

तमसो मा ज्योतिर्गमय
SANTINIKETAN
VISWA BHARATI
LIBRARY
32
V81
V.20

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NOS. 196,197,199,200,219,220 & 230.

वीरमित्रोदयः ।

लक्षणप्रकाशः ।

महामहोपाध्यायश्रीमित्रमिश्रविरचितः ।

साहित्योपाध्यायविष्णुप्रसादशर्मणा

संशोधितः ।

VÎRAMITRODAYA,

LAKSHANA PRAKÂŚA,

BY

MAHÂMAHOPÂDHYÂYA PANDITA MITRA MIŚRA.

EDITED BY

Pandita Vishnu Prasâd.

VOL. XX.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.

AGENTS:—

OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:

PROBSTHAIN & CO., BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press.

BENARES.

1916.

Registered According to Act XXV. of 1867.

वीरमित्रोदये लक्षणप्रकाशस्य

शुद्धिपत्रम् ।

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
सन्धिविग्रहिको	सान्धिविग्रहिको	१०	१२
स्थान	स्थानं	”	२२
भागं	भागे	१९	८
गमित्वं	गामित्वं	२२	२३
पूर्व	पूर्वे	३५	२०
चग्डा	चण्डा	४०	१५
र्द्धरेखा	र्ध्वरेखा	४५	९
लक्षंम्	लक्षणम्	६३	२
वन्ध	बन्ध	६९	२
अपेपयानं	अपेयपानं	”	२०
रेस्वा	रेखा	७२	१
यावन्त्यो	यावत्यो	”	२३
तावन्त्यो	तावत्यो	७३	२
जदल	जलद	७४	७
मिलियोः	मिलितयोः	७७	८
दहृत	दाहृत	७८	११
ग्रीवाः	ग्रीवा	८२	२१
ग्रीवा	ग्रीवाः	”	२२

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
पटला	पाटला	८७	८
शभा	शुभा	९०	१२
क्षुल्लक्षणम्	क्षुतलक्षणम्	९२	१२
द्वि	द्विः	९३	३
क्षुल्लक्षणम्	क्षुतलक्षणम्	”	७
सपङ्गलैः	सुमङ्गलैः	९५	१
चिपिटः	चिपिटैः	९८	२१
सः स्यात्	स स्यात्	१०३	१८
वशे	वंशे	१०४	२५
भुजभ्यां	भुजाभ्यां	११३	२४
यस्य	यस्या	१२१	४
ज्ञानासम्भव	ज्ञानसम्भव	१२४	५
शालिग्राम	शालग्राम	१२५	१
शुभाशुभ	शुभाशुभ	”	१०
स्कधांस	स्कन्धांश	१२७	६
तत्तद्रेखा	तत्तलतद्रेखा	”	”
मौलिकाः	मौलिजाः	”	२५
भोगः	भोगदः	१४०	९
पृथू पीनौ	पृथूपान्तौ	१४७	२
पर्यङ्क	पर्यङ्क	१५६	१
शङ्ख	शङ्ख	१६०	५
सुवर	सुस्वर	१६६	१२
मिश्रमेत	मिश्रकमेत	१६८	२२
बन्ध्यां	बन्ध्या	१७९	११

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
पुरुषं	पुरुष	१८७	२५
शशकं	शशकः	१९२	२१
महीपते	महीपतेः	२१०	१०
'यदप्यल्पतरं कर्म तदप्येकेन दुष्करम्" एतदनन्तरम्—"पुरुषेणासहायेन किमु राज्यं महत्पदम्" इदमर्धमधिकं पठनीयम् ।		२१५	२४
ताम्बूललक्षणग्रन्थो विषयानुक्रमेऽपरिगणितत्वात्प्रक्षिप्त	इति भाति ।	२१९	२०
प्राङ्मुखीं	प्राङ्मुखीं	२२३	१०
पार्थिवैः	पार्थिवः	२२८	२
प्रायो विशेषेण	प्रभुं विशेषेण	२३१	१९
तै	ते	२३३	१४
सान्नेवेश	सन्निवेश	२३४	
विषमैः	विषमं	२४०	२५
वनतरुगहन	घनतरगहन	२४१	२
उत्तम	उत्तमं	२४५	३
जातिभेदः	जातिभेदः	२५०	१५
मध्यम्	मध्यमम्	२७७	१९
विस्तिः	वितस्तिः	"	२२
ज्यष्ठो	ज्यष्ठो	२८७	११
लोह	लोहं	२९७	९
क्वचि	क्वचि	"	२५
नाशः सञ्चयो	नाशोऽसञ्चयो	३०३	४
त्रिविधा	त्रिविधो	३१२	२०

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
हस्तिकी	हस्तिका	३१८	२०
दिङ्नागान्	दिङ्नागान्	३२५	१२
पृष्ट	पृष्ठ	३३१	६
कृतो	कृतां	३३२	१२
'सर्पच्छत्रक'इति 'प्रान्तयोरिति' चार्धौ विनिमयेन पठितव्यौ		३३३	१४।१५
लङ्कारकम्	लङ्कारकारकम्	३३९	१
बिल्बे	बिल्बं	३५५	४
कालिङ्गके	कालिङ्गके-	३५६	२३
याश्वन्या	याश्वान्या	३६६	१९
क्षिप	क्षिपं	३८५	२०
वामना ये च	न तथा धार्या	३८८	१७
हस्तगतां	हस्तगता	४०४	२४
सेनापति	सेनापतिः	४०६	२३
सपृष्ठा	भूपृष्ठा	४१६	२
सपृष्ठा	भूपृष्ठा	,,	२२
सपृष्ठं	भूपृष्ठं	,,	२३
पृष्ठ्यः	पृष्ठाः	४१८	१४
गोरथिं	गोरथं	,,	२१
अपवृत्तका	उपावृत्तका	४२०	१३
श्वेम	श्वेत	,,	१७
प्रियदर्शनाः	प्रियदर्शनाः	४२१	१५
पृष्ठोन्नतो	पृष्ठानतो	४२२	५
श्वाहगामिनः	श्वारुगामिनः	,,	१४

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
प्रथाणाख्यं	प्रपानाख्यं	४३५	१४
दिष्टः	दिष्टः	४३७	१७
विधीये	विधीयते	४३८	७
प्रोथगे	प्रोथजे	४३९	१६
स्थूलाक्षिकूटः	स्थूलाक्षिकूटः	”	२१
ऽथ सिताः	ऽप्यसिताः	४४०	१७
जदत्त	जयदत्त	४४२	१६
सौष्ठवर्जिता	सौष्ठववर्जिता	”	२१
ष्वतेषु	ष्वेतेषु	४४५	१६
पर्याणयेद्धम्	पर्याणयेद्धयम्	४४६	२३
केशः	कशा	४५५	७
वजिताः	वर्जिताः	४६२	३
षण्णवत्यो	षट्सप्तत्यो	४७३	२
गुणोसिन्धवः	गुणसिन्धवः	४७६	२
मार्युभवांते	मायुर्भवति	४९०	२४
मध्यैषु	मध्येषु	४९२	२०
मान्नने	मानेन	४९३	२
वापि	चापि	४९९	४
वाराहं	वाराहे	५००	१४
पितृन्नेतान्	पितृनेतान्	५०७	२१
ब्रह्मणः	ब्राह्मणः	५६९	१०
मूर्तिजनं	मूर्त्तिपूजनं	५७३	७
अता	क्षत्ता	५७७	१०
शिवनाम इति	शिवनाभिरिति	५८२	१२

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
शच्छङ्कर	शङ्कर	५८३	१
रुक्ष	रूक्ष	५८६	१९
नन	नून	५९५	२०
मूल्प	मूल्य	६०८	१३
चण्डांशाय	चण्डेशाय	६२२	५
मनागुपहितं	मनागुपहतं	६२५	२५
परीक्षेव	परीक्षेत	६३५	२२
पराशिष्टे	परिशिष्टे	६३७	२४
वैखानसङ्ग्न्थे	वैखानसग्रन्थे	६४०	१८

इति लक्षणप्रकाशस्य शुद्धिपत्रम् ।

वीरमित्रोदये पूजाप्रकाशस्य

शुद्धिपत्रम् ।

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
मवागात्मकत्वात्	मत्यागात्मकत्वात्	१	२
मोक्षणां	मोक्षाणां	५	१५
बन्धुत्कृत्या	बन्धुसत्कृत्या	१०	३
चक्रदाधर	चक्रगदाधर	१२	९
कशी	काशी	२०	१
प्रातिष्ठा	प्रतिष्ठा	२२	३
नाशेया	नाशाय	२३	२४
विनाशतः	विनाशनः	”	”
समार्जिता	संमार्जिता	२५	२२
देवः लये	देवालये	”	२४
त्ततो	ततो	३०	८
तण्ढुल	तण्डुल	३२	१०
प्रयसो	पयसा	३४	२४
पुरं	पुरे	३५	१४
ग्रास्तो	ग्रस्तो	४४	२४
पुनुरावृत्तिः	पुनरावृत्तिः	४५	४
ज्वलैः	ज्ज्वलैः	५५	२१

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
यथातथ्य	याथातथ्य	६१	६
वन्यानि	धन्यानि	६२	२५
विष्ण्ववर्चने	विष्ण्वर्चने	६५	१५
मर्चयेत्	मर्चेच्	६६	१४
ब्राह्मणामपि	ब्रह्मणामपि	७१	११
ऽव्याख्यत्	व्याख्यत्	”	१३
पुष्यं	पुष्पं	७२	१२
गन्धैः	गन्धः	”	२२
शेषेणे	शेषेण	७४	११
विशेषः	विशेषतः	७६	४
अत्युज्वलश्च	अत्युज्ज्वलश्च	”	१६
निष्पावनां	निष्पावाणां	८१	२
मुनीन्द्रं	मुनीन्द्र	८२	३
दुदीरयेत्	मुदीरयेत्	८५	१६
मन्दिरं	मन्दिरे	८९	१४
खड्ग	खड्ग	१०७	२२
पुरुषोत्तम्	पुरुषोत्तमम्	११०	१३
त्रिष्टुवं	त्रिष्टुभं	”	२२
सुवर्णस्तं	सुपर्णस्तं	११३	९
पारस्प	पारस्य	११५	१५
विलेप्यां	विलेप्यायां	११६	१५
श्रुतिः	स्मृतिः	११७	२२
उयगायन्	उपगायन्	१२१	८
च परस्परम्	परिरभ्य च	”	१४

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
अथान्नैव	अथात्रैव	१२३	१३
ष्टिकां	मुष्टिका	१२५	२४
न्दमानं	वन्दमानं	१२८	१३
पार्ष्नि	पार्ष्णि	१३०	४
विनियोनः	विनियोगः	१३८	२१
कुक्वुरः	कुक्कुरः	१७९	२१
[१६]	[२६]	१८४	१७
ह्रीमान	ह्रीमान्	१९०	६
दर्भमयस्नि	दर्भमयस्त्रि	१९५	७
इहव	इहैव	१९८	२१
शालग्रम	शालग्राम	२००	१६
मूर्तय	मूर्तये	२०१	२५
मेव च	रेव चं	२०३	१४
तिन्तिणी	तिन्तिडी	२१६	११
संमिस्र	संमिश्र	२१९	१३
चकारद्वयायादाने	चकारद्वयादाने	२२४	१०
सूक्ष्मद्यारण	सूक्ष्मधारण	२२९	२४
धूपोपेक्षं	धूपोत्क्षेपं	२३१	१७
प्रतिमाम	प्रतिमासं	२४७	७
मृत्कुम्भा	मृत्कुम्भा	२५०	१
महंराज	महाराज	”	८
यस्त्वकार्यं	यस्त्वर्कीय	२५१	२०
निच्छिद्रैः	निश्छिद्रैः	५५५	१२
भस्करालय	भास्करालय	२६७	११

अशुद्धम् ।	शुद्धम् ।	पृ०	पं०
अपत्ते	अपत्ये	२८०	२१
संगृह्यास्त्रेण	सङ्गृह्यास्त्रेण	२८९	
कन्दूरूणि	कन्दुरूणि	३०३	१८
स्नापयेद्विविद्धत्या	स्नापयेद्विधिवद्धत्या	३१२	२३
गौरिकं	गैरिकं	३२२	४
त्रपुसीसमयोः	त्रपुसीसयोः	३२६	१२
देवीं देवं	देवं देवीं	३३१	३
वल्लकीकरम्	वल्लकीकराम्	”	”
अभिषेकेन	अभिषेकेण	३३९	१४
समुद्रं	समुद्रकं	३६४	८
ऽबुजोद्भवम्	ऽम्बुजोद्भवम्	३७५	२१
पापेः	पापैः	३७६	१०
दर्शनास्पर्शनं	दर्शनात्स्पर्शनं	”	१६
ह्रस्वो	ह्रस्वो	३७८	९
न्नृप	नृप	३८२	१२

इति पूजाप्रकाशस्य शुद्धिपत्रम् ।

श्रीगणेशाय नमः ।

श्रीसरस्वत्यै नमः ।

वीरमित्रोदयस्य लक्षणप्रकाशः।

कोपाटोपनटत्सटोद्भटमटद्भ्रूभीषणभ्रूकुटि
भ्राम्यद्भैरवदृष्टि निर्भरनमद्वर्वीकरोर्वीधरम् ।
गीर्वाणारिवपुर्विपाटविकटाभोगत्रुटद्धाटक-
ब्रह्माण्डोरुकटाहकोटि नृहरेर्व्यादपूर्वं वपुः ॥ १ ॥
सटाग्रव्यग्रेन्दुस्रवदमृतबिन्दुप्रातिवलन्-
महादैत्यास्म्भस्फुरितगुरुसंरम्भरभसः ।
लिहन्नाशाचक्रं हुतवहशिखावद्रसनया
नृसिंहो रंहोभिर्दमयतु मदंहो मदकलम् ॥ २ ॥
संसारध्वंसिकंसप्रमुखसुररिपुप्रांशुवंशावतंस-
भ्रंशी वंशीधरो वः प्रचुरयतु चिरं शं स राधारिरंसी ।
यच्चूडा रूढगूढास्मितमधुरमुखाम्भोजशोभां दिदृक्षु-
र्गुञ्जाभिः सानुरागाऽलिकानिकटनटच्चन्द्रकव्यक्तचक्षुः ॥३॥
लीलाभ्रान्तिविसर्पदम्बरतया व्यग्रार्द्धकान्तं पद-
न्यासन्यञ्चदुदञ्चदद्रिवसुधाभोगीन्द्रकूर्माधिपम् ।
फूत्कारस्फुरदुत्पतत्फणिकुलं रिङ्खज्जटाताडन-
ध्मातव्योमगभीरदुन्दुभि नटन्नव्यात्स वो धूर्जटिः ॥ ४ ॥
कुम्भोद्भ्रान्तमधुव्रतावलिवलज्झङ्कारकोलाहलैः
शुण्डास्फालनविह्वलैः स्तुत इव व्यालैर्वियत्प्लाविभिः ।
मज्जत्कुम्भमहावगाहनकृतारम्भो महाम्भोनिधौ

हेरम्बः कुरुतां कृताम्बरकरालम्बश्चिरं वः शिवम् ॥ ५ ॥
समन्तात्पश्यन्ती समसमयमेव त्रिभुवनं
त्रिभिर्न्नेत्रैर्द्दोर्भिर्द्दशभिरपि यान्ती दश दिशः ।
दधाना पारीन्द्रोपरि चरणमेकं परपदा
हतारिर्वा हन्यान्महिषमथनी मोहमहिषम् ॥ ६ ॥
वामान् भिन्दन्नवामान् भुवमनु सुखयन् पूरयन्नर्थिकामान्
श्रीमान् भीमानुकारी बहलबलभरैर्मेदिनीमल्लनामा ।
आसीदाशीविषेन्द्रद्युतिधवलयशा भूपचक्रावतंसः
श्रीकाशीराजवंशे विधुरिव जलधौ सर्वभूसार्वभौमः ॥ ७ ॥
सङ्ग्रामग्रामकामो निरुपममहिमा सत्त्वविश्रामधाम
क्रामन्नेवारिचक्रं मिहिर इव तमो विक्रमोरुक्रमेण ।
सारैर्मेरोरुदारैरपर इव गिरिर्मेदिनीमल्लनेन
प्रख्यातः क्षोणिचक्रे समजनि नृपतिर्मेदिनीमल्लनामा ॥ ८ ॥
निर्य्यद्भिस्तर्ज्जयद्भिर्विधुमिव जगतीमर्ज्जुनाभैर्यशोभिः
सम्पूर्यावार्यवीर्यो विशिखवितरणैरर्ज्जुनो दुर्ज्जनानाम् ।
साम्राज्योपार्ज्जनश्रीरगणितगुणभूरर्जुनप्रांशुबाहु-
र्नाम्नाऽभूदर्ज्जुनोऽस्मान्नरपतिरतुलो मेदिनीमल्लभूपात् ॥ ९ ॥
बुद्धिः शुद्धिमती क्षमा निरुपमा विद्याऽनवद्या मनो
गाम्भीर्य्यैकनिकेतनं वितरणं दीनार्तिनिर्दारणम् ।
आसीदर्ज्जुनभूपतेर्विदधतो विद्रावणं विद्विषां
भूमीनामवनं च कारणगुणात्कार्यं यशोऽप्यर्ज्जुनम् ॥ १० ॥
तस्मादाविरभूत्प्रभूतमहिमा भूमीपतेरर्ज्जुनात्
सौजन्यैकनिधिर्गुणैरनवधिर्लावण्यवारांनिधिः ।
भिन्दन् दुर्ज्जनमर्ज्जयन्बहु यशः-प्रौढप्रतापोदयै-
र्दुर्जेयो मलखाननामनिखिलक्ष्मामण्डलाखण्डलः ॥ ११ ॥

यस्मिन् शासति नीतिभिः क्षितिमिमां निर्वैरमासीज्जगत्
पारीन्द्रेण समं करीन्द्रमसारम्भोऽपि सम्भावितः ।
श्येनः क्रीडति कौतुकी स्म विहगैश्चिक्रीड नक्रैर्झषः
किञ्चान्यद्बहनेऽभवत्सह मृगैः शार्दूलविक्रीडितम् ॥ १२ ॥
हिमविशदयशोऽभिशोभिताशो
महिमतिरोहितवारिधिस्वभावः ।
समजनि मलखानतः प्रतापै-
स्त्रिजगति रुद्र इव प्रतापरुद्रः ॥ १३ ॥
शुचि धनमर्थिनि सहसा यशसा सममानने गुणो जगतः ।
पुत्रे भूराभिदधे चेतो रुद्रे प्रतापरुद्रेण ॥ १४ ॥
जातः प्रतापरुद्रात्ससमुद्रां पालयन्नवनीम् ।
कृतरिपुकाननदाहो मधुकरसाहो महीपतिः शुशुभे ॥ १५ ॥
पृथुः पुण्यांभोगैर्विहितहितयोगैरनुदय-
त्खलायोगैर्योगैः कृतसुकृतियोगैरपि गुरुः ।
भुजस्तम्भालम्बाल्लसशयितविश्वम्भरतया
बभौ प्रौढोत्साहः स मधुकरसाहः क्षितिपतिः ॥ १६ ॥
प्रजागणरुजाऽपहो द्युतिमहोदयाविष्कृतः
सुधांशुरिव मांसलो रसभरैः सभारञ्जनः ।
प्रदीप्तकुमुदावलिर्द्विजपतिश्च नक्षत्रपो नृपो
जयति सत्कृपो मधुकरः कृतारित्रपः ॥ १७ ॥
विन्यस्य वीरासिंहे भूपतिसिंहे महीभारम् ।
ज्ञानानलमलदाहो मधुकरसाहो दिवं भेजे ॥ १८ ॥
अन्तर्गम्भीरताऽन्धूकृतसलिलनिधिर्लालिताशेषबन्धुः
बुन्देलानन्दसिन्धुः सुलालितललनालोचनेन्दीवरेन्दुः ।
भ्रूभङ्गीलेशभङ्गीकृतरिपुनिवहो नृत्यसङ्गीतरङ्गी

सन्मातङ्गी तुरङ्गी धरणिपतिरभूद्वीरसिंहो नृसिंहः ॥ १९ ॥
अमुष्य प्रस्थाने सति सपदि नानेभनिवहै-
रिहैकोऽपि द्वेषी न खलु रणरोषी समजनि ।
परं तस्थौ दुःस्थो गहनकुहरस्थो ऽपि भयतः
क्षिपन्नुच्चैर्दिक्षु भ्रमितचकितं चक्षुरभितः ॥ २० ॥
दानं कल्पमहीरुहोपरि यशः क्षीरोदनीरोपरि
प्रज्ञा शक्रपुरोहितोपरि महासारोऽपि मेरूपरि ।
दावाग्नेरुपरि प्रतापगरिमा कामोपरि श्रीरभू-
त्सिंहातिक्रमवीरसिंहनृपतेः किंकिं न कस्योपरि ॥ २१ ॥
दानैरर्थिनमर्थनाविरहिणं प्रत्यर्थिनं च क्षणा-
त्कुर्वाणे सति वीरसिंहनिखिलक्ष्मामण्डलाखण्डले ।
कामं चेतसि कामधेनुरतनोत्कल्पद्रुमः कल्पितं
मोघीभूतजनिः समाश्रितखनिश्चिन्तां च चिन्तामणिः ॥२२॥
भ्रामंभ्रामममसम्भ्रमं त्रिजगतीचक्राणि चक्रे चिरा-
च्चारं शीलितविष्णुपादपदवी ब्रह्माण्डभाण्डोपरि ।
ब्रह्माण्डं निजमण्डमण्डलमिवाच्छाद्यैव सैवाधुना
विश्वेषामपि यस्व भास्वरयशोहंसी वर्तंसीयति ॥ २३ ॥
जलकणिकामिव जलधिं कणमिव कनकाचलं मनुते ।
नृपसिंहवीरसिंहो वितरणरंहो यदा तनुते ॥ २४ ॥
यदा भवति कुण्डलीकृतमहाधनुर्मण्डल-
स्तदा नयनताण्डवच्चुटितखाण्डवः पाण्डवः ।
मनो वितरणोत्सुकं वहति वीरसिंहो यदा
तदा पुनरुदारधीरयमवर्णि कर्णो जनैः ॥ २५ ॥
शौर्यौदार्यगभीरताधृतिदयादानादिनानागुणा-
नुर्वीदुर्वहभारवत्यहिपतिस्पर्द्धालदोः शालिनि ।

संयोज्यैव जुहारसिंहधरणीधौरेयचूडामणौ
मज्जन् ब्रह्मणि वीरसिंहसुकृती तस्थौ स्वयं निर्गुणः ॥२६॥
नद्यः स्वादुजला द्रुमाश्च सुफला भूरुर्वरा भूसुरा
वेदध्वानविधूयमानदुरिता लोका विशोका बभुः ।
राजन्नीतिनिरीतिरीति पितरीवोर्वीमिमां शासति
श्रीमद्वीरजुहारसिंहनृपतौ भ्रूभङ्गभग्नद्विषि ॥ २७ ॥
सङ्ग्रामोत्कटताण्डवोद्भटभटैरारब्धहेलाहठै-
श्चण्डाडम्बरपूरिताम्बरतटक्षीराब्धिगोत्राऽवटैः ।
भूभृत्सिंहजुहारसिंहधरणीजानेः प्रयाणे रणे
शौर्यौदार्यधनोऽपि को नु धरणीचक्रे न चक्रे भयम् ॥२८॥
तावद्वीरगभीरहुङ्कृतिरवस्तावद्गजाडम्बर-
स्तावत्तुङ्गतुरङ्गरिङ्गणचमत्कारश्चमूनामपि ।
तावत्तोयमहामहीभृदटवीदुर्गग्रहो विद्विषां
यावन्नैव जुहारसिंहनृपतिर्युद्धाय बद्धोत्सवः ॥ २९ ॥
अयं यदि महामना वितरणाय धत्ते धियं
भियं कनकभूधरोऽञ्चति ह्रियं च कर्णोऽटति ।
दधीचिरपचीयते बलिरलीकरूपायते
तदाऽतिमलिनायते स किल कल्पभूमीरुहः ॥ ३० ॥
प्रासादाऽगतडागनागमणिभूदानादिनानातपः-
प्राग्लभ्येन महेन्द्रचन्द्रवरुणब्रह्मेशविष्णुस्थली ।
प्राचण्ड्येन जिता मिता वसुमती कोदण्डदोर्दण्डयो-
र्जागर्तीति जुहारसिंहनृपतेः कुत्र प्रतापो न वा ॥ ३१ ॥
ब्रह्माऽभूच्चतुराननः स्मरहरः पञ्चाननः षण्मुखः
स्कन्दो भूपजुहारसिंहयशसो गानोत्सवेऽत्युत्सुकः ।
तस्यांभोगमुदीक्ष्य भूधरनभोनद्यस्त्रिलोकी दिशः

सप्तद्वीपमयी मही च विधिना विज्ञेन निर्वाहिताः ॥ ३२ ॥
तुङ्गत्वादनवाप्य दैवततरोः पुष्पाणि सर्वाः समं
श्रीमद्वीरजुहारसिंहनृपतेर्दानं समानं जगुः ।
व्रीडादुर्वहभारनिर्भरनमद्ग्रीवे तु देवद्रुमे
श्लाघन्ते सुलभायमानकुसुमास्तं भूरि देवस्त्रियः ॥ ३३ ॥
भीमो यः सहदेव एव पृतनादुर्द्धर्षपार्श्वो बल-
च्छ्रीभूमीनकुलः सदाऽर्जुनमहाख्यातिः क्षमामण्डले ।
कर्णश्रीकृतवर्मभीष्मघटनाशौटीर्यदुर्योधनो
रोषादेष युधिष्ठिरो यदि भवेत्कः स्यादमुष्याग्रतः ॥ ३४ ॥
सत्कीर्त्तिग्रामदामाभरणभृतजगद्विक्रमादित्यनामा
धाम्नो भूम्ना महिम्ना विघटितरिपुणा विक्रमोपक्रमेण ।
सुप्रांशुः पीवरांसः पृथुभुजपरिघस्तस्य वंशावतंसो
विश्वोदश्वत्प्रशंसो गुणिगणहृदयाऽऽनन्दनो नन्दनोऽभूत् ३५
आशापूर्तिं प्रकुर्वन् करवितरणतः पद्मिनीप्राणबन्धुः
प्रोद्यद्दिव्याम्बरश्रीः स्फुटमहिमरुचिः सर्वदा ध्वस्तदोषः ।
जम्भारातेरिहोच्चैरचलसमुदयात्सुप्रभातप्रकाशी
पुत्रो राज्ञः पवित्रो रचयति सुदिनं विक्रमादित्य एव ॥३६॥
सार्थीकुर्वन्निरर्थीकृतसुरविटपी चार्थिसार्थं निजार्थैः
व्यर्थीभूतारिपृथ्वीपतिरमरगुरुस्पर्द्धिवर्द्धिष्णुबुद्धिः ।
मानैर्यानादिदानैर्बहुविधगुणिभिर्गीयते यः सभायां
प्रातर्जातः स भूपः सुकविकुलमुदे विक्रमादित्य एव ॥३७॥
दानं दीनमनोरथावधि रणारम्भोऽरिनाशावधि
क्रोधो वागवधि प्रतापयशसोः पन्था दिगन्तावधि ।
दाक्षिण्यं क्षितिरक्षणावधि हरौ भक्तिश्च जीवावधि
व्यालुप्तावधि वीरविक्रमरवेः श्रेयः परं वर्द्धते ॥ ३८ ॥

हेमाद्रेः श्रियमन्यथैव कुरुते चक्रे च गौरीं तनुं
कैलाशोपरि शोभते पटयति स्पष्टुं च दिङ्मण्डलम् ।
भोगीन्द्रं न दधे श्रुतौ वत जटागूढां च गङ्गां व्यधा-
ल्लोकानामयमीश्वरोऽस्य यशसस्त्वैश्वर्यमुज्जृम्भते ॥ ३९ ॥
श्रीगोपाचलमौलिमण्डलमणिः श्रीदूरवारान्वये
श्रीहंसोदयहंसपण्डित इति ख्यातो द्विजाधीश्वरः ।
यं लक्ष्मीश्च सरस्वती च विगतद्वन्द्वं चिरं भेजतु-
र्भोक्तारं रभसात्समानमुभयोः साम्नाऽपमायं गुणैः ॥४०॥
पटु दिक्षु विदिक्षु कुर्वतीनां
नटलीलां स्फुटकीर्त्तिनर्तकीनाम् ।
स्फुरदध्वरधूमधोरणीह
च्युतवेणीति जनैरमानि यस्य ॥ ४१ ॥
ततोऽनल इवारणेरतुलधामभूर्भूभुजां
शिरोमणिरुरोमणिर्धरणिनामवामभ्रुवः ।
रणी बहुगुणी धनी भुवि वनीपकश्रीखनी
रमारमणमिश्रणी परशुराममिश्रोऽजनि ॥ ४२ ॥
येनागत्य पुरा पुरारिनगरे विद्याऽनवद्याऽर्जिता
श्रीचण्डीश्वरमग्निहोत्रितिलकं लब्ध्वा गरीयोगुरुम् ।
शुद्धा सैव महोद्यमेन बहुधा भान्ती भवन्ती स्थिरा
तद्वंश्येषु कियन्न कल्पलतिकेवाद्यापि सूते फलम् ॥ ४३ ॥
आस्यारविन्दमनुपास्य गुरोरपास्य
लास्यं चतुर्मुखमुखेषु सरस्वतीह ।
सालङ्कृतिश्च सरसा च गुणान्विता च
यस्यातनोति रसनोपरि ताण्डवानि ॥ ४४ ॥
अङ्के लोमलतेव सीमनि दृशोरेकेव रेखाऽञ्जनी

कस्तूरीमकरीव भालफलके धारेव मूर्ध्न्यालकी ।
ऊर्ध्वं भृङ्गपरम्परेव कबरीसौरभ्यलोभाकुला
यस्यैवाध्वरधूमधोरणिरभूदाशाकुरङ्गीदृशः ॥ ४५ ॥
सुभासुरयशोनिधेः सुनिरवद्यविद्यानिधेः
सुचारुकवितानिधेः स्मृतिनिधेः श्रुतिश्रीनिधेः ।
अयं सुकृतगौरवात्परशुरामामिश्राद्गुणै-
रनूनगरिमा पितुर्जगति मित्रमिश्रोऽजनि ॥ ४६ ॥
धर्मार्थैकनिकेतनं विधिमयं कर्मावलीदर्शनं
स्मृत्यम्भोजमहोदयं श्रुतिमयं श्रीवीरमित्रोदयम् ।
द्राक्सिद्धीकृतशुद्धसिद्धिशतया श्रीवीरसिंहाज्ञया
तेने विश्वमुदे पुरे पुरभिदः श्रीमित्रमिश्रः कृती ॥ ४७ ॥
क्षितितिलकसुधीरवीरसिंह-
प्रणयकृताऽऽग्रहधीरमित्रमिश्रः ।
गुणिगणहृदयानुरागहेतुं
कलयति लक्षितलक्षणप्रकाशम् ॥ ४८ ॥
लक्षणस्य प्रकाशेऽस्मिन् परीक्षा चायुषः पुरः ।
उन्मानलक्षणं चाथो मानलक्षणमेव च ॥ १ ॥
गतिसंहतिसाराणां लक्षणानि ततः परम् ।
वर्णस्नेहस्वराणां च ततः प्रकृतिसत्त्वयोः ॥ २ ॥
अनूकक्षेत्रयोश्चैव मृजागन्धासृजां तथा ।
पादपादतलाङ्गुष्ठाङ्गुलीनां लक्षणं ततः ॥ ३ ॥
नखस्य पादपृष्ठस्य गुल्फस्याप्यथ लक्षणम् ।
पार्ष्णिलक्षणमुक्त्वा तु जङ्घालक्षणजल्पनम् ॥ ४ ॥
अथोक्तं रोमजानूरुकटिस्फिग्गुदलक्षणम् ।
लक्षणं वृषणस्याथ प्रोक्तं लिङ्गस्य लक्षणम् ॥ ५ ॥

लिङ्गाग्रलक्षणं चाथो वर्णितं मूत्रलक्षणम्
शुक्रस्य लक्षणं चाथ प्रोक्तं पुंस्त्वपरीक्षणम् ॥ ६ ॥
वस्तिलक्षणमुक्त्वा च कथितं नाभिलक्षणम् ।
कुक्षिलक्षणमाख्यातं ततः पार्श्वस्य लक्षणम् ॥ ७ ॥
लक्षणं जठरस्याथ प्रोक्तं मध्यस्य लक्षणम् ।
त्रिवलीलक्षणं चाथ प्रोक्तं हृदयलक्षणम् ॥ ८ ॥
लक्षणं वक्षसः प्रोक्तं स्तनयोर्लक्षणं पुनः ।
लक्षणं चूचुकस्याथ कथितं जत्रुलक्षणम् ॥ ९ ॥
स्कन्धलक्षणमाख्यातं कक्षाबाह्वोश्च लक्षणम् ।
मणिबन्धस्य करयोः करपृष्ठस्य लक्षणम् ॥ १० ॥
करस्य च तलं रेखाङ्गुष्ठाङ्गुल्योर्नखास्तथा ।
पृष्ठं च लक्षितं पश्चाल्लक्षिताथ कृकाटिका ॥ ११ ॥
ग्रीवाचिबुकयोरुक्तं लक्षणं हनुकूर्चयोः
कपोलमुखयोरुक्तं लक्षणं चाधरौष्ठयोः ॥ १२ ॥
श्मश्रुणो दशनानां च रसनायाश्च लक्षणम् ।
घण्टिकालक्षणं चाथो तालुलक्षणमेव च ॥ १३ ॥
हासनासाक्षुतानां च नेत्रदृष्ट्योश्च लक्षणम् ।
पक्ष्मणश्च निमेषस्य रुदितस्य भ्रुवोस्तथा ॥ १४ ॥
कर्णस्य च ललाटस्य शिरसश्चिकुरस्य च ।
लक्षणं मशकादेश्च पुंसामत्र निरूपितम् ॥ १५ ॥
अथ स्त्रीणां स्वभावस्य मिश्रकस्य च लक्षणम् ।
आवर्त्तलक्षणं गन्धच्छाययोर्लक्षणं ततः ॥ १६ ॥
सत्त्वंस्वरगतीनां च लक्षणानि ततः परम् ।
ततः पुंसः स्त्रियाश्चैव कामशास्त्रोक्तलक्षणम् ॥ १७ ॥
पद्मिन्यादिप्रभेदाश्च स्त्रीणामथ निरूपिताः ।

राज्ञः पट्टमहिष्याश्च मन्त्रिणोऽथ पुरोधसः ॥ १८ ॥
ज्योतिर्विदश्च वैद्यस्य सहायानां ततः परम् ।
मित्रस्य शत्रोः सभ्यानां लक्षणं च क्रमोदितम् ॥ १९ ॥
परिच्छदः पार्श्ववर्त्ती रक्षकस्तदनन्तरम् ।
ताम्बूलधारी कोशस्याध्यक्षः खड्गधरस्ततः ॥ २० ॥
ततश्चान्तःपुराध्यक्षस्ततः पुरगतश्चरः
तदध्यक्षश्च सूदश्च क्रमेणैतेऽत्र लक्षिताः ॥ २१ ॥
धर्माध्यक्षो लेखकश्च लोकाह्वानकरस्तथा ।
दौवारिकः प्रतीहारः शस्त्रगेहस्य रक्षकः ॥ २२ ॥
शस्त्राध्यक्षः स्थपतिश्च सारथिर्दूत एव च ।
चारो नियोज्यस्तदनु सेवकोऽप्यथ लक्षितः ॥ २३ ॥
सन्धिविग्रहिको युद्धकर्ता सेनापतिस्तथा ।
व्यूहं वासस्थलं दुर्गं तदध्यक्षश्च लक्षितः ॥ २४ ॥
ग्रामस्य राजगेहस्य गवां च वृषभस्य च ।
छागकुक्कुरयोश्चैव लक्षणं समुदाहृतम् ॥ २५ ॥
कुक्कुटस्य च कूर्मस्य मार्ज्जनीशूर्प्पयोस्तथा ।
उलूखलस्य मुसलस्याथ लक्षणमीरितम् ॥ २६ ॥
जलद्रोणीजलाधारशय्यासननिरूपणम् ।
चामरच्छत्रपट्टानां रत्नानां लक्षणं ततः ॥ २७ ॥
कस्तूरिकालक्षणतः पश्चादायुधलक्षणम् ।
तत्र चापि धनुर्बाणफलानां लक्षणं पुरः ॥ २८ ॥
फलस्य पायनं स्थानगुणमुष्टिरथोदिता ।
चापमुष्टिव्यापलक्षौ परतश्च श्रमक्रिया ॥ २९ ॥
विधिश्च लक्ष्यास्खलने शीघ्रसन्धानलक्षणम् ।
अथोक्तं दूरपातित्वं दृढभेदित्वमेव च ॥ ३० ॥

शराणां गतयः प्रोक्तास्तथा दृढचतुष्टयम् ।
अत्र चित्रविधीनुक्त्वा धावल्लक्ष्यमुदीरितम् ॥ ३१ ॥
शब्दवेधित्वमुक्त्वा च प्रशंसा धन्विनां स्मृता ।
निरूपणं च खड्गस्य विस्तरेण ततः परम् ॥ ३२ ॥
चक्रस्य परशोश्चैव तोमरस्याथ लक्षणम् ।
कुणपस्य च शक्तेश्च चोत्थकस्य च लक्षणम् ॥ ३३ ॥
गदाकुन्तपताकानां भेर्य्याश्चाप्यथ लक्षणम् ।
सविशेषस्ततः प्रोक्तो गजलक्षणविस्तरः ॥ ३४ ॥
गजायुर्लक्षणं दन्तिदोषनाशकलक्षणम् ।
गजस्य मानं क्षेत्राणि छाया वर्णश्च लक्षितः ॥ ३५ ॥
गन्धनिश्वासदृष्टीनां तदीयानां च लक्षणम् ।
गन्धहृद्गतिवेगानां बृंहितावर्त्तयोस्तथा ॥ ३६ ॥
पुष्पस्य च बलस्याथ सत्त्वानूकद्वयस्य च ।
वेदितव्योधयोस्तद्वद्गुणस्थित्योस्तदीययोः ॥ ३७ ॥
प्रशस्तदुष्टगजयोरथ लक्षणमीरितम् ।
समरार्थं नृपारोहयोग्यो हस्ती निरूपितः ॥ ३८ ॥
युद्धकाले जयादीनां सूचकं दन्तिचेष्टितम् ।
करिण्या लक्षणं प्रोच्य गजरक्षाधिकारिणः ॥ ३९ ॥
गजवैद्यगजाप्त्यौ गजाध्यक्षो निरूपितः ।
अन्ते चेह महामात्रलक्षणं परिकीर्त्तितम् ॥ ४० ॥
अथाश्वलक्षणं तस्योत्पत्तिदेशाश्च कीर्तिताः ।
ततोऽश्वकुलभेदास्तु ततस्तस्याङ्गसंस्थितिः ॥ ४१ ॥
आयुर्वर्णौ च गतयस्तदीयाः परिकीर्तिताः ।
तुरङ्गवाहने प्रोक्तः प्रकारस्तदनन्तरम् ॥ ४२ ॥
स्वरच्छायाङ्गगन्धानां सत्त्वानूकद्वयस्य च ।

सारप्रकृत्योरश्वाङ्गमानस्यावयवस्य च ॥ ४३ ॥
पुष्पपुण्ड्रललाटानामावर्त्तस्य च लक्षणम् ।
महादोषास्तुरङ्गस्य लक्षितास्तदनन्तरम् ॥ ४४ ॥
राजयोग्यस्य चाश्वस्य परतो लक्षणं स्मृतम् ।
सङ्ग्रामावसरेऽश्वस्य शकुनानां निरूपणम् ॥ ४५ ॥
दशालक्षणमुक्ता च वयसो ज्ञापकं स्मृतम् ।
दन्तसङ्ख्या वाजिशाला तदध्यक्षाश्च लक्षिताः ॥ ४६ ॥
शालग्रामशिलाचक्रमूर्त्तीनां लक्षणान्यथ ।
अथ द्वारवतीजातशिलामूर्त्तिनिरूपणम् ॥ ४७ ॥
विस्तराच्छिवलिङ्गानां लक्षणानि ततः परम् ।
शिवलिङ्गार्च्चनफलं विशेषेण निरूपितम् ॥ ४८ ॥
शिवलिङ्गस्य नैवेद्ये भक्ष्याभक्ष्यविवेचनम् ।
अथ प्रकीर्णके प्रोक्तं लक्षणं गुरुशिष्ययोः ॥ ४९ ॥
लक्षणं योगपट्टस्य कौपीनकटिसूत्रयोः ।
उपवीतोत्तरीये च लक्षिते तदनन्तरम् ॥ ५० ॥
रुद्राक्षलक्षणं प्रोक्तं तन्माहात्म्यसमन्वितम् ।
आसनादिवितानान्तपूजोपकरणान्यथ ॥ ५१ ॥
एवं क्रमेण दुर्लक्ष्यलक्षणानां विचक्षणैः ।
मित्रामिश्रैः प्रकाशेऽस्मिन् कृतं सम्यक् परीक्षणम् ॥ ५२ ॥

ननु किमर्थं लक्षणप्रकाशाऽऽरम्भः लक्षणानामनुपयोगादिति । उच्यते । अस्ति हि महानुपयोगः । तथाहि—

अथ विवाहः । सलक्षणो वरो लक्षणवतीं कन्यामुपयच्छेतेति ।

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ॥

इत्यादिवचनैः स्त्रीपुंससामुद्रिकलक्षणानां विवाहोपयोगात् ।

लाञ्छनैर्विविधाकारैर्लाञ्छितं यच्च दृश्यते ।
चक्राङ्कितं हरेश्चापि शालग्रामस्य लक्षणम् ॥
यथायोग्यं विचार्यैव ग्रहीतव्यं प्रयत्नतः ।

इत्यादिवचनैः शालग्राममूर्त्तिलक्षणानां तत्पूजादावुपयोगात् ।

लिङ्गं सलक्षणं पूज्यं त्यजेल्लिङ्गमलक्षणम् ।
तस्मात्सर्वप्रयत्नेन लिङ्गं कुर्यात्सलक्षणम् ॥

इत्यादिवचनैर्लिङ्गलक्षणानां तत्पूजादावुपयोगात् ।

आराधनोपकरणं तस्य लक्षणमेव च ।
उच्यते सम्प्रति ब्रह्मन् श्रूयतां तदशेषतः ॥

इत्युपक्रम्य सर्वपूजोपयुक्तघण्टाभिषेकादिपात्रलक्षणान्यभिधाय—

चतुष्कं हेमदण्डांश्च पूजार्थं परिकल्पयेत् ।

इत्युपसंहारवचनेन घण्टाधूपदीपाभिषेकादिपूजोपकरणपात्रलक्षणानां देवपूजोपयोगात् ।

सूत्रखण्डैश्च पुष्पैश्च भूषितं दोषवर्जितम् ।
यथालाभोपपन्नं वा यः प्रयच्छति दन्तिनम् ॥
यो जगन्निधये दानं प्रयच्छति महामतिः ।
भद्रजातिसमुद्भूतं पद्मनाभाय भक्तितः ॥
गजं तु लक्षणोपेतं दद्याद्विप्राय भक्तितः ॥ इति ।
अश्वं यस्तु प्रयच्छेद्वै हेमचित्रं सुलक्षणम् ।
स तेन कर्मणा चैव गान्धर्वं लोकमश्नुते ॥
सर्वोपकरणोपेतं युवानं दोषवर्जितम् ।
योऽश्वं ददाति विप्राय स्वर्गलोके महीयते ॥

इत्यादिवचनैर्गजाश्वादिलक्षणानां तत्तद्दानोपयोगात् ।

सर्वलक्षणसम्पूर्णो यो भवेद् गज उत्तमः ।
सङ्ग्रामादिषु कार्येषु पार्थिवस्तं समारुहेत् ॥
सर्वलक्षणसम्पूर्णमारुहेद्वाजिनं नृपः ।

इत्यादिवचनैश्च गजाश्वादिलक्षणानां राजकार्येऽप्युपयोगात् । एवमन्येषामपि लक्षणानां यथासम्भवमुपयोगाद्युक्त एव लक्षणप्रकाशारम्भ इति । उपयोगश्च तत्तल्लक्षणप्रस्तावे वक्ष्यते । तत्र वक्ष्यमाणगजादिशुभाशुभलक्षणफलस्वामित्वात्पुरुषस्य प्राधान्यात्पुरुषलक्षणमेवादावुच्यते । ननु ब्रह्मचर्याद्याश्रमेषु

यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
तथा गृहस्थमाश्रित्य जीवन्त्याश्रमिणः परे ॥

इत्यादिवचनैर्गृहस्थाश्रमप्राधान्योक्तेर्गृहस्थस्य च

गृहिणी गृहमुच्यते ।

इत्यादिवचनोक्तगृहशब्दार्थभूतगृहिणीयोगे सत्येवोपपन्नत्वात् । अस्य स्त्र्यधीनत्वेन तत्प्राधान्यावगमात्पुरुषलक्षणप्राथम्ये विनिगमनाविरहाच्च स्त्रीलक्षणमेवादौ कुतो नोच्यत इति । अत्र ब्रूमः । यद्यपि सर्वेष्वाश्रमेषु गृहस्थस्य ब्रह्मचार्याद्युपजीव्यत्वेन गृहस्थाश्रमस्य प्राधान्यम् । तस्य च स्त्रीमूलत्वेन स्त्रियाः प्राधान्यम् । तथापि पुरुषप्राधान्यात्स्त्रियस्तत्पारतन्त्र्यमेव । तथाहि—

सुलक्षणा सदाचारा पत्युरायुर्विवर्द्धयेत् ।

तथा,

वर्ज्जयेत्सर्वथा भूष्णुरशुभा लक्षणैश्च याः ।
भर्तुरायुर्हरन्त्येता आलस्यादपरीक्षिताः ॥

इत्यादिवचनैः स्त्रीलक्षणशुभाशुभफलस्य भर्त्रर्थत्वेन ।

तथा,

लक्षणानि परीक्ष्यादौ ततः कन्यां समुद्वहेत् ।
अतः सुलक्षणा योषा परिणेया विचक्षणैः ॥

इत्यादिवचनोक्तसुलक्षणान्वितकन्योद्वाहस्य, वर्जयेत्सर्वथा भूष्णुरित्यादिवचनोक्तदुर्लक्षणान्वितस्त्रीवर्जनस्य च पुरुषाधीनत्वेन तत्प्राधान्यमेव । नन्वेवं सति षाष्ठन्यायविरोधः स्यात् । तथाहि—षष्ठे दर्शपूर्णमासादिषु स्त्रीणामधिकारोऽस्ति न वेति संशय्य स्त्रीणामद्रव्यत्वात् कर्मणां च द्रव्यसाध्यत्वात् न तेषु स्त्रीणामधिकार इति पूर्वपक्षं कृत्वा सिद्धान्तितम् । फलार्थित्वात्तु स्वामित्वेनापि सम्बन्ध इति । तस्यायं भावः । स्त्रीपुंसयोरुभयोरपि फलार्थित्वसाम्यात् कामश्रुतिवशादस्त्येव स्त्रीणामप्यधिकारः । न च द्रव्याभावादनधिकार इति वाच्यम् । धर्मे चार्थे च कामे च नातिचरितव्येत्यादिवचनैः पत्युपार्जितस्यापि द्रव्यस्योभयसाधारण्यावगमात् । तस्मादर्थित्वसाम्यात् द्रव्यवत्त्वसाम्याच्च स्त्रीणामप्यस्त्येवाधिकार इति । तदनेन न्यायेन उभयोः साम्यावगमात् कथमत्र पुरुषः प्राधान्येन व्यपदिश्यते । अत्रोच्यते । न वयमनेन स्त्रीणामधिकारं कर्मफलस्वामित्वं वा वारयामः । किन्तु स्त्रीणामस्वातन्त्र्यं ब्रूमः । स्वातन्त्र्यास्वातन्त्र्याभ्यां च प्रधानाप्रधानत्वव्यपदेशो नाङ्गाङ्गिभावेन । दृष्टश्च लोके स्वतन्त्रे प्रधानशब्दव्यपदेशः । यथा इतरकारकेषु समानव्यापारेषु आगतेष्वपि प्रधानभूतः पङ्क्तौ देवदत्तो नागत इति । तथा च तस्मिन्नेवाधिकरणे—

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ।

इतीयं स्मृतिरितरस्मृतिविरोधादस्वातन्त्र्यपरतया व्याख्येयेति वदन् पार्थसारथिमिश्रः स्त्रीणामस्वातन्त्र्यं स्पष्टमेवाचष्ट । यत्तु स्त्रीणां प्राधान्ये लिङ्गमुक्तम्—गृहिणी गृहमुच्यते इति ।

तदितरापेक्षया स्त्रीणां प्राधान्यं गम्यति न भर्त्रपेक्षयेति सर्वमनवद्यम्। तस्मात्स्वातन्त्र्यात्,

आदावेव प्रवक्ष्यामि पुरुषाणां तु लक्षणम्।

इति विष्णुधर्मोत्तरवचनाच्च पुरुषलक्षणमेवादावुच्यत इति। तत्र तावल्लक्षणपरीक्षाकाल उक्तः—

भविष्यपुराणे,

शुभेऽहनि शुभे क्षेत्रे गृहे सौम्ये शुभे रवौ।
पूर्वाह्णे मङ्गलैर्युक्तः परीक्षेत विचक्षणः॥ इति।

जगन्मोहनसमुद्रेऽपि,

शोभने हस्तनक्षत्रे ग्रहे सौम्ये शुभे रवौ।
पूर्वाह्णे ब्राह्मणैर्युक्तः परीक्षेत विचक्षणः॥ इति।

अत्र दक्षिणभागे पुंसां वामभागे स्त्रीणां लक्षणान्यवलोकनीयानि। तदुक्तम्—

प्रयोगपारिजाते,

वामभागे तु नारीणां दक्षिणं पुरुषस्य तु।
निर्दिष्टं लक्षणं तज्ज्ञैः समुद्रवचनं यथा॥ इति।

लक्षणं शुभाशुभसूचकं चिह्नम्। स्कान्दे काशीखण्डेऽप्याह—

नारदः,

वैश्वानर समभ्येहि ममोत्सङ्गे निषीद भोः।
लक्षणानि परीक्ष्येऽहं पाणिं दर्शय दक्षिणम्॥ इति।

विवेकविलासेऽपि,

अकर्मकठिनः पाणिर्दक्षिणो वीक्ष्यते नृणाम्।
वामश्चर्मा पुनर्वामो वीक्ष्यते चातिकोमलः॥ इति।

अथायुःपरीक्षा।

तत्र यद्यपि वक्ष्यमाणावयवादिलक्षणैः किञ्चिदायुःपरि-

माणं ज्ञास्यत एवेति तत्प्रसङ्गात्तत्रैव सकलायुर्लक्षणकथनं युक्तमिति आदौ तत्कथनानुपयोगः । तथापि—

प्रमाणसंहतिच्छायागतिसर्वाङ्गलक्षणैः ।
दन्तकेशनखश्मश्रुगन्धवर्णस्वरादिभिः ॥
पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
क्षीणे त्र्यायुषि मर्त्यानां लक्षणैः किं प्रयोजनम् ॥

इति भविष्यपुराणादिवचनैर्वक्ष्यमाणसर्वसामुद्रलक्षणकथनस्यायुष्मतामेवोपयोगात्तज्ज्ञानस्य चायुर्ज्ञानाधीनत्वात्तदर्थमादौ सङ्क्षेपादायुःपरीक्षा प्रस्तूयते । प्रमाणादीनां लक्षणमग्रेऽभिधास्यते । तत्रायुर्लेखा करभोत्थिता कनिष्ठाङ्गुलिमूलसमीपस्था ज्ञेया । तथा च—

गरुडपुराणे,

कनिष्ठिकां समाश्रित्य आयूरेखां समादिशेत् । इति ।

सा च यदि कनिष्ठिकामूलोत्था तर्जनीप्रान्तं गच्छति तदा शताब्दमायुर्ज्ञेयम् । तथा च—

भविष्यपुराणे,

यस्य पाणितले रेखा कनिष्ठामूलसम्भवा ।
गता प्रान्तं प्रदेशिन्याः स जीवेच्छरदां शतम् ॥ इति ।

गरुडपुराणे विशेषः ।

प्रदेशिनीगता रेखा कनिष्ठामूलसम्भवा ।
शतायुषं च कुरुते छिन्नया तु ततो भयम् ॥ इति ।

प्रदेशिनीगता प्रदेशिनीं व्याप्य स्थिता । सैव चेत्कनिष्ठापृष्ठोत्था तर्जनीपृष्ठमविच्छिन्ना गच्छति तदा परमायुर्ज्ञेयम् । तथा च स्कान्दे—

काशीखण्डे,

अच्छिन्ना तर्ज्जनीं व्याप्य तथा रेखाऽस्य दृश्यते ।
कनिष्ठापृष्ठनिर्याता दीर्घायुष्यं यथाऽऽप्नुयात् ॥ इति ।
दीर्घायुः परमायुः । तच्च विंशत्यधिकमब्दशतम् ।
तथा च समुद्रः,
कनिष्ठातर्ज्जनीं यावत् रेखा भवति चाक्षता ।
विंशत्यब्दाधिकशतं नरो जीवत्यनामयम् ॥ इति ।

ननु शतायुर्वै पुरुष इतिश्रुत्या शतायुरेवोक्तम्, कथमत्राधिकायुःकथनमिति । उच्यते । शताधिकस्यापि श्रवणात् ।

तथा च श्रुतिः, साग्रं वर्षशतं जीवेति ।

साग्रं सपादशतम् । पुराणादिष्वपि जीवेद्वर्षशतं साग्रमित्यादि । मध्यमाप्रान्तगतजीवितरेखया अशीत्यायुर्ज्ञेयम् । तथा च प्रयोगपारिजाते—

समुद्रः,
कनिष्ठाङ्गुलिदेशात्तु रेखा गच्छति मध्यमाम् ।
अविच्छिन्ना तु रेखा स्यादशीत्यायुर्विनिर्दिशेत् ॥ इति ।
आयुर्लेखायाः अनामिकाप्रान्ताधिक्ये षष्ट्यायुर्ज्ञेयम् ।
तथा च गरुडपुराणे,
कनिष्ठिकां समाश्रित्य मध्यमायां त्वनागता ।
षष्टिवर्षायुषं कुर्यादायुर्लेखा तु मानवम् ॥ इति ।
वराहसंहितायाम्,
रेखाः प्रदेशिनीगाः शतायुषां कल्पनीयाः । न्यूनाभिः छिन्नाभिर्द्रुमपतनमिति ।

रेखाः कनिष्ठामूलोत्थाः । प्रदेशिनीगाः प्रदेशिनीप्रान्तगताः शतायुषां ज्ञेयाः । इतो न्यूनगाभिर्लेखाभिर्न्यूनमायुःकल्पनीयम् । तद्यथा, तर्ज्जनीप्रान्तात्किञ्चिन्न्यूनत्वे नवत्यायुः, ततोऽपि कि-

श्चिन्न्यूनत्वे अशीत्यायुः, मध्यमाप्रान्ते पञ्चसप्तत्यायुः, ततोऽपि किंश्चिन्न्यूनत्वे सप्तत्यायुरित्यादि कल्पनीयम् ।

तथा च विवेकविलासे,

उल्लङ्घ्यन्ते च यावन्त्योऽङ्गुल्यो जीवितरेखया ।
पञ्चविंशतयो ज्ञेयास्तावन्त्यः शरदां बुधैः ॥ इति ।

पुराणाद्यविसंवाद्यतिविश्वसनीयम् । दुर्लभराजविरचित-

सामुद्रतिलके,

पुंसामायुर्भागं प्रत्येकं पञ्चविंशतिः शरदाम् ।
कल्प्या कनिष्ठिकाङ्गुलिमूलादिह तर्जनीपरतः ॥ इति ।

यस्य चायुर्लेखा अनामिकाङ्गुलिमूलादूर्ध्वा याति स धर्म-रतो ज्ञेयः । तथा च—

सामुद्रतिलके,

आयुर्लेखानामङ्गुलिमूलान्तर्गता भवेदूर्ध्वा ।
यस्य व्यक्ता रेखा स धर्मनिरतः सततम् ॥ इति ।

स्त्रीणां तु—

भविष्यपुराणे,

यस्याः कनिष्ठिकामूलाद्रेखा प्राप्ता प्रदेशिनीम् ।
शतमायुर्भवेत्तस्या हीनाया हीनता क्रमात् ॥ इति ।

प्रदेशिनीं प्राप्ता प्रदेशिनीमूलसमीपगता । हीनताक्रमस्तु पूर्ववदत्रापि कल्पनीयः ।

वराहसंहितायाम्,

कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तरालम् ।
करोति रेखा परमायुरेषा प्रमाणहीना तु तदूनमायुः ॥ इति ।

परमायुर्व्याख्यातम् ।

उत्पले समुद्रः,

कनिष्ठामूलसम्भूता गता मध्यमिकान्तरम् ।
प्रदेशिन्याश्च सा रेखा यस्याः सा दीर्घजीविनी ॥ इति ।
अत्रायुर्लेखायां यावन्तः छेदास्तावन्तोऽपमृत्यवो ज्ञेयाः ।
तदुक्तम् —
सामुद्रतिलके,
यावन्मात्राश्छेदा जीवितरेखास्थिता भवन्ति नृणाम् ।
अपमृत्यवोऽपि तावन्मात्रा नियतं परिज्ञेयाः ॥
पल्लवितायां क्लेशः छिन्नायां जीवितस्य सन्देहः ।
विषमायां धननाशः परुषायां कर्शनं तस्याम् ॥ इति ।
विषमा वक्रा । परुषा रूक्षा । अत्रोपर्युपरिच्छेदे रोगः । अधश्छेदे शस्त्रभीतिः । तत्तच्छेदानुगुणो दशारिष्टवदपमृत्युस्तरुपातः शस्त्रभीतिरूनां गता वा निर्देश्येति सम्प्रदायः । दशारिष्टं नाम ज्ञातायुष आयुर्लेखायाश्च दश भागाः कल्पनीयाः । तत्र यस्मिन् रेखाभागे रेखाच्छेदस्तदायुर्दशाभागे दुष्टं फलमिति कल्पनीयम् ।
अथायुर्ज्ञानोपायान्तरमुक्तम्—
नारदीयसंहितायाम्,
अनामिकापर्व यदा विलङ्घ्यते
कनिष्ठिकाग्रेण शतं स जीवति ।
समे त्वशीतिं विषमे तु सप्ततिं
पर्वार्धहीने खलु षष्टिमादिशेत् ॥ इति ।
अनामिकापर्व मध्यमम् । तथा च—
गर्गसंहितायाम्,
अनामिकान्तिमं पर्व समानीता कनिष्ठिका ।
आयामशुद्धपर्वाणि येषां ते चिरजीविनः ॥ इति ।
कनिष्ठिका अनामिकान्तिमं पर्व समानीता अन्तिमपर्वस्पृष्टा ।

आयामो दैर्घ्यम्। अथान्योऽप्यायुर्ज्ञानोपाय उक्तः—

भविष्यपुराणे,

रेखाः पञ्च ललाटे तु स्त्रिया वा पुरुषस्य वा।
शतं जीवति वर्षाणामैश्वर्यं चाधिगच्छति॥
रेखाचतुष्टयेऽशीतिस्तिसृभिः सप्ततिस्तथा।
द्वाभ्यां षष्टिस्तु रेखाभ्यां चत्वारिंशत्तथैकया॥
अरेखेण ललाटेन विज्ञेया पञ्चविंशतिः।
रेखाच्छेदैस्तु विज्ञेयाः पापकर्मरता नराः॥
अल्पायुषस्तथाल्पाभिर्व्याधिभिः परिपीडिताः। इति।
वर्षाणां शतमशीतिरित्येवं प्रत्येकं सम्बन्धः।

वराहसंहितायाम्,

तिस्रो रेखाः शतजीविनां ललाटायताः स्थिता यदि ताः।
चतसृभिरवनीशत्वं नवतिश्चायुः सपञ्चाब्दा॥
सपञ्चाब्दा नवतिरायुः पञ्चनवत्यायुरित्यर्थः।
विच्छिन्नाभिश्चागम्यागामिनो नवतिरप्यरेखेण।
केशान्तोपगताभिर्लेखाभिरशीतिवर्षायुः॥
केशान्तोपगताभिः केशान्तः केशोत्पत्तिस्थानम् तत्र गताभिः केशमध्यगताभिरित्यर्थः।
पञ्चभिरायुः सप्ततिरेकाग्रावस्थिताभिरपि षष्टिः।
एकाग्रावस्थिताभिः एकस्याः अग्रेणावस्थिताभिः विद्धाभिः विच्छिन्नाभिरित्यर्थः। अथ वा स्वप्रान्तमिलिताभिः।
बहुरेखेण शतार्धं चत्वारिंशत्तु वक्राभिः।
त्रिंशत् भ्रूलग्नाभिर्विंशतिरपि वामवक्राभिः॥
क्षुद्राभिः स्वल्पायुर्न्यूनाभिस्त्वन्तरे कल्प्यम्। इति।
बहुरेखेणेत्यादि। रेखाबहुत्वे पञ्चाशदायुः। बहुत्वमुक्तरेखापे-

क्षया। तिर्य्यगायताभिश्चत्वारिंशदायुः। भ्रूसन्निहिताभिस्त्रिंशदायुः। वामभागकुटिलाभिर्विंशतिरायुः। तनुभिरल्पायुः। लेखाभिरिति प्रत्येकं सम्बन्धः। विज्ञेयमिति शेषः। न्यूनाभिः उक्तन्यूनाभिर्लेखाभिर्द्वाभ्यामेकया च। तुशब्दात् स्वल्पायुरेव। अन्तरे मध्ये कल्पनीयम्। यथा रेखात्रये शतमायुः, रेखाचतुष्टये पञ्चनवत्यायुरित्युक्तं। तत्र सार्द्धरेखात्रये सार्द्धसप्तनवतिवर्षाण्यायुरित्यादि कल्पनीयम्। अत्रोदाहृतभविष्यपुराणवराहसंहितावचनेषु ललाटे एकत्र रेखापञ्चके शतमायुरपरत्र रेखात्रये, एकत्र तिसृभिः सप्तत्यायुरन्यत्र पञ्चभिर्लेखाभिः, एकत्र अरेखेण ललाटेन नवत्यायुरन्यत्र पञ्चविंशतिरित्येवं मिथोविरोधस्तत्परिहाराय वराहवचनानि व्याख्यायन्ते। तिस्रो रेखा इति। ललाटे आकर्णान्तास्तिस्रो रेखाः शतायुषां ज्ञेयाः। तथाचोक्तम्—

गरुडपुराणे,

आकर्णान्तगता रेखास्तिस्रः स्युश्च शतायुषः।
ललाटोपस्थितास्तिस्रो रेखाः स्युः शतवर्षिणाम्॥ इति।

चतसृभिरिति। अत्राऽऽयतपदानुषङ्गः। चतसृभिर्लेखाभिः पञ्चनवत्यायुरवनीशत्वं च। तदुक्तम्—

गरुडपुराणे,

नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ। इति।

विच्छिन्नाभिरिति। छेदयुक्ताभिर्लेखाभिर्नवत्यायुरगम्यागामित्वं च। अत्राप्यायतपदानुषङ्गः। अप्यरेखेणेत्यत्रापिशब्दश्चार्थे। दीर्घाभिर्लेखाभिर्वर्जितेन ललाटेन नवतिवर्षाण्यायुरगम्यागमित्वं च। ह्रस्वरेखायुक्तेन ललाटेनेत्यर्थः। तथा चोक्तम्—

गरुडपुराणे,

ह्रस्वरेखाञ्चिते भाले नवत्यायुश्च पुंश्चलः । इति ।

पुंश्चलो व्यभिचारी । अथ वा पुमांसं चलतीति व्युत्पत्त्या धात्वर्थानुसारेण पुंश्चलो व्यभिचारी पुरुषः प्रतीयते। केशान्तोपगताभिरिति । दीर्घाभिः केशान्तोपगताभिर्लेखाभिरशीत्यब्दमायुः । तदुक्तम्—

सामुद्रतिलके,

जीवति वर्षाशीतिः केशान्तोपगतदीर्घरेखेण । इति ।

पञ्चभिरिति । एकाग्रावस्थिताभिर्लेखाभिः सप्तत्यायुः षष्ट्यायुश्च ।

रेखाः सप्ततिमायुः पञ्चैकाग्रस्थिताः पुनः षष्टिम् ।

इति सामुद्रतिलके उक्तत्वात् । अथ वा दीर्घाभिः पञ्चभिर्लेखाभिः सप्तत्यायुः । एकाग्रावस्थिताभिश्च लेखाभिः षष्ट्यायुः । एकाग्रावस्थिताभिरपि षष्टिरित्यत्रापिशब्दश्चार्थे । बहुरेखेणेत्यादिवचनानां तु पूर्वोक्त एवार्थो ग्राह्यः अविरुद्धत्वादिति ।

इत्यायुःपरीक्षाप्रकरणं समाप्तम् ।

अत्रादौ सर्वसामुद्रलक्षणोपयोगितया आयुःपरीक्षामभिधायाधुना परीक्षाकर्त्तुः प्रथमकृत्यं प्रस्तूयते ।

बराहसंहितायाम्,

उन्मानमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनूक्रमादौ ।
क्षेत्रं मृजां च विधिवत्कुशलोऽवलोक्य
सामुद्रविद्वदति यातमनागतं च ॥

उन्मानं दैर्घ्यादि । मानं तुलामेयं गुरुत्वादि । गतिर्गमनम् । संहतिरङ्गसंश्लेषः । सारो रक्तादिधात्वाधिक्यम् । वर्णः कृष्णादिः । स्नेहः स्निग्धता । स्वरः कण्ठोत्थो ध्वनिः । प्रकृतिः

स्वभावः । सत्त्वं चित्तधर्मो धैर्यादिः । अथ वा प्रकृतिरूपं सत्त्वम् । अनूकम् अतीतजन्मसूचिका आकृतिः । क्षेत्रं शरीरम् । मृजा शरीरस्योज्ज्वलता । देहकान्तिरितियावत् । यातमतीतम् । अनागतं भावि ।

अथैतेषां लक्षणानि विस्तरतो निरूप्यन्ते । तत्रोर्ध्वं मानमुन्मानम् । तथाचोत्पले–

कात्यायनः,

ऊर्ध्वमानं किलोन्मानं मानं तु तुलया धृतम् । इति ।

तिष्ठन्तं पुरुषमापादतलमस्तकं सूत्रेण मापयेत् । ततस्तदङ्गुलिभिरेव तत्सूत्रमानं कार्यम् । तत्राष्टोत्तरशताङ्गुलपरिमाण उत्तमः शताङ्गुलो मध्यमो नवत्यङ्गुलो निकृष्ट इति । तथा च स्कान्दे–

काशीखण्डे,

आनीय कुङ्कुमारक्तं सूत्रं च त्रिगुणीकृतम् ।
स्मृत्वा शिवौ गणाध्यक्षमूर्ध्वभूतमुदङ्मुखम् ॥
मुनिः परिममौ बालमापादतलमस्तकम् ।
तिर्यगूर्ध्वं समो माने योऽष्टोत्तरशताङ्गुलः ॥
स भवेत्पृथिवीपालो बालोऽयं ते तथा द्विज । इति ।

तिर्यङ्मानं तु प्रसारितभुजमध्यमाग्रद्वयान्तरं ज्ञेयम् । अङ्गुलिमानं तु स्वमध्यमाङ्गुलिमध्यपर्वमितं ग्राह्यम् ।

निजाङ्गुलिपर्वसङ्ख्या नियतं तेषां विबोद्धव्या ।

इति सामुद्रतिलकोक्तेः । स्वाङ्गुष्ठोदरविस्तारपरिमितं ग्राह्यमिति हेमाद्रिः ।

भविष्ये,

जघन्यो नवतिः प्रोक्तो मध्यमस्तु शताङ्गुलः ।
अष्टोत्तरशतं यस्य उत्तमं तस्य लक्षणम् ॥

प्रमाणलक्षणं प्रोक्तं समुद्रेण शुभाशुभम् । इति ।
बराहसंहितायां तु विशेषः ।
अष्टशतं षण्णवतिः परिमाणं चतुरशीति वा पुंसाम् ।
उत्तमसमहीनानामङ्गुलिसङ्ख्या स्वमानेन ॥ इति
अत्रोत्तमध्यमहीनपुरुषेषूत्तममध्यमहीनं फलं कल्पनीयम् ।

इत्युन्मानलक्षणम् ।

अथ मानलक्षणम् ।

वराहसंहितायाम्,
भारार्द्धतनुः सुखभाक् तुलितो दुःखभाग्भवत्यूनः ।
भारोऽतीवाढ्यानामध्यर्धः सर्वधरणीशः ॥ इति
भारलक्षणमुक्तं हेमाद्रौ—
निघण्टौ,.
ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् ।
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला ॥ इति

ते पूर्वकृताः पञ्चगुञ्जाभिर्माषास्तैः षोडशमाषैः कर्षः चतुर्भिः कर्षैः पलम् पलानां शतेन तुला विंशतितौलिको भारः। पलसहस्रद्वयमित्यर्थः । यः पुरुषस्तुलायां तुलितो भारार्धतनुः सहस्रपलपरिमितशरीरः स सुखी । ऊनः अस्मान्न्यूनपरिमाणतनुर्दुःखितः । भारप्रमाणतनुरतिधनी । अधिकमर्धं यस्य सः सार्द्धो भारः. पलसहस्रत्रयमिति यावत् । तत्परिमितवपुः सार्वभौमो राजा । विज्ञेय इति सर्वत्र सम्बध्यते ।

इति मानलक्षणम् ।

अत्रोन्मानमानपरीक्षाकाल उक्तः—
बराहसंहितायाम्,
विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशत्या ।

अर्हति मानोन्माने जीवितभागे चतुर्थे वा ॥ इति ।

जीवितचतुर्थभाग इति चायुर्बहुत्वाभिप्रायेण । यत्तु उत्पलेन अल्पायुषां जीवितचतुर्थभागे मानोन्माने कर्त्तव्ये इत्युक्तम् । तन्न युक्तम् । पञ्चविंशतित्रिंशदाद्यल्पायुषश्चतुर्थभागे अवयवपरमवृद्ध्यनिष्पत्तेर्गुरुत्वाभावेन मानासम्भवात् ।

अथ गतिलक्षणम् ।

भविष्ये,

हंसभासशुकानां च तुल्या यस्य गतिर्भवेत् ।
स भवेत्पार्थिवश्रेष्ठः समुद्रवचनं यथा ॥
भासो गृध्रः ।
अन्येषामपि शस्तानां पक्षिणां च शुभा गतिः ।
वृषसिंहगजेन्द्राणां गतिर्भाग्यविवर्द्धिनी ॥
जलोर्मिसदृशी या च काकोलूकसमा च या ।
गतिर्द्रव्यविहीनानां दुःखशोकभयङ्करी ॥
श्वानोष्ट्रमहिषाणां च खरशूकरयोस्तथा ।
गतिर्मेषसमा येषां ते नरा भाग्यवर्जिताः ॥ इति ।

वराहसंहितायाम्,

शार्दूलसिंहसमदद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनां च भूपाः ।
येषां च शब्दरहितं स्तिमितं च यानं
तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः ॥ इति ।

शार्दूलो व्याघ्रः । गोपतिर्वृषः । शिखिनामिति बहुवचनं प्रशस्तपक्ष्यभिप्रायम् । अत एव

अन्येषामपि शस्तानां पक्षिणां च शुभा गतिः ।

इत्युक्तं प्राक् । परिप्लुतं व्याकुलं मण्डूकवत् ।

गर्गसंहितायाम्,

हंसस्य भासस्य शुकस्य चैव
येषां समाना गतयः समानाः ।
ते धार्मिकाः सर्वगुणोपपन्ना
नराधिपत्यं चिरमाप्नुवन्ति ॥

समानाः नातिमन्दद्रुतगतयः । समाना इति पुरुषविशेषणं वा ।

सामुद्रतिलके,

गतिभिर्भवन्ति तुल्या ये समदद्विरदनकुलहंसानाम् ।
वृषभस्यापि नरास्ते सततं धर्मार्थकामपराः ॥
गोमायुकरभरासभसैरिभकृकलासशशकभेकमृगैः ।
येषां गतिः समाना ते गतसुखराजसंमानाः ॥

गोमायुः शृगालः । सैरिभो महिषः । कृकलाशः शरटः ।

इति गतिलक्षणम् ।

अथ संहतिलक्षणम् ।

वराहसंहितायाम्,

संहततनुसुश्लिष्टसुसन्धयः सुखभुजो ज्ञेयाः । इति ।

सामुद्रतिलके,

मांसास्थिसन्धिबन्धः शिथिलो न कदापि लक्ष्यते यस्य ।
स च संहतिमान् धन्यो दीर्घायुर्जायते नियतम् ॥ इति ।

इति संहतिलक्षणम् ।

अथ सारलक्षणम् ।

वराहसंहितायाम्,

सप्त भवन्ति च सारा मेदोमज्जात्वगस्थिशुक्राणि ।
रुधिरं मांसं चेति प्राणभृतां तत्समासफलम् ॥

मेदः अस्थिमांसान्तर्गतः स्निग्धो मांसविशेषः । मज्जा अस्थ्यन्तर्गतः स्नेहभागः । तानाह—

स एव,

मज्जामेदःसाराः सुशरीराः पुत्रवित्तयुताः ।
स्निग्धत्वगृभिर्धनिनो मृदुभिः सुभगा विचक्षणास्तनुभिः ॥
स्थूलास्थिसारो बलवान् विद्यान्तगः सुरूपश्च ।
बहुगुरुशुक्राः सुभगा विद्वांसो रूपवन्तश्च ॥
ताल्वोष्ठदन्तपालीजिह्वानेत्रान्तपायुकरचरणैः ।
रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥
दन्तपाली दन्तत्वक् ।
उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः । इति ।
एतेषां विशेषतः फलं तु हेमाद्रौ स्मर्यते ।
श्रीमान् स्थिरमतिर्वेद्यो मेदःसारो नरोत्तमः ।
नित्यं प्रहृष्टः सुभगो मन्दकोपो महाधनः ॥
संहता यस्य दन्तेभ्यो निपतन्ति मरीचयः ।
शुक्रं च गुणवद्यस्य मज्जासारः स तादृशः ॥
अयत्नार्जितवित्तेशो वस्त्रभूषणभाक् सुखी ।
अलङ्करिष्णुर्मेधावी त्वक्सारः शीलकीर्तिमान् ॥
अवगुह्य परानेष वर्त्तते नावगूह्यते ।
अस्थिसारो नरः सौख्यं दीर्घमायुश्च विन्दति ॥
धनवान् पुत्रवान् शौण्डः प्राज्ञः साहसिकः सुखी ।
यौवनात्ययमृत्युः स्याद्रक्तसारो नरः शठः ॥ इति ।

शौण्डश्चतुरः । साहसिकः साहसं मरणाङ्गीकारेण सम्भावितमरणहेतुकर्मकरणं तद्वान् ।

सम्पूर्णस्पर्शसुखभाक् संविभागी बहुप्रजः ।

शतायुः स्वप्नशीलश्च मांससारोऽर्थभागृजुः ॥
षट्सु सारेषु ये प्रोक्ताः सारतत्त्वार्थदर्शिभिः ।
गुणास्ते शुक्रसारस्य नरस्य समुदाहृताः ॥ इति ।

सामुद्रतिलके,

प्रायेण सत्त्वसारः सर्वोत्कर्षास्पदं पुरुषः । इति ।

हेमाद्रिणा तु सत्त्वसंज्ञः सारोऽधिक उक्तः ।

स यथा,

कृतज्ञो धर्मज्ञः शूरः शुचिरवस्थितमर्यादोऽविषादी विद्वान-नहङ्कारी ख्यातिमान् व्यवसायी सततमनिर्वेदी स्वल्पा-दपि दाता सप्रत्याशश्च कल्याणेषु ।

सत्त्वेन परिपूर्णेन युक्तो भवति भूमिपः ।
अन्यैरपि गुणैर्हीनः सत्त्वेन स महागुणः ॥ इति ।

इति सारलक्षणम् ।

अथ वर्णलक्षणम् ।

बराहसंहितायाम्,

द्युतिमान् वर्णः स्निग्धः क्षितिपानां मध्यमः सुतार्थवताम् ।
रूक्षो धनहीनानां शुद्धः शुभदो न सङ्कीर्णः ॥ इति ।

वर्णो गौरश्यामकृष्णभेदेन त्रिविधः । स स्निग्धादिभेदे-नोत्तममध्यमहीनो ज्ञेयः । तेषु यो दीप्तिमान् स्निग्ध उत्तमो राज्ञाम् । मध्यमः प्रकृतिस्थोऽस्निग्धरूक्षः पुत्रार्थिनाम् । रूक्षो दरिद्राणाम् । सङ्कीर्णो व्यामिश्रवर्णः क्वचित्स्निग्धः क्वचिद्रूक्षो न प्रशस्त इति । तथा च—

सामुद्रतिलके,

गौरः श्यामः कृष्णो वर्णः सम्भवति देहिनां त्रेधा ।
आद्यौ द्वावपि शस्तौ शुभोऽपि शस्तो न सङ्कीर्णः ॥

पङ्कजकिञ्जल्कनिभो गौरः श्यामः प्रियङ्गुकुसुमसमः ।
कृष्णस्तु कज्जलाभः स्निग्धः शुद्धोऽपि नो शस्तः ॥ इति ।

इति वर्णलक्षणम् ।

अथ स्नेहलक्षणम् ।

वराहसंहितायाम्,

स्नेहः पञ्चसु लक्ष्यस्त्वग्जिह्वादन्तनेत्रनखसंस्थः ।
सुतधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः ॥ इति ।

गर्गसंहितायाम्,

चक्षुःस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् ।
त्वक्स्नेहेन परं सौख्यं नखस्नेहेऽधिकं धनम् ॥
त्वग्रोमनखकेशेषु दन्तोष्ठनयनेषु च ।
स्नेहो येषां तु दृश्येत कार्यं तेषामकारणम् ॥ इति ।

अकारणम् अयत्नसिद्धं कार्यं भवतीत्याशयः । प्रयोगपारिजाते तु विशेषः ।

त्वचः स्नेहेन शय्या स्यात्पादस्नेहेन वाहनम् । इति ।

सामुद्रतिलके,

प्रियभाषित्वं रसनास्निग्धश्च सुभोजनं रदास्निग्धः ।
अतिसौख्यं त्वक्स्निग्धो नियतं भजते भुजिष्योऽपि ॥
भुजिष्यो दासः ।
जनसौभाग्यं नयनस्निग्धः समधिकं धनं नखस्निग्धः ।
केशस्निग्धो बहुविधसुगन्धमाल्यं नरो लभते ॥ इति

इति स्नेहलक्षणम् ।

अथ स्वरलक्षणम् ।

भविष्ये,

हंसस्वरा नरा धन्या मेघगम्भीरनिस्वनाः ।

क्रौञ्चस्वराश्च राजानो भाग्यवन्तो महाधनाः ॥
चक्रवाकस्वरा धन्या राजानो धर्मवत्सलाः ।
कुम्भस्वरो नरपतिर्दुन्दुभिस्वर एव च ॥
खरदीर्घस्वराः क्रूराः शिशूनां सदृशेन तु ।
पशूनामिति पाठान्तरम् ।
कुररस्वरसंयुक्ताः पुरुषाः क्लेशभागिनः ॥
कुरर उत्क्रोशकः ।
चापस्वराः काकरुतो भिन्नकांस्यस्वराश्च ये ।
भासरुता इति पाठान्तरम् ।
क्षीणभिन्नस्वरा ये तु अधमास्ते प्रकीर्तिताः ॥ इति ।

वराहसंहितायाम्,

करिवृषपरथौघभेरीमृदङ्गासिंहाब्दनिस्वना भूपाः ।
गर्दभजर्जररूक्षस्वरास्तु धनसौख्यसन्त्यक्ताः ॥ इति ।

भेरी दुन्दुभिः । मृदङ्गो मुरजः । अब्दो जलदः । स चायं स्वरः पञ्चविधः प्रशस्तः । तद्यथा, गम्भीरो दुन्दुभिः स्निग्धो महाननुनादीति । तथा चोक्तम्—

गर्गसंहितायाम्,

गम्भीरो दुन्दुभिः स्निग्धो महांश्चैवानुनादवान् ।
इति स्वरगुणाः पञ्च समुद्रः प्राह तत्त्ववित् ॥ इति ।

तत्रोदीरित एवादिमध्यावसानतुल्यो यः स गम्भीरः । सर्वजनमनोऽभिप्रेतो यः स दुन्दुभिः । हर्षदैन्यभयव्याधिक्रोधादिषु अविकृतः श्रोत्रसुखो यः स स्निग्धः । युगपद्बहूनां जल्पतामुपेत्य योऽधिकं श्रूयते स महान् । दूरादपि शनैरुच्चार्यमाणो यः श्रोत्रपथमायाति सोऽनुनादीति । एतेषां फलमप्युक्तम्—

तत्रैव,

एभिरायुर्यशो विद्या मानं सौख्यं धनागमः ।
वाहनानि सुता नार्यो राज्यं भोगागमो महान् ॥
ऐश्वर्यं व्यवसायश्च त्रिभिर्मेधा सरस्वती ।
भोगानां चैव भोक्तृत्वं दानं यज्ञागमस्तथा ॥ इति ।

अप्रशस्ता अपि स्वरास्तत्रैवोक्ताः ।

ते च यथा,

विस्वरोऽतिस्वरो भग्नः क्षारो रूक्षस्तु भैरवः ।
अतिवृत्तस्तु परुषो विशीर्णः स्वल्प एव च ॥
निम्नो जर्ज्जरितश्चैवानिर्मलो गद्गदः स्वरः ।

विस्वरो घर्घरः । अतिस्वरश्चण्डः । भग्नः खण्डितः । क्षारः स्खलितः । रूक्षः अस्निग्धः । भैरवोऽतिभयानकः । अतिवृत्तः स्तब्धः । परुषो निष्ठुरः । विशीर्णो गालिताक्षरः । स्वल्पः सूक्ष्मः । निम्नः कण्ठान्तर्गतः । जर्ज्जरितो भिन्नकांस्यस्वरसदृशः । अनिर्मलः सनिष्ठीवः ।

स्वरैरेतैः कलिः क्रोधो लोभमोहमनोरुजः ।
नैर्घृण्यमवमानश्च पारुष्यं शाठ्यमेव च ॥ इति ।

कलिः कलहः । शाठ्यं शठभावः । शठः स्वकार्यतत्परः परकार्यविमुखः । तथा चोक्तम्—

वचसा मनसा यस्तु दृश्यते कार्यतत्परः ।
कर्मणा विपरीतश्च स शठः सद्भिरिष्यते ॥ इति ।

सामुद्रतिलके,

वृकवककाकोलूकप्लवगोष्ट्रक्रोष्टुरासभवराहैः ।
तुल्यः स्वरो न शस्तो विशेषतो विस्वरो दुष्टः ॥ इति ।

वृक ईहामृगः । मध्यदेशभाषायां हुंडार इति प्रसिद्धः । क्रोष्टा जम्बुकः ।

इति स्वरलक्षणम् ।

अथ प्रकृतिसत्त्वयोर्लक्षणम् ।

उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्त्वमनूक्मादौ।

इति वचने प्रकृतिः स्वभावः ।

महीस्वभावः शुभपुष्पगन्धः ।

इत्यादिवक्ष्यमाणः। सत्त्वं गुणः। सत्त्वपदं सत्त्वरजस्तमसां त्रयाणां गुणानामुपलक्षणार्थमित्येवं प्रकृतिसत्त्वभेदो यः प्रतिपादितः । तस्य तु—

तद्धातुमहाभूतप्रकृतिद्युतिवर्णसत्त्वरूपाद्यैः ।

इत्यादिना वराहाचार्येण गुणरूपसत्त्वस्य प्रकृतिभिन्नत्वेन पञ्चमहापुरुषलक्षणे प्रतिपादितत्वात्तद्विषयत्वमेव । केचित्त्वन्यथैवं पठन्ति ।

स्नेहस्वरप्रकृतयश्च ततो ह्यनूक्म् । इति ।

वस्तुतस्तु प्रकृतिरेव सत्त्वम् । अस्मिन्नेव प्रकरणे—

एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम्।

इति वराहोक्तेः । प्रकृतिसत्त्वमित्यत्र प्रकृतिरूपं सत्त्वमिति कर्मधारयेनैकपद्यं सम्पाद्य ततश्चोन्मानादिसत्त्वान्तानां द्वन्द्वैकवद्भावः । तत्र भूजलाग्न्यनिलाम्बरसुरनररक्षःपिशाचतिरश्चां प्रकृत्या युक्तो दशविधः पुरुषो भवति । तथा च—

वराहसंहितायाम्,

महीस्वभावः शुभपुष्पगन्धः सम्भोगवान्सुश्वसनः स्थिरश्च।

शुभपुष्पगन्धः पद्माद्युत्तमपुष्पशरीरगन्धः । सुश्वसनः सुखसुगन्धवायुः ।

तोयस्वभावो बहुतोयपायी प्रियाभिभाषी रसभाजनश्च ॥

रसभाजनो मधुरादिरसप्रियः ।

अग्निप्रकृत्या चपलोऽतितीक्ष्णश्चण्डः क्षुधालुर्बहुभोजनश्च ।
चण्डः कोपनः ।
वायुस्वभावेन चलः कृशश्च क्षिप्रं च कोपस्य वशं प्रयाति॥
खप्रकृतिर्विगुणो विवृतास्यः शब्दगतौ कुशलः सुखिताङ्गः ।
विवृतास्यः ज्ञापनविवृतमुखः । शब्दगतौ गानविषये कुशलः । सुखिताङ्गः सुकुमाराङ्गः ।
त्यागयुतः पुरुषो मृदुकोपः स्नेहयुतश्च भवेत्सुरसत्त्वः ॥
मर्त्यसत्त्वसंयुतो गीतभूषणप्रियः ।
संविभागशीलवान्नित्यमेव मानुषः ॥
तीक्ष्णप्रकोपः खलचेष्टितश्च पापश्च सत्त्वेन निशाचराणाम् ।
पिशाचसत्त्वश्चपलो मलाक्तो बहुप्रलापी च समुल्बणाङ्गः ॥
समुल्बणाङ्गः स्थूलाङ्गः । अधिकाङ्ग इति ना ।
भीरुः क्षुधालुर्बहुभुक्च यः स्यात्
ज्ञेयः स सत्त्वेन नरास्तिरश्चाम् ।
एवं नराणां प्रकृतिः प्रदिष्टा
यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् ॥ इति ।
गर्गसंहितायां तु अन्यदेवोक्तम् ।
ननु तत्सत्त्वमित्याहुर्यन्मौख्यांच्च[1] फलं भवेत् ।
गतं न धैर्यमापत्सु यस्य तत्सत्त्वमुच्यते ॥ इति ।
तत्प्रशंसा च तत्रैवोक्ता ।
गतेर्धन्यतरो वर्णो वर्णाद्धन्यतरः स्वरः ।
स्वराद्धन्यतरं सत्त्वं सर्वं सत्त्वे प्रतिष्ठितम् ॥
अस्थिष्वर्थाः सुखं मांसे त्वचि भोगाः स्त्रियोऽक्षिषु ।
गतौ यानं स्वरे चाज्ञा सर्वं सत्त्वे प्रतिष्ठितम् ॥ इति ।

---

१ मुख्यस्य भावो मौख्यं तस्मात् । प्राधान्यादित्यर्थः ।

विवेकविलासेऽपि,
गतेः प्रशस्यते वर्णस्ततः स्नेहस्ततः स्वरः ।
ततस्तेजस्ततः सत्त्वमिदं द्वात्रिंशतोऽधिकम् ॥ इति ।
सामुद्रतिलकेऽपि,
एकमपि सत्त्वमेतैः सर्वैः शंसन्ति लक्षणैस्तुल्यम् ।
यस्मिन् सति मनुजानां न कदाचन दुर्लभा लक्ष्मीः ॥
सौभाग्यमिव स्त्रीणां पुरुषाणां भवति भूषणं सत्त्वम् ।
तेन विहीना भुवने भजन्ति परिभवपदं प्रायः ॥
वक्त्रानुगतं रूपं रूपानुगतं नृणां भवति चित्तम् ।
चित्तानुगतं सत्त्वं सत्त्वानुगता गुणाः प्रायः ॥
इह सत्त्वमेव मुख्यं निखिलेष्वपि लक्षणेषु मनुजानाम् ।
तदभावे तेऽपि पुनश्चिन्तास्वाम्यं समुपयान्ति ॥
ननु येषां न मनागपि मनो विकारं कथञ्चनाभ्येति ।
आपद्यपि सम्पद्यपि ते सत्त्वविभूषिताः पुरुषाः ॥
शुभलक्षणमप्येकं बाह्यं न विलोक्यते स्फुटं यस्य ।
अथ दृश्यते पुनः श्रीस्तस्य तदस्ति ध्रुवं सत्त्वम् ॥ इति ।

इति प्रकृतिसत्त्वलक्षणम् ।

अथानूकलक्षणम् ।

सामुद्रतिलके,
पूर्वं भवे ह्यनवरतं सत्त्वस्वररूपगतिभिरभ्यस्तम् ।
पुनरिह यदनुक्रियते तदनूकं कथ्यते सद्भिः ॥
अनूकमनुकारः । स च वक्त्रादिसादृश्यात्कल्पनीयः । तथाच—
वराहसंहितायाम्,
साभ्यमनूकं वक्त्राद्रोट्टशार्दूलसिंहगरुडमुखाः ।
अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च ॥

वानरमहिषवराहाजतुल्यवदनाः सुतार्थसुखभाजः ।
गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वैसुखाः ॥ इति ।
देवदैत्यगन्धर्वयक्षराक्षसोरगविद्याधरपिशाचनरमृगतिर्यक्-
सत्त्वास्तत्तुल्यचेष्टाभिर्ज्ञेयाः । तथाचोक्तम्—
गर्गसंहितायाम्,
पूर्वयोनिर्यथाकामो मानुषाणां प्रवर्त्तते ।
यथा पूर्वजन्म तथैव तदनुरूपोऽभिलाषो मानुषाणां भवति ।
देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः ॥
विद्याधरपिशाचैश्च मानुषैर्मृगपक्षिभिः ।
च्युतिर्जन्मोपपत्तिश्च मानुषेषु प्रकीर्तिता ॥
तानहं सम्प्रवक्ष्यामि सामुद्रवचनं यथा ।
येषां देवदैत्यगन्धर्वादिशरीरच्युतिपूर्वकं मानुषजन्मप्राप्ति-
स्तानहं सम्प्रवक्ष्यामीति सम्बन्धः ।
स्रग्वी सुवेषः सुयशाः प्रियस्नानानुलेपनः ।
धनी जयपरो दाता सत्यव्रतपरायणः ॥
शीलवान् क्षमया युक्तो घृणी मनसि लज्जितः ।
घृणी दयालुः ।
देवसत्त्वो नरो ज्ञेयो गोब्राह्मणहिते रतः ॥
वृथाभिमानस्त्वधिकक्रोधो लोभसमन्वितः ।
उद्युक्तो मृगयायुक्तस्त्वासुरो नर उच्यते ॥
सुशरीरो महाभागो दाता मानी प्रियंवदः ।
स्त्रीसङ्गतत्परो नूनं स्नानलास्यरतिर्नरः ॥
लास्यं नृत्यम् ।
गन्धगान्धर्वमाल्यानां शयनासनयोषिताम् ।

---

१ निःस्वा निःसुखाश्चेत्यर्थः ।

विविधानां चोपभोक्ता रतिमान् मित्रवत्सलः ॥
गान्धर्वं गानम् ।
तन्त्रीद्विमुखवादित्रयानोद्यानवनप्रियः ।
गन्धर्वसत्त्वो विज्ञेयो गजाश्वरथतत्परः ॥
तन्त्री वीणा । द्विमुखवादित्रं मुरजादि ।
उग्रकर्मा दुराधर्षो बली माल्यानुलेपनः ॥
दक्षधोर्वेणुवीणाभिः शङ्खैः पणवडिण्डिमैः ॥
वादित्रैर्हृष्यते भोक्ता भक्ष्यमांसासवप्रियः ।
तेजस्वी निर्घृणः शूरो यक्षसत्त्वो नरः स्मृतः ॥
निर्घृणो विकृतः शूरस्तेजस्वी शर्वरीप्रियः ।
उद्वसे वसते मांसभोक्ता पानपरायणः ॥
देवगोब्राह्मणद्वेषी वधबन्धननिश्चयः ।
निर्घृणश्च तथा स्त्रीषु राक्षसो नर उच्यते ॥
जलपांशुरतिः शूरः क्रोधनः शङ्कितः शठः ।
रतश्च रथमाल्येषु गतिज्ञो भूषणप्रियः ॥
द्रव्यार्जनपरः स्रग्वी देवतानां च पूजकः ।
भुजङ्गसत्त्वो विज्ञेयो जिह्मगो युवतिप्रियः ॥
दान्तो महाधनः स्रग्वी देवायतनपूजकः ।
माल्यभोजनगन्धानां विद्यानां चाभिसाधकः ॥
रूपवान् सुभगः श्रीमान्नेता विद्याधरान्वयः ।[1]
क्रूरोऽपि विकृतो रूक्षो निर्घृणः पापतत्परः ॥
मलिनोऽप्यशुचिर्भीतो गोब्राह्मणजुगुप्सकः ।
निषादसौनिकस्त्रीषु नीचप्रव्रजितासु च ॥
रज्यते विकृताहारो नरः पैशाच उच्यते ।

---

१ विद्याधरसत्त्वः ।

सौनिको हिंसाकर्त्ता ।
अक्षोभ्यः सुभगो दाता मानी मधुरभाषणः ।
आचारयुक्तो मधुरः स्वकर्मानिरतः शुचिः ॥
अक्षोभ्यो गम्भीरः ।
आस्तिकः श्रद्दधानश्च सन्तुष्टोऽमृत्युवत्सलः ।
अमृत्युवत्सलो मरणभीरुः ।
मनुष्यसत्त्वो विज्ञेयो गन्धमाल्यरतिप्रियः ॥
पर्वतारामवादित्रनदीतीराश्रमेषु च ।
राजितैर्विविधैर्गीतैर्भीरुराक्रम्य उद्यतः ॥
आक्रम्यः आक्रमितुं योग्यः । उद्यतः उद्योगी ।
न रतिं लभते जन्तुर्दुर्गन्धो मृगसत्त्वजः ।
चञ्चलोऽसुमना भीरुः सर्वसञ्चयनिश्चितः ॥
स्त्रीविजेयो दुराचार इच्छावाननवत्सलः ।
तिर्यक्सत्त्वो नरो ज्ञेयः कृपणोऽवरयोनिजः ॥ इति ।

अवरयोनिजो नीचयोनिजः । एतेषु देवदैत्यनरगन्धर्वोरगरक्षःसत्त्वा नराः श्रेष्ठाः पिशाचादिसत्त्वाः कनिष्ठा इति । तथा च हेमाद्रौ स्मर्यते ।

देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
तुल्यचेष्टा नराः श्रेष्ठाः पिशाचानां नराधमाः ॥ इति

पिशाचानामिति बहुवचनं तिर्यक्सत्त्वाद्यभिप्रायमिति ।

विवेकविलासे,

सद्धर्म्मः सुभगो नीरुक् सुस्वप्नः सुनयः कविः ।
स्तवयत्यात्मनः श्रीमान् नरः स्वर्गमागमौ ॥
निर्दम्भस्सदयो दाता दान्तो दक्षः सदा ऋजुः ।
मर्त्ययोनेः समुद्भूतो भावी चात्र नरः पुनः ॥

मायालोभक्षुधालस्यबह्वाहारादिचेष्टितैः ।
तिर्यग्योनिसमुत्पत्तिं ख्यापयत्यात्मनः पुमान् ॥
सरोगः स्वजनद्वेषी कुटुम्बी मूर्खसङ्गकृत् ।
शास्ति स्वयं गतायातं नरो नरकवर्त्मनि ॥ इति ।

इत्यनूकलक्षणम् ।

अथ क्षेत्रलक्षणम् ।

अत्र शरीरे दश क्षेत्राणि । तथा च—

वराहसंहितायाम्,

पादौ सगुल्फौ प्रथमं प्रदिष्टं जङ्घे द्वितीयं च सजानुचक्रे ।
मेढ्रोरुमुष्काश्च ततस्तृतीयं नाभिः कटिश्चैव चतुर्थमाहुः ॥
उदरं कथयन्ति पञ्चमं हृदयं षष्ठमतः स्तनान्वितम् ।
अथ सप्तममंसजत्रुणी कथयन्त्यष्टममोष्ठकन्धरे ॥
जत्रुणी स्कधसन्धी ।
नवमं नयने च सभ्रुणी सललाटे दशमं शिरस्तथा । इति ।

एतेषु दशसु क्षेत्रेषु ज्ञातायुर्दशभागकल्पनया शुभाशुभफलं कल्पनीयमिति । एतदुक्तं भवति । उक्तायुःपरीक्षया ज्ञाताऽऽयुषो दश भागाः कल्पनीयाः । तत्र—

यद्यद्गात्रं रूक्षं मांसविहीतं शिरावनद्धं च ।
तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्वम् ॥

इत्यादिवक्ष्यमाणप्रकारेण यदङ्गमशुभलक्षणोपेतं यत्क्षेत्रान्तर्गतं तत्क्षेत्रसङ्ख्यया तदायुर्भागोऽशुभफलदः, यदङ्गं शुभं तदायुर्भागः शुभः, यन्मध्यमं तद्भागो मध्यम इति । तथाच—

सामुद्रतिलके,

क्षेत्रवशाज्जायन्ते मनुजानां जगति दश दशाः क्रमशः ।
क्षेत्रेष्वशुभेष्वशुभा दशा शुभेषु च शुभा प्रायः ॥

इति क्षेत्रलक्षणम् ।

अथ मृजालक्षणम् ।

शरीरकान्तिर्मृजा छायेतियावत् । तथा च—

वराहसंहितायाम्,

छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजोगुणान् बहिरपि प्रविकाशयन्ती
दीपप्रभा स्फटिकरत्नघटास्थितेव ॥
स्निग्धद्विजत्वङ्नखरोमकेशा छाया सुगन्धा च महीसमुत्था
पुष्ट्यर्थलाभाभ्युदयान् करोति धर्मस्य वाऽन्यहानि प्रवृद्धिम्
स्निग्धा सिता च हरिता नयनाभिरामा
सौभाग्यमार्द्रवसुखाऽभ्युदयान् करोति ।
सर्वार्थसिद्धिजननी जननीव चाढ्या
छाया फलं तनुभृतां शुभमादधाति ॥
चण्डाऽधृष्या पद्महेमाग्निवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः ।
आग्नेयीति प्राणिनां स्याज्जयाय
क्षिप्रं सिद्धिं वाञ्छितार्थस्य वत्ते ॥
अधृष्या अनाभिभवनीयप्रभावा ।
मलिनपरुषकृष्णा[1] पापगन्धाऽनिलोत्था
जनयति वधशोकौ पुत्रनाशार्थनाशौ ।
स्फटिकसदृशरूपा भाग्ययुक्ताप्युदारा
निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा ॥
छायाः क्रमेण कुजलाग्न्यनिलाम्बरोत्थाः

१ पुरुषेत्यपि पाठः ।

केचिद्वदन्ति दश ताश्च यथानुपूर्व्या ।
सूर्याञ्जनाभपुरुहूतयमोडुपानां
तुल्यास्तु लक्षणफलैरिति तत्समासः ॥ इति ।

कुः पृथिवी । अञ्जनाभो विष्णुः । उडुपश्चन्द्रः । एवं पृथिव्यादिपञ्चमहाभूतच्छायाः । उक्ता इति शेषः । केचित्तु सूर्यविष्वीन्द्रयमचन्द्रसम्बन्धिन्योऽन्याः पञ्च पूर्वोक्ताः पञ्च एवं दशविधा छायेत्याहुः । तत्र सूर्यादिपञ्चच्छाया नोक्ता रूपसाम्यात् । साम्यं तु सौरी चाग्नेयी, वैष्णवी नाभसी, ऐन्द्री पार्थिवी, याम्या वायवी, चान्द्री चाप्येति । फलं तु पूर्वोक्तानामेव । अतस्तत्समासः । तांसां सङ्क्षेपेण कथनमित्यर्थः ।

गर्गसंहितायाम्,

सूर्येन्दुमणिसङ्काशा विविधस्नेहसंयुता ।
कान्ता दीप्ता प्रसन्ना च प्रभा नृणां प्रशस्यते ॥
विवर्णा परुषा रूक्षा भस्मवर्णा तथाऽऽकुला ।
श्यामा दग्धोल्मुकाभासा प्रभा नृणां न शस्यते ॥
भूम्यग्न्यम्बरवाय्वम्भःसम्भूताः पञ्च कीर्तिताः ।
छाया विष्ण्विन्द्रचन्द्रार्कयमानां च तथा परा ॥ इति ।

हेमाद्रावपि स्मर्यते ।

रक्ता तेजोभवा छाया नभोनीला तु नाभसी ।
वैडूर्याभाम्भसी श्वेता छाया श्यामा च पार्थिवी ॥
भस्माभा बहुरूक्षा च वायवी सा न पूजिता ।
असमग्रैरसकलं समग्रैः सकलं फलम् ॥
पूर्वोक्तैर्लक्षणैस्तेषां नृणां छायाः सुनिर्दिशेत् । इति ।

इति छायालक्षणम् ।

अथ गन्धलक्षणम् ।

गर्गसंहितायाम्,
आम्लो वा कटुको ह्यन्यः पलाण्डुलशुनोपमः ।
मेदोरक्तवसामज्जाविण्मूत्राणां तथा खलु ॥
स्याद्गन्धः सदृशो येषां न च शस्ताः कदाचन ।
नरा भयङ्करा नित्यं समुद्रेणातिनिन्दिताः ॥
वसा मांसस्नेहभागविशेषः ।
शुद्धमांसभवः स्नेहो वसा सङ्कीर्त्यते बुधैः ।
इति वाग्भटेऽभिधानात् ।
कषायो मधुरो हृद्यः सुरभिः कुसुमाश्रयः ।
स्याद्गन्धः सदृशो येषां ते सौम्याः शुचयो नराः ॥
सत्यधर्मतपोयुक्ता दानव्रतपरायणाः । इति ।
सामुद्रतिलके,
गन्धो वपुषि नराणां प्रजायते नासिकेन्द्रियग्राह्यः ।
श्वासस्वेदादिभवो ज्ञेयः स शुभाशुभो द्विविधः ॥
कर्पूरागरुमलयजमृगमदजातीतमालदलगन्धाः ।
द्विजमदनभूमिगन्धाः पुरुषाः स्युर्भोगिनः प्रायः ॥
मत्स्याण्डपूयशोणितनिम्बवसाकाकनीडवकगन्धाः ।
दुर्गन्धाश्च नरास्ते दुर्भगतानिःस्वताभाजः ॥ इति ।

इति गन्धलक्षणम् ।

अथ रुधिरलक्षणम् ।

भविष्ये,
पद्मवर्णं भवेद्रक्तं स नरो धनवान् भवेत् ।
पद्मवर्णं रक्तोत्पलनिभम् ।
किञ्चिद्रक्तं तथा कृष्णं भवेद्यस्य तु शोणितम् ।
अधमः स तु विज्ञेयः पापकर्मरतः सदा ॥

किञ्चिद्रक्तं तथा पीतं भवेद्यस्य तु शोणितम् ।
मध्यमः स तु विज्ञेयः सुखदुःखस्य भाजनम् ॥
प्रवालसदृशं स्निग्धं भवेद्यस्य च शोणितम् ।
राजानं तं विजानीयात्सप्तद्वीपाधिपं गुह ॥ इति
उत्पले समुद्रः,
अलक्तसदृशं रक्तं जायते यस्य शोणितम् ।
धनवान् भोगवांश्चैव स नरः परिकीर्तितः ॥
पद्मपत्रनिभं यस्य देहे भवति शोणितम् ।
जनयेत् बहुधा कन्या दुःखितश्च सदा भवेत् ॥ इति ।
पद्मं सितोत्पलं नीलोत्पलं वा ।

इति रुधिरलक्षणम् ।

इह पुरुषसामान्यलक्षणान्यभिधाय अधुना प्रत्यङ्गविशेषलक्षणानि पादादिक्रमेण वक्ष्यन्ते । ननु

सर्वेषु गात्रेषु शिरः प्रधानम् ।

इत्यादिना सर्वावयवेषु शिरसः प्राधान्यावगमात्तस्यैवादौ लक्षणं वक्तुं युक्तमिति कथं पादलक्षणस्य प्राथम्यमिति । उच्यते ।

अतः परं प्रवक्ष्यामि देहावयवलक्षणम् ।

इत्युपक्रम्य,

पादौ समांसलौ स्निग्धौ रक्तौ सौम्यौ सुशोभनौ ।

इति भविष्ये पादलक्षणस्यैवादावुक्तत्वात्तत्पूर्वकमेव लक्षणकथनमिति । तत्र तावत् पादलक्षणमुक्तम्—

भविष्यगरुडपुराणयोः,
पादौ समांसलौ स्निग्धौ रक्तौ सौम्यौ सुशोभनौ ।
अस्वेदनौ मृदुतलौ कमलोदरसन्निभौ ॥
श्लिष्टाङ्गुली च सुनखौ सुपार्ष्णी व्योमकेशज ।

पार्ष्णिः पादमूलम् । पादपश्चाद्भाग इति यावत् ।
उष्णौ शिराविरहितौ गूढगुल्फौ च भीमज ॥
गूढगुल्फौ समपादग्रन्थी ।
कूर्मोन्नतौ च चरणौ प्ररूयातौ पार्थिवस्य तु ।
यस्य पादतले रेखा साङ्कुशेव प्रकाशते ॥
सततं हि सुखं तस्य पुरुषस्य न संशयः ।
शूर्पाकृती महाबाहो श्वेतरूक्षनखौ तथा ॥
वक्रौ शिरासन्ततौ च संशुष्कौ विरलाङ्गुली ।
दारिद्र्यदुःखदौ ज्ञेयौ चरणौ भीमनन्दन ॥
ब्रह्मघ्नौ देवशार्दूल पक्वमृत्सदृशौ च तौ ।
पीतावगम्यानिरतौ कृष्णौ यानरतौ सदा ॥
यानं गमनम् ।
अभक्ष्यभक्षणौ श्वेतौ ज्ञेयौ सेनाधिपोत्तम । इति ।
अभक्ष्यं लशुनपलाण्ड्वादि ।
स्कान्दे काशीखण्डे,
पादौ समांसलौ रक्तौ समौ सूक्ष्मौ सुशोभनौ ।
समगुल्फौ स्वेदहीनौ स्निग्धावैश्वर्यसूचकौ ॥ इति

इति पादलक्षणम् ।

अथ पादतललक्षणम् ।

गर्गसंहितायाम्,
पद्मरक्तोत्पलनिभैस्तथा क्षतजसन्निभैः ।
नृपाः पादतलैर्ज्ञेया ये चान्ये सुखभागिनः ॥ इति ।
सामुद्रतिलके,
रेखाहीनं कठिनं रूक्षं दुःखाय विस्फुटितम् ।
तलमन्तःसंक्षिप्तं स्त्रीकार्ये मृत्युमादिशति पुंसाम् ॥

रोगाय विगतमांसं मार्गाय ज्ञेयमुत्कटकम्।
उत्कटकमसकलभूमिस्पृक्।
रेखाः शङ्खच्छत्राङ्कुशकुलिशासिध्वजादिसंस्थानाः।
अच्छिन्ना गम्भीराः स्फुटास्तले भागधेयवताम्॥

ध्वजादीत्यत्रादिपदेन पद्मधनुःशरपताकादीनां ग्रहणम्। नन्द्यावर्तेन्दुपद्मशङ्खवज्राङ्कुशशरशक्तिध्वजपताकोरगव्यजनचामरशूर्पव्यक्तोर्द्धरेखोपाचितौ चरणौ च राज्ञां धनधान्यवतां महात्मनां च ज्ञेयाविति हेमाद्रिणा उक्तत्वात्।

ताः शङ्खाद्याकृतयः परिपूर्णा मध्यभेदिता येषाम्।
स्त्रीभोगभाजनं ते जायन्ते पश्चिमे वयसि॥
सेधासैरिभजम्बुकमूषकशुककाककङ्कसमाः।
रेखाः स्युर्यस्य तले तस्य न दूरेऽस्ति दारिद्र्यम्॥ इति।

सेधा श्वावित्। मध्यदेशभाषया साहीति प्रसिद्धा। जम्बुकः शृगालः। कङ्को लोहपृष्ठः। मध्यदेशभाषायां कुरकुंचि इति प्रसिद्धः।

इति पादतललक्षणम्।

अथाङ्गुष्ठलक्षणम्।

इह यद्यप्यङ्गुलीनखादीनामवयवावयविनोरभेदोपचारेणान्तःपातित्वात्तल्लक्षणेनैव गतार्थता। तथापि विशेषतः शुभाशुभफलज्ञानार्थं तत्तल्लक्षणानि पृथक् निरूप्यन्ते। तत्राङ्गुष्ठलक्षणमुक्तम्—

भविष्ये,

वृत्तैस्ताम्रनखै रक्तैरङ्गुष्ठै राज्यभागिनः।
अङ्गुष्ठाः पृथुला येषां ते नरा भाग्यवर्जिताः॥
क्लिश्यन्ते विकृताङ्गुष्ठास्ते नरा वनगामिनः।

चिपिटैर्विक्षतैर्भग्नैरङ्गुष्ठैरतिनिन्दिताः ॥
वक्रै रूक्षैस्तथा ह्रस्वैरङ्गुष्ठैः क्लेशभागिनः । इति ।
सामुद्रतिलके,
वृत्तो भुजगफणाकृतिरुत्तुङ्गो मांसलः शुभोऽङ्गुष्ठः ।
सशिरो ह्रस्वश्चिपिटो वक्रो विपुलः स पुनरशुभः ॥ इति ।

इत्यङ्गुष्ठलक्षणम् ।

अथाङ्गुलिलक्षणम् ।

भविष्ये,
मृदुवृत्तघनस्निग्धास्तून्नताङ्गुलयः समाः ।
येषां प्रदक्षिणावर्त्ता पार्थिवास्ते न संशयः ॥
यस्य प्रदेशिनी दीर्घा अङ्गुष्ठं समतिक्रमेत् ।
स्त्रीभोगं लभते नित्यं पुरुषो नात्र संशयः ॥
कनिष्ठायां तु दीर्घायां सुवर्णस्य तु भागिनः ।
चिपिटा विरलाः शुष्का यस्याङ्गुल्यो भवन्ति वै ॥
स भवेत् दुःखितो नित्यं धनहीनश्च जायते । इति ।
जगन्मोहने समुद्रः,
यस्य प्रदेशिनी दीर्घा अङ्गुष्ठञ्च व्यतिक्रमेत् ।
स्त्रीभोगं लभते सोऽपि पुरुषो नात्र संशयः ॥
भार्या च म्रियते तस्य पुत्रो वा प्रथमोऽपि वा ।
सा च ह्रस्वा भवेद्यस्य तं विद्यात्कलहप्रियम् ॥
मध्यमायां तु दीर्घायां विद्याभोगी भवेन्नरः ।
सा चेद्ध्रस्वा भवेद्यस्य भार्याहानिमवाप्नुयात् ॥
अङ्गुली मध्यमा यस्य समा श्लिष्टा च शोभना ।
पुत्रांश्च जनयेत्सोऽपि अल्पायुश्चैव जायते ॥
अत्र दीर्घत्वं प्रदेशिन्यपेक्षया । ह्रस्वत्वमनामिक्यपेक्षया ।

समत्वं प्रदेशिन्या सह । एवमग्रेऽपि द्रष्टव्यम् ।

अनामिकायां दीर्घायां स्वर्णभागी भवेन्नरः ।
सा च ह्रस्वा भवेद्यस्य तं विद्यात्परदारगम् ॥
यस्य प्रदेशिनी स्थूला तथा चैव कनिष्ठका ।
बाल्ये च म्रियते माता समुद्रवचनं यथा ॥
असङ्गताभिर्ह्रस्वाभिरङ्गुलीभिस्तु मानवः ।
दासो वा दासकर्मा वा भवेन्मर्त्यो न संशयः ॥

इत्यङ्गुलिलक्षणम् ।

अथ नखलक्षणम् ।

भविष्ये,

इन्द्रगोपकसङ्काशैर्नखैर्नृपतयः स्मृताः ।
शङ्खावर्त्तप्रतीकाशैर्नखैर्भवति पार्थिवः ॥
ताम्रैर्नखैस्तथैश्वर्यं वन्द्याः पद्मनखा नराः ।
श्लक्ष्णैर्नखैस्तथैश्वर्यं पुष्पितैः सुभगो भवेत् ॥

पुष्पितैः पुष्पकुड्मलाकारैरिति केचित् । शुभ्रबिन्दुयुतैरित्यन्ये ।

सूक्ष्मैः कूर्मोन्नतैः स्निग्धैर्विमलैः सौख्यभाग् भवेत् ।
रुक्षैर्नखैर्विरूक्षैश्च पुरुषा दुःखजीविनः ॥
कुशीलाः कुनखैर्ज्ञेयाः कामभोगविवर्जिताः ।
विकृतैः स्फुटितैः स्थूलैर्नखैर्दारिद्र्यभागिनः ॥
ब्रह्महत्यां च कुर्वन्ति पुरुषा हरितैर्नखैः ।
बन्धुभिर्विप्रयुज्यन्ते कुलक्षयकराश्च ते ॥ इति ।

सामुद्रतिलके,

स्थूलैर्नखैर्विदीर्णैः शूर्पाकारैः खराश्वनखदीर्घैः ।
आसितैः सितैर्दरिद्रा भवन्ति तेजोमृजारहितैः ॥ इति ।

इति नखलक्षणम् ।

अथ पादपृष्ठलक्षणम् ।

सामुद्रतिलके,

मांसोपचितं स्निग्धं गूढशिरं कोमलं चरणपृष्ठम् ।
रोमस्वेदविरहितं पृथुलं कमठोन्नतं शस्तम् ॥ इति ।

कमठः कच्छपः ।

इति पादपृष्ठलक्षणम् ।

अथ गुल्फलक्षणम् ।

जगन्मोहने समुद्रः,

नराः शूकरगुल्फास्तु नित्यं बन्धनभागिनः ।
समैर्भवन्ति गुल्फैस्तु पुरुषाः सुखभागिनः ॥
गुल्फैस्तु महिषाकारैर्वधबन्धनभागिनः ।
वक्रैस्तु दुःखिता नित्यं रोमशैर्निरपत्यता ॥ इति ।

इति गुल्फलक्षणम् ।

अथ पार्ष्णिलक्षणम् ।

जगन्मोहने समुद्रः,

महापार्ष्णिस्तु दीर्घायुः समैर्दुःखसुखानि च ।
अल्पपार्ष्णिर्दरिद्रश्च प्रोन्नतैश्चैव दुर्जयः ॥ इति ।

भवतीति शेषः ।

इति पार्ष्णिलक्षणम् ।

अथ जङ्घालक्षणम् ।

जङ्घा तु गुल्फजान्वोर्मध्यदेशः ।

भविष्ये,

वर्द्धनं वाश्वजङ्घानामैश्वर्यं चैव निर्दिशेत् ।
मृगजङ्घाश्च राजानो जायन्ते नात्र संशयः ॥

मीनजङ्घास्तथैश्वर्यं प्राप्नुवन्ति न संशयः ।
सिंहव्याघ्रसमा जङ्घा धनिनः परिकीर्तिताः ॥
रोमशैश्च तथा जङ्घैर्दुःखदारिद्र्यभागिनः ।
शृगालजङ्घाः पुरुषा नित्यं भाग्यविवर्जिताः ॥
काकजङ्घा नरा ये तु ते वै दुःखस्य भागिनः ।
दीर्घजङ्घाः स्थूलजङ्घा नित्यं भाग्यविवर्जिताः ॥ इति ।

गारुडे,

जङ्घा विरलरोमिका ।
मृदुरोमा समा जङ्घा तथा करिकरप्रभा ॥ इति ।

प्रशस्तेति शेषः ।

उत्पले समुद्रः,

जङ्घाभिरतिपुष्टाभिरैश्वर्यमभिनिर्दिशेत् ।
शृगालजङ्घा दुःखार्त्ताः श्वजङ्घा नित्यमध्वगाः ॥ इति ।

सामुद्रतिलके,

जङ्घा ऋक्षसदृक्षा वधबन्धौ निःस्वतां प्रायः ।
स्थूलां दीर्घां मार्गे वितरत्युद्वृद्धपिण्डिका जङ्घा ॥
ऋक्षो भल्लूकः ।
श्वशृगालकरभरासभवायसजङ्घोपमा त्वशुभा । इति ।

इति जङ्घालक्षणम् ।

अथ जङ्घालक्षणावसरे " जङ्घा विरलरोमिका " " मृदुरोमा समा जङ्घा " इत्युक्तम् । तत्प्रसङ्गात् रोमलक्षणमुच्यते । तथा च—

भविष्यगरुडपुराणयोः,

पार्थिवानां भवेद्रोममेकैकं रोमकूपके ।
पण्डितश्रोत्रियाणां च द्वे द्वे ज्ञेये महामते ॥

त्रिभिस्त्रिभिस्तथा निःस्वा मानवा दुःखभागिनः ।
केशाश्चैवं महाबाहो निन्दिताः पूजितास्तथा ॥ इति ।
सामुद्रतिलके,
ललितानि स्निग्धानि भ्रमरश्यामानि देहरोमाणि ।
जायन्ते भूमिभुजां मृदूनि विसतन्तुसूक्ष्माणि ॥
सुभगो रोमयुतः स्याद्विद्वान् घनरोमसंयुतो मनुजः ।
रोमैकैकं नृपतेर्द्वे द्वे श्रोत्रियधनाढ्यबुद्धिमताम् ॥
आदीन्येतानि पुनर्निर्विन्द्यात् मूर्द्धजेष्वेवम् ।
रोमरहितः परिव्राट् स्यादधमः स्थूलरूक्षखररोमा ॥
पापः पिङ्गलरोमा निस्वः स्फुटिताग्ररोमापि । इति ।

इति रोमलक्षणम् ।

अथ जानुलक्षणम् ।

जानुर्जङ्घोरुमध्यग्रन्थिः ।
भविष्ये,
निम्नैः सजानुर्म्रियते प्रवासे भीमनन्दन ।
सौभाग्यमल्पैः कथितं दारिद्र्यं विकटैस्तथा ॥
निम्नैस्तु स्त्रीजिता ज्ञेयाः समांसै राज्यभागिनः । इति ।
विकटैः विकरालैः ।
उत्पले समुद्रः,
अतिस्थूलैश्चिरं कालं जीवेदैश्वर्यसंयुतः । इति
जानुभिरित्यनुषङ्गः ।
सामुद्रतिलके,
कुञ्जरजानुर्मनुजो भोगयुतः पीनजानुरवनीशः ।
संश्लिष्टसन्धिजानुर्वर्षशतायुर्भवेत्प्रायः ॥
कुम्भनिभं दुर्गततां तालफलाभं तु बहुदुःखम् ।

जानुद्वितयं हीनं यस्य सदा सेवते स वधबन्धौ ॥
इदमेव यस्य विषमं स पुनः प्राप्नोति दारिद्र्यम् । इति ।
विषमम् एकत्र मांसलं महत् अन्यत्र कृशं स्वल्पमिति ।

इति जानुलक्षणम् ।

अथोरुलक्षणम् ।

जगन्मोहने समुद्रः,
वृत्तोरुर्हसितोरुश्च नरः सर्वगुणान्वितः ।
ऊरुभ्यां विकटाभ्यां च स भवेत् स्त्रीषु वल्लभः ॥
स्थूलाग्रमध्यनिम्नेन ते नरोऽध्वनि गामिनः । इति ।
सामुद्रतिलके,
ऊरू यस्य समांसे रम्भास्तम्भभ्रमं वितन्वाते ।
कोमलतनुरोमचिते स जायते भूपतिः प्रायः ॥
स्निग्धावूरू मृदुलौ क्रमेण पीनौ प्रयच्छतो लक्ष्मीम् ।
विकटौ स्त्रीवल्लभतां गुणवत्तां संहतौ वृत्तौ ॥
स्थूलाग्रे मध्यनते स्यातां मार्गानुसन्धिनी पुंसाम् ।
कठिने चिपिटे विपुले निर्मांसे दुर्भगत्वाय ॥ इति ।

इत्यूरुलक्षणम् ।

अथ कटिलक्षणम् ।

वराहसंहितायाम्,
सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः । इति ।
जगन्मोहने समुद्रः,
सिंहव्याघ्रसमा येषां कटिस्ते दण्डनायकाः ।
ऋक्षवानरतुल्याभा कटिर्येषां न ते शुभाः ॥ इति ।
उत्पले समुद्रः,

---

१ नृशब्दस्य बहुवचनम् ।

सिंहतुल्या कटिर्यस्य स नरेन्द्रो न संशयः ।
श्वशृगालगजेन्द्राणां तुल्या यस्य स निर्धनः ॥ इति ।
सामुद्रतिलके,
यस्य कटिः स्यात् दीर्घा पीना पृथुला भवेत्स वित्ताढ्यः ।
रोमशकटिर्दरिद्रो ह्रस्वकटिर्दुर्भगो मनुजः ॥ इति ॥

इति कटिलक्षणम् ।

अथ स्फिग्लक्षणम् ।

स्फिचौ कट्यधस्तनमांसपिण्डौ ।
भविष्यपुराणे,
स्थूलस्फिङ्मण्डलो यश्च निःस्वो भवति मानवः ।
व्याघ्रस्फिङ्मण्डलो राजा मण्डूकस्फिक् नराधिपः ॥
भूमण्डले महाबाहो सिंहस्फिक् सार्वभौमताम् ।
उष्ट्रवानरयोर्यस्य सदृशौ भवतः स्फिचौ
धनधान्यविहीनोऽसौ विज्ञेयो भीमनन्दन ॥ इति ।
स्कान्दे,
विस्तीर्णौ मांसलौ स्निग्धौ स्फिचावस्य सुखोचितौ । इति ।
उत्पले समुद्रः,
अर्द्धस्फिङ्मनुजो यस्तु व्याघ्रान्तः स तु कीर्तितः । इति ।
व्याघ्रादन्तो मृत्युर्यस्येति ।

इति स्फिग्लक्षणम् ।

अथ गुदलक्षणम् ।

सामुद्रतिलके,
यतमांसो गम्भीरः सुकुमारः संवृतः समः शोणः ।
पायुः शुभो नराणां पुनरशुभे भवति विपरीतः ॥ इति ।

इति गुदलक्षणम् ।

अथ वृषणलक्षणम् ।

भविष्ये,

यस्त्वेकवृषणस्तात जले प्राणान् स मुञ्चति ।
स्त्रीचञ्चलस्तु विषमैः समै राजा प्रशस्यते ॥
स्त्रीचञ्चलः परदारलम्पटः ।
उद्वृत्तैश्चापि ह्रस्वायुः शतजीवी प्रलम्बकैः ।
मणिभिश्चापि रक्तैस्तु धनवन्तो भवन्ति वै ॥
उद्वृत्तैरलम्बैः । मणिभिर्वर्तुलैः ।

सामुद्रतिलके,

शुष्काः स्वयं वा सततं जायन्ते सुप्रतिष्ठिता यस्य ।
स भवति भर्ता नूनं भूमेः सप्ताब्धिवलयायाः ॥
जलमरणमद्वितीयैर्मनुजानां कुलविनाशोऽपि ।
स्त्रीलोलत्वं विषमैः प्राक् पुत्रो दक्षिणोन्नतैर्वृषणैः ॥
वामोन्नतैश्च तैरपि दुःखेन समं भवति दुहिता ।
निस्वाः शुष्कस्थूलैरगम्यरमणीरतास्तुरङ्गसमैः ॥
पुनरर्द्धार्द्धैर्वृषणैर्भवन्ति न चिरायुषः पुरुषाः । इति ।
गुरुडपुराणे विशेषः ।
प्रलम्बाभ्यां च धीमत्ता ।
उद्वृद्धाभ्यां बहुस्वामी । इति ।
वृषणाभ्यां भवतीति, शेषः ।

इति वृषणलक्षणम् ।

अथ लिङ्गलक्षणम् ।

भविष्ये,

दक्षिणावर्त्तलिङ्गस्तु नरो वै पुत्रवान् भवेत् ।
वामावर्त्ते तथा लिङ्गे नरः कन्यां प्रसूयते ॥

सिंहव्याघ्रसमो यस्य ह्रस्वो भवति मेहनः।
मेहनो लिङ्गम्।
भोगवान् स तु विज्ञेयो नरो यो ह्रस्वमेहनः॥
भूमौ पादोपविष्टस्य गुल्फौ स्पृशति मेहनः।
ईश्वरं तं विजानीयात्प्रमदानां च वल्लभम्॥
ऋजुभिर्वर्त्तुलाकारैः पुरुषाः पुत्रभागिनः।
स्थूलैः शिरालैर्विषमैर्लिङ्गैर्दारिद्र्यमादिशेत्॥
निम्नपादोपविष्टस्य भूमिं स्पृशति मेहनः।
दुःखितं तं विजानीयात्पुरुषं नात्र संशयः॥ इति।

स्कान्दे काशिखण्डे,

लिङ्गेन कृशह्रस्वेन राजराजो भविष्यति। इति।

वराहसंहितायाम्,

लिङ्गेऽल्पे धनवानपत्यरहितः स्थूले विहीनो धनै-
र्मेढ्रे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान्।
दारिद्र्यं विनते त्वधोऽल्पतनयो लिङ्गे शिरासन्तते
स्थूलग्रन्थियुते सुखी मृदु करोत्यन्तं प्रमेहादिभिः॥

अस्यार्थः। अल्पे लिङ्गे धनी सन्ततिहीनश्च। स्थूले धन-हीनः। वामभागविनते लिङ्गे पुत्रद्रव्यरहितः। अन्यथावक्रे दक्षिणभागविनते पुत्रवान्। अधोविनते दरिद्रः। शिराव्याप्ते स्वल्पपुत्रः। स्थूलग्रन्थियुक्ते सुखी। लिङ्गे इति सर्वत्र सम्बन्धः। भवतीति, शेषः। मृदु कोमलं लिङ्गं प्रमेहादिरोगैर्मृत्युं करोति। प्रमेहाः धातुविकाराः ते च विंशतिः श्लेष्मोद्भूताः दश-पित्तोद्भूताः षट् वातोद्भूताश्चत्वार इति। तथाच—

गरुडपुराणे,

धन्वन्तरिरुवाच।

प्रमेहाणां निदानं ते वक्ष्येऽहं शृणु सुश्रुत ।
प्रमेहा विंशतिस्तत्र श्लेष्मणो दश पित्ततः ॥
षट् चत्वारोऽनिलात्तेषां क्रमाद्वक्ष्यामि लक्षणम् ।
अच्छं बहुसितं शीतं निर्गन्धमुदकोपमम् ॥
मेहत्युदकमेहेन किञ्चिदाविलपिच्छिलम् ।
आविलं कलुषम् ।
इक्षो रसमिवात्यर्थं मधुरं चेक्षुरोहतः ॥
सान्द्रीभवेत्पर्युषितं सान्द्रमेहेन मेहति ।
सुरामेही सुरातुल्यमुपर्यच्छमधोद्यतम् ॥
संहृष्टरोमा पिष्टेन पिष्टवद् बहलं सितम् ।
पिष्टेन पिष्टमेहेन ।
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ॥
मूत्रयेत्सिकतामेही सिकतारूपिणोत्पलम् ।
शीतमेही सुबहुशो मधुरं भृशशीतलम् ॥
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ।
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् ॥
गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ।
नीलमेहेन नीलाभं कालमेही मषीनिभम् ॥
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत् ।
विश्रं माञ्जिष्ठमेहेन माञ्जिष्ठासलिलोपमम् ॥
विश्रमुष्णं सलवणं रक्ताभं रक्तमेहतः ।
वसामेही वसामिश्रं वसाभं मूत्रयन्मुहुः ॥
मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः ।
कषायं मधुरं रूक्षं क्षौद्रमेहे वदेद्बुधः ॥
हरितमस्तद्वाजस्रंमूत्रं वेगविवर्जितम् ।

सलसीकं विबद्धं च हस्तिमेही प्रमेहति । इति ।

प्रमेहादिभिरित्यत्रादिपदेन मूत्रकृच्छ्रादिगुह्यरोगग्रहणम् ।

कोशनिगूढैर्भूपा दीर्घैर्भग्नैश्च वित्तपरिहीनाः ।
ऋजुवृत्तशेफा लोलशिरालशिश्नाश्च धनवन्तः ॥ इति ।

कोशो लिङ्गाच्छादनकर्त्री त्वक् । शेफो लिङ्गम् ।

सामुद्रतिलके,

स्थूलशिरेण विशालच्छिद्रवता प्रजननेन दारिद्र्यम् । इति ।

इति लिङ्गलक्षणम् ।

अथ लिङ्गाग्रलक्षणम् ।

भविष्ये,

सुवर्णरजतप्रख्यैर्मणिमुक्तासमप्रभैः ।
प्रवालसदृशैः श्लक्ष्णैर्मणिभिः पार्थिवो भवेत् ॥

अत्रोत्तरो मणिशब्दो लिङ्गाग्रवाचकः । पार्थिव इति जात्यभिप्रायेणैकवचनम् ।

रत्नाकृतिर्मणिर्यस्य समः स्निग्धो विराजते ।
पार्थिवः स तु विज्ञेयः समुद्रवचनं यथा ॥
समैस्तथोन्नतैश्चापि सुस्निग्धैर्मणिभिर्गुह ।
धनवन्तस्तथा स्त्रीणां भोक्तारस्ते भवन्ति वै ॥
सोल्बणैश्चापि धनिनो नरा वीरा भवन्ति ते ।
कर्कशैर्मलिनै रूक्षैर्दीर्घैः श्यामैर्दरिद्रो व्रजेत् ॥ इति ।

वराहसंहितायाम्,

रक्तैराढ्यः मणिभिर्निर्द्रव्याः पाण्डुरैर्मलिनैश्च ।
बहुपशुभाजो मध्योन्नतैश्च नात्युल्बणैर्धनिनः ॥ इति ।

गारुडे,

समैः स्त्रीरत्नैर्धनिनो मध्यनिम्नैश्च कन्यका । इति ।

भवतीति, शेषः ।

सामुद्रतिलके,

विद्रुमहेमोपमया महामणौ रेखया नरो धनवान् ।

दौर्भाग्यवान् शबलया धूसरया जायते निःस्वः ॥ इति ।

इति लिङ्गाग्रलक्षणम् ।

अथ मूत्रलक्षणम् ।

भविष्ये,

मूत्रधारा पतेदेका वलिता दक्षिणा यदि ।

स भवेत्पार्थिवः पृथ्व्यां समुद्रवचनं यथा ॥

द्वे धारे च तथा स्निग्धे स नरो भोगवान् स्मृतः ।

बहुधारास्तथा रूक्षाः सशब्दाः पुरुषाधमाः ॥ इति ।

इदमशुभं फलं सशब्दरूक्षमूत्रधाराबहुत्वे ज्ञेयम् । सशब्दमूत्रधाराल्पत्वे तु शुभं फलं वेदितव्यम् । तथा चोक्तम्—

वराहेण,

सुखिनः सशब्दमूत्रा निःस्वा निःशब्दधाराश्च । इति ।

विशेषान्तरमप्युक्तं तेनैव ।

द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्तवलितमूत्राभिः ।

पृथिवीपतयो ज्ञेया विकीर्णमूत्रा धनविहीनाः ॥ इति ।

यत्तु वराहसंहितावचनम्—

एकैव मूत्रधारा वलिता दुःखप्रदा न सुतदात्री । इति ।

तदप्रादक्षिण्यवलितमूत्रैकधाराविषयम् । प्रादक्षिण्ये तु पूर्वोदाहृतं भविष्यपुराणोक्तं शुभं फलं वेदितव्यमित्यविरोधः । अत्रान्यो विशेष उक्तः—

---

१ लिङ्गाग्रैः ।

उत्पले समुद्रेण,

द्विधारं पतते मूत्रं स्निग्धं शब्दविवर्जितम् ।
भोगवान् स तु विज्ञेयो गवाढ्यो नात्र संशयः ॥ इति ।

इति मूत्रलक्षणम् ।

अथ शुक्रलक्षणम्

भविष्ये,

मीनगन्धं भवेद्रेतो धनवान् पुत्रवान् भवेत् ।
हविर्गन्धं भवेद्यस्य सर्वाग्रः श्रोत्रियः स्मृतः ॥
मद्यगन्धिर्भवेद्यज्वा पन्नगान्धिर्नृपः स्मृतः ।
लाक्षागन्धिर्भवेन्निःस्वो बहुकन्यः प्रजायते ॥
मधुगन्धिर्भवेदाढ्यो क्षारगन्धे दरिद्रता ।

मधु क्षौद्रं न मद्यम् । तत्फलस्य पूर्वमेवोक्तत्वात् ।

तनुशुक्रः स्त्रीजनको मांसगन्धे च भोगवान् ॥
शीघ्रमैथुनगामी यः स दीर्घायुरतोऽन्यथा ।
अल्पायुर्दैवशार्दूल विज्ञेयो नात्र संशयः ॥ इति ।

शीघ्रमैथुनगामी मैथुने यस्य शीघ्रं रेतश्च्यवते, रेतोबहुत्वात् । तथा च—

सामुद्रतिलके,

यस्य च्यवते रेतो लघु मैथुनगामिनो बहु स्निग्धम् ।
दीर्घायुः सम्पत्तिं पुत्रानपि विन्दते स पुमान् ॥
निपतति शुक्रं स्तोकं चिरमैथुनसङ्गतस्थायि ।
दारिद्र्यं सोऽल्पायुर्बहुकन्याजनकतां भजते ॥ इति ।

शीघ्रमैथुनेच्छावानिति के चित् ।

वराहसंहितायाम्,

कुसुमसमगन्धशुक्रा विज्ञातव्या महीपालाः । इति ।

सामुद्रतिलके,

सुरभिद्रव्यसुगन्धे श्रियोऽन्यगन्धे तु दारिद्र्यम् ।
जम्बूवर्णेन सुखी दुग्धसवर्णेन रेतसा नृपतिः ॥
धूम्रेण दुःखसहितः स्यात् दुःस्थः श्यामवर्णेन । इति ।

जगन्मोहने समुद्रः,

मीनगन्धेन शुक्रेण धनवान् श्रोत्रियो भवेत् ।
हविर्गन्धेन शुक्रेण गवाढ्यो जायते नरः ॥
मधुगन्धेन शुक्रेण नरः स्त्रीजनवल्लभः ।
लाक्षागन्धो भवेन्निःस्वो मांसगन्धेन तस्करः ॥
व्यसनी च वसागन्धे मेदोगन्धेन दुःखितः ।
श्यामवर्णेन शुक्रेण देशभागी भवेन्नरः ॥ इति ।

इति शुक्रलक्षणम् ।

अथ प्रसङ्गात्पुंस्त्वपरीक्षा उच्यते ।

तत्राह मिताक्षरायाम्—

नारदः,

यस्याप्सु प्लवते वीर्यं ह्रादि मूत्रं च फेनिलम् ।
पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु षण्ढकः ॥ इति ।

एतदावश्यकत्वमप्याह—

प्रयोगपारिजाते नारदः,

अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः ।
क्षेत्रं बीजवते देयं नाबीजः क्षेत्रमर्हति ॥ इति ।

अथ वस्तिलक्षणम् ।

वसत्यस्मिन् मूत्रादिकमिति वस्तिर्लिङ्गोपरितनो नाभेरधोभागः ।

भविष्ये,

विस्तीर्णा मांसला स्निग्धा वस्तिः पुंसां प्रशस्यते ।
निर्मांसा विकटा रूक्षा वस्तिर्येषां न ते शुभाः ॥
गोमायोः सदृशा यस्य श्वानोष्ट्रमहिषस्य च ।
स भवेत् दुःखितो नित्यं पुरुषो नात्र संशयः ॥ इति ।

वराहसंहितायाम्,

परिशुष्कवस्तिशीर्षा धनरहिता दुर्भगाश्च विज्ञेयाः ॥ इति ।

उत्पले समुद्रः,

गोमायोः सदृशा यस्य खरोष्ट्रमहिषस्य च ।
स भवेद् दुःखितो नित्यं धनहीनश्च मानवः ॥ इति ।

सामुद्रतिलके,

श्वशृगालकरभसैरिभतुल्या वस्तिर्नता भवति येषाम् ।
सङ्कीर्णा क्लिन्नास्ते धनहीनाः स्युर्नराः प्रायः ॥ इति ।

इति वस्तिलक्षणम् ।

अथ नाभिलक्षणम् ।

भविष्यगरुडपुराणयोः,

विस्तीर्णमण्डलाभिश्च प्रोन्नताभिश्च नाभिभिः ।
भवन्ति सुखिनो वीर नरा राज्यसमन्विताः ॥
धनधान्यसमन्विता इति पाठान्तरम् ।
निम्नाभिरथ चाल्पाभिः क्लेशभाजो भवन्ति वै ॥
वलिमध्यगता वीर विषमा च विशेषतः ।
धनहानिं तथा शूलं नित्यं जनयते विभो ॥
वामावर्त्ता सदा शाठ्यं करोतीति विदुर्बुधाः ।
करोति सा दक्षिणतः सम्प्रवृत्ता मनीषिणम् ॥

मनीषा बुद्धिः । सा चाष्टाङ्गगुणयुक्ता विवक्षिता । तथा चोक्तम्-

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।

ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥ इति ।
श्रोतुमिच्छा शुश्रूषा ।
पार्श्वायता दीर्घमायुरैश्वर्यं चोर्ध्वमायता ।
गवाढ्यं तमधस्तात्तु करोतीति विदुर्बुधाः ॥
शतपत्रकर्णिकाभा नाभिर्यस्य महामते ।
भूपतिं कुरुते सा तु पुरुषं नात्र संशयः
वर्तुला यदि गम्भीरा नाभिः पुंसां प्रशस्यते ।
उत्ताना विरला नाभिः सर्वदा दुःखितो भवेत् ॥ इति ।
यस्येति, शेषः ।

इति नाभिलक्षणम् ।

अथ कुक्षिलक्षणम् ।

उदरपार्श्वभागौ कुक्षी ।
भविष्ये,
समकुक्षिर्भवेद्भोगी निम्नकुक्षिर्धनापहः ।
मायावीभसमा कुक्षिस्तथा कुहककृत्सदा ॥
कुहकं कपटम् ।
राजा चोन्नतकुक्षिस्तु सार्वभौमो महाबलः ॥ इति ।
सामुद्रतिलके,
कुक्षिर्यस्य गभीरा विनिपातं स लभते नरः प्रायः ।
उत्ताना यस्य पुनर्नारीवृत्तेन जीवते सोऽपि ॥ इति ।

इति कुक्षिलक्षणम् ।

अथ पार्श्वलक्षणम् ।

पार्श्वौ कक्षाधोभागौ ।
भविष्ये,
मांसलैर्मृदुभिः पार्श्वैः राजा स्यान्नात्र संशयः ।

गारुडे,

धनिनो विपुलैः पार्श्वैः निःस्वा वक्रैश्च निम्नगैः ।
नृपः पार्श्वैः समांसलैः ॥
मृदुभिः सुसमैश्चैव दक्षिणावर्त्तरोमभिः ।
विपरीतैः परप्रेष्या निर्द्रव्याः सुखवर्जिताः ॥ इति ।

इति पार्श्वलक्षणम् ।

अथोदरलक्षणम् ।

भविष्ये,

मृगोदरो नरो धन्यो मयूरोदर एव च ।
व्याघ्रोदरो नरपती राजा सिंहोदरो भवेत् ॥
मण्डूकसदृशो यस्य पुरुषस्योदरो भवेत् ।
स भवेत्पार्थिवः पृथ्व्यां समुद्रवचनं यथा ॥
समोदरो भवेद्भोगी निःस्वः स्याद्वै घटोदरः । इति ।

वराहसंहितायाम्,

समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः ।
सर्पोदरा दरिद्रा भवन्ति बह्वाशिनश्चैव ॥ इति ।

जठरमुदरम् । घटः प्रसिद्धः । पिठरः उषा, मृन्मयपात्रम् । मध्यदेशभाषायां हण्डीति प्रसिद्धा ।

सामुद्रनिलके,

जठरं यस्य समं स्यादाभितः स पुमान्महार्थाढ्यः ।
भेकोदरो नरपतिर्वृषभमयूरोदरो भोगी ॥
वृत्तोदरः सुखी स्यान्मीनव्याघ्रोदरः सुभगः ।
भुजगजठरो भुजिष्यो बहुभोजी जायते मनुजः ।
श्ववृकोदरो दरिद्रः शृगालतुल्योदरोपेतः ॥
पापः कृशोदरः स्यान्मृगशिशुसदृशोदरश्चौरः । इति ।

इत्युदरलक्षणम् ।

अथ मध्यलक्षम् ।

सामुद्रतिलके,

जायते यस्य मध्यं मुशलोदरसोदरं तनुत्वेन ।
स पुमान्नृपतिर्ज्ञेयो विपर्यये भवति विपरीतः ॥ इति ।

इति मध्यलक्षणम् ।

अथ बलिलक्षणम् ।

वराहसंहितायाम्,

शास्त्रान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथासङ्ख्यम् ।
एकद्वित्रिचतुर्भिर्बलिभिर्विद्यान्नृपत्वमबलीभिः ॥
विषमबलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः ।
ऋजुबलयः सुखभाजः परदारद्वेषिणश्चैव ॥ इति ।

उत्पले समुद्रः,

अबलिस्तु नृपः प्रोक्तो यज्वा दानैकतत्परः । इति ।

इति बलिलक्षणम् ।

अथ हृदयलक्षणम् ।

भविष्ये,

समोन्नतं तु हृदयमकम्पं पृथुरेव हि ।
अरोमशं मांसलं च पार्थिवानां न संशयः ॥
विस्तीर्णं हृदयं येषां मांसलोपचितं भृशम् ।
शतायुषां विजानीयाद्भाग्यवतो महीपतीन् ॥
खररोमचितं वीर शिरालं च विशेषतः ।
अधमानां भवेदेवं हृदयं च षडानन ॥ इति ।

इति हृदयलक्षणम् ।

अथ वक्षोलक्षणम् ।

भविष्ये,
समवक्षसोऽर्थयुताः पीनैः शूराः स्मृता बुधैः ।
तनुभिर्द्रव्यहीनाः स्युरसमैश्चाप्यकिञ्चनाः ॥
वध्यन्ते चापि शस्त्रेण नात्र कार्या विचारणा । इति ।
गारुडे,
सुपुत्राः समवक्षोभिः पीनैर्वक्षोभिरूर्जिताः । इति ।
सामुद्रतिलके,
पृथुलं भवत्युरःस्थलमचलशिलाकठिनमुन्नतं नृपतेः ।
मृगनाभिपत्रलतासमानमुरो रोमराजिचितम् ॥
उरसा समेन धनवान् पीनेन भटस्तथोर्द्धरोम्णा स्यात् । इति ।

इति वक्षोलक्षणम् ।

अथ स्तनलक्षणम्

जगन्मोहने समुद्रः,
उन्नतोपचिता येषां घनाः स्निग्धाः पयोधराः ।
पुरुषा धनिनः शूरा भोगवन्तश्च कर्मभिः ॥ इति ।
सामुद्रतिलके,
वृत्ताः स्तनाः प्रशस्ताः सुस्निग्धाः कोमलाः समाः पुंसाम् ।
विषमाः परुषा विकटाः प्रायो दुःखाय जायन्ते ॥ इति ।

इति स्तनलक्षणम् ।

अथ चूचुकलक्षणम् ।

चूचुकं स्तनाग्रम् ।
भविष्ये,
उद्बद्धचूचुका ये तु सुभगास्ते प्रकीर्तिताः ।
निर्द्धना विषमैर्दीर्घैर्भवन्तीह सुवीरज ॥
पीनैरुपचितैर्निम्नैश्चूचुकैर्देवसत्तम ।

राजानः सुखिनश्चापि भवन्तीह न संशयः ॥ इति ।
गारुडे,
अनुद्धतैश्चूचुकैश्च भवन्ति सुभगा नराः । इति ।

इति चूचुकलक्षणम् ।

अथजत्रुलक्षणम् ।

जत्रुणी स्कन्धसन्धी ।
भविष्ये,
जत्रुभिर्विषमैर्वीर जातिहीनो भवेन्नरः ।
यस्योन्नतं भवेदङ्ग स भोगी नात्र संशयः ॥
निर्मांसैर्विषमैर्वीर निःस्वो निम्नैः प्रचक्ष्यते ।
धनवांश्च भवेत् हीनैः सुखभोगसमन्वितः ॥ इति ।
गारुडे,
विषमैर्जत्रुभिर्निःस्वा अस्थिबद्धैश्च मानवाः । इति ।

इति जत्रुलक्षणम् ।

अथ स्कन्धलक्षणम् ।

भविष्ये,
अव्युच्छिन्नौ तथा श्लिष्टौ विपुलौ च सुराधिप ।
शूराणमीदृशावंसौ नगजानन्दवर्द्धन ॥
निर्मांसौ रोमशौ भग्नावल्पौ वापि विशेषतः ।
निर्द्धनस्येदृशावंसौ प्रख्यातौ व्योमकेशज ॥ इति ।
जगन्मोहने समुद्रः,
वृषस्कन्धा गजस्कन्धाः कोलस्कन्धाश्च ये नराः ।
सर्वे ते पार्थिवा ज्ञेया महाभोगा महाधनाः ॥ इति ।
उत्पले समुद्रः
कदलीस्तम्भसङ्काशा अजस्कन्धाश्च ये नराः ।

राजानस्ते हि विज्ञेया महाकोशा महाबलाः ॥ इति ।

इति स्कन्धलक्षणम् ।

अथ कक्षालक्षणम् ।

बाहुमूले कक्षे ।

भविष्ये,

अस्वेदनोन्नते वत्स तथा पीने षडानन ।
समरोमसुगन्धे च कक्षे नित्यं क्षमाभृताम् ॥ इति ।

गारुडे,

कक्षाऽश्वत्थदला श्रेष्ठा सुगन्धमृदुरोमिका ।
अन्यथा त्वर्थहीनानाम् । इति ।
समकक्षाश्च भोगाढ्या निम्नकक्षा धनोज्झिताः ।
नृपाश्चोन्नतकक्षाः स्युर्जिह्मा विषमकक्षकाः ॥ इति ।

इति कक्षालक्षणम् ।

अथ बाहुलक्षणम् ।

भविष्ये,

उद्बद्धबाहुर्यस्तु स्याद्बधबन्धमवाप्नुयात् ।
दीर्घबाहुर्भवेद्राजा समुद्रवचनं यथा ॥
प्रलम्बबाहुर्विज्ञेयो नरः सर्वगुणान्वितः ।
ह्रस्वबाहुर्भवेद्दासः परप्रेष्यकरोऽपि वा ॥
समवृत्तभुजो यस्तु दीर्घपीनभुजाश्रयः ।
सम्पूर्णबाहू राजा स्यादित्याह स पयोनिधिः ॥
इभाङ्गसदृशौ वृत्तौ समौ पीनौ च सुव्रत ।
आजानुलम्बिनौ बाहू पार्थिवानां न संशयः ॥
इभाङ्गं गजकरः ।
दरिद्राणां रोमशौ ह्रस्वौ बाहू ज्ञेयौ सुरोत्तम ।

तस्कराणां च विषमौ स्थूलौ सूक्ष्मौ च सुव्रत ॥ इति ।

स्कान्दे,

वामावर्त्तौ सुप्रलम्बौ दोषौ दिग्रक्षणोचितौ । इति ।

दोषौ हस्तौ ।

सामुद्रतिलके,

गोपुच्छाकृति पीनं हीनं खररोमाभिदीर्घम् ।
निर्मग्नशिरासन्धि प्रशस्यते भुजयुगं पुंसाम् ॥ इति ।

इति बाहुलक्षणम् ।

अथ मणिबन्धलक्षणम् ।

मणिबन्धः पाणिमूलम् ।

गारुडे,

मणिबन्धैर्निगूढैश्च सुश्लिष्टैश्च सुसन्धिभिः ।
नृपा हीनैः करच्छेदः सशब्दैर्धनवर्जिताः ॥ इति ।

वराहसंहितायाम्,

मणिबन्धनैर्निगूढैः सुश्लिष्टसुसन्धिभिर्भूपाः ।
हीनैर्हस्तच्छेदः श्लथैः सशब्दैश्च निर्द्रव्याः ॥ इति ।

सामुद्रतिलके,

रेखाभिः पूर्णाभिस्तिसृभिः करमूलमङ्कितं यस्य ।
धनकाञ्चनरत्नयुतं श्रीः पतिमिव भजति लुब्धं च ॥
त्रिपरिक्षेपा व्यक्ता यवमाला भवति यस्य मणिबन्धे ।
नियतं महार्थसहितः स सार्वभौमो नराधिपतिः ॥
करमूले यवमाला द्विपरिक्षेपा मनोहारा यस्य ।
मनुजः स राजमन्त्री विपुलमतिर्जायते मतिमान् ॥
सुभगैकपरिक्षेपा यवमाला यस्य पाणिमूले स्यात् ।
भवति धनधान्ययुतः श्रेष्ठो जनपूजितो मनुजः ॥

यदि तिस्रो यवमाला मणिबन्धादुभयतो विनिःसृत्य ।
परिवेष्टयन्ति पृष्ठं तदधिकमपीह फलं ज्ञेयम् ॥ इति ।
विवेकविलासेऽपि,
मणिबन्धे यवश्रेण्यः तिस्रश्चेत्स नृपो भवेत् ।
यदि ताः पाणिपृष्ठेऽपि ततोऽधिकतरं फलम् ॥
द्वाभ्यां तु यवमालाभ्यां राजमन्त्री धनी बुधः ।
एकया यवपङ्क्त्या तु श्रेष्ठो बहुधनोचितः ॥ इति ।

इति मणिबन्धलक्षणम् ।

अथ करलक्षणम् ।

गारुडे,
कपितुल्यकरा भूपा व्याघ्रतुल्यकरा मलाः ॥ इति ।
मलाः पापिनः । स्कान्दे—
काशीखण्डे,
कमठीपृष्ठकठिनावकर्मकरणौ करौ ।
राज्यहेतू शिशोरस्य पादौ चाध्वनि कोमलौ ॥ इति ।
कमठः कच्छपः ।
सामुद्रतिलके,
पाणी नृपतेः श्लक्ष्णौ निःस्वेदौ मांसलावपच्छिद्रौ ।
अरुणावकर्मकठिनावुष्णौ दीर्घाङ्गुली स्निग्धौ ॥
विस्तीर्णौ ताम्रनखौ स्यातां कपिवत्करौ धनाढ्यस्य ।
शार्दूलवद्विरूक्षौ विकृतौ निःस्वस्य निर्मांसौ ॥ इति ।

इति करलक्षणम् ।

अथ करपृष्ठलक्षणम् ।

सामुद्रतिलके,
अथ शस्तं करपृष्ठं विस्तीर्णं पीनमुन्नतं स्निग्धम् ।

निर्गूढशिरं परितः क्षोणिपतेः फणिफणाकारम् ॥
मणिवन्धसमं निम्नं निर्मांसं रोमसञ्चितं सशिरम् ।
करपृष्ठं निःस्वानां रूक्षं परुषं विवर्णं स्यात् ॥ इति ।

विवेकविलासेऽपि,

करपृष्ठं तु विस्तीर्णं पीनं स्निग्धं समुन्नतम् ।
श्लाघ्यं गूढशिरं नृणां फणभृत्फणसन्निभम् ॥
विवर्णं परुषं रूक्षं रोमशं मांसवर्जितम् ।
मणिबन्धसमं निम्नं न श्रेष्ठं करपृष्ठकम् ॥ इति ।

इति करपृष्ठलक्षणम् ।

अथ करतललक्षणम् ।

भविष्ये,

निम्नं करतलं यस्य पितृवित्तं च तस्य वै ।
स भवेद्देवशार्दूल तथा हीनश्च मानवः ॥
अतिवृत्तेन निम्नेन धनी करतलेन वै ।
उत्तानकतलो दाता भवतीह न संशयः ॥
विषमा भवन्ति विषमैर्निःस्वाश्चापि विशेषतः ।
विषमाः क्रूराः ।
करतलैर्देवशार्दूल लाक्षाभैरीश्वराः स्मृताः ॥
अगम्यागामिनः पीतै रूक्षैर्निर्द्धनता स्मृता ।
अपेपग्यानं कुर्वन्ति नीलकृष्णैस्तथैव च ॥ इति ।

सामुद्रतिलके,

बहुरेखापरिकलितं पाणितलं भवति यस्य मनुजस्य ।
यदि वा रेखाहीनं सोऽल्पायुर्दुःखितो निःस्वः ॥ इति ।

विवेकविलासेऽपि,

पाणेस्तलेन शोणेन धनी नीलेन मद्यपः ।

पीतेनागम्यनारीगः कल्माषेणावरेप्सितः ॥
दातोन्नते तले पाणेर्निम्ने पितृधनेप्सितः ।
धनी संवृतनिम्ने स्याद्विषमे निर्धनः पुनः ॥ इति ।

इति करतललक्षणम् ।

अथ रेखालक्षणम् ।

भविष्यपुराणे,

निम्नस्निग्धा भवेन्नृणां रेखा करतले गुह ।
धनिनां न दरिद्राणामित्याह स पयोनिधिः ॥
यस्य मीनसमा रेखा कर्मसिद्धिस्तु दृश्यते ।
धनवान् स तु विज्ञेयो बहुपुत्रश्च मानवः ॥
तुला यस्य तु वै दीर्घा करमध्ये हि दृश्यते ।
वाणिज्यं सिध्यते तस्य पुरुषस्य न संशयः ॥
सूर्यः पाणितले यस्य द्विजस्य तु विशेषतः ।
सोमः पाणितले यस्येति पाठान्तरम् ।
यज्ञयाजी भवेन्नित्यं बहुवित्तश्च मानवः ॥
शैलो वाप्यथवा वृक्षः करमध्ये हि दृश्यते ।
अचलां श्रियमाप्नोति बहुभृत्यसमन्वितः ॥
शक्तितोमरबाणासिरेखा चापोपमा भवेत् ।
यस्य हस्ते महाबाहो स जयेद्विग्रहे रिपून् ॥
ध्वजो वाप्यथ वा शङ्खः करमध्ये तु दृश्यते ।
समुद्रयायी स भवेद्बली च सततं गुह ॥
श्रीवत्समर्थं वा पद्मं वज्रं वा चक्रमेव वा ।
रथो वाप्यथ वा कुम्भो यस्य हस्ते प्रकाशते ॥

श्रीवत्सं चक्राकारो रेखाविशेषः । मृदुरोमावर्त्तविशेषः श्रीवत्समिति तु रायमुकुटे ।

राजानं तं विजानीयात्परसैन्यविमर्दनम् ।
दक्षिणे तु कराङ्गुष्ठे यवो यस्य तु दृश्यते ॥
सर्वविद्याप्रवक्ताऽसौ भवेद्वै नात्र संशयः । इति ।

वराहसंहितायाम्,

अङ्गुष्ठयवैराढ्याः सुतवन्तोऽङ्गुष्ठमूलजैश्च यवैः ।
तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा नृपतेः ॥
मीनयुगाङ्कितपाणिर्नित्यं सत्रप्रदो भवति ।
वज्राकारा धनिनां विद्याभाजां तु मीनपुच्छनिभा ॥
शङ्खातपत्रशिबिकागजाश्वपद्मोपमा नृपतेः ।
कलशमृणालपताकाङ्कुशोपमाभिर्भवन्ति भूपालाः ॥
दामनिभैश्च गवाढ्याः स्वस्तिकरूपाभिरैश्वर्यम् ।
स्वस्तिकश्चतुष्कः ।
चक्रासिपरशुतोमरशक्तिधनुःकुन्तसन्निभा रेखाः ।
कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः ॥
मकरध्वजकोष्ठागारसान्निभाभिर्महाधनोपेताः ।
कोष्ठागारं कोशगृहम् ।
वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन ॥

अङ्गुष्ठमूले ब्रह्मतीर्थम् । तच्चेत् यज्ञवेदीसदृशं तदाऽग्निहोत्रिणो भवन्ति ।

वापीदेवकुलाढ्यैर्धर्मं कुर्वन्ति च त्रिकोणाभिः ।

देवकुलं देवप्रासादः । आदिपदेन सिंहासनरथहयादीनां ग्रहणम् । त्रिकोणाः शृङ्गाटकाभा इति यावत् ।

अङ्गुष्ठमूलरेखाः पुत्राः स्युर्दारिकाः सूक्ष्माः ॥ इति ।

गरुडपुराणे,

कुलरेखा तु प्रथमा अङ्गुष्ठादनुवर्त्तते ।

मध्यमा धनरेखा तु आयूरेखा ततः परम् ॥
यः सुमीनाङ्कितकरो भवेत्सत्रप्रदो नरः ।
वज्राकारश्च धनिनां मत्स्यपुच्छोऽणिमा बुधः ॥

वज्राकारः वज्रसदृशरेखाङ्कितः । अणिमा ऐश्वर्यम् । बुधो विद्वान् । भवतीति, शेषः । स्कान्दे—

काशीखण्डेऽपि,

श्रीवत्सवज्रचक्राब्जमत्स्यकोदण्डदण्डवान् ।
तथाऽस्य करगा रेखा यथा स्युस्त्रिदिवस्पतेः ॥ इति ।

जगन्मोहने समुद्रः,

कनिष्ठामूलसम्बद्धा आयूरेखा च कीर्तिता ।
द्वितीया धनरेखा च तृतीया कुलवर्द्धिनी ॥
यदि पूर्णाश्च रेखाः स्युः पूर्णं तस्य सुलक्षणम् ।
त्यक्त्वाऽधो मणिबन्धं या रेखा स्यात्करगामिनी ॥
सुवर्णरत्नराज्यश्रीदायिका सा न संशयः ।
अङ्गुष्ठस्यापि मध्येऽपि ब्रूते नृपतिमुत्तमम् ॥
मध्ये तर्जन्यङ्गुष्ठान्तराले ।
सैव तर्जनिकां प्राप्य दत्ते साम्राज्यमग्रिमम् ।
सेनापतिर्धनेशो वा मध्यमागतरेखया ॥
अनामिकां पुनः श्रेष्ठधनवान् सर्वदा नरः ।
सुखिनं सुभगं वापि सम्प्राप्ता सा कनिष्ठिकाम् ॥
करोति सत्यमेवैषा यद्यच्छिन्ना सुवर्णभाक् ।
भवतीति, शेषः ।
यावन्त्यो मणिबन्धायुर्लेखयोरन्तरे स्थिताः ॥
रेखा इति, शेषः ।
सहोदरगणस्तावान् विज्ञेयः पाणिपल्लवे ।

स्थिताश्चान्ते च या रेखाः कनिष्ठाजीवरेखयोः ॥
तावन्त्यो महिलास्तस्य स्त्रियास्तावन्मिता धवाः । इति ।
महिलाः स्त्रियः ।
उत्पले समुद्रः,
रक्ते पाणितले यस्य द्विजस्य तु विशेषतः ।
यज्ञयाजी भवेन्नित्यं बहुवित्तश्च मानवः ॥
श्रीवत्समथ वा पद्मं वज्रं चामरमेव वा ।
यस्य हस्ते तु दृश्येत स भवेत्पृथिवीपतिः ॥ इति ।
हेमाद्रौ—
नारदीयसंहितायाम्,
पद्ममष्टदलाकारमच्छिन्नं पाणिपल्लवे ।
अपि हीनकुले जातः क्षितिपालो भवेन्नरः ॥
अभ्यन्तरमुखं मत्स्यं यस्य पाणितले भवेत् ।
स तु लक्ष्मीमवाप्नोति समुद्रस्य वचो यथा ॥
अमत्स्यस्य कुतो विद्या अयवस्य कुतो धनम् । इति ।
प्रयोगपारिजाते,
अङ्गुष्ठोदरमध्यस्थो यवो यस्य विराजते ।
उत्पन्नभक्ष्यभोजी तु स नरः सुखमेधते ॥
रेखाभिर्बहुभिः क्लेशं स्वल्पाभिर्धनहीनता ।
रक्ताभिः सुखमाप्नोति कृष्णाभिर्दुःखितो भवेत् ॥
अङ्कुशं कुण्डलं चक्रं यस्य पाणितले भवेत् ।
तस्य राज्यं विनिर्दिष्टं समुद्रवचनं यथा ॥
मत्स्ये शतं विजानीयान्मकरे तु सहस्रकम् ।
पद्मे कोटीं विजानीयाच्छङ्खे कोटिसहस्रकम् ॥ इति ।
सामुद्रतिलके,

अधुना मीनाद्याकृतिरेखाणां लक्षणं स्फुटं वक्ष्ये ।
वामकरे नारीणां दक्षिणपाणौ नराणां तु ॥
जीवितमरणं लाभालाभं सुखदुःखमिह जगत्यखिलम् ।
कररेखाभिः प्रायः प्राप्नोति नरोऽथ नारी वा ॥
अन्तर्मुखेन मीनद्वयेन पूर्णेन पाणितलमध्यम् ।
यस्याङ्कितं भवेदिह स धनी सत्रप्रदो मनुजः ॥
अच्छिन्ना गम्भीरा पूर्णा रक्ता जदलनिभा मृदुला ।
अन्तर्वृत्ता स्निग्धा कररेखा शस्यते पुंसाम् ॥
मधुपिङ्गाभिः सुखिनः शोणाभिस्त्यागिनो गभीराः स्युः ।
सूक्ष्माभिर्धीमन्तः समाप्तमूलाभिरथ सुभगाः ॥
पल्लविता विच्छिन्ना विषमाः परुषाः समाः स्फुटितरूक्षाः ।
विक्षिप्ताश्च विवर्णा हरिताः कृष्णाश्च पुनरशुभाः ॥
आ पाणिमूलकरभान्निःसृत्याङ्गुष्ठतर्जनीमध्ये ।
नूनं भवन्ति तिस्रो गोत्रद्रव्यायुषां रेखाः ॥
भिन्नाभिश्छिन्नाभिः स्वल्पाभिर्भवन्ति कुलधनायूंषि ।
रेखाभिर्दीर्घाभिर्विपरीताभिस्तु विपरीतम् ॥
मणिबन्धान्निर्गच्छति रेखा यस्य प्रदेशिनीमूलम् ।
बहुबन्धुजनाकीर्णस्तस्य पुनर्जायतेऽभिजनः ॥
लघ्व्या पुनर्नराणां लघुरिह दीर्घो दीर्घया वंशः ।
परिभिन्नो विज्ञेयः प्रभिन्नया छिन्नया छिन्नः ॥
न च्छिन्ना न स्फुटिता दीर्घतरा न पल्लवा पूर्णा ।
ऊर्ध्वा रेखा कुरुते सहस्रजनयोपमेकाऽपि ॥
सा ब्राह्मणस्य रेखा वेदकरी क्षत्रियस्य राज्यकरी ।
वैश्यस्य महार्थकरी सौख्यकरी भवति शूद्रस्य ॥
आलिखितं काकपदं धनरेखायां तु दृश्यते यस्य ।

अर्जयति धनानि पुनस्तल्लक्षमपि स व्ययं कुरुते ॥
इह ताभिः पूर्णाभिः पूर्णां प्राप्नोति सम्पदं सदासि ।
मध्याभिर्वा मध्यां ह्रस्वाभिर्वा पुमान् ह्रस्वाम् ॥
यदि रेखा सर्वाङ्गुलिसमस्तपर्वान्तरे स्थिता व्यक्ता ।
स्पष्टो यवोऽपि पुंसां महीयसां तन्महीशत्वम् ॥
रेखाः कानिष्ठिकायुर्लेखामध्ये नरस्य यावत्यः ।
तावत्यो महिलाः स्युर्महिलायाः पुनरपि मनुष्याः ॥
रेखाभिर्विषमाभिर्विषमास्समाभिरथ समशीलाः ।
हीनतरा हीनाभिर्ध्रुवमधिकतराः समधिकाभिः ॥
पुष्टाभिर्हि पुनर्भूः कन्या रेखाभिरथ सुदीर्घाभिः ।
सुभगा सूक्ष्माभिः स्यात्स्फुटिताभिर्दुर्भगा नारी ॥
मूलेऽङ्गुष्ठस्य नृणां स्थूला रेखा भवन्ति यावत्यः ।
तावन्तः पुत्राः स्युः सूक्ष्माभिः पुत्रिकास्ताभिः ॥
यावत्यो मणिबन्धायुर्लेखान्तःप्रतिष्ठिताः स्थूलाः ।
तावत्सङ्ख्याकान् भ्रातॄन् वदन्ति सूक्ष्माः पुनर्भगिनीः ॥
रेखाभिश्छिन्नाभिः सम्भावितमृत्यवो ज्ञेयाः ।
यावत्यस्ताः पूर्णा नियतं जीवन्ति तत्सङ्ख्याः ॥
मीनो मकरः शङ्खः पद्मो वाऽन्तर्मुखः सदा फलदः ।
पाणौ बहिर्मुखो यदि तस्य फलं पश्चिमे वयसि ॥
छिन्नैर्भिन्नैः स्फुटितैरव्यक्तैः किमपि नास्ति फलमेतैः ।
जायन्ते पाणितले प्रायोऽमी सार्वभौमानाम् ॥
उडुपं वा नौका वा पोतो वा यस्य करतले पूर्णः ।
धनकाञ्चनरत्नानां पात्रं सांयात्रिकः स स्यात् ॥
सांयात्रिकः पोतवणिक् ।
जायन्ते गोमन्तः प्रासादैर्दामभिः स्फुटं मनुजाः ।

निधिनायकाः कमण्डलुकलशस्वस्तिकपताकाभिः ॥
यस्य सदण्डं छत्रं चामरयुग्मं प्रतिष्ठितं पाणौ ।
सोऽम्बुधिरसनावासां भुनक्ति भूमिं भुजिष्योऽपि ॥
विप्रस्य यस्य यूपो वेदिनिभं ब्रह्मतीर्थमपि हस्ते ।
विश्वाधिपतिर्नियतं स भवेदथ वाऽग्निहोत्रीशः ॥
भाग्येन भवन्ति यवाः पुंसामङ्गुष्ठपर्वसु स्पष्टाः ।
योपाविशेषनिमितं कर्म कृशं यशस्तुरङ्गस्य ॥
सुतवन्तः श्रुतवन्तो जायन्तेऽङ्गुष्ठमूलजैस्तु यवैः ।
मध्यगतैर्धनकाञ्चनरत्नाढ्या भोगिनः सततम् ॥
त्रिपरिक्षेपा मूलेऽङ्गुष्ठगता भवति यस्य यवमाला ।
द्विपसुसमिद्धः स पुमान् राजा वा राजसचिवो वा ॥
यस्य द्विपरिक्षेपा सैव नरो राजपूजितः स स्यात् ।
यस्यैकपरिक्षेपा यवमाला सोऽपि वित्ताढ्यः ॥
अङ्गुष्ठस्याधस्तात्काकपदं भवति यस्य विस्पष्टम् ।
स नरः पश्चिमकाले शूलेन विपद्यते सद्यः ॥
अव्यक्ताः स्युस्तनवः खण्डा रेखाः करे स्थिता यस्य ।
तिग्मांशोरिव रजनी श्रीस्तस्य पलायते सततम् ॥ इति ।

विवेकविलासेऽपि,

सूक्ष्माः स्निग्धाश्च गम्भीराः प्रलम्बा मधुपिङ्गलाः ।
अव्यावृत्तगतिच्छेदाः करे रेखाः शुभा नृणाम् ॥
त्यागाय शोणगम्भीराः सुखाय मधुपिङ्गलाः ।
सूक्ष्माः श्रियै भवेयुस्ताः सौभाग्याय समूलकाः ॥
छिन्नाः सपल्लवा रूक्षा विषमाः स्थानकच्युताः ।
विवर्णाः स्फुटिताः कृष्णा नीलास्तन्व्यश्च नोत्तमाः ॥
क्लेशं सपल्लवा रेखा छिन्ना जीवितसंशयम् ।

कदन्नं परुषा द्रव्यविनाशं विषमार्पयेत् ॥
मणिबन्धात् पितुर्लेखा करभात् विभवायुषोः ।
द्वे लेखे यान्ति तिस्रोऽपि तर्जन्यङ्गुष्ठकान्तरम् ॥
येषां रेखा इमास्तिस्रः सम्पूर्णा दोषवर्जिताः ।
तेषां गोत्रधनायूंषि सम्पूर्णान्यन्यथा न तु ॥
मणिबन्धोन्मुखा आयुर्लेखायां ये तु पल्लवाः ।
सम्पदे ते बहिर्ये ते विपदेऽङ्गुलिसम्मुखाः ॥
गत्वा मिलियोः प्रान्ते द्रव्यपित्रोश्च रेखयोः ।
गृहबन्धो विनिर्देश्यो गृहभङ्गोऽन्यथा पुनः ॥
आयुर्लेखावसानाभिर्लेखाभिर्मणिबन्धतः ।
स्पष्टाभिर्भ्रातरोऽस्पष्टतराभिर्जामयः पुनः ॥
जामयो भगिन्यः ।
अस्पष्टाभिरदीर्घाभिर्भ्रातृजाम्यायुषस्त्रुटिः ।
यवैरङ्गुष्ठमूलोत्थैस्तत्सङ्ख्याः सूनवो नृणाम् ॥
यवैरङ्गुष्ठमध्यस्थैर्विद्याख्यातिविभूतयः ॥
शुक्लपक्षे तदा जन्म दक्षिणाङ्गुष्ठजैश्च तैः ।
कृष्णपक्षे नृणां जन्म वामाङ्गुष्ठगतैर्यवैः ।
एकोऽप्यभिमुखस्तस्यावश्यं श्रीवृद्धिकारणम् ॥
सम्पूर्णौ किं पुनस्तौ द्वौ पाणिमूले स्थितौ नृणाम् ।
सिंहासनदिनेशाभ्यां नन्द्यावर्त्तेन्दुतोरणैः ॥
पाणिरेखास्थितैर्मर्त्याः सार्वभौमा न संशयः ।
आतपत्रं करे यस्य दण्डेन सहितं पुनः ॥
चामरद्वितयं चापि चक्रवर्त्ती स जायते ।
त्रिकोणरेखया सीरमुसलोलूखलादिना ॥
वस्तुना हस्तजातेन पुरुषः स्यात्कृषीबलः ।

गोमन्तः स्युर्नराः सौधैर्दामभिः पाणिसंस्थितैः ॥
कमण्डलुध्वजौ कुम्भस्वस्तिकौ श्रीप्रदौ नृणाम् ।
अनामिकान्त्यपर्वस्था प्रतिरेखा प्रभुत्वकृत् ॥
ऊर्ध्वा पुनस्तले तस्या धर्मरेखेयमुच्यते ।
रेखाभ्यां मध्यमास्थाभ्यामाभ्यां प्रोक्तविपर्ययः ॥
तर्जनीगृहबन्धान्तर्लेखा स्यात्सुखमृत्युदा ।
अङ्गुष्ठपितृरेखान्तास्तिर्यग्रेखाः पदप्रदाः ॥
अङ्गुष्ठस्य तले यस्य रेखा काकपदाकृतिः ।
तस्य स्यात्पश्चिमे काले विपत्तिः शूलरोगतः ॥

अत्र हेमाद्रिणा आयूरेखामणिबन्धमध्ये प्रदेशिनीं प्रापिणीभिस्तिसृभिर्लेखाभिः शतमायुरित्युक्तम् । तच्चोदहृतबहुवचनविरुद्धत्वान्मूलानुपलम्भाच्चोपेक्षणीयम् ।

इति कररेखालक्षणम् ।

अथाङ्गुष्ठलक्षणम् ।

सामुद्रतिलके,

ऋजुरङ्गुष्ठः स्निग्धस्तुङ्गो वृत्तः प्रदक्षिणावर्तः ।
अङ्गुष्ठेऽपि धनवतां सुघनानि समानि पर्वाणि ॥ इति ।

इत्यङ्गुष्ठलक्षणम् ।

अथाङ्गुलीलक्षणम् ।

भविष्ये,

विरलाङ्गुलयो ये तु तान् दरिद्रान् प्रचक्षते ।
धनिनस्तु महाबाहो ये घनाङ्गुलयो नराः ॥
विरलाश्च तथा रूक्षा दृश्यन्तेऽङ्गुलयः करे ।
स भवेत् दुःखितो नित्यं नरो दारिद्र्यभाजनम् ॥ इति ।

गारुडे,

हस्ताङ्गुलय एव स्युरायुर्दावलिताः शुभाः ।
मेधाविनां च सूक्ष्माः स्युर्भृत्यानां चिपिटाः स्मृताः ॥

'अवलिताः अवक्राः । आर्षत्वात्सन्धिः । मेधा अतीतानुस्मृतिः । तथा चोक्तम्—

अतीतानुस्मृतिर्मेधा तत्कालग्राहिणी मतिः ।
शुभाशुभविचारज्ञा प्रज्ञा धीरैरुदाहृता ॥ इति ।
स्थूलाङ्गुलीभिर्निःस्वाः स्युर्नताभिः शस्त्रमृत्यवः ।

नताभिः बहिः, करपश्चाद्भागे इत्यर्थः । बहिर्नम्राभिरङ्गुलीभिः शस्त्रघातेन मृत्युर्जायत इत्यर्थः । तथा चोक्तम्—

विवेकविलासे,

यच्छन्ति विरलाः शुष्काः स्थूला वक्रा दरिद्रताम् ।
शस्त्रघातं बहिर्नम्राश्चेटत्वं चिपिटाश्च ताः ॥ इति ।
अङ्गुष्ठमूलजैः पुत्री स्यादीर्घाङ्गुलिपर्वकः ।
दीर्घायुः सधनश्चैव निर्धनो विरलाङ्गुलिः ॥ इति ।

सामुद्रतिलके,

नियतं कनिष्ठिकाङ्गुलिरनामिकापर्वयुगलमुल्लङ्घ्य ।
यद्यधिकतरा पुंसां धनमधिकं जायते प्रायः ॥
दीर्घाभिरङ्गुलीभिः सौभाग्ययुतः सदीर्घपर्वाभिः ।
विरलाभिः कुटिलाभिः शुष्काभिर्भवति धनहीनः ॥
छिद्रं मिथः कनिष्ठाऽनामामध्याप्रदेशिनीनां स्यात् ।
वृद्धत्वे तारुण्ये बाल्ये क्रमशो नरस्य सुखम् ॥ इति ।

विवेकविलासे,

अनामिकान्त्यरेखायाः कनिष्ठेह यदाऽधिका ।
धनवृद्धिस्तदा पुंसां मातृपक्षो बहुस्तथा ॥
मध्यमाप्रान्तरेखाया अधिका यदि तर्जनी ।

प्रचुरस्तत्पितुः पक्षः श्रीश्च व्यत्ययतोऽन्यथा ॥
अङ्गुष्ठस्याङ्गुलीनां च यद्यूनाधिकता भवेत् ।
धनैर्धान्यैस्तथा हीनो नरः स्यादायुषाऽपि च ॥
तर्जनीमध्यमारन्ध्रे मध्यमानामिकान्तरे ।
अनामिकाकनिष्ठान्तश्छिद्रे सति यथाक्रमम् ॥
जन्मतः प्रथमे त्वंशे द्वितीयेऽथ तृतीयके ।
भोजनावसरे दुःखं केऽप्याहुः श्रीमतामपि ॥
आवर्त्ता दक्षिणाः शस्ताः साङ्गुष्ठाङ्गुलिपर्वसु । इति ।

इत्यङ्गुलीलक्षणम् ।

अथ नखलक्षणम् ।

गरुडपुराणे,

तुषतुल्यनखाः क्लीबाः कुटिलैः स्फुटितैर्नराः ।
निःस्वाश्च कुनखैस्तद्वद्विवर्णैः परतर्ककाः ॥
ताम्रैर्भूपा धनाढ्याश्च । इति ।
परतर्ककाः परोपजीविनः, अस्वतन्त्रा इति यावत् ।

गर्गसंहितायाम्,

शूर्पशुक्तीतुषनखा नैकवर्णा महाबलाः ।
स्फुटितार्धनखाश्चैव स्मृता द्रव्यविवर्जिताः ॥
निर्मलैर्लोहिताभैश्च नखैर्भवति पार्थिवः । इति ।

सामुद्रतिलके,

विद्रुमरुचयः श्लक्ष्णाः पाणिनखाः कच्छपोन्नताः स्निग्धाः ।
साशिखाः क्रमेण विपुलाः पर्वार्धमिता महेशानाम् ॥
सशिखाः साग्राः ।
दीर्घाः कुटिला रूक्षा शुक्तिनिभा यस्य करनखा विशिखाः ।
तेजोमृजाविहीनाः स हीयते धान्यधनभोगैः ॥

पुष्पयुतैर्दुःशीलाः श्वेतैः श्रवणास्तुषोपमैः क्लीबाः।
पुष्पयुतैः श्वेतबिन्दुयुक्तैः। श्रवणाः परवार्त्ताकर्णनतत्पराः; सूचका इत्यर्थः।
अपसव्यसव्यकरयोर्नखेषु सितबिन्दवश्चरणयोर्वा।
आगन्तवः प्रशस्ताः पुरुषाणां भोजराजमतम्॥ इति।
विवेकविलासेऽपि,
ताम्रास्निग्धोच्छिखोत्तुङ्गपर्वार्धेत्था नखाः शुभाः।
श्वेतैर्यतित्वमस्थानैर्नखैः पीतैः सरोगता॥
पुष्पितैर्दुष्टशीलत्वं क्रौर्यं व्याघ्रोपमैर्नखैः।
शुक्त्याभैः श्यामलैः स्थूलैः स्फुटिताग्रैश्च नीलकैः॥
अद्योतरूक्षवक्रैश्च नखैः पातकिनोऽधमाः।
तर्जन्यादिनखैर्भग्नैर्जातमात्रस्य तु क्रमात्॥
अर्द्धत्र्यंशचतुर्थांशाष्टांशाः स्युः सहजायुषः।
अङ्गुष्ठस्य नखे भग्ने धर्मतीर्थरतो नरः॥
कूर्म्मोन्नतेऽङ्गुष्ठनखे नरः स्याद्भाग्यवर्जितः। इति।

इति नखलक्षणम्।

अथ पृष्ठलक्षणम्।

भविष्ये,
व्याघ्रपृष्ठो नरो यस्तु सेनायाश्चैव नायकः।
सिंहपृष्ठो नरो यस्तु बन्धनं तस्य निर्दिशेत्॥
कूर्मपृष्ठास्तु राजानो धनसौभाग्यभोगिनः।
भवेदरोमशं पृष्ठं धनिनां रोमसंहतम्॥ इति।
रोमसंहतं रोमशम् दरिद्राणामिति शेषः।
जगन्मोहने समुद्रः,
अश्वव्याघ्रसमः पृष्ठः स नरोऽवनिनायकः। इति।

उत्पले समुद्रः,

सुस्निग्धं मांसलं पृष्ठमभग्नं च अलोमशम् ।
सधनानां विपर्यस्तं निर्धनानां प्रकीर्तितम् ॥ इति ।

विपर्यस्तमुक्तलक्षणविपरीतम् ।

इति पृष्ठलक्षणम् ।

अथ कृकाटिकालक्षणम् ।

कृकाटिका अवटुः ।

सामुद्रतिलके,

नियतं कृकाटिका रोमशिरासंयता नृणां सापि ।
कुरुते कुटिला विकटा विसङ्कटा रोगदारिद्र्यम् ॥ इति ।

इतिकृकाटिकालक्षणम् ।

अथ ग्रीवालक्षणम् ।

भविष्ये,

चिपिटग्रीवो हि कृशो मतो लोकस्य वै गुह ।

चिपिटग्रीवको निःस्वः शिरालग्रीव एव च—इति पाठान्तरम् ।

शूरः स्यान्महिषग्रीवो मृगग्रीवो भयातुरः ।
ह्रस्वग्रीवस्तु धनवान् स सुखी भोगवांस्तथा ॥
ग्रीवायां विरला यस्य कम्बुरेखाः समाहिताः ।
स भवेत्पार्थिवो भूमौ सर्वदुष्टनिवर्हणः ॥
दीर्घग्रीवाः बकग्रीवाः शशग्रीवाश्च ये नराः ।
शुष्कग्रीवा कृशग्रीवाः सर्वे ते निर्द्धनाः स्मृताः ॥ इति ।

कम्बुग्रीवलक्षणं स्पष्टमेवाह—

उत्पले समुद्रः,

वलित्रयचितग्रीवः कम्बुग्रीवो हि कथ्यते । इति ।

गरुडपुराणे,

निम्नाश्चिपिटकण्ठः स्यात् शिराशुष्कगलः सुखी ।

निम्नो नीचः निकृष्ट इति यावत् । शिराशुष्कगलः शिराशुष्कः शिरारहितः गलः कण्ठो यस्येति सः ।

शूरः स्यान्महिषग्रीवः शस्त्रान्तो मृगकण्ठकः ।
कम्बुग्रीवोऽथ नृपतिर्लम्बकण्ठोऽतिभक्षणः ॥ इति ।

जगन्मोहने समुद्रः,

ग्रीवा स्याद्वर्त्तुला यस्य पूर्णकुम्भसमा भवेत् ।
सुधनं तं विजानीयादायुष्मन्तं च मानवम् ॥ इति ।

उत्पले समुद्रः,

शूरस्तु महिषग्रीवः शस्त्रान्तो वृषकन्धरः । इति ।

सामुद्रतिलके,

पिशुनो वक्रग्रीवः शस्त्रविनाशो मृगग्रीवः ।
रासभकरभग्रीवो दुःखी स्याद्दाम्भिको बकग्रीवः ॥
शुष्कशिरालग्रीवश्चिपिटग्रीवश्च धनविहीनः । इति ।

इति ग्रीवालक्षणम् ।

अथ चिबुकलक्षणम् ।

अधरादधः कण्ठोपरि चिबुकम् । तल्लक्षणमुक्तम्—

उत्पले समुद्रेण,

निर्मांसैश्चिबुकैर्दीर्घैर्निर्द्रव्याश्चाध्ववासिनः ॥
समांसलैर्धनोपेता बहुपुत्रसमन्विताः ॥ इति ।

सामुद्रतिलके,

पुण्यवतामिह चिबुकं वृत्तं मांसलमदीर्घलघुमृदुलम् ।
अतिकृशदीर्घस्थूलं द्विधाग्रभागं दरिद्राणाम् ॥ इति ।

इति चिबुकलक्षणम् ।

अथ हनुलक्षणम् ।

सामुद्रतिलके,

हनुयुगलं सुश्लिष्टं चिबुकोभयपार्श्वास्थितं पुंसाम् ।
दीर्घं वक्रं शस्तं पुनरशुभं भवति विपरीतम् ॥ इति ।

इति हनुलक्षणम् ।

अथ कूर्चलक्षणम् ।

सामुद्रतिलके,

कूर्चं प्रलम्बमुज्ज्वलमस्फुटिताग्रं निरन्तरं मृदुलम् ।
स्निग्धं पूर्णं सूक्ष्मं सुमेचकं विशिष्यते पुंसाम् ॥ इति ।

इति कूर्चलक्षणम् ।

अथ कपोललक्षणम् ।

भविष्ये,

यस्य गण्डौ च सम्पूर्णौ पद्मपत्रसमप्रभौ ।
कृपिभोगी भवेन्नित्यं बहुवित्तश्च मानवः ॥
सिंहव्याघ्रगजेन्द्राणां कपोलः सदृशो यदि ।
महाभोगी स विज्ञेयः सेनायाश्चैव नायकः ॥ इति ।

गारुडे,

भोगी त्वनिम्नगण्डः स्यान्मन्त्री सम्पूर्णगण्डकः । इति
अनिम्नगण्ड उन्नतगण्डः ।

सामुद्रतिलके,

सुखिनः समुन्नतैः स्युः परिपूर्णभोगिनश्च मांसयुतैः ।
सिंहद्विपेन्द्रतुल्यैर्गण्डैर्देशाधिपा धन्याः ॥
निम्नौ यस्य कपोलौ निर्मांसौ स्वल्पकूर्चरोमाणौ ।
पापास्ते दुःखजुषो भाग्यविहीनाः परप्रेष्याः ॥ इति ।

इति कपोललक्षणम् ।

अथ मुखलक्षणम् ।

तत्प्रशंसा च हेमाद्रौ स्मर्यते,

अथ लक्षणसम्पन्नं शरीरं यस्य देहिनः ।
मुखं चेल्लक्षणोपेतं स सुखी मुखजैर्गुणैः ॥ इति ।

गर्गसंहितायां मुखमधिकृत्य—

परमेतत् शरीरस्य प्राणायतनमुच्यते ।
मुखमालपनं श्रेष्ठं मुखं च पुरुषः स्मृतम् ॥
यन्मुखं मांसलं स्निग्धं सुप्रभं प्रियदर्शनम् ।
वर्णाढ्यं सन्धिविश्लिष्टमजस्रं सुखभोगिनाम् ॥ इति ।

भविष्ये,

वदनं मण्डलं यस्य धर्म्मशीलं तमादिशेत् ।
मण्डलं वर्त्तुलम् ।
महावक्त्रा नरा ये तु दुर्भगास्ते न संशयः ॥
हरिवक्त्रा जिह्मवक्त्रा विकृतास्यास्तथा नराः ।
हरिरश्वः ।
भग्नवक्त्राः करालास्याः सर्वे ते तस्कराः स्मृताः ।
सम्पूर्णवक्त्रा राजानो गजसिंहाननास्तथा ॥
छागवानरवक्त्राश्च निर्द्धनाः परिकीर्त्तिताः ।
वदनं तु समं श्लक्ष्णं सौम्यं संवृत्तमेव हि ॥
पार्थिवानां महाबाहो विपरीतं च दुःखिनाम् ।
स्त्रीमुखं पुत्रनाशाय मण्डलं सौम्यतां व्रजेत् ॥
द्रव्यनाशाय वै दीर्घं पापदं भयदं तथा ।
धूर्त्तानां चतुरस्रं स्यात्पुत्रदारहरं शृणु ॥
निम्नं चक्रं तु देवेश पुत्रदारहरं भवेत् ।
ह्रस्वं भवति नाशाय पूर्णं कान्तं च भोगिनाम् ॥ इति ।

गरुडपुराणे,

महामुखं दुर्भगानां स्त्रीमुखं पुत्रमाप्नुयात् ।
भीरुवक्त्रं पापिनां स्याद् धूर्त्तानां चतुरस्रकम् ॥
निम्नं वक्त्रमपुत्राणां कृपणानां च ह्रस्वकम् । इति ।

स्त्रीमुखं मातृमुखसदृशमुखं ज्ञेयम् । तस्य तु—

जननीमुखानुरूपं मुखकमलं भवति यस्य मनुजस्य ।
प्रायो धन्यः स पुमानित्युक्तमिदं समुद्रेण ॥

इति सामुद्रतिलके प्राशस्त्याभिधानात् । यत्तु पूर्वोदाहृतं भविष्यवचनम्—

स्त्रीमुखं पुत्रनाशाय—

इति, यदपि वराहवचनम्—

स्त्रीमुखमनपत्यानां शाठ्यवतां मण्डलं परिज्ञेयम् ।

इति, तदुभयमपि मातृव्यतिरिक्तस्त्रीसदृशमुखविषयमित्यविरोधः ।

जगन्मोहने समुद्रः,

मृगमूषकवक्त्राश्च ते नरा दुःखभागिनः । इति ।

उत्पले समुद्रः,

कृपणानां तथा ह्रस्वं चिपिटं परजीविनाम् । इति ।

सामुद्रतिलके,

रासभकरभप्लवगव्याघ्रमुखा दुःखभागिनः पुरुषाः ।
जिह्ममुखा विकृतमुखाः शुष्कमुखा हयमुखानिःस्वाः॥इति।

इति मुखलक्षणम् ।

अथाधरलक्षणम् ।

भविष्ये,

रक्ताधरो नरपतिर्धनवान् कमलाधरः । इति ।

गारुडे,
सुस्निग्धैरधरैर्नृपाः ।
बिम्बोपमैश्च स्फुटितैरोष्ठै रूक्षैश्च खण्डितैः ॥
विवर्णैर्धनहीनाश्च । इति ।
वराहोऽप्याह—
बिम्बोपमैरवक्रैरधरैर्भूपास्तनुभिरस्वाः । इति ।
सामुद्रतिलके,
बिम्बाधरो धनाढ्यः प्रज्ञावान् पटलाधरो भवति ।
प्राज्यं राज्यं लभते प्रवालवर्णाधरस्तु नरः ॥
यस्याधरोत्तरोष्ठौ व्यङ्गुलमानौ सुकोमलौ मसृणौ ।
मृदुलसममसृणकोणौ स जायते प्रायशो धनवान् ॥ इति ।

इत्यधरलक्षणम् ।

अथोत्तरोष्ठलक्षणम् ।

वराहसंहितायाम्,
ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धनपरित्यक्ताः । इति ।
उत्पले समुद्रः,
उत्तरोष्ठैर्लोहितैश्च धनिनः सौख्यसंयुताः । इति ।
सामुद्रतिलके,
पीनोष्ठः सुभगः स्याल्लघ्वोष्ठो भोगभाजनं मनुजः ।
अतिविषमोष्ठो भीरुर्लम्बोष्ठो दुःखितो भवति ॥ इति ।

इत्युत्तरोष्ठलक्षणम् ।

अथ श्मश्रुलक्षणम् ।

भविष्ये,
अस्फुटिताग्रं स्निग्धं श्लक्ष्णं तथा गुह्य ।
सम्पूर्णं च तथा कृष्णं श्मश्रु भूमिपतेर्गुह्य ॥

रक्तैः स्वल्पैस्तथा रूक्षैः श्मश्रुभिर्भीमनन्दन ।
नराश्चौरा भवन्तीह परदाररतास्तथा ॥ इति ।

इति श्मश्रुलक्षणम् ।

अथ दन्तलक्षणम् ।

भविष्ये,

कुन्दकुड्मलसङ्काशैः प्रकाशैर्दशनैर्नृपाः ।
ऋक्षवानरदन्ताश्च नित्यं क्षुत्परिपीडिताः ॥
हस्तिदन्ताः खरदन्ताः स्निग्धदन्ता गुणान्विताः ।
सर्वे ते धनिनो ज्ञेयाः समुद्रवचनं यथा ॥
करालैर्विरलै रूक्षैर्दशनैर्दुःखभागिनः ।
द्वात्रिंशद्दन्ता राजानः सैकत्रिंशश्च भोगवान् ॥
त्रिंशद्दन्ता नरा नित्यं सुखदुःखस्य भागिनः ।
ऊनत्रिंशैश्च दशनैः पुरुषा दुःखभागिनः ॥

गारुडे,

दन्ताः स्निग्धा घनाः शुभाः ।
तीक्ष्णदंष्ट्राः समाः श्रेष्ठाः । इति ।

जगन्मोहने समुद्रः,

दक्षिणोन्नतदन्ताश्च महाभोगा महाबलाः ।
स्तोकदन्ता अदन्ताश्च ये नराः श्यामदन्तकाः ॥
मूषिकोपमदन्ताश्च ते पापाः परिकीर्त्तिताः । इति
मूषिका अल्पमूषकाः ।

सामुद्रतिलके,

द्वात्रिंशता नरपतिर्दशनैस्तैरेकविरहितैर्भोगी ।
स्यात्त्रिंशता तनुधनोऽष्टाविंशत्या सुखी पुरुषः ॥
दारिद्र्यदुःखभाजनमेकोनत्रिंशता सदा दशनैः ।

ऊर्ध्वमधः शस्तैरपि विहीनसङ्ख्यैर्नरो दुःखी ॥
स्यातां द्विजावधः प्राक् द्वादशके मासि राजदन्ताख्यौ ।
शस्तावूर्ध्वं न शुभौ जन्मन्येवोद्गतौ तद्वत् ॥
सर्वे भवन्ति दशनाः पूर्णे वर्षद्वये जनिप्रभृति ।
आसप्तमदशमान्तं निपत्य पुनरुद्गमं यान्ति ॥ इति ।

इति दन्तलक्षणम् ।

अथ जिह्वालक्षणम् ।

भविष्ये,

कृष्णजिह्वो भवेत्प्रेष्यः शबलया तु जिह्वया ।
भवेत्पापस्य कर्त्ता वै स्थूलजिह्वश्च रूक्षकः ॥
प्रेष्यो दासः । रूक्षको रूक्षवक्ता ।
पद्मपत्रसमा जिह्वा श्लक्ष्णा दीर्घा सुशोभना ।
न स्थूला न च विस्तीर्णा येषां ते मनुजाधिपाः ॥
निम्ना स्निग्धा च ह्रस्वा च रक्ताग्रा रसना यदि ।
सर्वविद्याप्रवक्तारो भवेयुर्नात्र संशयः ॥ इति ।

गारुडे,

जिह्वा रक्ता समा शुभा । इति ।

उत्पले समुद्रः,

श्वेतजिह्वा नरा ज्ञेयाः शौचाचारविवर्जिताः । इति ।

सामुद्रतिलके,

जिह्वा पीता स पुमान् मूर्खो दुःखाकुलः सततम् । इति ।

जगन्मोहने समुद्रः,

कृष्णजिह्वो भवेच्छ्रेष्ठो रक्तजिह्वस्तु नायकः ।
श्वेतजिह्वो नरो ज्ञेयः शौचाचारसमन्वितः ॥
अत्र कृष्णजिह्व ईषत्कृष्णजिह्वः, श्वेतजिह्व ईषत् श्वेतजिह्व

इति व्याख्येयम् ।

ईषत्कृष्णा तथा दीर्घा जिह्वा यस्य नृपो भवेत् ।
अतिश्वेतातिकृष्णा च गर्हिता रसना बुधैः ॥
इति समुद्रोक्तेः ।
पद्मपत्रसमा जिह्वा अतिसूक्ष्मा च शोभना ।
सर्वविद्याप्रवक्तारस्ते भवन्ति नरोत्तमाः ॥ इति ।

इति जिह्वालक्षणम् ।

अथ घण्टिकालक्षणम् ।

घण्टिका गलच्छिद्रमध्यगता प्रसिद्धा ।
सामुद्रतिलके,
अरुणतला गुणयुक्ता तीक्ष्णाग्रा घण्टिका शुभा स्थूला ।
लम्बा कृष्णा कठिना सूक्ष्मा चिपिटा नृणां न शुभा ॥ इति ।

इति घण्टिकालक्षणम् ।

अथ तालुलक्षणम् ।

भविष्ये,
कृष्णतालुर्नरो यस्तु स भवेत्कुलनाशकः ।
दुःखभागी च सततं धनक्षयकरस्तथा ॥
सुखभागी च विज्ञेयः पीततालुर्नराधिपः ।
आरक्तं चैव पृथुलं शोभनं गुह्य तालुकम् ॥
विकृतं स्फुटितं रूक्षं तालुकं न प्रशस्यते ।
सिंहतालुर्नरपतिर्गजतालुस्तथैव च ॥
पद्मतालुर्भवेद्राजा श्वेततालुर्धनेश्वरः । इति ।
पद्मं रक्तोत्पलम् ।
सामुद्रतिलके,
रक्ताम्बुजतालुदलो भूमिपतिर्विक्रमी भवति मनुजः ।

वित्ताढ्यः सिततालुर्गजतालुर्मण्डलाधीशः ॥
रूक्षं शबलं परुषं मलान्वितं न प्रशस्यते तालु ।
कृष्णं कुलनाशकरं नीलं दुःखावहं पुंसाम् ॥ इति ।

इति तालुलक्षणम् ।

अथ हसितलक्षणम् ।

भविष्ये,

अकम्पं शुभदं ज्ञेयं नराणां हसितं गुह ।
निमीलिताक्षं पापस्य हसितं हि सुरोत्तम ॥ इति ।

वराहसंहितायाम्,

हसितं शुभदमकम्पं सम्मीलितलोचनं तु पापस्य ।
दुष्टस्य हसितमसकृत्सोन्मादस्यासकृत्प्रोक्तम् ॥ इति ।

सामुद्रतिलके,

हसितमलक्षितदशनं किञ्चिद्विकसितकपोलमतिमधुरम् ।
पुंसां धीरमकम्पं प्रायेण स्यात्प्रधानानाम् ॥ इति ।

इति हसितलक्षणम् ।

अथ नासिकालक्षणम् ।

भविष्ये,

पार्थिवाः शुकनासाः स्युर्दीर्घनासास्तु भोगिनः ।
ऋजुनासा नरा ये तु धर्मशीलास्तु ते मताः ॥
हस्त्यश्वसिंहनासाश्च सूचीनासास्तु ये नराः ।
वाणिज्यं सिध्यते तेषां हयानां चैव विक्रयः ॥
विकृता नासिका यस्य स्थूलाग्रा रूपवर्जिता ।
पापकर्मा स विज्ञेयः समुद्रवचनं यथा ॥ इति ।

वराहसंहितायाम्,

सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च ।

छिन्नानुरूपयाऽगम्यगामिनो दीर्घया तु सौभाग्यम् ॥
आकुञ्चितया चौराः स्त्रीमृत्युः स्याच्चिपिटनासः ।
धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभक्षणाः क्रूराः ॥
अग्रवक्रनासाः प्रान्तकुटिलनासाः । प्रभक्षणाः बह्वाशिनः ।
अथ वा द्रव्याद्यसञ्चयशीलाः ।
ऋज्वी स्वल्पच्छिद्रा सुपुटा नासा सुभाग्यानाम् । इति ।
सामुद्रतिलके,
तिलपुष्पतुल्यनासः शुकनासो भवति भूपतिर्मनुजः ।
क्रमविस्तीर्णसमुद्भूतवंशनासा महेशितुर्भवति ॥
द्वेधास्थिताग्रभागाऽतिदीर्घह्रस्वा च निःस्वस्य । इति ।

इति नासालक्षणम् ।

अथ क्षुल्लक्षणम् ।

बराहसंहितायाम्,
धनिनां क्षुतं सकृत् द्वित्रिपिण्डितं ह्रादि सानुनादं च ।
दीर्घायुषां प्रयुक्तं विज्ञेयं संहतं चैव ॥ इति ।
अस्यार्थः । धनिनामाढ्यानां क्षुतं सकृदेकवारमेव विज्ञेयम् । दीर्घायुषां तु द्वित्रिपिण्डितं ह्रादि सानुनादं प्रयुक्तं संहतं च विज्ञेयम् । पिण्डितं गुणितं, द्विपिण्डितं द्विगुणितं द्विवारमित्यर्थः । त्रिपिण्डितं त्रिगुणितं त्रिवारमित्यर्थः । तथा ह्रादि शब्दान्तरयुक्तम् । तथा सानुनादम् अनुनादिशब्दयुक्तम् । दूरादपि शनैरुच्चार्यमाणो यः श्रोत्रपथमायाति सोऽनुनादीति स्वरलक्षणे प्रागभिहितमस्माभिः । तथा प्रयुक्तमतिदीर्घम् । तथा संहतं संहतशब्दयुक्तम् । तत्र उदीरित एवादिमध्यावसानतुल्यो यः स संहतः ।
उत्पले पराशरोऽपि,
सकृत्क्षुतं भोगवतां द्वित्रि ह्रादि चिरायुषाम् ।

चतुः स्याद्भोगनाशाय परमस्मान्न शोभनम् ॥ इति ।

सामुद्रतिलकेऽपि,

निर्ह्रादि सानुनादं सकृत्क्षुतं भोगवतां धनवतां द्वि ।
दीर्घायुषां प्रयुक्तं सुसंहतं त्रिर्भवेत्पुंसाम् ॥
स्खलितं लघु च नराणां क्षुतं चतुर्भवति भोगनाशाय ।
दोषदमतः परं स्यान्निन्दितमनुनादसहितमपि ॥ इति ।

इति क्षुल्लक्षणम् ।

अथ नेत्रलक्षणम् ।

भविष्ये,

दाडिमीपुष्पसङ्काशे भवेतां यस्य लोचने ।
भूपतिः स च विज्ञेयः सप्तद्वीपाधिपो गुह ॥
व्याघ्राक्षाः कोपना ज्ञेयाः कुक्कुटाक्षाः कलिप्रियाः ।
विडालनेत्रा हिंस्राश्च भवन्ति पुरुषाधमाः ॥
मयूरनकुलाक्षाश्च नरास्ते मध्यमाः स्मृताः ।
न श्रीस्त्यजति सर्वत्र पुरुषं मधुपिङ्गलम् ॥
आपिङ्गलाक्षा राजानः सर्वभोगसमन्विताः ।
रोचनाहरितालाक्षा गजपिङ्गा धनेश्वराः ॥
रोचना गोरोचना ।
बलसर्वगुणोपेताः पृथिवीचक्रवर्त्तिनः । इति ।

गर्गसंहितायाम्—

मुखप्रशंसामुक्त्वा,

तत्र भ्रूनासिके श्रेष्ठे प्रोक्ते तत्रापि चक्षुषी ।
समे गोक्षीरवर्णाभे सुवृत्ते कृष्णतारिके ॥
प्रसन्ने च विशाले च स्निग्धे चैवायते शुभे ।
व्याघ्राक्षाः कुक्कुटाक्षाश्च शशाक्षाश्चैव ये नराः ॥

निर्घृणाः पापिनः क्रूरा दुरन्ताः कलहप्रियाः ।
शस्त्रवध्याश्च नयनैर्गार्दभैर्माहिषोरगैः ॥
येषां चार्चिष्मती नेत्रे श्वेतशङ्खसमप्रभे ।
विद्युत्सूर्यसुवर्णाग्निमुक्तावैडूर्यवत्तथा ॥
मल्लिकाक्षौद्रवच्चापि लाजास्फटिकसन्निभे ।
पाटलाक्षाश्च ये मर्त्यास्ते धन्याः पुरुषाधमाः ॥
महाद्भिर्नयनैर्वामैः स्त्रीजिताः पुरुषाः स्मृताः ।
वामैः वक्रैः ।
उष्ट्राभैर्नयनैर्नूनं निर्घृणाः पापकारिणः ।
एतदेव तु श्रेष्ठं च नेत्रे स्याल्लक्षणं नृणाम् ॥
कर्णात्प्रभृति या रेखा नेत्रे नृणां प्रशस्यते ।
तया विरहितं रूक्षं म्लानं निम्नं कृशं च यत् ॥
परुषं निष्प्रकाशं च सन्दिग्धं पुत्तिकानिभम् ।
चक्षुर्न शस्यते नृणां द्रव्यक्षयभयावहम् ॥
सन्दिग्धं झटिति विषयाग्राहकम् । पुत्तिका मधुमक्षिका-विशेषः ।
पिङ्गैरेतैः प्रशस्यन्ति नृणां नेत्रान्तरैस्तथा ।
अर्कमर्कटपिङ्गं च तारावद्यस्य पिङ्गलम् ॥
कृष्णं पर्यन्तरक्तं च मङ्गल्यं ब्रह्मवर्चसम् ।
श्वेतं नीलं च मङ्गल्यं शितिनीलं च यद्भवेत् ॥
रक्तैः सुनयनैर्धर्मैः कृष्णतारैः सुखैधिता ।
भोगवानथ मत्स्याक्षश्चकोराक्षो नराधिपः ॥
वृषदर्दुरकौञ्चाक्षाः कुरराक्षा नरेश्वराः ।
दर्दुरो मण्डूकः ।
स्निग्धै रक्तैश्च पिङ्गैश्च पक्ष्मवद्भिः समैः स्थिरैः ॥

आयतैः पृथुभिस्तुङ्गैः कृष्णशुक्लैः समङ्गलैः।
रक्तहंसकरीराश्वनयनैः पार्थिवाः स्मृताः॥
करीरः पक्षिविशेषः।
प्रजापालनदक्षैश्च सौख्यप्रीतिकरैः शुभैः। इति।
गरुडपुराणे,
क्रूराः केकरनेत्राश्च हरिणाक्षास्तु कल्मषाः।
जिह्मैश्च लोचनैश्चौराः सेनान्यो गजलोचनाः॥
केकरस्तिर्यग्दृष्टिः।
गम्भीराक्षा ईश्वराः स्युर्मन्त्रिणः स्थूलचक्षुषः।
नीलोत्पलाक्षा विद्वांसः सौभाग्यं श्यामचक्षुषाम्॥ इति।
वराहसंहितायाम्,
पद्मदलाभैर्धनिनो रक्तान्तविलोचनाः श्रियोभाजः।
अतिकृष्णतारकाणामक्ष्णामुत्पाटनं भवति॥
मन्त्रित्वं स्थूलदृशां श्यामाक्षाणां भवति सौभाग्यम्। इति।
महाभारते,
वरमन्धो न काणः स्यात्काणः स्यान्न तु केकरः।
वरमन्धश्च काणश्च केकरो न तु पिङ्गलः॥
एष दुर्योधनो राजा कर्कशो मधुपिङ्गलः।
न केवलं कुलस्यान्तं क्षत्रस्यान्तं करिष्यति॥ इति।
जगन्मोहने समुद्रः,
कुक्कुटाक्षः सदा द्वेषी मातृपुत्रैर्न संशयः।
न श्रीस्त्यजति रक्ताक्षं पुरुषं मधुपिङ्गलम्॥ इति।
सामुद्रतिलके,
अधमा मण्डूकाक्षाः काकाक्षा धूसराक्षाश्च।
बहुवयसो धूम्राक्षाः समुन्नताक्षा भवन्ति तनुवयसः॥ इति।

अत्र पुरुषाणामनेकदुर्लक्षणसद्भावे यदि नेत्रे उक्तलक्षणे भवतस्तदा सर्वदुर्लक्षणनिरासो भवति । तदुक्तम्—

गर्गेण,

एकतो दुर्लक्षणशतं सौम्यं चक्षुस्तथैकतः ।
दुर्लक्षणशतं हन्यान्नरः सौम्येन चक्षुषा ॥
तस्मान्नेत्रे प्रयत्नेन लक्ष्यं पश्येत कालवित् । इति ।

इति नेत्रलक्षणम् ।

अथ दृष्टिलक्षणम् ।

गर्गसंहितायाम्,

दृष्टिः पीता सिता धन्या दीना वै निःस्वकारिका ।
गूढा महत्त्वतां कुर्यादाढ्याः स्युः स्निग्धदृष्टयः ॥
सर्पदृष्टिर्नरः क्रूरो दुःशीलः स्यात्तथैव च ।
अधोदृष्टिर्नरः क्रूरो विद्वान्नासाग्रमीक्षते ॥
कदम्बदृष्टिः सुभगो लक्षणैः परिकीर्त्तितः । इति ।
कदम्बदृष्टिः स्थूलदृष्टिः ।

सामुद्रतिलके विशेषः ।

श्यावदृशां सुभगत्वं स्निग्धदृशां भवति भूरिभोगित्वम् ।
स्थूलदृशां धीमत्त्वं दीनदृशां धनविहीनत्वम् ॥
ऋजु पश्यति सरलमनाः पश्यत्यूर्ध्वं सदैव पुण्याढ्यः ।
पश्यत्यधः स पापस्तिर्यक् पश्यति नरः क्रोधी ॥
दुष्टो दारुणदृष्टिः कुक्कुटदृष्टिः कलिप्रियो भवति ।
अहिदृष्टिर्दयोगी विडालदृष्टिः सदा पापः ॥ इति ।

इति दृष्टिलक्षणम् ।

अथ पक्ष्मलक्षणम् ।

सामुद्रतिलके,

सुदृढैः कृष्णैर्नयनच्छदस्थितैः पक्ष्मभिर्घनैः सूक्ष्मैः ।
सौभाग्यं चिरमायुर्लभते मनुजो धनेशत्वम् ॥
पक्ष्मभिरधमा विरहिताः पुनरगम्यनारीरताः पापाः ।

इति पक्ष्मलक्षणम् ।

अथ निमेषलक्षणम् ।

सामुद्रतिलके,

अनिमेषो धनरहितः पुरुषः स्यादेकमात्रनिमेषोऽपि ।
नियतं द्विमात्रनिमेषः परजनमाश्रित्य जीवति सः ॥
धनिनस्त्रिमात्रनिमेषास्तथा चतुर्मात्रनिमेषवन्तोऽपि ।
ननु पञ्चमात्रनिमेषाश्चिरायुषो भोगिनो धनिनः ॥ इति ।

अत्र मात्राशब्देन अल्पः कालविशेष उपलक्ष्यते । तत्परिमाणं च सामुद्रतिलके उक्तम्—

जानुं प्रदक्षिणीकृत्य यत् छोटिकां करो दत्ते ।
तदिदमिह समयमानं मात्राशब्देन निर्गदितम् ॥ इति ।

हस्तेन जानुप्रादक्षिण्येन यच्छोटिकादानं तत्परिमितः कालो मात्रेत्यर्थः ।

भविष्ये,

द्विमात्रोन्मेषिणो नित्यं जीवन्ति परमाश्रिताः ।
त्रिमात्रास्पन्दना ज्ञेयाः पुरुषाः सुखभागिनः ॥
चतुर्मात्रावशेषैश्च निमेषैरीश्वराः स्मृताः ।
दीर्घायुषो धर्मरताः पञ्चमात्रानिमेषिणः ॥ इति ।

इति निमेषलक्षणम् ।

अथ रुदितलक्षणम् ।

भविष्ये,

शुभावहं मनुष्याणां रोदनं स्यात्तथा शृणु ।

अदीनमश्रुस्निग्धं च सस्मितं च विशेषतः ॥
साश्रु दीनं तथा रूक्षमस्निग्धं च तथा गुह ।
अशुभावहं विज्ञेयं नराणां वारिधारणम् ॥ इति ।

इति रुदितलक्षणम् ।

अथ भ्रूलक्षणम् ।

भविष्ये,

भ्रुवौ बालेन्दुसदृशे धनिनामृषभोत्तम ।
दीर्घाभिर्धनिनो ज्ञेयाः संसक्ताभिश्च सुव्रत ॥
खण्डाभ्यां त्वर्थहीनाः स्युर्नरा भ्रूभ्यां सुरोत्तम ।
मध्ये नते भ्रुवौ येषां परदाररतास्तु ते ॥ इति ।

वराहसंहितायाम्,

विषमभ्रुवो दरिद्रा बालेन्दुसमभ्रुवः सधनाः । इति ।

सामुद्रतिलके,

बालेन्दुनते वृत्ते दीर्घे पृथुलोन्नते सुखं श्यामे ।
नासावंशविनिर्गतदले इव भ्रूदले दिशतः ॥
नृणामयुते स्निग्धे मृदुनतरोमान्विते भ्रुवौ शस्ते ।
हीने स्थूले सूक्ष्मे खरपिङ्गलरोमके न शुभे ॥ इति ।

इति भ्रूलक्षणम् ।

अथ कर्णलक्षणम् ।

वराहसंहितायाम्,

निर्मांसैः कर्णैः पापमृत्यवश्चिपिटैः सुबहुभोगाः ।
कृपणाश्च ह्रस्वकर्णाः शङ्कुश्रवणाश्च भूपतयः ॥
रोमशकर्णा दीर्घायुषोऽथ धनभोगिनो विपुलकर्णाः ।
क्रूराः शिरावनद्धैर्व्यालम्बैर्मांसलैः सुखिनः ॥ इति ।

भविष्ये,

दीर्घायुषो दीर्घकर्णा लम्बकर्णास्तपस्विनः । इति ।
सामुद्रतिलके,
परिपूर्णकर्णपालीपिप्पलिकाद्यवयवाः सुसंस्थानाः ।
लघुविवरा विस्तीर्णाः कर्णाः प्रायेण भूमिभुजाम् ॥
आढ्यः प्रलम्बकर्णः सुखी शुभावर्त्तपीनमृदुकर्णः ।
मतिमान्मूषककर्णश्चमूपतिः शङ्कुकर्णः स्यात् ॥
येषां पृथुलच्छिद्राः कर्णाः स्युः कर्णशष्कुलीलीनाः ।
स्वल्पायुषो दरिद्रा विलोक्यमाना विरूपास्ते ॥ इति ।

इति कर्णलक्षणम् ।

अथ ललाटलक्षणम् ।

भविष्ये,
ललाटेनार्धचन्द्रेण भवन्ति पृथिवीश्वराः ।
विपुलेन ललाटेन महानरपतिः स्मृतः ॥
श्लक्ष्णेन तु ललाटेन नरो धर्मरतस्तथा ।
श्लक्ष्णं स्निग्धम् ।
त्रिशूलं पट्टिशं वापि ललाटे यस्य दृश्यते ।
ईश्वरं तं विजानीयाद्भोगिनं कीर्तिमाश्रितम् ॥
विपुलैरुन्नतैः शङ्खैर्धन्याः स्युर्नात्र संशयः ।
शङ्खो ललाटास्थि ।
निम्नैः सुतार्थसन्त्यक्ता उन्नतैश्च नराधिपाः ।
विषमललाटा निःस्वाः सदा स्युर्देवसत्तम ॥
आचार्याः शुक्तिसदृशैर्नराः स्युर्नात्र संशयः । इति ।
वराहसंहितायाम्,
शुक्तिविशालैराचार्याः शिरासन्नतैरधर्मरताः ।
शुक्तिविशालैः शुक्तिवद्विस्तीर्णैः ।

उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च ॥

ललाटगताभिः शिराभिः स्वस्तिकाकाराभिः चशब्दाद्धनिनो ज्ञेयाः ।

निम्नललाटा वधबन्धभागिनः क्रूरकर्मनिरताश्च ।
अभ्युन्नतैश्च भूपाः कृपणाः स्युः सङ्कटललाटाः ॥ इति ।

जगन्मोहने समुद्रः,

निःस्वा विषमभालेन दुःखिता ज्वरजर्जराः ।
परकर्मकरा नित्यं प्राप्यन्ते वधबन्धनम् ॥
ज्वरजर्जराः ज्वरपीडिताः ।
अल्पेन तु ललाटेन अल्पायुस्तु भवेन्नरः । इति ।

सामुद्रतिलके विशेषः ।

श्रीवत्सकार्मुकाद्या यस्य शिरारोमभिः कृता भाले ।
रेखाभिर्वा नृपतिर्भोगी वा जायते सपदि ॥ इति ।

इति ललाटलक्षणम् ।

अथ शिरोलक्षणम् ।

भविष्ये,

उच्चैरनिम्नं तु शिरः श्लक्ष्णं संहतमेव च ।
छत्राकारं नरेन्द्राणां गवाढ्यं मण्डलं स्मृतम् ॥
संहतं दृढम् ।
विषमं तु दरिद्राणां शिरोदैर्घ्ये तु दुःखिताः ।
गजकुम्भनिभं सक्तं समं सर्वत्र भोगिनः ॥
चिपिटं तु शिरो यस्य हन्याद्धि पितरौ नरः ।
घटाकृति शिरोऽध्वानमसकृत्सेवते नरः ॥
निम्नं शिरोऽनर्थदं स्यान्नराणामृषभोत्तम । इति ।

वराहोऽपि,

घटमूर्द्धा चाध्वरुचिर्द्विमस्तकः पापकृद्धनपरित्यक्तः। इति।

सामुद्रतिलके,

धनविरहितो द्विमौलिः पापरतो मीनमौलिरतिदुःखी।
अध्वरुचिर्घटमौलिर्धननतमौलिः सदा निन्द्यः॥ इति।

इति शिरोलक्षणम्।

अथ केशलक्षणम्।

भविष्ये,

कपिलैः स्फुटितैः रूक्षैः स्थूलैश्च चिकुरैः खरैः।
दुःखिताः पुरुषा ज्ञेया रोमश्मश्रुभिरेव च॥
विरला मृदवः स्निग्धा भ्रमराञ्जनसुप्रभाः।
केशा यस्य तु दृश्यन्ते स भवेत्पृथिवीपतिः॥ इति।

वराहसंहितायाम्,

एकैकभवैः स्निग्धैः कृष्णैराकुञ्चितैरभिन्नाग्रैः।
मृदुभिर्न चातिबहुभिः केशैः सुखभाक् नरेन्द्रो वा॥
बहुमूलविषमकपिलाः स्थूलस्फुटिताग्रपरुषह्रस्वाश्च।
अतिकुटिलाश्चातिघनाश्च मूर्द्धजा वित्तहीनानाम्॥ इति।

इति केशलक्षणम्।

अथ सर्वगात्रलक्षणम्।

विष्णुधर्मोत्तराग्निपुराणयोः,

रूक्षं शिराततं गात्रं तथा मांसविवर्जितम्।
दुर्गन्धि चाशुभं सर्वं विपरीतं प्रशस्यते॥ इति।

गारुडे,

यद्यद्गात्रं महारूक्षं शिरालं मांसवर्जितम्।
तत्तत्स्यादशुभं सर्वं शुभं सर्वं ततोऽन्यथा॥ इति।

इति सर्वगात्रलक्षणम्।

अथ पादाद्यङ्गप्रमाणम् ।

सामुद्रतिलके,

अङ्गोपाङ्गानामिह विस्तारायामपरिधिभेदेन ।
मानं यथानुरूपं सङ्क्षेपेण प्रवक्ष्यामि ॥
आपार्ष्णिज्येष्ठान्तं तलमत्र चतुर्दशाङ्गुलायामम् ।
विस्तारेण षडङ्गुलमङ्गुष्ठो द्व्यङ्गुलायामः ॥
पञ्चाङ्गुलपरिणाहः पादोनं तन्नखोऽङ्गुलं दैर्घ्यात् ।
अङ्गुष्ठसमा ज्येष्ठा मध्या तत्षोडशांशोना ॥
अष्टांशोनाऽनामा कनिष्ठिका षष्ठभागपरिहीना ।
सर्वासामप्यासां नखाः स्वपर्वत्रिभागमिताः ॥
सत्र्यङ्गुलपरिणाहा प्रथमाऽङ्गुलीविस्तृताऽङ्गुली भवति ।
अष्टाष्टभागहीनाः शेषाः क्रमशः परिज्ञेयाः ॥
जङ्घान्तःपरिणाहो ध्रुवमष्टाधिकदशाङ्गुलानि स्यात् ।
विंशतिरेखोपगतौ जानु द्वात्रिंशदूरुरपि ॥
अष्टादशाङ्गुलमिता विस्तारा जायते कटिः पुंसाम् ।
नाभेरन्तःपरिधिः षट्चत्वारिंशदङ्गुलकः ॥
पुंसां द्वादश कुचयोरभ्यन्तरं च दैर्घ्येण ।
उरसि युगोपरिष्टात्षडङ्गुलो भवति कक्षान्तः ॥
विंशतिरुरःस्थलं स्याद्विस्तारादङ्गुलानि चतुरधिकः ।
षष्ट्या सह परिणाहे षडधिकपञ्चाशदङ्गुलिकम् ॥
पर्व प्रथमं बाहोरष्टादश चाङ्गुलानि दैर्घ्येण ।
षोडश पुनार्द्वितीयं सप्त तलं पञ्च मध्यमाङ्गुलिकाः ॥
इति समुदायेन भुजः षट्चत्वारिंशदङ्गुलानि स्यात् ।
पञ्चाङ्गुलविस्तारं पाणितलं शस्तरेखान्तम् ॥
मध्याऽङ्गुली विहीना प्रदेशिनी भवति पर्वणार्द्धेन ।

तत्सममानाऽनामा कनिष्ठिका पर्वपरिहीना ॥
अङ्गुष्ठस्यायामोऽङ्गुलानि चत्वारि जायते पुंसाम् ।
निजपर्वार्द्धपरिमिता भवन्ति सर्वेऽपि पाणिनखाः ॥
ग्रीवायाः परिणाहोऽङ्गुलानि चतुरधिकविंशतिः शस्तः ।
नासापुटद्वयान्तर्विस्तारे व्यङ्गुलं मानम् ॥
आचिबुकपश्चिमकचमान्तं द्वात्रिंशदङ्गुलो मूर्धा ।
कर्णद्वयस्य मध्ये पुनरष्टाधिकदशाङ्गुलिकः ॥
पुंसामङ्गुलमानं स्पष्टं शिष्टैः पुरा विनिर्दिष्टम् ।
इह पुनरुपयोगाद्वै दिङ्मात्रामिदं मयाप्युक्तम् ॥ इति ।

इति पादाद्यङ्गप्रमाणम् ।

अथावर्त्तलक्षणम् ।

विवेकविलासे,

आवर्त्तो दक्षिणे भागे दक्षिणः शुभकृन्नृणाम् ।
वामे वामोऽतिनिन्द्यश्च दिगन्यत्वे तु मध्यमः ॥ इति ।

सामुद्रतिलके,

रोमत्वग्बालभवः स्यादावर्त्तः शुभस्त्रेधा ।
शस्तो दक्षिणवलितः स्निग्धो व्यक्तः परो न शुभः ॥
करतलपदश्रुतियुगे नाभौ वा त्वग्भवो नृणां सः स्यात् ।
अपरौ द्वावपि लक्षणविद्भिर्ज्ञेयौ यथास्थानम् ॥
सव्यापसव्यभागे शिरसि स्याद्यस्य दक्षिणावर्त्तः ।
श्वेतातपत्रलक्ष्या लक्ष्मीः करवर्त्तिनी तस्य ॥
रोमावर्त्तः स्निग्धो भ्रूयुगमध्ये प्रदक्षिणो व्यक्तः ।
यस्योर्णाख्यः पूर्णः सोऽम्बुधिकाञ्चेर्भुवो भर्त्ता ॥
भुजयुग्मे यस्य स्यादावर्तद्वितयमङ्गदप्रतिमम् ।
नियतं सोऽखिलभूमिं पुरुषो निजबाहुना वहते ॥

यस्य कराम्भोजतले दक्षिणवलितो भवेदसिर्व्यक्तः ।
परिचितशौचाचारो धर्मपरः स्यात्स वित्ताढ्यः ॥
भाग्यवतां पश्चाङ्गुलि शिरः सुसौख्याय दक्षिणावर्त्तः ।
प्रायः पुंसां वामावर्त्ता दुःखाय पुनरेते ॥
श्रुतियुगनाभ्यावर्ताः प्रदक्षिणाः श्रेयसे भवन्ति नृणाम् ।
चूडावर्त्तोऽप्येकः श्रेष्ठतरो दक्षिणः शिरसि ॥
शीर्षे वामे भागे वामावर्त्तो भवेत् स्फुटो यस्य ।
स क्षुत्क्षामो भिक्षां रूक्षां निर्लक्षणो लभते ॥
वामो दक्षिणपार्श्वे प्रदक्षिणो वामपार्श्वके यस्य ।
ननु तस्य चरमकाले भोगो नास्त्यत्र सन्देहः ॥
अन्तर्ललाटपट्टे व्यक्तावर्त्तो ललामवद्यस्य ।
वामोऽथ दक्षिणो वा सोऽल्पायुर्दुःखितो वा स्यात् ॥
यस्यावर्तद्वितयं सुव्यक्तं भवति पादतलमध्ये ।
नक्तन्दिनमतिदीनो भूमिं स भ्रमति मतिहीनः ॥ इति ।

इत्यावर्त्तलक्षणम् ।

अथ पिटकलक्षणम् ।

पराशरसंहितायाम्, पिटकाः सितरक्तकृष्णवर्णा द्विजादीनां क्रमात् स्थानवर्णविशेषेणोक्तसकलफलदा भवन्ति । तत्र मूर्द्धि सुव्यक्तः स्निग्धः सुवर्णोऽभिषेकागमं कुर्यात् । शिरसि धनागमं केशान्ते सौभाग्यं ललाटे धनसञ्चयं भ्रुवोर्दौर्भाग्यं सङ्गमे दौःशील्यम् ।

सङ्गमे भ्रुवोरेव । भ्रूमध्यभाग इत्यर्थः ।
इष्टसङ्गमं च नेत्रपुटयोः ।
नेत्रयोरिष्टदर्शनमित्यर्थः ।
शङ्खदेशे प्रव्रज्यां चिन्तामश्रुपाते गल्लयोः सुतनाशं नासावशे

वस्त्रलाभमग्रे सुराभिसङ्गमम् ।

अग्रे नासाग्र इत्यर्थः ।

चिबुकोत्तरोष्ठयो रत्नलाभं हन्वोर्धनागमं गलेऽन्नपानमाभूषणं च । शिरः सन्धौ ग्रीवायां चोपघातं शस्त्रेण । कर्णयोस्तद्भूषणमानन्दश्रवणं च । पार्श्वयोः शोकमुरसीष्टसङ्गमं स्कन्धयोर्भैक्ष्यचर्यां कुक्षयोरर्थक्षयं स्तनयोः पुत्रलाभं पृष्ठदेशे दुःखशयनम् । अरिविनाशं बाह्वोः प्रबाह्वोराभरणं मणिबन्धयोर्नियमनम् ।

नियमनं बन्धनमित्यर्थः ।

पाणौ धनागमं सौभाग्यं चाङ्गुलीषु शोकमुदरे अन्नपानावाप्तिं नाभ्यां चौरैरर्थहरणमधः । अधः नाभेरधः ।

धनधान्यावाप्तिर्वस्तिशिरसि सौभाग्यमर्थलाभं च वृषणयोः पुत्रजन्म स्त्रीलाभं मेहने गुदे सौभाग्यं यानाङ्गनालाभमूर्वोः । जानुनोरासिभिरुपघातं शस्त्रेण जङ्घयोः गुल्फयोरध्वबन्धपरिक्लेशागमं स्फिचोरर्थहरणं पार्ष्णितलयोरगम्यागमनं प्रपदतलेऽध्वगमनं नियमनमङ्गुलीषु अङ्गुष्ठे ज्ञातिपूजां दद्युः ।

दद्युरिति प्रत्येकं सम्बन्धः ।

वराहसंहितायामप्येवमेव निरूपितम् ।

उत्पातगण्डपिटका दक्षिणतो वामतस्त्वमी घाताः ।
धन्या भवन्ति पुंसां तद्विपरीताश्च नारीणाम् ॥
इति पिटकविभागः प्रोक्त आमूर्धतोऽयं
व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः ।
भवति मशकलक्ष्माऽऽव जन्मापि तद्व-
न्निगदितफलकारि प्राणिनां देहसंस्थम् ॥ इति ।

विवेकविलासे,

उत्पाटपिटकौ लक्ष्म तिलको मशको व्रणः ।
स्पर्शनं स्फुरणं पुंसः शुभायाङ्गे प्रदक्षिणे ॥ इति ॥

इति पिटकलक्षणम् ।

अथ पादाद्यङ्गलक्षणानां विशेषफलं हेमाद्रौ स्मर्यते ।
यानवाहनभृत्येशो बाल्ये चातिसुखान्वितः ।
निकटारामभोगी स्यात्पादजङ्घागुणान्वितः ॥
धैर्यमायुः सुखावाप्तिर्गाम्भीर्यं स्थिरवृत्तता ।
आज्ञाप्रदानं भृत्येभ्यो गुणाः स्युर्जानुसम्पदि ॥
जानुसम्पत् जानुशुभलक्षणम् ।
नरद्विपहयैर्यानं समरे ह्यपराजयः ।
प्रधानपमदेशत्वं फलमूर्वोः प्रचक्षते ॥
राजा स्याद्राजपुत्रो वा बहुभार्यो बहुप्रजः ।
कान्तो मनोहरोऽर्थेशः श्रेष्ठो वृषणलक्षणैः ॥
शयनासनयानानि वस्त्रस्त्रीमित्रसम्पदः ।
आसादयत्ययत्नेन स्फिक्कटी यस्य शोभने ॥
भोगव्ययोऽर्थसम्पत्तिरापच्छान्तिररोगता ।
गुणवज्जठरं यस्य तस्यैतत्फलमादिशेत् ॥
आयुः शौर्यं श्रुतं मेधा शोकत्यागो दमः शमः ।
अविषादश्च कृच्छ्रेषु शस्तो हृदयजैर्गुणैः ॥
कृच्छ्रं दुःखम् ।
सुखमैश्वर्यविज्ञाने लभते स्तनसम्पदा ।
अंसपीठोरुजत्रूणां सम्पदा स्तनवत्फलम् ॥
पृष्ठपञ्जरपार्श्वानां सम्पदा कक्षयोरपि ।
आयुर्भोगान्महत्त्वं च हारहेमादिभूषणम् ॥
अन्नपानार्थसौख्यानि सुग्रीवो लभते नरः ।

प्रजेशत्वं धनेशत्वं विविधं पानभोजनम् ॥
नरः प्राप्नोति सम्पन्नैर्जिह्वादन्तोष्ठतालुभिः ।
येषां च सम्पदस्त्वेताः कर्णश्मश्रुहनुभ्रुवाम् ॥
सुखमायुर्धनं तेषां प्रियश्रवणमेव च ॥
अथ लक्षणसम्पन्नं शरीरं यस्य देहिनः ।
चक्षुषः सम्पदश्चैव ऐश्वर्यं सोऽश्नुते महत् ॥
क्षुतशङ्खललाटानां सम्पदा मूर्द्धजैः सह ।
आयुर्दीर्घं समासाद्य सततं सुखमेधते ॥
आज्ञा गतौ यशो गन्धे सुखं वर्णे स्वरे धनम् ।
भाग्यागमस्तथाऽनूके नित्यं नृणां प्रतिष्ठितम् ॥ इति ।
अत्रान्योऽपि विशेष उक्तो—
गर्गसंहितायाम्,
तेजसा तेज आदत्ते परेषां वपुषा वपुः ।
प्रभया च प्रभां हन्यात्सरस्वत्या सरस्वतीम् ॥
गत्या गतिं धनैर्वित्तं परेषां नात्र संशयः ।
रक्ताक्षो न जहात्यर्थान्न श्रीः कनकपीतकान् ॥
न दीर्घबाहुरैश्वर्यं न मांसोपचितः सुखम् ।
न सुनासो वहेद्भारं न सुगन्धी तु सौख्यताम् ॥
स्वरवान् प्रेरयत्यर्थान् सात्त्विके नास्ति दुर्गतिः ।
कुनखी नास्ति धनवानुद्धतो नास्ति भोगवान् ॥
स्नेहवान् दुःखितो नास्ति गतिमान्नास्त्यनीश्वरः ।
शनैर्गात्राणि शीर्यन्ते दन्तरोमनखास्तथा ॥
इन्द्रियाणि च बुद्धिश्च सर्वेषां चिरजीविनाम् ।
महाकर्णा महानासा महाचरणपाणयः ॥
सुबद्धदृढगात्राश्च विज्ञेयास्ते चिरायुषः ।

सौभाग्यं विदन्तेऽक्षिभ्यां विद्यामैश्वर्यमेव च ॥
दन्तैर्भोजनमाप्नोति स्नेहेन च परं सुखम् ।
चलन्मांसोऽतिमांसश्च स्थूलमांसः शिरातनः ॥
स वै दुरन्तको नाम समुद्रमपि शोषयेत् ।
येन केन चिदन्नेन शरीरं यस्य वर्द्धते ॥
स वै दुन्दुभको नाम सर्वकल्याणवर्जितः ।
अपत्यं व्यञ्जनं विद्या विज्ञानं धर्मसञ्चयः ॥
पूर्वे वयसि वर्त्तन्ते सर्वेषामल्पजीविनाम् ।
व्यञ्जनं श्मश्रुप्रभृति ।
अतिमेधातिकीर्तिश्च विक्रमोऽतिसुखानि च ।
तथा जरा प्रसूतिश्च लक्षणानि गतायुषः ॥
यथा सुखं तथा शीलं यथा वर्णस्तथा धनम् ।
यथा गन्धस्तथा सत्त्वं विनयश्च तथा ध्रुवम् ॥
यथाऽऽचारस्तथा शौचं कीर्तिर्भवति कर्मणाम् ।
यथा मांसं तथा सौख्यं विनयश्च तथा ध्रुवम् ॥
निर्घृणो द्वेष्यसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपतापी च पडेते नित्यदुःखिताः ॥
अतिदीर्घातिह्रस्वेषु अतिस्थूलकृशेषु च ।
अतिकृष्णातिगौरेषु सदा सत्यं न विद्यते ॥ इति ।

बराहसंहितायाम्,

श्रान्तस्य पानमशनं च बुभुक्षितस्य
पानं च तृट्परिगतस्य भयेषु रक्षा ।
एतानि यस्य पुरुषस्य भवन्ति काले
धन्यं वदन्ति खलु तं नरलक्षणज्ञाः ॥ इति ।

प्रयोगपारिजाते,

उरोविशालो धनधान्यभोगी
शिरोविशालो नृपपुङ्गवः स्यात् ।
कटीविशालो बहुपुत्रभोगी
विशालपादस्तु धनी सुखी स्यात् ॥
अतिमेधोऽतिकीर्त्तिश्च विक्रमी च सुखी तथा ।
अतिस्निग्धा च दृष्टिः स्यात् स नरोऽल्पायुषो भवेत् ॥
अतिकृष्णमतिश्वेतमतिरक्तं तथैव च ।
इत्थंवर्णो नरो रोगी समुद्रस्य वचो यथा ॥

विवेकविलासे,

सात्त्विकः सुकृती दाता राजसो विषयी भ्रमी ।
तामसः पातकी लोलः सात्त्विकोऽमीषु सत्तमः ॥ इति ।

सामुद्रतिलके,

शुभलक्षणमङ्गेभ्यः सौन्दर्येणाधिकं मुखं यस्य ।
स्वज्ञातिप्राधान्यं प्राप्नोति स धान्यधनवत्त्वम् ॥
सत्त्वं रजस्तमश्चेत्यमी नराणां त्रयो भवन्ति गुणाः ।
क्वचिदेकः कुत्र द्वौ त्रयः समं क्वापि दृश्यन्ते ॥
यः सत्त्वगुणोपेतः स दयालुः सत्यवाक् स्थिरः स नरः ।
देवगुरुभक्तियुतो व्यसनेऽभ्युदये च कृतधैर्यः ॥
काव्यकलासु प्रवणः कुलनारीकृतरतिः सदा शूरः ।
प्रणयेन युतः सततं रजोऽधिकः कथ्यते स पुमान् ॥
मूर्खस्तमोऽन्वितः स्यान्निद्रालुर्वञ्चकोऽलसः क्रोधी ।
एतैर्मिश्रैर्बहुशो भेदाश्चान्ये नृणां मिश्राः ॥
बुद्धियुतो यद्दीर्घो ह्रस्वो यज्जायते नरो मूर्खः ।
पिङ्गः शुचिः सुशीलः काणाक्षो यत्तदाश्चर्यम् ॥
यदन्तुरोऽपि मूर्खो रोमयुतो जायते यदल्पायुः ।

यन्निष्ठुरः सदाऽऽढ्यस्तदद्भुतं जृम्भते भुवने ॥
पृथुपाणिः पृथुपादः पृथुकर्णः पृथुशिराः पृथुस्कन्धः ।
पृथुवक्षाः पृथुजठरः पृथुभालः पूजितः पुरुषः ॥
रक्ताक्षं भजति श्रीः प्रलम्बबाहुं भजत्यधीशत्वम् ।
पीनाङ्गं भजति कृपिर्मांसोपचितं च भजति सौभाग्यम् ॥
सुश्लिष्टसन्धिबन्धो यः कश्चिन्मांसलो मृदुस्निग्धः ।
अतिसुन्दरः प्रकृत्या स सुखाढ्यो जायते प्रायः ॥
अत्रोक्तलक्षणेषु लक्षणतारतम्येन फलं वक्तव्यम् । तदुक्तम्—
सामुद्रतिलके,
देहस्थितेषु सन्ततमशुभेषु शुभेषु लक्षणेषु नृणाम् ।
ज्ञात्वा तरतमभावं तत्फलमपि निर्दिशेत्प्राज्ञः ॥ इति ।
तत्रापि यदेव शुभमशुभं वा लक्षणं बलवत्तदेव फलदम् ।
तथा चोक्तम्—
विवेकविलासे,
पुष्टं यदेव देहे स्याल्लक्षणं वाप्यलक्षणम् ।
इतरद्बाध्यते तेन बलवत् फलदं भवेत् ॥ इति ।
सामुद्रतिलके विशेषः ।
यल्लक्ष्म पुनः शुभमपि कररेखाप्रभृतिकं विसंवदति ।
बाह्याभ्यन्तरमपरं तत्र समुद्रेण निर्दिष्टम् ॥ इति ।

अथ राजलक्षणम् ।

भविष्यपुराणे,
गुरुरुवाच ।
पुंसां श्रुतानीह विभो लक्षणानि नृपस्य तु ।
शुभानि चाङ्गजातानि ब्रूहि मे वदतां वर ॥
ब्रह्मोवाच ।

शृणु वत्साङ्गजातानि पार्थिवस्य शुभानि वै ।
पार्थिवो ज्ञायते यैश्च नराणां मध्यमागतः ॥
त्रीणि यस्य महाबाहो विपुलानि नरस्य तु ।
उन्नतानि तथा षट् च गम्भीराणि च त्रीणि च ॥
चत्वारि चापि ह्रस्वानि सप्त रक्तानि वै विभो ।
दीर्घाणि चापि सूक्ष्माणि भवन्ति यस्य पञ्च च ॥
वदनं च ललाटं च देवोत्तम उरस्तथा ।
विस्तीर्णमेतत्त्रितयं वीर यस्य नरस्य तु ॥
स राजा नात्र सन्देहः शृणुष्वैवोन्नतानि च ।
कृकाटिका तथा चास्यं नखा वक्षोऽथ नासिका ॥
कक्षौ चापि महाबाहो षडेतानि विदुर्बुधाः ।
नाभिः सत्त्वं स्वरश्चेति गम्भीराणि तु त्रीणि वै ॥
लिङ्गग्रीवापृष्ठजङ्घं ह्रस्वमेतच्चतुष्टयम् ।
नेत्रान्तो हस्तपादौ तु तालोष्ठौ च सुरोत्तम ॥
जिह्वा नखाश्च रक्तानि सप्तानि तु महामते ।
नेत्रान्तो नेत्रप्रान्तः । अपाङ्ग इतियावत् ।
नासिकालोचने बाहुः स्तनयोरन्तरं हनुः ।
इति दीर्घमिदं प्रोक्तं पञ्चकं भूभृतां गृह ॥
त्वचा कररुहाः केशा दशनाश्च सुरोत्तम ।
सूक्ष्माण्येतान्यङ्गुलीनां पर्वाण्यपि विदुर्बुधाः ॥
क्षुतं राज्ञां सकृत् द्वित्रिर्नादितं ह्रादितं तथा ।
निर्घोषान्तं प्रयुक्तं च संहतं च विदुर्बुधाः ॥
अत्र व्याख्येयविषयस्तु पूर्वोक्तक्षुतलक्षणादवगन्तव्यः ।
नेत्रैः कनकवर्णाभैर्नरा भूपतयस्तथा । इति ।
भवन्तीति, शेषः । इदं तु क्षुतनेत्रलक्षणं राजलक्षणेपूक्तत्वा-

त्तदुपयोगित्वेनोक्तमित्यपौनरुक्त्यम् ।

स्कान्दे काशीखण्डे,

विश्वानरं प्रत्याह नारदः ।

पञ्चसूक्ष्मः पञ्चदीर्घः सप्तरक्तः षडुन्नतः ।
त्रिपृथुर्लघुगम्भीरो द्वात्रिंशल्लक्षणास्त्विति ॥
त्वक्केशाङ्गुलिदशनाः पर्वाण्यङ्गुलिजान्यपि ।
तथाऽस्य पञ्च सूक्ष्माणि दिक्पालपदभाग्यथा ॥
पञ्च दीर्घाणि शस्यानि यथा दीर्घायुषोऽस्य वै ।
भुजौ नेत्रे हनुर्जानुर्नासा च तनयस्य ते ॥
पाण्योस्तले च नेत्रान्ते तालुजिह्वाधरौष्ठकम् ।
सप्तारुणं च सनखमस्मिन् राज्यसुखप्रदम् ॥
वक्षः कक्षो नखस्कन्धकरवक्त्रं षडुन्नतम् ।
ललाटकटिवक्षोभिस्त्रिविस्तीर्णो यथा ह्यसौ ॥
ग्रीवाजङ्घामेहनैश्च त्रिभिर्ह्रस्वोऽयमीरितः ।
स्वरेण सत्त्वनाभिभ्यां त्रिगम्भीरः शिशुः शुभः ॥ इति ।

इति राजलक्षणम् ।

अथ सर्वोत्कृष्टपुरुषलक्षणम् ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

आदावेव प्रवक्ष्यामि पुरुषाणां तु लक्षणम् ।
निबोध तन्मे गदतो भृगुवंशविवर्द्धन ॥
एकाधिको द्विशुक्लश्च त्रिगम्भीरस्तथैव च ।
त्रित्रिकस्त्रिप्रलम्बश्च त्रिभिर्व्याप्नोति यस्तथा ॥
त्रिवलीवान् त्रिविनतस्त्रिकालज्ञश्च भार्गव ।
पुरुषः स्यात्स लक्षण्यो विपुलश्च तथा त्रिषु ॥

चतुर्लेखस्तथा राम तथैव च चतुःसमः ।
चतुष्किष्कुश्चतुर्दंष्ट्रश्चतुष्कृष्णस्तथैव च ॥
चतुर्गन्धश्चतुर्ह्रस्वः पञ्चसूक्ष्मस्तथैव च ।
पञ्चदीर्घो भृगुश्रेष्ठ तथैव च षडुन्नतः ॥
सप्तस्नेहोऽष्टवंशश्च नवस्थानामलस्तथा ।
दशपद्मो दशबृहन्न्यग्रोधपरिमण्डलः ॥
चतुर्दशसमद्वन्द्वः षोडशाक्षश्च शस्यते ।

श्रीराम उवाच ।

एकाधिकाद्या ये प्रोक्ताः पुरुषस्य त्वया गुणाः ।
तानहं श्रोतुमिच्छामि यथावद्वरुणात्मज ॥

पुष्कर उवाच ।

धर्मे चार्थे च कामे च जनः सर्वोऽभिजायते ।
एकाधिकः स विज्ञेयो यस्तु धर्मे विशेषतः ॥
तारकाभ्यां विना नेत्रे शुक्लाश्च दशनास्तथा ।
द्वात्रिंशद्राम यस्य स्युर्द्विशुक्लः स तु कीर्त्तितः ॥
उरो नासा तथा सत्त्वं गम्भीरं यस्य देहिनः ।
उरो नाभिस्तथा सक्थि गम्भीरा यस्य देहिनः— इति पाठान्तरम् ।
प्रोच्यते स तु धर्मज्ञ त्रिगम्भीरो नरोत्तमः ॥
अनसूया दया क्षान्तिस्त्रिकमेकं प्रकीर्त्तितम् ।
मङ्गलाचारशौचे च अस्पृहेत्यपरं त्रिकम् ॥
अनायासस्त्वकार्पण्यं शौर्यं चेति त्रयस्त्रिकाः ।
अनायासमकार्पण्यमैश्वर्यं च त्रयस्त्रिकाः— इति पाठान्तरम् ।
त्रिप्रलम्बो भुजभ्यां तु वृषणेन च कीर्त्यते ॥
दिग्देशज्ञातिवर्गाश्च तेजसा यशसा श्रिया ।

व्याप्नोति यो भृगुश्रेष्ठ त्रिभिर्व्याप्नोत्यसौ नरः ॥
उदरे वलयस्तिस्रो गम्भीरा यस्य देहिनः ।
स उच्यते भृगुश्रेष्ठ त्रिवलीवान्न संशयः ॥
देवतानां गुरूणां च द्विजानां च तथा नतः ।
पुरुषो भार्गवश्रेष्ठ प्रोक्तस्त्रिविनतः सदा ॥
धर्मस्यार्थस्य कामस्य सम्यक्कालविभागवित् ।
सेवने यस्तु धर्मज्ञ प्रोच्यते स त्रिकालवित् ॥
उरो ललाटं वक्त्रं च विस्तीर्णं यस्य देहिनः ।
कथितः स भृगुश्रेष्ठ विपुलस्त्रिषु मानवः ॥
द्वौ पाणी द्वौ तथा पादौ ध्वजच्छत्रादिभिर्युतौ ।
लेखाभिर्यस्य निर्दिष्टश्चतुर्लेखः स मानवः ॥

छत्रादिभिरित्यत्र आदिपदेन चक्रधनुर्मत्स्यादीनां ग्रहणम् । तथा च—

चक्रासितोमरगदाङ्कुशपाशवज्रैः
शक्त्या धनुःपरशुपाशमृणालपत्रैः ।
श्रीवत्समत्स्यमकरध्वजकुञ्जराद्यै—
र्हस्ताङ्घ्रिलाञ्छितकरः सुखभाक् नरेन्द्रः ॥ इति ।

अङ्गुल्यो हृदयं पृष्ठं कटिर्यस्य तथा समा ।
पुरुषः स भृगुश्रेष्ठ चतुःसम उदाहृतः ॥
बाहुजानुभगाण्डाश्च चत्वार्यथ समानि तु ।
पुरुषः स भृगुश्रेष्ठ चतुःसम उदाहृतः ॥ (?)
षण्णवत्यङ्गुलोत्सेधश्चतुष्किष्कुप्रमाणतः ।
प्रमाणयोगाद्धर्मज्ञ चतुष्किष्कुः स कीर्त्तितः ॥

किष्कुर्हस्तः । चतुष्किष्कुः स्वहस्तेन हस्तचतुष्टयप्रमाणः ।
दंष्ट्राश्चतस्रश्चन्द्राभा दशनेभ्यः समुन्नताः ।

किञ्चिद्यस्य स धर्मज्ञ चतुर्दंष्ट्रः प्रकीर्तितः ॥
नेत्रतारौ भ्रुवौ श्मश्रु कृष्णाः केशास्तथैव च ।
यस्येह स चतुष्कृष्णः प्रोच्यते मनुजोत्तम ॥
नासायां वदने स्वेदे कक्षासु च नरोत्तम ।
गन्धस्तु सुरभिर्यस्य चतुर्गन्धः स कीर्त्तितः ॥
ह्रस्वं लिङ्गं तथा ग्रीवाजङ्घे ह्रस्वे तथैव च ।
यस्य भार्गवशार्दूल चतुर्ह्रस्वः प्रकीर्तितः ॥
अङ्गुलीनां तु पर्वाणि नखकेशद्विजत्वचः ।
सूक्ष्माणि यस्य तं राम पञ्चसूक्ष्मं प्रचक्षते ॥
हनुनेत्रे ललाटं च नासा चैव स्तनान्तरम् ।
दीर्घाणि यस्य तं राम पञ्चदीर्घं विदुर्बुधाः ॥
वक्षः कक्षौ नखा नासा मुखं चैव कृकाटिका ।
षडुन्नतानि यस्येह तं वदन्ति षडुन्नतम् ॥
त्वक्केशलोमदन्ताश्च दृष्टिर्वाणी नखास्तथा ।
स्निग्धा यस्येह तं प्राहुः सप्तस्निग्धं बहुश्रुताः ॥
जानुवंशावथो राम भुजवंशौ तथा परौ ।
ऊरुवंशद्वयं चैव पृष्ठवंशं च भार्गव ॥
नासावंशं समं यस्य सोऽष्टवंशः प्रकीर्तितः ।
नेत्रे नासापुटे कर्णौ मेढ्रं पायुर्मुखं तथा ॥
छिद्रा नवैते विमला यस्य तं तु नवामलम् ।
जिह्वोष्ठतालुनेत्रान्तहस्तपादनखाः स्तनौ ॥
शिश्नाग्रवक्त्रे शस्यन्ते पद्माभा दश देहिनाम् ॥
पाणी पादौ मुखं ग्रीवा श्रवणे हृदयं शिरः ।
ललाटमुदरं पृष्ठं बृहन्तः पूजिता दश ॥
प्रसारितभुजस्येह मध्यमाग्रद्वयान्तरम् ।

उच्छ्रायेण समं यस्य न्यग्रोधपरिमण्डलः ॥
कथितः स नृणां श्रेष्ठः सर्वलक्षणपूजितः ।
पादौ गुल्फौ स्फिचौ पार्श्वौ वृषणावीक्षणे कुचौ ॥
कर्णोष्ठौ सक्थिनी जङ्घे हस्तौ बाहू तथा भ्रुवौ ।
सक्थिनी ऊरू ।
द्वन्द्वान्येतानि यस्य स्युः समानि तु चतुर्दश ।
चतुर्दशसमद्वन्द्वः कथितः स नरोत्तमः ॥
विद्यास्थानानि यानीह कथितानि चतुर्दश ।
तैः प्रपश्यति यो राम नेत्राभ्यां च नरोत्तमः ॥
सम्यक्स कथितो लोके षोडशाक्षो भृगूत्तम । इति ।
विद्यास्थानान्याह—
याज्ञवल्क्यः,
पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ इति ।

पुराणं ब्राह्मादि । न्यायो वेदाद्यविरुद्धः सत्तर्कः । मीमांसा वेदवाक्यविचारः । धर्मशास्त्रं मन्वादिप्रणीतम् । अङ्गसहिता वेदा श्चत्वारः । अङ्गानि षट्, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिरिति ।

रामायणे हनूमानाह—
चतुष्किष्कुश्चतुर्दंष्ट्रस्त्रिशुक्लो दशपद्मवान् ।
षडुन्नतो दशबृहत्त्रिभिर्व्याप्नोति राघव ॥
त्रिबलीवान् त्रिविनतः चतुर्गन्धस्त्रिकालवित् ।
त्रित्रिकस्त्रिप्रलम्बश्च महास्यौष्ठहनुस्वरः ॥
चतुष्कृष्णश्चतुर्लेखः षोडशाक्षश्चतुःसमः ।
चतुर्दशसमद्वन्द्वः पञ्चस्नेहोऽष्टवंशवान् ॥ इति ।

त्रिशुक्रः कर्मधर्मयशांसि त्रीणि शुक्लानि यस्य सः । महास्यौष्ठहनुस्वरः वदनौष्ठहनुशब्दाः बृहन्त इत्यर्थः । पञ्चस्नेहः-

स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखसंस्थः ।

इति वराहवचनोक्तेर्वाग्जिह्वादन्तनेत्रनखेषु स्निग्ध इत्याशयः।

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरी-

नीराजितचरणकमल-

श्रीमन्महाराजाधिराजप्रतापरुद्रतनूज-

श्रीमन्महाराजमधुकरसाहसूनु-


चतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकर-

श्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मजश्रीपरशुरामामिश्रसूनु-

सकलविद्यापारावारपारीणजगद्दारिद्र्यमहागजपारीन्द्रविद्वज्ज-

नजीवातु-

श्रीमन्मित्रमिश्रकृते श्रीवीरमित्रोदयाभिधनिबन्धे लक्षणप्रकाशे पुरुषलक्षणप्रकरणं समाप्तम् ।



अथ स्त्रीलक्षणप्रकरणम् ।

तत्र तावत्कन्यालक्षणनिरीक्षणकाल उक्तो—

भविष्यपुराणे,

मुहूर्त्ते तिथिसम्पन्ने नक्षत्रे चाभिपूजिते ।
द्विजैश्च सह सङ्गम्य कन्यां पश्येत कालवित् ॥ इति ।

जगन्मोहने समुद्रोऽपि,

मूहूर्त्ते तिथिसम्पन्ने ग्रहे सौम्ये बलान्विते ।
ब्राह्मणैः सह सङ्गम्य कन्यां पश्येत शास्त्रवित् ॥ इति ।

आश्वलायनगृह्ये,

बुद्धिरूपलक्षणशीलसम्पन्नामरोगामुपयच्छेत । इति ।

शास्त्राविरुद्धदृष्टादृष्टसाधनोहापोहकुशला धीर्बुद्धिः । यत्र वरस्य मनो रमते तद्रूपम् । तदाह—

आपस्तम्बः,

यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिरिति ।

मनुः,

उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् । इति ।

दक्षः,

समावर्त्तनपूर्वं तु लक्षण्यां स्त्रियमुद्वहेत् । इति ।

याज्ञवल्क्यः,

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । इति ।

लक्षणानि द्विविधानि बाह्यान्याभ्यन्तराणि च । अथ तावत् बाह्यान्याह—

मनुः,

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् ॥ इति ।

पृथ्वीचन्द्रोदये शातातपः,
हंसस्वनां मेघवर्णां मधुपिङ्गललोचनाम्।
तादृशीं वरयेत्कन्यां गृहस्थः सुखमेधते ॥ इति।
मेघवर्णां मेघवत्स्निग्धश्यामवर्णाम्। तत्रैव—
नारदोऽपि,
मृगाक्षी मृगगुह्या च मृगग्रीवा महोदरी।
हंसस्वनगतिर्नारी राजपत्नी भविष्यति ॥
मृदुभाषा च या नारी मृदुपादतलागतिः।
नारी कुमुदवर्णाभा राजपत्नी भविष्यति ॥ इति।
गरुडपुराणे,
यस्यास्तु कुञ्चिताः केशा मुखं च परिमण्डलम्।
नाभिश्च दक्षिणावर्ता सा कन्या कुलवर्द्धिनी ॥
कुञ्चिताः केशाः ईषत्कुञ्चिताग्राः।
किञ्चिदाकुञ्चिताग्राश्च कुटिलाश्चातिशोभनाः—
इत्यग्रे केशलक्षणे वक्ष्यते।
या च काञ्चनवर्णाभा रक्तहस्तसरोरुहा।
सहस्राणां च नारीणां भवेत्सा च पतिव्रता ॥
पूर्णचन्द्रमुखी कन्या बालसूर्यसमप्रभा।
विशालनेत्रा बिम्बोष्ठी सा कन्या लभते सुखम् ॥
कार्येषु मन्त्री सा स्त्री स्यात्सुसुखं करणेषु च।
स्नेहेषु भार्या माता स्यात् वेश्या च शयने शुभा ॥
करणेषु इन्द्रियेषु।
नाभिः प्रशस्ता गम्भीरा दक्षिणावर्तगा शुभा।
अरोमा त्रिबली नार्या हस्तौ रोमवर्जितौ ॥ इति।
विष्णुधर्मोत्तराग्नेययोः,

शस्ता स्त्री चारुसर्वाङ्गी मत्तमातङ्गगामिनी ।
गुरूरुजघनायामा मत्तपारावतेक्षणा ॥
सुनीलकेशी तन्वङ्गी परपुष्टनिनादिनी ।
तनुमध्यविलोमाङ्गी स्निग्धवर्णा मनोहरा ॥ इति ।

परपुष्टः कोकिलः ।

मनुः,

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ।
नालोमिकां नातिलोमां न वाचालां न पिङ्गलाम् ॥

रोगिणीम् अपस्मारादिमहारोगयुक्ताम् । वाचालां बहुनिन्द्यभाषिणीम् ।

नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ।
न पक्ष्यहिप्रेष्यनाम्नीं न विभीषणनामिकाम् ॥ इति ।

अन्त्यः अन्त्यजः ।

बौधायनः,

पार्ष्णिस्थूलां रोमशां च यमलां श्यावदन्तिनीम् ।
सन्नतभ्रूयुगां चैव पिङ्गाक्षीं चैव नोद्वहेत् ॥

सन्नतभ्रूयुगां सँल्लग्नभ्रूयुगलाम् ।

शातातपः,

दीर्घकुत्सितरोगार्ता व्यङ्गा संसृष्टमैथुना ।
दृष्टान्यगतभावा च कन्यादोषाः प्रकीर्त्तिताः ॥ इति ।

दीर्घरोगोऽपस्मारादिः । कुत्सितरोगो गलत्कुष्ठादिः । संसृष्टमैथुना कृतव्यभिचारा ।

विष्णुपुराणे,

न घर्घरस्वरां क्षामां तथा काकस्वरां न च ।
नातिवद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः ॥

क्षामां कृशाम् । अतिबद्धेक्षणां निमीलितप्रायलोचनाम् ।
वृत्ताक्षीं वर्त्तुलाक्षीम् ।
यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ ।
गण्डयोः कूपके यस्य हसन्त्याश्चैव जायते ॥
नोद्वहेत्तादृशीं कन्यां प्राज्ञः कार्यविचक्षणः ।
नातिरूक्षच्छविं पाण्डुकरजामरुणेक्षणाम् ॥
अपीतहस्तपादां च न कन्यामुद्वहेद्बुधः ।
पाण्डुकरजां पाण्डुरनखाम् ।
भविष्यपुराणे,
नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ।
न नीलोष्ठीं न निर्लोमां नास्यकूपां न पिङ्गलाम् ॥
आस्यकूपां कपोलगर्त्तयुक्ताम् ।
बृहन्नारदीये,
रोगिणीं चैव वृत्ताक्षीं सरोगकुलसम्भवाम् ।
अतिकेशामकेशां च बालां नैवोद्वहेद्बुधः ॥
अत्र कन्यामित्यनुषङ्गः ।
कोपनां वामनां चैव दीर्घदेहां विरूपिणीम् ।
न्यूनाधिकाङ्गामुन्मत्तां पिशुनां नोद्वहेद्बुधः ॥
स्थूलगुल्फां दीर्घजङ्घां तथैव पुरुषाकृतिम् ।
श्मश्रुव्यञ्जनसंयुक्तां विकारीं नोद्वहेद्बुधः ॥
वृथाहास्यमुखीं चैव सदाऽन्यगृहवासिनीम् ।
विवादशीलां भ्रमितां निष्ठुरां नोद्वहेद्बुधः ॥
बह्वाशिनीं स्थूलदन्तां स्थूलास्थीं घर्घरस्वराम् ।
अतिकृष्णां रक्तवर्णां धूर्त्तां नैवोद्वहेद्बुधः ॥
सदा रोदनशीलां च पाण्डुवर्णां च कुत्सिताम् ।

कासश्वासादिसंयुक्तां निद्राशीलां च नोद्वहेत् ॥
अनर्थभाषिणीं चैव लोकद्वेषपरायणाम् ।
परापवादानिरतां तस्करां नोद्वहेद्बुधः ॥
दीर्घनासां च कितवां तनूरुहविभूषिताम् ।
गर्वितां वक्रवृत्तिं च सर्वथा नोद्वहेद्बुधः ॥ इति ।
पृथ्वीचन्द्रोदये व्यासोऽप्याह,
ह्रस्वा दीर्घाः कृशाः स्थूलाः पिङ्गाक्ष्यो गौरपाण्डुराः ।
न पूज्या न च सेव्यास्ता यतो मृत्युकराः स्त्रियः ॥ इति ।
गरुडपुराणे,
वक्रकेशा तु या कन्या मण्डलाक्षी च या भवेत् ।
भर्त्ता च म्रियते तस्या नियतं दुःखभागिनी ॥
यस्यास्तु रोमशौ पादौ रोमशौ च पयोधरौ ।
उन्नतौ चाधरोष्ठौ च क्षिप्रं मारयते पतिम् ॥
यस्यास्त्वनामिकाङ्गुष्ठौ पृथिव्यां नैव तिष्ठतः ।
पतिं मारयते क्षिप्रं स्वेच्छाचारेण वर्त्तते ॥ इति ।
नागरखण्डेऽपि,
तथा त्रिभिः स्तनैर्युक्तां पृष्ठावर्त्तकसंयुताम् ।
दरिद्रोऽप्यतिदुःस्थोऽपि कुलहीनोऽपि नोद्वहेत् ॥
दीयमानां च तां वै यः प्रतिगृह्णाति कश्चन ।
तं भक्षयति भर्त्तारं षण्मासाभ्यन्तरे हि सा ॥
यस्याः स्युर्द्विगुणा दन्ता एतत्सामुद्रिका जगुः ।
त्रिस्तनी कन्यका या तु श्वशुरस्य कुलक्षयम् ॥
सा धत्ते नात्र सन्देहस्तस्मात्तां दूरतस्त्यजेत् ।
पृष्ठावर्त्ता भवेद्यस्या असती सा भवेद्ध्रुवम् ॥
बहुपापसमाचारा तस्मात्तां परिवर्जयेत् । इति ।

अथ आभ्यन्तराणि ।

तान्याश्वलायनोक्तानि—

यथा, दुर्विज्ञेयानि लक्षणान्यष्टौ पिण्डान् कृत्वा ऋतमग्रे प्रथमं यज्ञक्रते सत्यं प्रतिष्ठितं यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति । क्षेत्रादेदुभयतःसस्यांद्गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विद्यात् गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनो ह्रदात्सर्वसम्पन्ना देवनात्कितवी चतुष्पथाद्द्विप्रव्राजिनीरिणादधन्या श्मशानात्पतिघ्नीति ।

अस्यार्थः । लक्षणानि दुर्विज्ञेयानीति कृत्वा एवं परीक्षेत । क्षेत्रादिभ्योऽष्टभ्यो मृदमाहृत्याष्टौ पिण्डान् कृत्वा ऋतमग्रे इत्यनेन मन्त्रेण मृत्पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति । क्षेत्रादिति । उभयतःसस्यात् क्षेत्रादाहृतं मृत्पिण्डं गृह्णीयाच्चेत् अन्नवत्यस्याः प्रजा भविष्यतीति विद्यात् । उभयतःसस्यं क्षेत्रं नाम यदेकस्मिन् संवत्सरे द्विः फलति तत् । गोष्ठादिति । गोष्ठं नाम गवामवस्थानदेशः । तस्मादाहृतं मृत्पिण्डं यदि गृह्णीयात्तदा पशुमती ज्ञेया । वेदिपुरीषादिति । वेदिपुरीषं नाम अपवृत्ते कर्मणि या वेदिस्तस्या मृत्तिका । तस्मादाहृतं मृत्पिण्डं यदि गृह्णीयात्तदा ब्रह्मवर्चस्विनी । अविदासिनो ह्रदादिति । अविदासी ह्रदो नामाऽशोष्यो ह्रदः । तस्मादाहृतमृत्पिण्डग्रहणे सर्वसम्पन्ना ज्ञेया । देवनादिति । देवनं नाम दीव्यतेऽत्रेति द्यूतस्थानम् । तदाहृतमृत्पिण्डग्रहणे कितवी । चतुष्पथादिति । चतुष्पथादाहृतमृत्पिण्डग्रहणे द्विप्रव्राजिनी द्वौ प्रव्रजतीति द्विप्रव्राजिनी । ईरिणमूषरं यत्रोप्तं न प्ररोहति तत् । तदाहृतमृत्पिण्डग्रहणे अधन्या । श्मशानादिति । श्मशानाहृतमृत्पिण्डग्रहणे पतिघ्नी ।

नन्वत्रोदाहृतेषु स्त्रीलक्षणेषु धूर्तत्वपरापवादनिरतत्वादीनां केषांचिल्लक्षणानां बालभावेन विवाहात्पूर्वं विशिष्य ज्ञानासम्भवात्,

लक्षणानि परीक्ष्यादौ ततः कन्यां समुद्वहेत् ।

इत्युक्तं तत्कथमिति चेत्, सत्यम् । येषां लक्षणानां विवाहात्पूर्वं ज्ञानासम्भवस्तद्विषयकमिदं वचनम् । यानि तु दुर्लक्षणानि विवाहोत्तरकाले प्रागलभ्ये ज्ञायन्ते तेषु ज्ञातेषु परिणयादूर्ध्वमपि सर्वथा तां परित्यजेदिति । तथा च पृथ्वीचन्द्रोदये बृहन्नारदीयवचनमपि—

बालभावादविज्ञातस्वभावामुद्वहेद्यदि ।

प्रागलभ्येऽप्यगुणां ज्ञात्वा सर्वथा तां परित्यजेत् ॥ इति ।

ननु बहुद्रव्यव्ययायासादिप्राप्तायाः स्त्रियाः किमर्थं त्याग इति । उच्यते । अशुभलक्षणान्वितत्वात् ।

वर्जयेत्सर्वथा भूप्युरशुभा लक्षणैश्च याः ।

भर्तुरायुर्हरन्त्येता आलस्यादपरीक्षिताः ॥

इति बौधायनवचने भर्तुर्मरणाद्यनिष्टफलश्रवणेनाशुभलक्षणान्वितभार्यात्यागविधानात् । नन्वत्र यदनिष्टं फलं तत्किं विवाहेन उत केवलं तत्संसर्गेणेति । नाद्यः, विवाहोत्तरकाले मृतायामपि भार्यायां स्वमरणाद्यनिष्टफलावश्यम्भावापत्तेः । न च तथास्ति । नान्त्यः, दुर्लक्षणयुक्तसामान्यादिस्त्रीसंसर्गेणापि स्वमरणाद्यनिष्टफलप्राप्तिप्रसङ्गात् । अत्रोच्यते ।

कोपनां वामनां चैव दीर्घदेहां विरूपिणीम् ।

न्यूनाधिकाङ्गामुन्मत्तां पिशुनां नोद्वहेद्बुधः ॥

इत्यादिपूर्वोदाहृतवचनैरशुभलक्षणान्वितकन्योद्वहनेनैव दुष्टं फलं भवतीति प्रतीयते । तदप्यनिष्टं फलं भार्यायां विद्यमानायामेव न अविद्यमानायाम् । विद्यमानो हि शत्रुरपकारं ज-

नयति नाविद्यमानः । यथा च शालिग्रामगजाश्वादेर्विद्यमानस्यैवं शुभाशुभफलसूचकत्वं नाविद्यमानस्य । एवमत्रापीति । तच्चानिष्टं भार्यात्यागेनापैति । यथा मूलोत्पन्नाशिशुजनितपित्रादिमरणाद्यनिष्टं वचनात्तत्यागेन शान्तिकादिना वा नश्यति। तथात्राऽपि दुर्लक्षणान्वितकन्योद्वाहजनितस्वमरणाद्यनिष्टं भार्यात्यागेन नश्यति । सर्वथा तां परित्यजेदिति पूर्वोदाहृतवचनात् । यच्चोक्तं सामान्यादिस्त्रीसंसर्गेण स्वानिष्टफलम् । तन्न युक्तम् ।

भर्तुरायुर्हरन्त्येता आलस्यादपरीक्षिताः ।
सुलक्षणा सदाचारा पत्युरायुर्हि वर्द्धयेत् ॥

इत्यादिवचनैर्भार्याया भर्तुः शुभाशुभफलं प्रतीयते । अतस्तासु भार्यात्वाभावात्तासां च तस्मिन् भर्तृत्वाभावादेव फलाभावः । अथात्र योऽयं भार्यात्यागः स किं सर्वथा गृहनिष्काशनादिरूपस्तत्स्वातन्त्र्यप्रतिपादकः, उत तत्संसर्गादावेवेति । ननु सर्वथा परित्यागः कर्त्तव्यः पूर्वोक्तवचनादिति चेत्, न । सर्वथा परित्यागे कृते स्वातन्त्र्येण तया सुरापानादिदुश्चारित्र्याचरणे कृते—

पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ।

इत्यादिवचनैर्भार्याकृतमहापातकादिजनितः प्रत्यवायो भर्तुः स्यात् । न चेष्टापत्तिरिति वाच्यम्, वृश्चिकभयात्पलायमानस्याशीविषमुखनिपात इव न च स्वमरणादिदृष्टफलनिवृत्तौ क्रियमाणायां निरयपाताद्यदृष्टफलप्राप्तिर्न दोषायेति वाच्यम् । उभयत्रापि दुःखक्लेशाद्यसहत्वेन दुष्टफलत्वात् ।

रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके ।
अभावे ज्ञातयस्त्वेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः ॥

इत्यादिना स्त्रियाः स्वातन्त्र्यनिषेधाच्च । अतः संसर्गादा-

वेव त्याग इति सिद्धान्त इत्यास्तां तावत् प्रसक्तानुप्रसक्तचिन्तयेति ।

अत्र लक्षणपरीक्षायाश्चावश्यकत्वमाह—

बौधायनः,

वर्जयेत्सर्वथा भूष्णुरशुभा लक्षणैश्च याः ।
भर्तुरायुर्हरन्त्येता आलस्यादपरीक्षिताः ॥ इति ।

विवेकविलासेऽपि,

नापरीक्ष्य स्पृशेत्कन्यामविज्ञातां कदाचन ।
निघ्नन्ति येन योगैस्ताः कदाचिद्दक्षनिर्मितैः ॥ इति ।

उक्तशुभलक्षणान्वितकन्यापरिणयने विशेषफलमपि श्रूयते ।

भविष्ये,

ईदृग्लक्षणसम्पन्नां कन्यामुद्वहते तु यः ।
ऋद्धिर्वृद्धिस्तथा कीर्त्तिरनुतिष्ठति निश्चला ॥ इति ।

स्कान्दे काशीखण्डेऽपि,

लक्षणानि परीक्ष्यादौ ततः कन्यां समुद्वहेत् ।
सुलक्षणा सदाचारा पत्युरायुर्हि वर्द्धयेत् ॥
सुलक्षणैः सुचरितैरपि मन्दायुषं पतिम् ।
दीर्घायुषं प्रकुर्वन्ति प्रमदाः प्रमदास्पदम् ॥
अतः सुलक्षणा योषाः परिणेया विचक्षणैः । इति ।
सदा गृही सुखं भुङ्क्ते स्त्रीलक्षणवती यदि ।
अतः सुखसमृद्ध्यर्थमादौ लक्षणमीक्षयेत् ॥

तच्च लक्षणमष्टविधं वीक्षेत । तथा च—

स्कान्दे काशीखण्डे,

वपुरावर्त्तगन्धाश्च छाया सत्त्वं स्वरो गतिः ।
वर्णश्चेत्यष्टधा प्रोक्ता बुधैर्लक्षणभूमिका ॥

लक्षणभूमिका लक्षणावलोकनस्थानम्। वपुः शरीरम्। तस्य लक्षणं तु आपादतलकेशान्तं वक्ष्यते। चरणतल–तद्रेखा–ङ्गुष्ठाङ्गुलि–तन्नख–तत्पृष्ठ–गुल्फ–पार्ष्णि–जङ्घा–रोम–जानूरु–कटि–नितम्ब–स्फिक्–भग–जघन–वस्ति–नाभि–कुक्षि–पार्श्वोदर–मध्य–वलित्रय–रोमावली–हृदय–वक्षः–स्तनचू–चुक–जत्रु–स्कधांस–कक्षा–बाहु–मणिबन्ध–कंर–तत्पृष्ठ–तत्तद्रे–खाङ्गुष्ठाङ्गुली–नख–पृष्ठ–कृकाटिका–कण्ठ–चिबुक–हनु–कपोल–वदना–धरोत्तरोष्ठ–दन्त–जिह्वा–घण्टिका–तालु–हसित–नासा–क्षुत–नयन–पक्ष्म–भ्रू–कर्ण–भाल–मौलि–सीमन्त–केशक्रमेण। अयमेव च क्रमः स्कान्दे काशीखण्डे स्कन्देनोक्तः।

स यथा,

आपादतलमारभ्य यावन्मौलि त्वहं क्रमात्।
शुभाशुभानि वक्ष्यामि लक्षणानि मुने शृणु॥
आदौ पादतले रेखा ततोऽङ्गुष्ठाङ्गुलीनखाः।
पृष्ठं गुल्फद्वयं पार्ष्णी जङ्घा रोमाणि जानुनी॥
ऊरू कटिनितम्बस्फिग्युग्मं जघनवस्तिके।
नाभिः कुक्षिद्वयं पार्श्वोदरमध्यवलित्रयम्॥
रोमाली हृदयं वक्षो वक्षोजद्वयचूचुकम्।
जत्रुस्कन्धांसकक्षादोर्मणिबन्धकरद्वयम्॥
पाणिपृष्ठं पादतलं रेखाङ्गुष्ठाङ्गुलीनखाः।
पृष्ठं कृकाटिका कण्ठचिबुकं च हनुद्वयम्॥
कपोलौ वक्त्रमधरोत्तरोष्ठद्विजजिह्विकाः।
घण्टिका तालु हसितं नासिका क्षुतमक्षिणी॥
पक्ष्मभ्रूकर्णभालानि मौलिसीमन्तमौलिकाः।
षष्टिः षडुत्तरा योषिदङ्गलक्षणसंहतिः॥ इति।

अत्र यद्यपि स्कान्दे काशीखण्डे पादलक्षणं पृथक् नोक्तम् । तथापि गरुडपुराणादिषु पादलक्षणस्य पृथगुक्तत्वादुच्यते ।

भविष्यपुराणे,

प्रतिष्ठिततलाः सम्यग्रक्ताम्भोजसमत्विषः ।
तादृशाश्चरणा धन्या योषितां भोगवर्द्धनाः ॥
प्रतिष्ठिततलाः सम्यक् संलग्नभूभागपादाधस्तलाः ।
करालैरतिनिर्मांसै रूक्षैरथ शिरातताः ॥
दारिद्र्यं दुर्भगत्वं च प्राप्नुवन्ति न संशयः ॥ इति ।

कराला भयङ्करः ।

गरुडपुराणे,

यस्याः स्निग्धौ समौ पादौ तनुताम्रनखौ तथा ।
श्लिष्टाङ्गुली चोन्नताग्रौ तां प्राप्य नृपतिर्भवेत् ॥
निगूढगुल्फोपचितौ पद्मकान्तितलौ शुभौ ।
अस्वेदनौ मृदुतलौ मत्स्याङ्कुशयवाङ्कितौ ॥
वज्राब्जहलचिन्हौ च दास्याः पादौ ततोऽन्यथा । इति ।

हलं लाङ्गलम् ।

विष्णुधर्मोत्तरे,

सगग्रभूस्पृशौ यस्याश्चरणौ कमलोपमौ । इति ।

सा प्रशस्तेत्यनुषङ्गः ।

वराहसंहितायाम्,

स्निग्धोन्नताग्रतनुताम्रनखौ कुमार्याः
पादौ समोपचितचारुनिगूढगुल्फौ ।
श्लिष्टाङ्गुली कमलकान्ततलौ च यस्या-
स्तामुद्वहेद्यदि भुवोऽधिपतित्वमिच्छेत् ॥

मत्स्याङ्कुशाब्जयववज्रहलासिचिह्ना—
वस्वेदनौ मृदुतलौ चरणौ प्रशस्तौ । इति ।

इति पादलक्षणम् ।

अथ पादतललक्षणम् ।

स्कान्दे काशीखण्डे,
स्त्रीणां पादतलं स्निग्धं मांसलं मृदुलं समम् ।
अस्वेदमुष्णमरुणं बहुभोगोचितं स्मृतम् ॥
रूक्षं विवर्णं परुषं खण्डितं प्रतिबिम्बकम् ।
शूर्पाकारं विशुष्कं च दुःखदौर्भाग्यसूचकम् ॥ इति ।
सामुद्रतिलके,
असितं दौर्भाग्याय श्वेतं दुःखाय योषाणाम् ।
शूर्पाकृतिभिश्चेभ्यः कुटिलैः स्युर्दुर्भगाश्चरणतलैः ॥ इति ।
योषा स्त्री ।

इति पादतललक्षणम् ।

अथ पादरेखालक्षणम् ।

जगन्मोहने समुद्रः,
यस्याः पादतले रेखा तर्जन्यां सुप्रकाशते ।
भर्त्तारं लभते शीघ्रं प्रिया भर्तुश्च जायते ॥
चक्रं पद्मं ध्वजं छत्रं स्वस्तिकं वर्धमानकम् ।
यासां पादे च दृश्यन्ते ज्ञेयास्ता राजयोषितः ॥
पद्मं मालाङ्कुशं छत्रं नन्द्यावर्त्तः प्रदक्षिणम् ।
पाणिपादेषु दृश्यन्ते राज्ञीं वदन्ति तां बुधाः ॥ इति ।
स्कान्दे काशीखण्डे,
चक्रस्वस्तिकशङ्खाब्जध्वजमीनातपत्रवत् ।
यस्या पादतले रेखा सा भवेत्क्षितिपाङ्गना ॥

भवेदखण्डभोगायोर्ध्वा मध्याङ्गुलिसङ्गता ।
रेखाऽऽखुसर्पकाकाभा दुःखदारिद्र्यसूचिका ॥
आखुर्मूषकः । गरुडपुराणे पादतलमुमक्रम्य-
वाजिकुञ्जरश्रीवृक्षयूपैश्च यवतोमरैः ।
ध्वजचामरमालाभिः शैलकुण्डलवेदिभिः ॥
शङ्खातपत्रपद्मैश्च मत्स्यस्वस्तिकसद्रथैः ।
लक्षणैरङ्कुशाद्यैश्च स्त्रियः स्यू राजवल्लभाः ॥ इति ।
गर्गसंहितायाम्,
शङ्खाङ्कुशं पद्मदलातपत्रं
पृथ्वी च नक्षत्रमथाद्रिरूपम् ।
चक्रं शशी दिनकृच्चामरं च
तथा वज्रं व्यजनं तोरणं च ॥
सिंहो वत्सस्तुरगः स्वस्तिकं च
मत्स्यो हंसः पूर्णकुम्भस्तथा च ।
पुरं महद्वारण एव चापि
तथा समुद्रो मकरः पताका ॥
तलेष्वथैतानि भवन्ति यासां
पादाङ्गुलीष्वेव च संस्थितानि ।
ता भोगवत्यः सुसमृद्धवत्यः
प्रजान्विताश्चैव भवन्ति नार्यः ॥ इति ।
सामुद्रतिलके,
श्वशृगालमहिषकाकोलूकाहिकोककरभाद्याः ।
चरणतले जायन्ते यस्याः सा दुःखमाप्नोति ॥ इति ।
कोकश्चक्रवाकः ।
ऊर्ध्वा रेखाङ्घ्रितले यावन्मध्याङ्गुलिं गता यस्याः ।

सा लभते पतिमाढ्यं प्रिया पुनर्भवति तस्यापि ॥ इति ।

अत्र चक्रादिसर्वलक्षणसद्भावे पूर्णं फलं कल्पनीयम् । तेषु यस्य कस्य चित्सद्भावे तदनुसारेणेति । तथा च—

सामुद्रतिलके,

चक्रादिचिह्नमध्ये स्यादेकं बहूनि वा यासाम् ।
ऐश्वर्यं सौख्यं वा तासामपि तदनुमानेन ॥ इति ।

इति पादरेखालक्षणम् ।

अथाङ्गुष्ठलक्षणम् ।

स्कान्दे काशीखण्डे,

उन्नतो मांसलोऽङ्गुष्ठो वर्त्तुलोऽतुलभोगदः ।
वक्रो ह्रस्वश्च विकटो दुःखदौर्भाग्यसूचकः ॥
विधवा विपुलाङ्गुष्ठा दीर्घाङ्गुष्ठेन दुर्भगा । इति ।

सामुद्रतिलके,

ह्रस्वश्चिपिटो वक्रः कुलक्षयाय ध्रुवं स्त्रीणाम् ।
अत्राङ्गुष्ठ इत्यनुषङ्गः ।
वैधव्यं विपुलेन द्वेष्यत्वं स्वल्पवर्त्तुलेन स्यात् ।
रमणावमानना पुनरङ्गुष्ठेनातिदीर्घेण ॥ इति ।

इत्यङ्गुष्ठलक्षणम् ।

अथाङ्गुलीलक्षणम् ।

भविष्यपुराणे,

अङ्गुल्यः संहता वृत्ता ऋज्व्यः सूक्ष्मनखास्तथा ।
कुर्वन्त्यनन्तमैश्वर्यं राजभोगं च योषिताम् ॥
संहता अविरलाः । राजभोगं राजभोगोपमं भोगम् ।
ह्रस्वाश्च जीवितं ह्रस्वं विरला वित्तहानये ।
दारिद्र्यं मूलभुग्नासु प्रेष्यत्वं पृथुलासु च ॥

मूलघुप्राः प्रथमपर्ववक्राः ।
परस्परं समारूढैस्तनुभिर्वृद्धपर्वभिः ।
बहूनपि पतीन् हत्वा दासी भवति वै द्विजाः ॥
अङ्गुल्यस्तपर्वाणस्तुङ्गाग्राः कोमलाः समाः ।
रक्षकाश्चनवासाय विपरीता विपत्तये ॥ इति ।
स्कान्दे काशीखण्डे,
मृदवोऽङ्गुलयः शस्ता घना वृत्ताः समुन्नताः ।
दीर्घाङ्गुलीभिः कुलटा कृशाभिरतिनिर्घृणा ॥
कुलटा वेश्या ।
ह्रस्वायुष्या च ह्रस्वाभिर्मुग्राभिर्मुग्रवर्त्तिनी ।
मुग्राभिर्वक्राभिः ।
चिपिटाभिर्भवेद्दासी विरलाभिर्दरिद्रिणी ॥
परस्परसमारूढा पादाङ्गुल्यो भवन्ति वै ।
हत्वा बहूनपि पतीन् परप्रेष्या तदा भवेत् ॥
परप्रेष्या दासी ।
यस्याः पथि समायान्त्या रजो भूमेः समुच्छलेत् ।
पांसुला सा प्रजायेत कुलत्रयविनाशिनी ॥
पांसुला वेश्या ।
यस्याः कनिष्ठिका भूमिं नै गच्छन्त्याः परिस्पृशेत् ।
अनामिका मध्यमा च यस्या भूमिं न संस्पृशेत् ॥
पतिद्वयं निहन्त्याद्या द्वितीया च पतित्रयम् ।
पतिहीनत्वकारिण्यौ हीने ते द्वे इमे यदि ॥
प्रदेशिनी भवेद्यस्या अङ्गुष्ठादतिरेकिणी ।
कन्यैव कुलटा सा स्यादेष एव विनिश्चयः ॥ इति ।

---

१ अस्य परिस्पृशेदित्यनेनान्वयः ।

विष्णुधर्मोत्तरे,
भुवं कनिष्ठिका यस्या न स्पृशेत कथञ्चन ।
न तां कुर्वीत भार्यार्थे मृत्युः स कथितो बुधैः ॥ इति ।
गरुडपुराणे,
कनिष्ठिकाऽनामिका वा यस्या न स्पृशते महीम् ।
अङ्गुष्ठं वा गतातीत्य तर्जनी कुलटा तु सा ॥ इति ।
पराशरोऽप्याह,
एकापि यस्या न महीं संस्पृशेच्चरणाङ्गुलिः ।
तलमध्यमथो यस्या अधमां तां विनिर्दिशेत् ॥
पादे प्रदेशिनी यस्या अङ्गुष्ठं समतिक्रमेत् ।
दुःखितां दुर्भगां चैव कन्यां तां परिवर्जयेत् ॥
पादे मध्यमिका यस्याः क्षितिं न स्पृशते यदि ।
न सा रमति कौमारे स्वच्छन्दाऽकार्यकारिणी ॥
पादे अनामिका यस्याः क्षितिं न स्पृशते यदि ।
न सा रमति कौमारे द्वितीये सुप्रतिष्ठिता ॥
पादे कनिष्ठिका यस्याः क्षितिं न स्पृशते यदि ।
द्वितीयं पुरुषं हत्वा तृतीये सुप्रतिष्ठिता ॥ इति ।
जगन्मोहने समुद्रः,
यस्या न स्पृशते भूमिमङ्गुली च कनिष्ठिका ।
भर्त्तारं प्रथमं हत्वा द्वितीयेन सह स्थिता ॥
यस्या न स्पृशते भूमिं कनिष्ठा विरला द्विजाः ।
सन्नतभ्रुकुटीगण्डा पुंश्चली चाप्यभागिनी ॥
यस्या अनामिका ह्रस्वा तां विद्यात्कलहप्रियाम् ।
अङ्गुष्ठं तु व्यतिक्रम्य यस्याः पादे प्रदेशिनी ॥
कुमारी कुरुते जारं यौवनस्यैव का कथा । इति ।

विवेकविलासे,

यत्पादाङ्गुलिरेकापि भवेद्दीना कथञ्चन ।
येन केनापि सा सार्धं प्रायः कलहकारिणी ॥ इति ।

इति पादाङ्गुलीलक्षणम् ।

अथ नखलक्षणम् ।

गर्गसंहितायाम्,

कुशेशयाः पद्मपलाशवर्णा
रूप्यप्रभा विद्रुमसन्निभाश्च ।
श्लक्ष्णाः सुजाताश्च भवन्ति धन्याः
स्त्रीणां नखाः पद्ममणिप्रभाश्च ॥ इति ।

पद्मपलाशवर्णाः पद्मपत्रसदृशाः । विद्रुमं प्रवालम् । पद्ममणिः पद्मरागः ।

भविष्ये,

सुभगत्वं नखैः स्निग्धैराताम्रैश्च धनाढ्यता ।
पुत्राः स्युरुन्नतैरेभिः सुसूक्ष्मैश्चापि राजता ॥
पाण्डुरैः स्फुटितैः रूक्षैर्नीलैर्धूम्रैस्तथा खरैः ।
निःस्वता भवति स्त्रीणां पीतैश्चाभक्ष्यभक्षणम् ॥ इति ।

स्कान्दे काशीखण्डे,

स्निग्धाः समुन्नतास्ताम्रा वृत्ताः पादनखाः शुभाः । इति ।

इति नखलक्षणम् ।

अथ चरणपृष्ठलक्षणम् ।

स्कान्दे काशीखण्डे,

राज्ञीत्वमूचकं स्त्रीणां पादपृष्ठं समुन्नतम् ।
अस्वेदमशिराढ्यं च मसृणं मृदु मांसलम् ॥
दारिद्र्यं मध्यनिम्नेन शिरालेन सदाध्वगा ।

रोमाढ्येन भवेद्दासी निर्मांसेन च दुर्भगा ॥ इति ।

इति चरणपृष्ठलक्षणम् ।

अथ गुल्फलक्षणम् ।

भविष्ये,

गुल्फाः स्निग्धाश्च वृत्ताश्चासमारूढशिरास्तथा ।
यस्याः सा तु धनाढ्यत्वं बान्धवाद्यैः समाप्नुयात् ॥ इति ।

स्कान्दे काशीखण्डे,

गूढगुल्फौ शुभायोक्तावशिरालौ सुवर्त्तुलौ ।
विषमौ शिथिलौ रूक्षौ स्यातां दौर्भाग्यसूचकौ ॥ इति ।

जगन्मोहने समुद्रः,

गुल्फैश्च महिषाकारैर्बन्धनं वधमाप्नुयात् ।
निगूढगुल्फा या नारी साऽत्यन्तं सुखमेधते ॥ इति ।

गर्गः,

अत्युन्नताभ्यन्तरतः शिराला
गुल्फा विशालाश्च भवन्ति यासाम् ।
प्रजा न विन्दन्ति धनं न चार्या-
स्ता गुल्फदोषैर्विधवा भवन्ति ॥

इति गुल्फलक्षणम् ।

अथ पार्ष्णिलक्षणम् ।

स्कान्दे काशीखण्डे,

समपार्ष्णिः शुभा नारी पृथुपार्ष्णिश्च दुर्भगा ।
कुलटोन्नतपार्ष्णिः स्यादीर्घपार्ष्णिश्च दुःखभाक् ॥ इति ।

जगन्मोहने समुद्रः,

उन्नतपार्ष्णिर्दुःशीला महापार्ष्णिस्तु बन्धकी ।
दीर्घपार्ष्णिः परिक्लिष्टा समपार्ष्णिस्तु शोभना ॥ इति ।

बन्धकी व्यभिचारिणी ।

विवेकविलासे,

कृपणा स्यान्महापार्ष्णिर्दीर्घपार्ष्णिस्तु कोपना ।
दुःशीलोन्नतपार्ष्णिश्च निन्द्या विषमपार्ष्णिका ॥ इति ।

इति पार्ष्णिलक्षणम् ।

अथ जङ्घालक्षणम् ।

गरुडपुराणे,

जङ्घे च रोमरहिते सुवृत्ते विशिरे शुभे ॥ इति ।

विशिरे शिरावर्जिते ।

भविष्ये,

अशिराः शरकाण्डाभाः सुवृत्तालपतनूरुहाः ।
जङ्घाः कुर्वन्ति सौभाग्यं यानं च गजवाजिभिः ॥
क्लिश्यते रोमजङ्घा स्त्री भ्रमत्युद्भ्रद्धपिण्डिका ।
काकजङ्घा पतिं हन्ति वाचाटा कपिला च या ॥ इति ।

वाचाटा बहुप्रलपनशीला ।

स्कान्दे काशीखण्डे,

रोमहीने समे स्निग्धे यज्जङ्घे क्रमवर्त्तुले ।
सा राजपत्नी भवति विशिरे सुमनोहरे ॥ इति ।

सामुद्रतिलके,

शुष्के पृथू विशाले शिरान्विते स्थूलपिण्डिके यस्याः ।
जङ्घे मांसोपचिते श्लथमूले पांसुला सा स्यात् ॥ इति ।

इति जङ्घालक्षणम् ।

अथ रोमलक्षणम् ।

भविष्ये,

अत्यन्तं कुटिलै रूक्षैः स्फुटिताग्रैर्गुडप्रभैः ।

अनेकजैस्तथा रोमैः केशैश्चापि तथाविधैः ॥
अत्यन्तं पिङ्गला नारी विषकन्येति निश्चिता।
सप्ताहाभ्यन्तरे पापा पतिं हन्यान्न संशयः ॥ इति।
स्कान्दे काशीखण्डे,
एकरोमा राजपत्नी द्विरोमापि सुखास्पदा।
त्रिरोमा रोमकूपेषु भवेद्वैधव्यदुःखभाक् ॥ इति।

इति रोमलक्षणम्।

अथ जानुलक्षणम्।

गरुडपुराणे,
अनुल्बणं सन्धिदेशे समं जानुद्वयं शुभम्। इति।
भविष्ये,
जानुभिश्चैव मार्जारासिंहजान्वनुकारिभिः।
श्रियमाप्य सुभाग्यत्वं प्राप्नुवन्ति सुतांस्तथा ॥
घटाभैरध्वगा नार्यो निर्मांसैः कुलटाः स्त्रियः।
शिरालैरपि हिंस्राः स्युर्विश्लिष्टैर्धनवर्जिताः ॥ इति।
स्कान्दे काशीखण्डे,
वृत्तं पिशितसंलग्नं जानुयुग्मं प्रशस्यते।
निर्मांसं स्वैरचारिण्या दरिद्रायाश्च विश्लथम् ॥ इति।
उत्पले समुद्रः,
सुश्लिष्टे जानुनी धन्ये शिरारोमविवर्जिते। इति।

इति जानुलक्षणम्।

अथोरुलक्षणम्।

भविष्ये,
हस्तिहस्तनिभैर्वृत्तै रम्भाभैः करभोपमैः।
प्राप्नुवन्त्यूरुभिः शश्वत् स्त्रियः सुखमनङ्गजम् ॥

दौर्भाग्यं स्थूलमांसाभिर्बन्धनं रोमशोरुभिः ।
तनुभिर्वैधमित्याहुर्मध्यच्छिद्रैस्त्वनीशता ॥ इति ।
गरुडपुराणे,
ऊरू करिकराकारौ पीवरौ च समौ शुभौ । इति ।
स्कान्दे काशीखण्डे,
विशिरैः करभाकारैरूरुभिर्मसृणैर्घनैः ।
सुवृत्तै रोमरहितैर्भवेयुर्भूपवल्लभाः ॥
वैधव्यं रोमशैरुक्तं दौर्भाग्यं चिपिटैरपि ।
मध्यच्छिद्रैर्महादुःखं दारिद्र्यं कठिनत्वचैः ॥ इति ।

इत्यूरुलक्षणम् ।

अथ कटिलक्षणम् ।

स्कान्दे काशीखण्डे,
चतुर्भिरङ्गुलैः शस्ता कटिर्विंशतिसंयुतैः ।
समुन्नतनितम्बाढ्या चतुरस्रा मृगीदृशाम् ॥
विनता चिपिटा दीर्घा निर्मांसा सङ्कटा कटिः ।
ह्रस्वा रोमयुता नार्या दुःखवैधव्यसूचिका ॥ इति ।

इति कटिलक्षणम् ।

अथ नितम्बलक्षणम् ।

स्कान्दे काशीखण्डे,
नितम्बबिम्बो नारीणामुन्नतो मांसलः पृथुः ।
महाभोगाय सम्प्रोक्तस्तदन्योऽशर्मणे मतः ॥ इति ।
सामुद्रतिलके,
विकटो चिपिटो नतिमान् निर्मांसो रोमशः खरः शुष्कः
कुरुते नितम्बफलको दरिद्रतां दुःखदौर्भाग्यम् ॥ इति ।

इति नितम्बलक्षणम् ।

अथ स्फिग्लक्षणम्।

स्कान्दे काशीखण्डे,

कपित्थफलवद्वृत्तौ मृदुलौ मांसलौ घनौ।
स्फिचौ बलिविनिर्मुक्तौ रतिसौख्यविवर्द्धनौ॥ इति।

भविष्ये,

कपित्थफलसङ्काशः पीनो बलिविवर्जितः।
स्फिक् प्रशस्तो हि नारीणां निन्दितोऽन्यथा द्विज॥ इति।

इति स्फिग्लक्षणम्।

अथ भगलक्षणम्।

भविष्ये,

ऊर्ध्वरोम भगं यस्याः समं सुश्लिष्टसंस्थितम्।
अपि नीचकुलोत्पन्ना राजपत्नी भवत्यसौ॥
अश्वत्थपत्रसदृशः कूर्मपृष्ठोऽप्यचूलिकः।
अचूलिकः अशिखः।
शशिबिम्बनिभः स्थूलस्तथा च कलशाकृतिः॥
शकटाकृतिरिति पाठान्तरम्।
भगः शस्ततमः स्त्रीणां रतिसौभाग्यवर्द्धनः।
तिलपुष्पनिभो यश्च यश्चाश्वखुरसन्निभः॥
द्वावप्येतौ परप्रेष्यां कुर्वेन्ति च दरिद्रताम्।
उलूखलनिभैः शोकं मरणं विवृतानने॥
विरूपैश्चातिनिर्मांसैर्गजाश्वनिभरोमभिः।
दौःशील्यं दुर्भगत्वं च दारिद्र्यं चाधिगच्छति॥ इति।

गारुडे,

अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम्। इति।

स्कान्दे काशीखण्डे,

शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः ।
वामोन्नतस्तु कन्यादः पुत्रदो दक्षिणोन्नतः ॥
आखुरोमा गूढमणिः सुश्लिष्टः संहतः पृथुः ।
तुङ्गः कमलपर्णाभः शुभोऽश्वत्थदलाकृतिः ॥
कुरङ्गखुररूपो यश्चुल्लीकोटरसन्निभः ।
कुरङ्गो हरिणः ।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः ॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति ।
चिपिटः कर्पराकारः किङ्करीपदभोगः ॥
कर्परः कटाहः ।
वंशवेतसपत्राभो गजरोमोच्चनासिकः ।
विकटः कुटिलाकारो लम्बगल्लः श्लथोऽशुभः ॥ इति ।

विष्णुधर्मोत्तरे,

गुह्यं प्रदक्षिणावर्त्तमश्वत्थदलसन्निभम् । इति ।

जगन्मोहने समुद्रः,

आवर्त्तस्तु भवेद्यस्या भगस्योपरिमस्तके ।
सा चैव वर्धते पुत्रैर्धनधान्यैः समन्विता ॥
अश्वत्थपत्रसङ्काशं गुह्यं यस्याः प्रजायते ।
सा भवेत्सुभगा नारी यदि गूढो मणिर्भवेत् ॥
कूर्मपृष्ठो गजस्कन्धः समरोमाल्पनासिकः ।
विस्तीर्णः पद्मवर्णश्च षडेते सुभगा भगाः ॥
कठोरः खररोमा च शुष्कश्च दीर्घनासिकः ।
सङ्कटो विरलश्चैव षडेते दुर्भगा भगाः ॥ इति ।

सामुद्रतिलके,

शुचिरत्युष्णः सुघनो गोजिह्वाकर्कशोऽथ वा मृदुलः ।

अतिसंवृतः सुगन्धिः सप्तभगा वर्द्धयन्ति रतिम् ॥ इति ।

इति भगलक्षणम् ।

अथ जघनलक्षणम् ।

भविष्ये,

सव्यावर्त्तं समं चारु सूक्ष्मरोमचितं पृथु ।
जघनं शस्यते स्त्रीणां रतिसौख्यकरं द्विजाः ॥ इति ।

स्कान्दे काशीखण्डे,

भगस्य भालं जघनं विस्तीर्णं तुङ्गमांसलम् ।
मृदुलं मृदुरोमाढ्यं दक्षिणावर्त्तमीडितम् ॥
वामावर्त्तं च निर्मांसं भुग्नं वैधव्यसूचकम् ।
सङ्कटं स्थपुटं रूक्षं जघनं दुःखदं सदा ॥ इति ।

उत्पले समुद्रः,

जघनं विपुलं यस्याः सुस्पर्शं रोमवर्जितम् ।
सुवर्णाभरणैर्युक्ता राजपत्नी भवत्यसौ ॥ इति ।

इति जघनलक्षणम् ।

अथ वस्तिलक्षणम् ।

स्कान्दे काशीखण्डे,

वस्तिः प्रशस्ता विपुला मृद्वी स्तोकसनुन्नता ।
रोमशा च शिराला च रेखाङ्का नैव शोभना ॥ इति ।
स्तोकसमुन्नता ईषदुचा ।

इति वस्तिलक्षणम् ।

अथ नाभिलक्षणम् ।

गरुडपुराणे,

विस्तीर्णमांसोपचिता गम्भीरा विपुला शुभा ॥
नाभिः प्रदक्षिणावर्ता–इति ।

शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः ।
वामोन्नतस्तु कन्यादः पुत्रदो दक्षिणोन्नतः ॥
आखुरोमा गूढमणिः सुश्लिष्टः संहतः पृथुः ।
तुङ्गः कमलपर्णाभः शुभोऽश्वत्थदलाकृतिः ॥
कुरङ्गखुररूपो यश्चुल्लीकोटरसन्निभः ।
कुरङ्गो हरिणः ।
रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः ॥
शङ्खावर्त्तो भगो यस्याः सा गर्भमिह नेच्छति ।
चिपिटः कर्पराकारः किङ्करीपदभोगः ॥
कर्परः कटाहः ।
वंशवेतसपत्राभो गजरोमोच्चनासिकः ।
विकटः कुटिलाकारो लम्बगल्लः श्लथोऽशुभः ॥ इति ।

विष्णुधर्मोत्तरे,

गुह्यं प्रदक्षिणावर्त्तमश्वत्थदलसन्निभम् । इति ।

जगन्मोहने समुद्रः,

आवर्त्तस्तु भवेद्यस्या भगस्योपरिमस्तके ।
सा चैव वर्धते पुत्रैर्धनधान्यैः समन्विता ॥
अश्वत्थपत्रसङ्काशं गुह्यं यस्याः प्रजायते ।
सा भवेत्सुभगा नारी यदि गूढो मणिर्भवेत् ॥
कूर्मपृष्ठो गजस्कन्धः समरोमाल्पनासिकः ।
विस्तीर्णः पद्मवर्णश्च पडेते सुभगा भगाः ॥
कठोरः खररोमा च शुष्कश्च दीर्घनासिकः ।
सङ्कटो विरलश्चैव षडेते दुर्भगा भगाः ॥ इति ।

सामुद्रतिलके,

शुचिरत्युष्णः सुघनो गोजिह्वाकर्कशोऽथ वा मृदुलः ।

अतिसंवृतः सुगन्धिः सप्तभगा वर्द्धयन्ति रतिम् ॥ इति।

इति भगलक्षणम्।

अथ जघनलक्षणम्।

भविष्ये,

सव्यावर्त्तं समं चारु सूक्ष्मरोमचितं पृथु।
जघनं शस्यते स्त्रीणां रतिसौख्यकरं द्विजाः ॥ इति।

स्कान्दे काशीखण्डे,

भगस्य भालं जघनं विस्तीर्णं तुङ्गमांसलम्।
मृदुलं मृदुरोमाढ्यं दक्षिणावर्त्तमीडितम् ॥
वामावर्त्तं च निर्मांसं भुग्नं वैधव्यसूचकम्।
सङ्कटं स्थपुटं रूक्षं जघनं दुःखदं सदा ॥ इति।

उत्पले समुद्रः,

जघनं विपुलं यस्याः सुस्पर्शं रोमवर्जितम्।
सुवर्णाभरणैर्युक्ता राजपत्नी भवत्यसौ ॥ इति।

इति जघनलक्षणम्।

अथ वस्तिलक्षणम्।

स्कान्दे काशीखण्डे,

वस्तिः प्रशस्ता विपुला मृद्वी स्तोकसनुन्नता।
रोमशा च शिराला च रेखाङ्का नैव शोभना ॥ इति।

स्तोकसमुन्नता ईषदुच्चा।

इति वस्तिलक्षणम्।

अथ नाभिलक्षणम्।

गरुडपुराणे,

विस्तीर्णमांसोपचिता गम्भीरा विपुला शुभा ॥
नाभिः प्रदक्षिणावर्ता—इति।

स्कान्दे काशीखण्डे,
गम्भीरा दक्षिणावर्त्ता नाभिः स्यात्सुखसम्पदे ।
वामावर्त्ता समुत्तानाव्यक्तग्रन्थिर्न शोभना ॥ इति ।
गर्गः,
संछन्ननाभ्यस्त्वविवर्णनाभ्यः
प्रदक्षिणावर्त्तविवृत्तनाभ्यः ।
स्त्रियः प्रशंसन्ति विशालनाभ्यः
पद्मायताभिश्च सुमण्डलाभिः ॥ इति ।
नाभिभिरिति, शेषः ।
जगन्मोहने समुद्रः,
गम्भीरनाभी या नारी सा भवेत्पुरुषप्रिया ।
पद्माकारा भवेन्नाभिर्नूनं सा सुखमेधते ॥ इति ।

इति नाभिलक्षणम् ।

अथ कुक्षिलक्षणम् ।

भविष्ये,
विपुलैः सुकुमारैश्च कुक्षिभिः सुबहुप्रजाः ।
मण्डूककुक्षिर्या नारी राजानं सा प्रसूयते ॥ इति ।
स्कान्दे काशीखण्डे,
सूते सुतान् बहून्नारी पृथुकुक्षिः सुखास्पदम् ।
क्षितीशं जनयेत्पुत्रं मण्डूकाभेन कुक्षिणा ॥
उन्नतेन वलीभाजा सावर्त्तेनापि कुक्षिणा ।
वन्ध्या प्रव्रजिता दासी क्रमाद्योषा भवेदिह ॥ इति ।

इति कुक्षिलक्षणम् ।

अथ पार्श्वलक्षणम् ।

स्कान्दे काशीखण्डे,

समैः समांसैर्मृदुभिर्योषिन्मग्नास्थिभिः शुभैः ।
पार्श्वैः सौभाग्यसुखयोर्निधानं स्यादसंशयम् ॥
यस्या दृश्यशिरे पार्श्वे उन्नते रोमसंयुते ।
निरपत्या च दुःशीला सा भवेत् दुःखशेवधिः ॥ इति ।
शेवधिर्निधिः, दुःखस्थानमित्यर्थः ।
गर्गः,
पार्श्वानि यासां मृदुलान्वितानि
प्रदक्षिणावर्त्तनसंयुतानि ।
श्लिष्टान्यरोमाणि निरन्तराणि
स्त्रीणां प्रशंसन्ति सुसंहितानि ॥ इति ।

इति पार्श्वलक्षणम् ।

अथोदरलक्षणम् ।

स्कान्दे काशीखण्डे,
उदरेणातितुच्छेन विशिरेण मृदुत्वचा ।
योषिद्भवति भोगाढ्या नित्यं मिष्टान्नसेविनी ॥
कुम्भाकारं दरिद्राया जठरं च मृदङ्गवत् ।
कूष्माण्डाभं यवाभं च दुष्पूरं जायते स्त्रियाः ॥
सुविशालोदरी नारी निरपत्या च दुर्भगा ।
प्रवङ्गजठरा हन्ति श्वशुरं चापि देवरम् ॥ इति ।
गर्गसंहितायाम्,
यासामनिम्नानि नतोन्नतानि
सूक्ष्माण्यरोमाणि तथोदराणि ।
ता भोगवत्यो हृदयैश्च शुक्लैः
प्रजान्विताश्चापि भवन्ति नार्यः ॥ इति ।

इत्युदरलक्षणम् ।

अथ मध्यलक्षणम् ।

भविष्ये,

पयोधरभरानम्रः सुसमस्त्रिवलीगुरुः ।
मध्यः शुभावहः स्त्रीणां रोमराजीविभूषितः ॥
पणवाभैर्मृदङ्गाभैस्तथा मध्यैर्यवोपमैः ।
प्राप्नुवन्ति भयावासं क्लेशदौःशील्यमीदृशैः ॥ इति ।

उत्पले समुद्रः,

मध्यं वलित्रयचितं सुस्पर्शं रोमवर्जितम् ।
यस्याः सा राजमहिषी कन्या स्यान्नात्र संशयः ॥ इति ।

इति मध्यलक्षणम् ।

अथ वलित्रयलक्षणम् ।

भविष्ये,

उन्नतैर्वलिभिर्मध्याः सावर्त्तैः कुलटाः स्त्रियः ।
परकर्मरताश्च स्युः प्रव्रज्यां च समाप्नुयुः ॥ इति ।

गारुडे,

अरोमा त्रिवलिर्नार्याः—इति ।

स्कान्दे काशीखण्डे,

भोगाढ्या सवलित्रया । इति ।

इति वलित्रयलक्षणम् ।

अथ रोमराजिलक्षणम् ।

स्कान्दे काशीखण्डे,

ऋज्वी तन्वी च रोमाली यस्याः सा शर्म्मनर्म्मभूः ।
कपिला कुटिला स्थूला व्युच्छिन्ना रोमराजिका ॥
चौरवैधव्यदौर्भाग्यं विद्यादिह योषिताम् । इति ।

जगन्मोहने समुद्रः,

रोमराजी भवेत्खण्डा ह्रस्वा वक्रा समुन्नता ।
अर्धाब्देन तु भर्त्तारं हत्वा भवति निर्द्धना ॥
रोमराजी पुनर्यस्यास्त्रिवलीभिर्विराजिता ।
गम्भीरा नाभिका यस्याः सा प्रशस्ता निगद्यते ॥ इति ।

इति रोमराजिलक्षणम् ।

अथ हृदयलक्षणम् ।

भविष्यपुराणे,

उन्नतावनतैः क्षुद्रा विषमैर्विषमाशयाः ।
आयुरैश्वर्यसम्पन्ना वनिता हृदयैः समैः ॥ इति ।

स्कान्दे काशीखण्डे,

निर्लोम हृदयं यस्याः समं निम्नत्ववर्जितम् ।
ऐश्वर्यमप्यवैधव्यं प्रियमेव च सा लभेत् ॥
विस्तीर्णहृदया योषा पुंश्चली निर्दया तथा ।
उद्भिन्नरोमहृदया पतिं हन्ति विनिश्चितम् ॥ इति ।

सामुद्रतिलके,

निर्लोमं व्रणरहितं हृदयं यस्याः समं मनोहारि ।
ऐश्वर्यमवैधव्यं पतिप्रियात्वं भवति तस्याः ॥
पिशितविवर्जितमुन्नतविनतं हृदयं व्रणान्वितं विषमम् ।
कर्मकरीत्वं तनुते वनितानां तत्क्षणादेव ॥ इति ।

इति हृदयलक्षणम् ।

अथ वक्षोलक्षणम् ।

भविष्यपुराणे,

सुसमं मांसलं चारु शिरारोमविवर्जितम् ।
वक्षो यस्य भवेन्नार्या भोगान् भुङ्क्ते यथेप्सितान् ॥
हिंस्रा भवति वक्रेण दौःशील्यं रोमशेन तु ।

निर्मांसेन तु वैधव्यं विस्तीर्णेन कलिप्रिया ॥ इति ।
विस्तीर्णं परिमाणाधिकम् । तत्परिमाणं चोक्तम्—
स्कान्दे काशीखण्डे,
अष्टादशाङ्गुलततमुरः पीवरमुन्नतम् ।
सुखाय दुःखाय भवेद्रोमशं विषमं पृथु ॥ इति ।
वराहः,
रोमप्रवर्जितमुरो मृदु चाङ्गनानाम्—इति ।
मृदु नातिमृदु ।
सामुद्रतिलके,
पीवरमुन्नतमायतमुरःस्थलं न मृदु न कठिनं विशिरम् ।
अष्टादशाङ्गुलततं रोमविहीनं शुभं स्त्रीणाम् ॥ इति ।

इति वक्षोलक्षणम् ।

अथ स्तनलक्षणम् ।

भविष्यपुराणे,
सुवृत्तमुन्नतं पीनमदूरोन्नतमायतम् ।
स्तनयुग्मं सदा शस्तमतोऽन्यदसुखावहम् ॥
उन्नतिः प्रथमे गर्भे द्वयोरेकस्य भूयसी ।
वामे तु जायते कन्या दक्षिणे तु भवेत्सुतः ॥
स्तनैः सर्पफणाकारैः श्वजिह्वाकृतिभिस्तथा ।
दारिद्र्यमभिगच्छन्ति स्त्रियः पुरुषचेष्टिताः ॥ इति ।
स्कान्दे काशीखण्डे,
घनौ वृत्तौ दृढौ पीनौ समौ शस्तौ पयोधरौ ।
स्थूलाग्रौ विरलौ शुष्कौ वामोरूणां न शर्मदौ ॥
दक्षिणोन्नतवक्षोजा पुत्रिणीष्वग्रणीर्मता ।
वामोन्नतकुचा सूते कन्यां सौभाग्यसुन्दरीम् ॥

अवघट्टघटीतुल्यौ कुचौ दौःशील्यसूचकौ।
पीवरास्यौ सान्तरालौ पृथू पीनौ न शोभनौ॥
मूले स्थूलौ क्रमकृशावग्रे तीक्ष्णौ पयोधरौ।
सुखदौ पूर्वकाले तु पश्चादत्यन्तदुःखदौ॥ इति।
गरुडपुराणे,
अरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ। इति।
गर्गोऽपि,
स्निग्धाः समाश्चापि भवन्ति यासा-
मुच्चाश्च मांसोपचिताश्च वाह्याः।
रक्ताग्रतुण्डाः परिमण्डलाश्च
स्त्रीणां स्तनाः पिण्डितवच्च धन्याः॥ इति।
वाह्या वहनयोग्याः, बृहन्त इत्यर्थः।

इति स्तनलक्षणम्।

अथ चूचुकलक्षणम्।

भविष्ये,
दीर्घे तु चूचुके यस्याः सा स्त्री धूर्ता रतिप्रिया।
प्रविष्टे तु पुनर्यस्या द्वेष्टि सा पुरुषं सदा॥ इति।
स्कान्दे काशीखण्डे,
सुदृशां चूचुकयुगं शस्तं श्यामं सुवर्त्तुलम्।
अन्तर्मग्नं च दीर्घं च कृशं क्लेशाय जायते॥ इति।

इति चूचुकलक्षणम्।

अथ जत्रुलक्षणम्।

स्कान्दे काशीखण्डे,
पीवराभ्यां च जत्रुभ्यां धनधान्यनिधिर्वधूः।

श्लथाभ्यां च निमग्नाभ्यां विषमाभ्यां दरिद्रिणी ॥ इति ।

इति जङ्घलक्षणम् ।

अथ स्कन्धलक्षणम् ।

स्कान्दे काशीखण्डे,

उन्नतावनतौ स्कन्धावदीर्घावकृशौ शुभौ ।
वक्रौ स्थूलौ च रोमाढ्यौ प्रेष्यवैधव्यसूचकौ ॥ इति ।

भविष्यपुराणे,

उन्नतावनतश्चैव नातिस्थूलो न लोमशः ।
सुस्कन्धस्तु सदा स्त्रीणां सौभाग्यारोग्यवर्द्धनः ॥
स्थूल स्कन्धे वहेद्भारं रोमशे व्याधिनी भवेत् ।
वक्रे स्कन्धे भवेद्वन्ध्या कुलटा चोन्नते भवेत् ॥

इति स्कन्धलक्षणम् ।

अथांसलक्षणम् ।

स्कान्दे काशीखण्डे,

निगूढसन्धी सुस्ताग्रौ शुभावंसौ सुसंहतौ ।
वैधव्यदौ समुच्चाग्रौ निर्मांसावतिदुःखदौ ॥ इति ।

इत्यंसलक्षणम् ।

अथ कक्षालक्षणम् ।

कक्षे सुसूक्ष्मरोमाणौ तुङ्गे स्निग्धे च मांसले ।
शस्ते न शस्ते गम्भीरे शिराले स्वेदमेदुरे ॥ इति ।

गर्गसंहितायाम्,

उत्तानरूपास्तनुरोमयुक्त—
वर्णोपपन्नाः परिमण्डलाश्च ।
प्रदक्षिणावर्त्तसमन्विताश्च
कक्षाः प्रशंसन्ति विशालसूक्ष्माः ॥ इति ।

सामुद्रतिलके,
कक्षायुगं सुगन्धि स्निग्धं च समुन्नतं पिशितपूर्णम् ।
प्रशस्तमिति, शेषः ।

इति कक्षालक्षणम् ।

अथ बाहुलक्षणम् ।

भविष्यपुराणे,
अनुन्नतशिरासन्धि पीनं दोषविवर्जितम् ।
गोपुच्छाकृति नारीणां भुजयोर्युगलं शुभम् ॥
निगूढग्रन्थयो यासां कूर्परा रोमवर्जिताः ।
बाहवो ललिता यासां प्रशस्ता वृत्तकोमलाः ॥ इति ।
स्कान्दे काशीखण्डे,
स्यातां दोषौ सुनिर्दोषौ गूढास्थिग्रन्थिकोमलौ ।
विशिरौ च विरोमाणौ सरलौ हरिणीदृशाम् ॥
वैधव्यं स्थूलरोमाणौ ह्रस्वौ दौर्भाग्यसूचकौ ।
परिक्लेशाय नारीणां परिदृश्यशिरौ भुजौ ॥ इति ।
गर्गः,
न चातिलम्बा न कृशा न ह्रस्वा
भुजङ्गवर्णाः पृथुलोमवर्जिताः ।
निर्ग्रन्थिला वृत्तनिगूढलेखाः
सुबाहवः स्त्रीषु भवन्ति धन्याः ॥ इति ।

इति बाहुलक्षणम् ।

अथ मणिबन्धलक्षणम् ।

भविष्यपुराणे,
मणिबन्धोऽव्यवच्छिन्नो रेखात्रयविभूषितः ।

ददाति न चिरादेव मणिकाञ्चनमण्डनम् ॥ इति ।

इति मणिबन्धलक्षणम् ।

अथ करलक्षणम् ।

स्कान्दे काशीखण्डे,

अम्भोजमुकुलाकारं स्वङ्गुष्ठाङ्गुलि सन्नखम् ।
करद्वयं मृगाक्षीणां बहुभोगाय जायते ॥ इति ।

गरुडपुराणे,

निगूढमणिबन्धौ च पद्मगर्भोपमौ करौ ।

शुभाविति, शेषः ।

क्रव्यादरूपैर्हस्तैश्च वृककाकादिसन्निभैः ॥

क्रव्यादाः आममांसादनशीला व्याघ्रादयः ।

करालैर्विषमैः शुष्कैर्वित्तहीना भवन्ति हि । इति ।

जगन्मोहने समुद्रः,

पद्मपत्रनिभा यासां नारीणां पाणिपल्लवाः ।
मृदवः स्वेदरहितास्तासां भवति सम्पदा ॥ इति ।

वराहः,

निगूढमणिबन्धनौ तरुणपद्मगर्भोपमौ
करौ नृपतियोषितां तनुषिकुष्टपर्वाङ्गुली ।
क्रव्यादरूपैर्वृककाककङ्क-
सरीसृपोलूकसमानचिह्नैः ।
शुष्कैः शिरालैर्विषमैश्च हस्तै-
र्भवन्ति नार्यः सुखवित्तहीनाः ॥ इति ।

इति करलक्षणम् ।

अथ करपृष्ठलक्षणम् ।

स्कान्दे काशीखण्डे,

विरोम विशिरं शस्तं पाणिपृष्ठं समुन्नतम् ।
वैधव्यहेतु रोमाढ्यं निर्मांसं स्नायुमत्यजेत् ॥ इति ।

सामुद्रतिलके,

रोमशिरापरिहीनं घनमांसं पाणिपृष्ठमवहस्तम् ।
स्निग्धं सममबलानां समुन्नतं शस्यते प्रायः ॥ इति ।

इति पाणिपृष्ठलक्षणम् ।

अथ पाणितललक्षणम् ।

भविष्यपुराणे,

मृदु मध्योन्नतं रक्तं तलं पाण्योररन्ध्रकम् ।
प्रशस्तं शस्तरेखाढ्यमल्परेखं शुभश्रियाम् ॥
विधवा बहुरेखेणाप्यरेखेण दरिद्रिणी ।
भिक्षुकी सुषिराढ्येन नारी करतलेन च ॥ इति ।

गारुडे,

न निम्नं नोन्नतं स्त्रीणां भवेत्करतलं शुभम् ।
रेखान्वितं च विविधं कुर्यात्सम्भोगिनीं स्त्रियम् ॥ इति ।

वराहसंहितायाम्,

न निम्नमतिनोन्नतं करतलं सुरेखान्वितं
करोत्यविधवां चिरं सुतसुखार्थसम्भोगिनीम् ॥ इति ।

इति पाणितललक्षणम् ।

अथ कररेखालक्षणम् ।

भविष्यपुराणे,

चतस्रो रक्तगम्भीरा रेखाः स्निग्धाः करे स्त्रियाः ।
यदि स्युः सुखमाप्नोति विच्छिन्नाभिरनीशता ॥
समरेखा यवा यासामङ्गुष्ठाङ्गुलिपर्वसु ।
तासां हि विपुलं सौख्यं धनं धान्यं तथाऽक्षयम् ॥

श्रीवत्सध्वजशङ्खाब्जगजवाजिनिवेशनैः ।
चक्रस्वस्तिकवज्रासिपूर्णकुम्भै रथाङ्कुशैः ॥
निवेशनं गृहम् ।
प्रासादच्छत्रमुकुटैर्हारकेयूरकुण्डलैः ।
शङ्खतोरणनिर्व्यूहैर्हस्तन्यस्तैर्नृपस्त्रियः ॥
यस्याः पाणितले रेखा यूपस्रुग्दण्डकुण्डलाः ।

यस्याः पाणितले रक्तो वृक्षः स्रुग्दण्डकुण्डकाः—इति पाठान्तरम् । स्रुक् यज्ञपात्रविशेषः । कुण्डमेव कुण्डकमिति अल्पार्थे कप्रत्ययः ।

दृश्यन्ते चरणे यस्या यज्ञपत्नी भवस्यसौ ।
यज्ञपत्नी याज्ञिकपत्नी ।
वीथ्यापणतुलामानभाण्डमुद्रादिभिः स्त्रियः ।
जायन्ते वणिजां पत्न्यो रत्नकाञ्चनशालिनाम् ॥
आपणः क्रयविक्रयस्थानम् ।
दात्रयोक्त्रयुगाबन्धहलोलूखललाङ्गलैः ।
भवन्ति धनधान्याढ्याः कृषीबलजनाङ्गनाः ॥

दात्रं धान्यादिच्छेदसाधनकृषीबलशस्त्रम् । योक्त्रं तु युज्यते बध्यतेऽनेनेति रज्जुः ।

गारुडे,

रेखा या मणिबन्धोत्था गता मध्याङ्गुलीं करे ।
गता पाणितले या च योर्ध्वं पादतले स्थिता ॥
स्त्रीणां पुंसां तथा सा स्याद्राज्याय च सुखाय च ।

अङ्गुष्ठमूलगतरेखामधिकृत्योक्तम् —

तत्रैव,

बृहत्यां पुत्राः स्वल्पासु प्रमदाः परिकीर्तिताः ।

स्वल्पायुषो लघुच्छिन्ना दीर्घाच्छिन्ना महायुषः ॥ इति ।
स्कान्दे काशीखण्डे,
रक्ता व्यक्ता च गम्भीरा स्निग्धा पूर्णा च वर्तुला ।
कररेखाङ्गनायाः स्यात् शुभा भाग्यानुसारतः ॥
मत्स्येन सुभगा नारी स्वस्तिकेन च सुप्रजा ।
पद्मेन भूपतेः पत्नी जनयेद्भूपतिं सुतम् ॥
रक्तवर्णः स्त्रियाः पाणौ नन्द्यावर्तः प्रदक्षिणः ।
शङ्खातपत्रकमठा देवमातृत्वसूचकाः ॥
तुलामानाकृती रेखे वणिक्पत्नीत्वसूचिके ।
गजवाजिवृषाकाराः करे वामे मृगीदृशाम् ॥
रेखाः प्रासादवज्राभा ब्रूयुस्तीर्थकरीं शुभाम् ।
कृषीवलस्य पत्नी स्यात् शकटेन युगेन वा ॥
चामराङ्कुशकोदण्डैः राजपत्नी भवेद्ध्रुवम् ।
अङ्गुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम् ॥
यदि सा पतिहन्त्री स्याद्दूरतस्तां त्यजेत्सुधीः ।
त्रिशूलासिगदाशक्तिदुन्दुभ्याकृतिरेखया ॥
नितम्बिनी कीर्तिमती त्यागेन पृथिवीतले ।
त्यागेन दानेन ।
काकजम्बुकमण्डूककृकलृश्चिकभोगिनः ।
रासभोष्ट्रविडालाभाः करस्था दुःखदाः स्त्रियाः ॥ इति ।
गर्गोऽपि,
मत्स्यः समुद्रो वसुधा धनं च
ध्वजस्तथाऽसिर्दिनकृच्छशी च ।
शङ्खः पुरं चक्रमथो वनं च
द्विपस्तथा व्यञ्जनतोरणं च ॥

छत्रं यवः पद्ममथाङ्कुशं च
सिंहो हयः स्वस्तिक एव चापि ।
कूर्मः पताका मकरः पुमांश्च
दण्डोऽशनिः पूर्णघटस्तथा च ॥
अशनिर्वज्रम् ।
पाणिष्वथैतानि भवन्ति यासा-
मेकं तथा द्वे च बहूनि चापि ।
अत्यन्तसौख्यं बहुपुत्रता च
स्त्रीणां तथा लक्षणैरादिशेच्च ॥ इति ।

इति कररेखालक्षणम् ।

अथ कराङ्गुष्ठलक्षणम् ।

स्कान्दे काशीखण्डे,
शुभदः सरलोऽङ्गुष्ठो वृत्तो वृत्तनखो मृदुः । इति ।

इत्यङ्गुष्ठलक्षणम् ।

अथाङ्गुलीलक्षणम् ।

भविष्यपुराणे,
संवृत्ताः समपर्वाणस्तीक्ष्णाग्राः कोमलत्वचः ।
समास्त्वङ्गुलयो यस्याः सा नारी भोगवर्धिनी ॥ इति ।
स्कान्दे काशीखण्डे,
अङ्गुल्यश्च सुपर्वाणो दीर्घा वृत्ताः क्रमात्कृशाः ।
चिपिटाः स्थपुटा रूक्षाः पृष्ठरोमयुजोऽशुभाः ॥
अतिह्रस्वाः कृशा रक्ता विरला रोगहेतुकाः ।
दुःखायाङ्गुलयः स्त्रीणां बहुपर्वसमन्विताः ॥ इति ।

इति अङ्गुलीलक्षणम् ।

अथ नखलक्षणम् ।

भविष्यपुराणे,

बन्धुजीवारुणैस्तुङ्गैर्नखैरैश्वर्यमाप्नुयात् ।
खरैर्वक्रैर्विवर्णाभैः श्वेतपीतैरनीशताम् ॥ इति ।

स्कान्दे काशीखण्डे,

अरुणाः सशिखास्तुङ्गाः करजाः सुदृशां शुभाः ।
निम्ना विवर्णाः शुष्काभाः पीता दारिद्र्यदायकाः ॥
नखेषु बिन्दवः श्वेताः प्रायः स्युः स्वैरिणीस्त्रियः ।
पुरुषा अपि जायन्ते दुःखिनः पुष्पितैर्नखैः ॥ इति ।

गर्गसंहितायाम्,

श्लक्ष्णाः सुवर्णाः क्षतजप्रभाश्च
वैडूर्यमुक्ताफलसन्निभाश्च ।
पुष्पान्विताः सौख्यकरा भवन्ति ।
कुशेशयाभाश्च नखाः करेषु ॥

अत्र समुदितानां शुभं फलं वक्तव्यम् । अन्यथा स्कान्दे पुष्पितनखानामशुभफलश्रवणादिह तु शुभफलश्रवणाद्विरोधः प्रसज्येत ।

इति नखलक्षणम् ।

अथ पृष्ठलक्षणम् ।

स्कान्दे काशीखण्डे,

अन्तर्न्निमग्नवंशास्थि पृष्ठं स्यान्मांसलं शुभम् ।
पृष्ठेन रोमयुक्तेन वैधव्यं लभते ध्रुवम् ॥
भुग्नेन विनतेनापि सशिरेणातिदुःखिता । इति ।

भविष्यपुराणे,

अभग्नानुल्बणं पृष्ठमरोमशमगर्हितम् ।

नानास्तरणपर्यङ्करातिसौख्यकरं परम् ॥
कुब्जमद्रोणिकं पृष्ठं रोमशं यदि योषितः ।
स्वप्नान्तेऽपि सुखं तस्या नास्ति हन्यात्पतिं च सा ॥ इति ।
अद्रोणिकं द्रोणी काष्ठाम्बुवाहिनी तद्वद्विशालं न भवति ।
अनुल्वणमनिम्नम् ।
सामुद्रतिलके,
मुग्नवलितेन दासी भर्तृघ्नी द्रोणिकाविशालेन । इति ।

इति पृष्ठलक्षणम् ।

अथ कृकाटिकालक्षणम् ।

भविष्यपुराणे,
अनुन्नता समांसा च समा यस्याः कृकाटिका ।
सुदीर्घमायुस्तस्यास्तु चिरं भर्त्ता च जीवति ॥
निर्मांसा बहुमांसा च शिराला रोमशा तथा ।
कुटिला विकटा चैव विस्तीर्णा च न शस्यते ॥
स्कान्दे काशीखण्डे,
ऋज्वी कृकाटिका श्रेष्ठा समांसा च समोन्नता ।
शुष्का शिराला रोमाढ्या विशाला कुटिलाऽशुभा ॥ इति ।

इति कृकाटिकालक्षणम् ।

अथ कण्ठलक्षणम् ।

स्कान्दे काशीखण्डे,
मांसलो वर्त्तुलः कण्ठः प्रशस्तश्चतुरङ्गुलः ।
शस्ता ग्रीवा त्रिलेखाङ्का सुव्यक्तास्थिः सुसंहता ॥
निर्मांसा चिपिटा दीर्घा स्थपुटा न शुभप्रदा ।
स्थूलग्रीवा च विधवा वक्रग्रीवा च किङ्करी ॥
वन्ध्या हि चिपिटग्रीवा ह्रस्वग्रीवा च निर्धना ॥ इति ।

भविष्यपुराणे,
स्पष्टं रेखात्रयं यस्या ग्रीवायां चतुरङ्गुलम्।
मणिकाञ्चनरत्नाढ्यं सा दधाति विभूषणम्॥
अधमा स्त्री कृशग्रीवा दीर्घग्रीवा च बन्धकी।
ह्रस्वग्रीवा मृतापत्या स्थूलग्रीवा च दुःखिता॥ इति।
गर्गोऽपि,
दृश्यत्रिलेखा सुभगोपपन्ना
सुस्निग्धमांसोपचिता सुवृत्ता।
न चातिदीर्घा चतुरङ्गुला च
ग्रीवा च दीर्घा भवतीह धन्या॥ इति।

इति कण्ठलक्षणम्।

अथ चिबुकलक्षणम्।

स्कान्दे काशीखण्डे,
चिबुकं ह्यनुच्चं शस्तं वृत्तं पीनं सुकोमलम्।
स्थूलं द्विधासंविभक्तमायतं रोमशं त्यजेत्॥ इति।

इति चिबुकलक्षणम्।

अथ हनुलक्षणम्।

भविष्यपुराणे,
न स्थूलो न कृशोऽत्यल्पो न वक्रो न च रोमशः।
हनुरेवंविधः श्रेष्ठस्ततोऽन्यो न प्रशस्यते॥ इति।
स्कान्दे काशीखण्डे,
हनुश्चिबुकसंलग्ना निर्लोमा सुघना शुभा।
वक्रा स्थूला कृशा ह्रस्वा रोमशा न शुभप्रदा॥ इति।

इति हनुलक्षणम्।

अथ कपोललक्षणम् ।

भविष्ये,

ईषदापाण्डुरा गण्डाः सुवृत्ताः सर्वतः स्त्रियाः ।
प्रशस्ता न पुनर्द्धन्या रोमकूपकदूषिताः ॥ इति ।

स्कान्दे काशीखण्डे,

शस्तौ कपोलौ वामाक्ष्याः पीनौ वृत्तौ समुन्नतौ ।
रोमशौ परुषौ निम्नौ निर्मांसौ परिवर्जयेत् ॥ इति ।

इति कपोललक्षणम् ।

अथ मुखलक्षणम् ।

भविष्यपुराणे,

सुमृष्टदर्पणाम्भोजपूर्णबिम्बेन्दुसन्निभम् ।
वदनं वरनारीणामभीष्टफलदं शुभम् ॥
मालतीबकुलाम्भोजनीलोत्पलसुगन्धि यत् ।
वदनं मुच्यते नैव पानताम्बूलभोजनैः ॥
चतुरस्रमुखी धूर्त्ता मण्डलास्या च या भवेत् ।
अप्रजा वाजिवक्त्रा स्त्री महावक्त्रा च दुर्भगा ॥
श्ववराहवृकोलूकमर्कटास्याश्च याः स्त्रियः ।
क्रूरास्ताः पापकर्मिण्यः प्रजाबन्धुविवर्जिताः ॥ इति ।

स्कान्दे काशीखण्डे,

समं समांसं सुस्निग्धं स्वामोदं वर्त्तुलं मुखम् ।
जनित्रवदनच्छायं धन्यानामिह जायते ॥ इति ।
जनित्रवदनच्छायं पितृमुखसदृशम् ।

गारुडे,

मांसलं वर्त्तुलं मुखम् । इति ।

इति मुखलक्षणम् ।

अथाधरलक्षणम्।

भविष्यपुराणे,

ताम्राभः किञ्चिदानम्रः स्थौल्यकार्श्यविवर्जितः।
अधरो यदि तुङ्गश्च नारीणां भोगदः सदा॥
स्थूले कलहशीला स्याद्विवर्णे चातिदुःखिता। इति।

स्कान्दे काशीखण्डे,

पाटलो वर्त्तुलः स्निग्धो रेखाभूषितमध्यभूः।
सीमन्तिनीनामधरो धराजानिप्रियो भवेत्॥
कृशः प्रलम्बः कुटिलो रूक्षो दौर्भाग्यसूचकः।
श्यामः स्थूलोऽधरोष्ठः स्याद्वैधव्यकलहप्रदः॥ इति।

गारुडे,

आरक्तावधरौ श्रेष्ठौ—इति।

वराहसंहितायाम्,

बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपधृक्। इति।

उत्पले समुद्रः,

अधरो बिम्बसङ्काशो मांसलोऽस्फुटितस्तथा।
यस्याः सा राजमहिषी कुमारी नात्र संशयः॥ इति।

इत्यधरलक्षणम्।

अथोत्तरोष्ठलक्षणम्।

स्कान्दे काशीखण्डे,

मसृणोत्तमकामिन्याश्चोत्तरोष्ठः शुभोऽमलः।
किञ्चिन्मध्योन्नतोऽरोमा विपरीतो विरुद्धकृत्॥ इति।

भविष्ये,

उत्तरोष्ठेन तीक्ष्णेन वनिताऽत्यन्तकोपना। इति।

गारुडे,

या सरोमोत्तरौष्ठी स्यान्न शुभा भर्तुरेव हि । इति ।

इत्युत्तरोष्ठलक्षणम् ।

अथ दन्तलक्षणम् ।

भविष्यपुराणे,

शङ्खकुन्देन्दुधवलैः स्निग्धैस्तुङ्गैरसन्धिभिः ।
मिष्टान्नपानमाप्नोति दन्तैरेभिरनुन्नतैः ॥
सूक्ष्मैरतिकृशैर्ह्रस्वैः स्फुटितैर्विरलैस्तथा ।
रूक्षैश्च दुःखिता नित्यं विकटैर्विमतिर्भवेत् ॥ इति ।

गारुडे,

कुन्दपुष्पसमा दन्ता—इति ।

प्रशस्ता, इति शेषः ।

कराला विषमा दन्ताः क्लेशाय च भयाय च ।
चौर्याय कृष्णमांसाश्च दीर्घा भर्तुश्च मृत्यवे ॥ इति ।

स्कान्दे काशीखण्डे,

गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाः शुभाः ।
अधस्तादुपरिष्टाच्च समाः स्तोकसमुन्नताः ॥
पीताः श्यामाश्च दशनाः स्थूलदीर्घा द्विपङ्क्तयः ।
शुक्त्याकाराश्च विरला दुःखदौर्गत्यकारणम् ॥
अधस्तादधिकैर्दन्तैर्मातरं भक्षये स्फुटम् ।
पतिहीना च विकटैः कुलटा विरलैर्भवेत् ॥ इति ।

जगन्मोहने समुद्रः,

अनपत्या भवेन्नारी दन्तानां चलनं यदि ।
निधनत्वं च दारिद्र्यं तस्याश्चैव विनिर्दिशेत् ॥ इति ।

गर्गोऽपि,

तीक्ष्णाग्रवृत्ताः सुयमा दृढाश्च

शुभा मृणालेन्दुसमानवर्णाः ।
निरन्तराः स्त्रीषु भवन्ति धन्या
द्विजास्तथा ये रजतप्रकाशाः ॥ इति ।

इति दन्तलक्षणम् ।

अथ जिह्वालक्षणम् ।

भविष्यपुराणे,

जिह्वा तनुतलाऽवक्रा ताम्रा दीर्घा च शस्यते ।
स्थूला ह्रस्वा विवर्णा या वक्रा भिन्ना च निन्दिता ॥ इति ।

स्कान्दे काशीखण्डे,

जिह्वेष्टमिष्टभोक्त्री स्याच्छोणा मृद्वी तथाऽसिता ।
दुःखाय मध्यसङ्कीर्णा पुरोभागे सविस्तरा ॥
सितया तोयमरणं श्यामया कलहप्रिया ।
दरिद्रिणी मांसलया लम्बयाऽभक्ष्यभक्षिणी ॥
विशालया रसनया प्रमदाऽतिप्रमादभाक् । इति ।

जगन्मोहने समुद्रः,

श्यामायां कलहो नित्यं कर्णच्छेदमवाप्नुयात् ।
जिह्वायामित्यनुषङ्गः ।

गर्गः,

न चापि तन्व्यो न भुजङ्गवच्च
स्युर्विद्रुमाभाः क्षतजप्रभाश्च ।
जिह्वाः प्रशस्ता विमलाः सुलघ्व्यः
स्त्रीणां तथा मांससमप्रभाश्च ॥ इति ।

इति जिह्वालक्षणम् ।

अथ घण्टिकालक्षणम् ।

स्कान्दे काशीखण्डे,

कण्ठेऽस्थूला सुवृत्ता च क्रमतीक्ष्णा सुलोहिता ।
अप्रलम्बा शुभा घण्टी स्थूला कृष्णा च दुःखदा ॥ इति ।

इति घण्टिकालक्षणम् ।

अथ तालुलक्षणम् ।

स्कान्दे काशीखण्डे,

स्निग्धं कोकनदाभासं प्रशस्यं तालु कोमलम् ।
सिते तालुनि वैधव्यं पीते प्रव्रजिता भवेत् ॥
कृष्णेऽपत्यवियोगार्ता रूक्षे चौरकुटुम्बिनी । इति ।

गारुडे,

तालुश्वेता धनक्षयम् ।
कृष्णा च परुषा च—इति ।

जगन्मोहने समुद्रः,

श्वेतेन तालुना दासी दुःखिता कृष्णतालुका ।
हरितेन च रूक्षेण प्रव्रज्यामनुगच्छति ॥ इति ।

गर्गसंहितायाम्,

यासामचित्राणि सुमांसलानि
रक्तोत्पलाभानि सदाऽरुणानि ।
तालूनि भद्राणि भवन्ति चापि
ताः पुत्रवत्यः सुभगाश्च नार्यः ॥ इति ।

इति तालुलक्षणम् ।

अथ हसितलक्षणम् ।

स्कान्दे काशीखण्डे,

अलक्षितद्विजं चैव किञ्चित्फुल्लकपोलकम् ।
स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् ॥ इति ।

गारुडे,

स्मिते कूपौ गण्डयोश्च सा ध्रुवं व्यभिचारिणी। इति।

इति हसितलक्षणम्।

अथ नासालक्षणम्।

भविष्यपुराणे,

न स्थूला न कृशा वक्रा नातिदीर्घा समुन्नता।
ईदृशी नासिका यस्याः सा धन्या तु शुभङ्करी॥ इति।

गारुडे,

नासा समपुटा स्त्रीणां रुचिरा च तथा शुभा। इति।

स्कान्दे काशीखण्डे,

समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा।
स्थूलाग्रा मध्यनम्रा च न प्रशस्ता समुन्नता॥
आकुञ्चितारुणाग्रा च वैधव्यक्लेशदायिनी।
परप्रेष्या च विकटा ह्रस्वा दीर्घा कलिप्रिया॥ इति।

जगन्मोहने समुद्रः,

दीर्घेण नासिकाग्रेण नारी भवति कोपना।
ह्रस्वेण च भवेद्दासी परकर्म्मकरी स्मृता॥
चिपिटा नासिका यस्या वैधव्यमधिगच्छति। इति।

इति नासिकालक्षणम्।

अथ क्षुतलक्षणम्।

स्कान्दे काशीखण्डे,

दीर्घायुष्कृत्क्षुतं दीर्घं युगपद्द्वित्रिपिण्डितम्। इति

सामुद्रतिलके,

दीर्घं दीर्घायुष्कृत् क्षुतं सकृद्द्वित्रिपिण्डितं ह्रादि।
अनुवादयुतं शस्तं ततोऽन्यथा भवति विपरीतम्॥ इति।

इति क्षुतलक्षणम्।

अथ नेत्रलक्षणम्

भविष्यपुराणे,

नीलोत्पलदलप्रख्यैरातास्रैश्चारुपक्ष्मभिः ।
अन्विता नयनैरेभिर्भोगसौभाग्यभागिनी ॥
शशकाक्षी मृगाक्षी च वराहाक्षी वराङ्गना ।
यत्र यत्र समुत्पन्ना महान्तं भोगमाप्नुयात् ॥
अगम्भीरैरसङ्क्लिष्टैर्बहुरेखाविभूषितैः ।
राजपत्न्यो भवन्तीह नयनैर्मधुपिङ्गलैः ॥
वायसाकृतिनेत्राणि दीर्घापाङ्गानि योषिताम् ।
अनाविलानि चारूणि भवन्ति हि विभूतये ॥
गम्भीरैः पिङ्गलैश्चैव दुःखिताश्च चिरायुषः ।
वयोमध्ये त्यजेत्प्राणानुन्नताक्षी च याङ्गना ॥
रक्ताक्षी विषमाक्षी च धूम्राक्षी प्रेतलोचना ।
वर्जनीया सदा नारी श्वनेत्रा चैव दूरतः ॥
उद्भ्रान्तकेकरैश्चित्रैर्नयनैरङ्गनास्त्विह ।
मद्यमांसप्रिया नित्यं चपलाश्चैव सर्वतः ॥ इति ।

चपलाः परपुरुषरताः ।

गारुडे,

नीलोत्पलनिभं चक्षुः—इति ।

प्रशस्तमित्यनुषङ्गः ।

स्कान्दे काशीखण्डे,

ललनालोचने शस्ते रक्तान्ते कृष्णतारके ।
गोक्षीरवर्णविशदे सुस्निग्धे कृष्णपक्ष्मणी ॥
उन्नताक्षी न दीर्घायुर्वृत्ताक्षी कुलटा भवेत् ।
मेषाक्षी महिषाक्षी च केकराक्षी न शोभना ॥

कामगृहीता नितरां गोपिङ्गाक्षी सुदुर्दृता ॥
पारावताक्षी दुःशीला रक्ताक्षी भर्तृघातिनी ।
कोटरनयना दुष्टा गजनेत्रा न शोभना ॥
पुंश्चली वामकाणाक्षी वन्ध्या दक्षिणकाणिका ।
मधुपिङ्गाक्षी रमणी धनधान्यसमृद्धिभाक् ॥ इति ।

वराहोऽप्याह,

नेत्रे यस्याः केकरे पिङ्गले वा
सा दुःशीला श्यावलोलेक्षणा च । इति ।

उत्पले समुद्रोऽपि,

नीलोत्पलसवर्णाभे नेत्रे लावण्यसंयुते ।
मृगी भवेच्च सा कन्या धनधान्यविवर्द्धिनी ॥ इति ।

सामुद्रतिलके,

यस्याः पिङ्गलनेत्रद्वितयं सा सुरतकौशलं लभते ।
दुःशीलत्वेन समं वैधव्यं वा ध्रुवं रमणी ॥
गोपिङ्गलनेत्रयुता पितरं श्वशुरं च मातुलं पुत्रम् ।
भ्रातरमप्यधिगच्छति कामग्रथितेव मोहपरा ॥ इति ।

इति नेत्रलक्षणम् ।

अथ पक्ष्मलक्षणम् ।

स्कान्दे काशीखण्डे,

पक्ष्मभिः सुघनैः स्निग्धैः कृष्णैः सूक्ष्मैः सुभाग्यभाक् ।
कपिलैर्विरलैः स्थूलैर्निन्द्या भवति भामिनी ॥ इति ।

इति पक्ष्मलक्षणम् ।

अथ भ्रूलक्षणम् ।

भविष्यपुराणे,

उन्नता मृदुरोमाणो रेखाः शुद्धा न सङ्गताः ।

भ्रुवोऽर्द्धवक्रा सूक्ष्माश्च योषितां च सुखावहाः ॥
वर्त्तुलाभिश्च सौभाग्यं वन्ध्या स्यादीर्घरोमभिः ।
पिङ्गला सङ्गता ह्रस्वा दरिद्राया न संशयः ॥ इति ।
स्कान्दे काशीखण्डे,
भ्रुवौ सुवर्तुले तन्व्यौ स्निग्धे कृष्णे असंहते ।
प्रशस्ते मृदुरोमाणौ सुभ्रुवः कार्मुकाकृती ॥
खररोमा च पृथुला विकीर्णा सरला स्त्रियाः ।
न भ्रूः प्रशस्ता मिलिता दीर्घारोमा च पिङ्गला ॥ इति ।

इति भ्रूलक्षणम् ।

अथ कर्णलक्षणम् ।

स्कान्दे काशीखण्डे,
लम्बौ कर्णौ शुभावर्त्तौ शुभदौ सुखरप्रदौ ।
शष्कुलीरहितौ निन्द्यौ शिरालौ कुटिलौ कृशौ ॥ इति ।
गारुडे,
सुमांसलं कर्णयुग्मं समं मृदु समाहितम् । इति ।
भविष्यपुराणे,
शूकराकृतयः कर्णा न च स्कन्ना न संस्थिताः ।
वहन्ति विलसत्कान्ति हेमरत्नविभूषणम् ॥
खरोष्ट्रनकुलोलूककठिनश्रवणाः स्त्रियः ।
प्राप्नुवन्ति महद्दुःखं प्रायशः प्रव्रजन्ति हि ॥ इति ।

इति कर्णलक्षणम् ।

अथ ललाटलक्षणम् ।

भविष्यपुराणे,
अर्द्धेन्दुप्रतिमाभोगमरोगमशमनायतम् ।
तत् श्रीभोगकरं श्रेष्ठं ललाटं वरयोषिताम् ॥ इति ।

आभोगो विस्तारः।
स्कान्दे काशीखण्डे,
भालः शिराविरहितो निर्लोमार्द्धेन्दुसन्निभः।
अनिम्नस्त्र्यङ्गुलो नार्याः सौभाग्यारोग्यकारणम्॥
व्यक्तस्वस्तिकरेखं च ललाटं राज्यसम्पदे।
प्रलम्बमलिकं यस्या देवरं हन्ति सा ध्रुवम्॥
रोमशेन शिरालेन पांसुला गोधिना मता।
गोधिर्ललाटम्।
भालगेन त्रिशूलेन निर्मितेन स्वयम्भुवा।
नितम्बिनीसहस्राणां स्वामित्वं योषिदाप्नुयात्॥ इति।
गारुडे,
ललाटमधिकृत्य—
शुभ्रमर्द्धेन्दुसंस्थानमतुङ्गं स्यादरोमकम्। इति।
जगन्मोहने समुद्रः,
ललाटं त्र्यङ्गुलं यस्याः शिरारोमविवर्जितम्।
निर्मलं सुसमं दीर्घमायुःसौख्यधनप्रदम्॥ इति।

इति ललाटलक्षणम्।

अथ शिरोलक्षणम्।

भविष्ये,
द्विगुणं परिणाहेन ललाटात्त्रिगुणं च यत्।
शिरः प्रशस्तं नारीणां सुधन्या हस्तिमस्तका॥ इति।
स्कान्दे काशीखण्डे,
मौलिः शस्तः समुन्नतः।
गजकुम्भनिभो वृत्तः सौभाग्यैश्वर्यसूचकः॥
स्थूलमूर्द्धा च विधवा दीर्घशीर्षा च बन्धकी।

विशालेनापि शिरसा भवेद्दौर्भाग्यभाजनम् ॥ इति ।

गारुडे,

स्त्रीणां समं शिरः श्रेष्ठम्—इति ।

इति शिरोलक्षणम् ।

अथ केशलक्षणम् ।

भविष्ये,

सूक्ष्माः कृष्णा मृदुस्निग्धाः कुञ्चिताग्राः शिरोरुहाः ।
भवन्ति श्रेयसे स्त्रीणामन्ये स्युः क्लेशशोकदाः ॥

कुञ्चिताग्राः भङ्गुरभङ्गिभाजः ।

गारुडे,

स्निग्धा नीलाश्च मृदवो मूर्द्धजाः कुञ्चिताग्रकाः । इति ।

शुभा इत्यनुषङ्गः ।

स्कान्दे काशीखण्डे,

केशा अलिकुलच्छायाः सूक्ष्माः स्निग्धाः सुकोमलाः ।
किञ्चिदाकुञ्चिताग्राश्च कुटिलाश्चातिशोभनाः ॥
परुषाः स्फुटिताग्राश्च विरलाश्च शिरोरुहाः ।
पिङ्गला लघवो रूक्षा दुःखदारिद्र्यबान्धवाः ॥ इति ।

इति केशलक्षणम् ।

इह देहस्यापादतलकेशान्तलक्षणान्युक्त्वा तस्यैव व्यञ्जनादिलक्षणान्युच्यन्ते ।

सामुद्रतिलके,

व्यञ्जनमथ प्रकृतयो मिश्रमेतदपि भवति संस्थानम् ।
सङ्क्षेपात्तल्लक्षणमनुक्रमेणैव वक्ष्यामः ॥

संस्थानं शरीराश्रितं लक्षणम् ।

जन्मान्तरविरचितमिह शुभाशुभं व्यज्यते ध्रुवं येन ।
तन्मशकादिव्यञ्जनमसहजमाख्यायते सद्भिः ॥
रक्तः कृष्णो धूम्रो बिन्दुसमो मशक एव विज्ञेयः ।
तिलकं तिलकाकारं ततोऽन्यदपि लाञ्छनं स्त्रीणाम् ॥ इति ।

भविष्यपुराणे,

यस्याः कण्ठेऽधरे वामे हस्ते कर्णे स्तनेऽपि च ।
मशकं तिलकं चापि साऽपूर्वान् जनयेत्सुतान् ॥ इति ।

स्कान्दे काशीखण्डे,

भ्रुवोरन्तर्ललाटे वा मशको राज्यसूचकः ।
वामे कपोले मशकः शोणो मिष्टान्नदः स्त्रियाः ॥
तिलकं लाञ्छनं वापि हृदि सौभाग्यकारणम् ।
यस्या दक्षिणवक्षोजे शोणे तिलकलाञ्छने ॥
कन्याचतुष्टयं सूते सूते सा च सुतत्रयम् ।
तिलकं लाञ्छनं शोणं यस्या वामे कुचे भवेत् ॥
एकं पुत्रं प्रसूयादौ ततः सा विधवा भवेत् ।
गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः ॥
तदा क्षितिपतेः पत्नी सूते च क्षितिपं सुतम् ।
नासाग्रे मशकः शोणो महिष्या एव जायते ।
कृष्णः स एव भर्तृघ्न्याः पुंश्चल्या वा प्रकीर्तितः ॥
नाभेरधस्तात्तिलकं मशको लाञ्छनं स्मृतम् ।
मशकस्तिलकं चिह्नं गुल्फदेशे दरिद्रकृत् ।
करे कर्णे तथा कण्ठे वामे यस्याः स्फुरेद्यदि ॥
एषां त्रयाणामेकं तु प्राग्गर्भे पुत्रदं भवेत् ॥ इति ।

जगन्मोहने समुद्रः,

स्तने वामे तु कृष्णाभं लाञ्छनं तिलकोऽपि वा ।
शीघ्रं तु विधवा सा स्त्री जायतेऽतीव दुःखिता ॥
स्तने तु दक्षिणे यस्या लाञ्छनं तिलकोऽपि वा ।
कुङ्कुमोदकसङ्काशं सा भवत्यतिशोभना ॥
लभते वित्तसम्पत्तिं भर्त्तारं वशवर्त्तिनम् ।
पुत्रत्रयं प्रसूयेत तथा कन्याचतुष्टयम् ॥
गुह्यान्ते तिलको यस्या रक्तकुङ्कुमसन्निभः ।
अथवा दक्षिणे भागे प्रशस्ता सा निगद्यते ॥
स्तनमध्ये तु नारीणां कुङ्कुमोदकसन्निभम् ।
लाञ्छनं दृश्यते यस्याः प्रशस्ता सा निगद्यते ॥
ललाटे दृश्यते यस्याः कृष्णं तिलकमुज्ज्वलम् ।
पञ्च सा जनयेत्पुत्रान् धर्मसौभाग्यभागिनी ॥
यस्यास्तु हृदये नार्या रक्ताभस्तिलको भवेत् ।
लाञ्छनं चापि रक्ताभं सा नारी शोभना भवेत् ॥
लभते वित्तसम्पन्नं भर्त्तारं वंशवर्द्धनम् ।
पुत्रत्रयं प्रसूयेत तथा कन्याचतुष्टयम् ॥
यस्याः पयोधरे वामे मशकं तिलोऽपि वा ।
हस्ते कर्णे च कण्ठे च सा कन्या पुत्रभागिनी ॥ इति ।

उक्तस्थानेष्वेव मशकादिलक्षणं शुभमन्यत्राशुभमिति तदुक्तम्—

सामुद्रतिलके,

मशकं तिलकं लाञ्छनमुक्तस्थानैर्विनाऽशुभं स्थाने ।
अङ्गे पुनरपसव्ये सुदृशां क्लेशावहं बहुशः ॥ इति ।

इति व्यञ्जनलक्षणम् ।

अथ स्त्रीणां प्रकृतिलक्षणम्।

सामुद्रतिलके,

प्रकृतिर्द्विविधा गदिता स्त्रीणां श्लेष्मादिका स्वभावाख्या।
प्रथमा सापि त्रेधा द्वादशधा भवति पुनरन्या॥
नारी श्लेष्मप्रकृतिः सत्यप्रियभाषिणी स्थिरस्नेहा।
फलिनीप्रसूननीलोत्पलदलदूर्वाङ्कुरश्यामा॥
स्निग्धनखदन्तलोमत्वक्केशविलोचना क्षमायुक्ता।
सुविभक्तसमावयवा बहुसत्त्वाऽपत्यवीर्ययुता॥
अक्षुद्राचिरशुष्यत्प्रसूनमाल्यानुलेपना सुभगा।
धर्मार्थिनी कृतज्ञा दयान्विता सततदानमुखी॥
प्रच्छन्नधृतदोषा क्षुत्तृष्णोष्णक्षमात्रयोपेता।
मितवचनपानभोजनकोपा पक्ष्मलपृथुलनयना॥
साधारणसुरतेच्छा निद्रालुः शोणमांसलश्रोणिः।
जलदजलाशयजलजक्षीरादीनीक्षते स्वप्ने॥
योपित्पित्तप्रकृतिर्गौरी कृष्णाथवा बहुस्वेदा।
आताम्रनयनकररुहरसनापादपाणितालुतला॥
क्षणरुष्टा क्षणतुष्टोष्णाभीष्टशीतमधुररसा।
मृदुविमलकपिलमूर्द्धजरोमा मेधाविनी प्रायः॥
प्रियशुचिनिवसनमाल्यानुलेपनात्युष्णशिथिलमृदुगुह्या।
अभिमानिनी सुचरिता शुचिराश्रितवल्लभा शूरा॥
धृतवलिपलितक्षुत्तृट्तनुवीर्या मृदुलमोहनक्रीडा।
किंशुकदिग्दाहताडिद्दहनादीन् पश्यति स्वप्ने॥
वनिता वातप्रकृतिः प्रस्फुरितकुचाग्रपादतला।
रूक्षेक्षणनखदशना चलचित्ता चञ्चलप्रकृतिः॥
अजितेन्द्रिया खराङ्गी गन्धर्वविलासहासकलहरतिः।

बहुभोजनाऽल्पनिद्रा बहुलालापाऽनिशं भ्रमणशीला ॥
धूसरवर्णच्छाया विद्विष्टमधुररसा शिशिरा ।
किञ्चिद्वृत्ताक्षिमुखं शेते प्रलपति निशि त्रसति ॥
कटुकाम्ललवणतिक्तस्निग्धकषायप्रिया सुरतकाठिना ।
उद्यानवनक्रीडारतिरत्युष्णप्रिया स्थिरक्रोधा ॥
तरुपर्वताधिरोहं स्वप्ने कुरुते तथा नभोगमनम् ।
प्रायेणैषा प्रकृतिः शुद्धैव विलोक्यते स्फुटं क्वापि ॥
भेदाः पुनरेतासां बहवोऽपि भवन्ति मिश्राणाम् । इति ।

विवेकविलासे,

यस्याः केशांशुकस्पर्शान्म्लायन्ति कुसमस्रजः ।
स्नानाम्भसि विपद्यन्ते बहवः क्षुद्रजन्तवः ॥
म्रियन्ते मत्कुणास्तल्पे तथा यूकाश्च वाससि ।
वातश्लेष्मव्यथायुक्ता सा च पित्तोदयान्विता ॥ इति ।

अत्र श्लेष्मपित्तवातप्रकृतीरभिधाय अधुना स्वभावाभिधा प्रकृतिर्निरूप्यते । सा द्वादशधा । सुरविद्याधरगन्धर्वयक्षराक्षस-पिशाचनरकापिसर्पखरमार्जारासिंहभेदैरिति । तथा च—

सामुद्रतिलके,

सुरविद्याधरगन्धर्वयक्षराक्षसपिशाचनरकापिभिः ।
अहिखरविडालसिंहैस्तुल्यानां प्रकृतिरत्रैव ॥ इति ।

क्रमेण ता उक्ता—

भविष्यपुराणे,

नित्यं स्नाता सुगन्धा च नित्यं च प्रियवादिनी ।
अल्पाक्षी अल्परोमा च देवतां तां विनिर्दिशेत् ॥
चन्द्राननां शुभाङ्गीं च मत्तवारणगामिनीम् ।

आरक्तमुखहस्तां च विद्याद्विद्याधरीं तथा ॥
वीणावादित्रशब्देन सर्वसङ्गीतवेणुना ।
पुष्पधूपेन युक्तां च गान्धर्वीं तां विनिर्दिशेत् ॥
बह्वाशिनी बहुवाक्या नित्यं चाप्रियवादिनी ।
पतिं बीभत्सते या तु राक्षसीं तां विनिर्दिशेत् ॥
शौचाचारपरिभ्रष्टा रूपभ्रष्टा भयङ्करी ।
प्रस्वेदमलपङ्काढ्या पिशाचीं तां विनिर्दिशेत् ॥
असन्दूषितचारित्रा गुरुभक्ता पतिव्रता ।
देवब्राह्मणभक्ता च मानुषीं तां विनिर्दिशेत् ॥
कोपना चञ्चला चैव नित्यं बीक्षेद्दिशस्तथा ।
चलं च भाषते लुब्धा वानरीं तां विनिर्दिशेत् ॥
प्रतिकूलकरी नित्यं बन्धूनां भर्तुरेव च ।
स्वच्छन्दललिता चैव सर्पिणीं तां विनिर्दिशेत् ॥
येन केन चिदन्नेन मांसं यस्या विवर्धते ।
रासभीं तादृशीं विद्यान्न सा कल्याणमर्हति ॥
प्रच्छन्नं कुरुते पापं मायावादे च हृष्यति ।
हृदयं चैव दुर्ग्राह्यं मार्जारीं तां विनिर्दिशेत् ॥
हसते क्रीडते चैव क्रुध्यते न प्रसीदति ।
जीवेषु रमते नैव सैंहीं तां हि विनिर्दिशेत् ॥
सामुद्रतिलके विशेषः,
हसते पराभिभूतिं खरमैथुनसेविनी तुमुलनादा ।
अन्नेन येन केन चिदुपचितगात्रा खरप्रकृतिः ॥
अन्यच्छिद्रान्वेषणपरायणा कुटिलगामिनी रौद्रा ।
धृतवैरा क्रुद्धमना अहिस्वभावा च वनिता स्यात् ॥
एकान्तस्थानरतिश्चिरेण मैथुननिषेवणस्वान्ता ।

निद्रालसा गतभया सिंहप्रकृतिर्भवति युवतिः ॥ इति ।

इति प्रकृतिलक्षणम् ।

अथ मिश्रकलक्षणम् ।

भविष्यपुराणे,

तिस्रस्तु रेखा ग्रीवायां चेदिन्दीवरलोचना ।
यस्य सा गृहमागच्छेत्स गृही सुखमेधते ॥
राजहंसगतिर्या तु मृगाक्षी मृगवर्णिका ।
समशुक्लाग्रदन्ता च कन्यां तामुत्तमां विदुः ॥
मण्डूककुक्षिर्या नारी न्यग्रोधपरिमण्डलम् ।
एकं जनयते पुत्रं सोऽपि राजा भविष्यति ॥
हंसस्वरा मेघवर्णा या कन्या मधुपिङ्गला ।
अष्टौ जनयते पुत्रान् धनधान्यविवर्धिनी ॥
आयतौ श्रवणौ यस्याः सुरूपा चापि नासिका ।
भ्रुवौ चेन्द्रायुधाकारे सन्ततं सुखभागिनी ॥
तन्वी श्यामा तथा कृष्णा स्निग्धाङ्गी मृदुभाषिणी ।
शङ्खकुन्देन्दुदशना भवेदैश्वर्यभागिनी ॥
विस्तीर्णं जघनं यस्या वेदिमध्या तु या भवेत् ।
आयते विपुले नेत्रे राजपत्नी तु सा भवेत् ॥
वेदिमध्या वेदिमध्यवत्कृशमध्या कृशोदरीत्यर्थः ।
गूढगुल्फाङ्गुलिशिरा अल्पग्रीवाल्पमध्यमा ।
रक्ताक्षी रक्तचरणा सात्यन्तं सुखभागिनी ॥
वक्राङ्गुलितलौ पादौ कन्यां तां परिवर्जयेत् ।
इन्द्रचन्द्रनदीऋक्षसर्पनाम्न्यश्च याः स्त्रियः ॥
नैताः पतिषु रज्यन्ते या च नक्षत्रनामिका ।

यस्यास्तु हसमानाया गण्डे जायेत कूपकम् ।
न सा रमति कौमारे स्वच्छन्दाकार्यकारिणी ॥
यस्यास्तु गच्छमानायाष्टिट्टिकायति जङ्घिका ।
सा पुत्रं वाञ्छते कर्त्तुं पतित्वे नात्र संशयः ॥

टिट्टिकायति । यस्या गमने जङ्घयोः टिट्टिकाकारः शब्दः श्रूयते ।

स्थूलपादा च या कन्या सर्वाङ्गेषु च लोमशा ।
स्थूलोष्ठदन्ता यस्याः स्युर्विधवां तां विनिर्दिशेत् ॥
यस्या हस्तौ च पादौ च मुखं च विकृतं भवेत् ।
उत्तरोष्ठे च रोमाणि सा क्षिप्रं भक्षयेत्पतिम् ॥
त्रीणि यस्याः प्रलम्बन्ते ललाटमुदरं स्फिचौ ।
त्रीन् प्रभक्षयते सा तु देवरं श्वशुरं पतिम् ॥
मृदूनि मृदुरोमाणि नात्यन्तं स्वेदनानि च ।
सुरभीणि च गात्राणि यासां ताः पूजिताः स्त्रियः ॥ इति ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।
गन्धैर्मधूकपुष्पाभैः स्निग्धैश्च दशनच्छदैः ।
असङ्गतभ्रूः संश्लिष्टचरणाङ्गुलिकुड्मला ॥
पतिप्रिया पतिप्राणा या नारी पतिदेवता ।
अलक्षणापि सा ज्ञेया सर्वलक्षणसंयुता ॥
अतिदीर्घा कृशा या च चलन्मांसमयी तथा ।
सापि वर्ज्या विशेषेण नरेण हितमिच्छता ॥
स्त्रीसर्वलक्षणान्यभिधायात्रैवान्ते उपसंहृतम् ।
सङ्क्षेपतस्तेऽभिहितं मयैतत्
स्याल्लक्षणं चारु नितम्बिनीनाम् ।

रहस्यमेतत्कथितं तु तत्र
यत्राकृतिस्तत्र गुणा वसन्ति ॥ इति ।
स्कान्दे काशीखण्डे,
सुप्ता परस्परं या तु दन्तान् किटिकिटायते ।
सुलक्ष्मापि न सा शस्ता यत्किञ्चित्प्रलपेत्तथा ॥ इति ।
जगन्मोहने समुद्रः,
स्थूलकेशी पतिघ्नी च दीर्घकेशी तथैव च ।
कपिलैः परुषैः क्रूरा स्कन्धकेशी न शोभना ॥
मृगाक्षी च मृगग्रीवा मृगजङ्घा मृगोदरी ।
अपि दासकुले जाता राजपत्नी भविष्यति ॥
कुले महति सम्भूता लक्षणैः समलङ्कृता ।
भार्या प्रशस्यते लोकैरितरा कलहप्रिया ॥
रक्तनेत्रा बृहद्ग्रीवा लम्बोष्ठी विकृताननना ।
तथैवोत्कटपादा च वर्जनीया प्रयत्नतः ॥
हंसस्वरा मेघवर्णा या कन्या दीर्घलोचना ।
यस्य गेहे तु सा गच्छेत्तद्गृहं सुखमेधते ॥
आयतं वदनं यस्याः सुरूपा चैव नासिका ।
भ्रुवौ चेन्द्रायुधाकारे साऽत्यन्तं सुखभागिनी ॥
अङ्गुलीसहिता यस्या नखाः पद्मदलप्रभाः ।
मृदुहस्ततला कन्या सा नित्यं सुखमेधते ॥
एकैकेन तु रोमेण जङ्घे चैव सुवर्त्तुले ।
धनधान्यवती कन्या सर्वसौख्यकरी स्मृता ॥
या नीलोत्पलवर्णाभा पिङ्गनेत्रा च भामिनी ।
सुवर्णरूप्यरत्नानां स्वामिनीं तां विनिर्दिशेत् ॥
श्यामवर्णा च तन्वङ्गी स्निग्धाङ्गी मृदुभाषिणी ।

शङ्खकुन्देन्दुदशना सर्वसौख्यविभागिनी ॥
विस्तीर्णं जघनं यस्या वेदिमध्या च या भवेत्।
आयतैर्विपुलैर्नेत्रै राजपत्नी तु सा भवेत् ॥
यस्याः कृष्णाश्च सूक्ष्माश्च मृदुस्निग्धाश्च मूर्द्धजाः।
स्निग्धाङ्गी सुकुमारी च सौभाग्यसुखभागिनी ॥
कूर्मपृष्ठनखा यस्याः स्निग्धभावविवर्जिताः।
बाह्याङ्गुलितलौ पादौ तां कन्यां परिवर्जयेत् ॥
उद्धद्धपिण्डिका या तु वराहखररोमशा।
अपि राजकुलोत्पन्ना दासी स्याद्यदि रूपिणी ॥
काकजङ्घा च या नारी या वराहर्क्षरोमशा।
न सा भवति कल्याणी पतिदुःखेन मोहिता ॥
यस्यास्तु गच्छमानायाः कटिः किटिकिटायते।
जङ्घा च ग्रसते नित्यं भर्त्तारं नात्र संशयः ॥
उग्ररूपा चा या कन्या सर्वाङ्गेषु च रोमशा।
स्थूलपादा च या कन्या दासीं तां च विनिर्दिशेत् ॥
रोमराजी भवेत्खण्डा ह्रस्वा वक्रा समुन्नता।
अर्धाब्देन तु भर्तारं हत्वा भवति निर्धना ॥
रोमराजी पुनर्यस्यास्त्रिवलीभिर्विराजिता।
गम्भीरा नाभिका यस्याः प्रशस्ता सा निगद्यते ॥
धनाढ्या रूपसम्पन्ना भर्त्तारं वशवर्त्तिनम्।
लभते नात्र सन्देहः समुद्रवचनं यथा ॥ इति।

तथा,

समुद्र उवाच।

पीनोरुः पीनगण्डा समसितदशना पद्मपत्रायताक्षी
बिम्बोष्ठी तुङ्गनासा गजगतिगमना दक्षिणावर्त्तनाभिः।

स्निग्धाङ्गी चारुवेषा मृदुपृथुजघना सुस्वरा चारुकेशा
भर्ता तस्याः क्षितीशो भवति च सुभगा पुत्रयुक्ता च नारी॥
पिङ्गाक्षी कूपगण्डा खरपरुषरवा स्थूलजङ्घोर्ध्वकेशी
रूक्षाक्षी वक्रनासा प्रविरलदशना कृष्णताल्वोष्ठजिह्वा ।
शुष्काङ्गी सङ्गतभ्रूः कुचयुगविषमा वामना चातिदीर्घा
कन्यैषा वर्जनीया धनसुखरहिता दुष्टशीलाच नित्यम् ॥
हृद्रोमनखकेशेषु दन्तोष्ठनयनेषु च ।
स्नेहोऽत्र विद्यते यासां ताः स्त्रियः शुभकारणम् ॥
अल्पस्वेदाऽल्परोमा च निद्राभोजनदुर्बला ।
गात्रेषु च न रोमाणि नारीलक्षणमुत्तमम् ॥
रक्तजिह्वा मृगाक्षी च या नारी नागलोचना ।
कृशोदरी गजगतिः स्त्रीणां लक्षणमुत्तमम् ॥
परानुकूलां परपाकपाकिनीं
विवादशीलां स्वयमर्थचोरिणीम् ।
आक्रन्दिनीं सप्तगृहप्रवेशिनीं
त्यजेच्च भार्यां दशपुत्रपौत्रिणीम् ॥
मातुलिङ्गसमौ हस्तौ लम्बमानं स्तनद्वयम् ।
यदा तदा न सन्देहो द्वितीयं कुरुते पतिम् ॥
मातुलिङ्गं बीजपूरम्। मध्यदेशभाषायां विज उर इति प्रसिद्धम्।
महाङ्गुली महानासा महामुखी महास्तनी ।
महानखा तु या नारी सा नारी दुःखिनी भवेत् ॥
नदीनामा च या नारी या नारी फलनामतः ।
देवीनामा च या नारी स्वयं भक्षयते पतिम् ॥
तीर्थनामा च या नारी सा भवेत्पतिवर्जिनी ।
वृक्षनामा च या कन्या तन्मुखं नावलोकयेत् ॥

दक्षा तुष्टा प्रियालापा पतिचित्तानुगामिनी ।
कालौचित्याव्ययकरी या सा लक्ष्मीरिवापरा ॥ इति ।

विवेकविलासे,

कुचे वराङ्गपार्श्वे च वामे उच्चे मनाक् सति ।
नारीप्रसविनी नारी दक्षिणे तु नरप्रसूः ॥
अतिश्यामातिगौरा च अतिस्थूलातितन्विका ।
अतिदीर्घातिह्रस्वा च विषमाङ्ग्यधिकाङ्गिका ॥
हीनाङ्गी चैव विकला रूक्षकर्कशकाङ्गिका ।
सञ्चारिस्वरुगाक्रान्ता धर्मविद्वेषिणी तथा ॥
धर्मान्तररता चापि नीचकर्मरतापि च ।
दुःशीला दुर्भगा बन्ध्या दरिद्रा दुःखिताऽधमा ॥
अल्पायुर्विधवा कन्या स्यादेभिर्दुष्टलक्षणैः ।
उपाङ्गमथ वाङ्गं स्याद्यदीयं बहुरोमकम् ॥
वर्जयेत्तां प्रयत्नेन विषकन्यासहोदरीम् ।
भौमार्कशनिवाराणां वारः कोऽपि भवेद्यदि ॥
तथाऽश्लेषाशतभिषाकृत्तिकानां च सम्पदि ।
द्वादशी वा द्वितीया वा सप्तमी वा तिथिर्यदि ॥
ततस्तत्र सुता जाता जायते विषकन्यका । इति ।

सामुद्रतिलके,

मधुपिङ्गाक्षी स्निग्धश्यामाङ्गी राजहंसगतिनादा ।
अष्टौ जनयति पुत्रान् धनधान्यविवर्धिनी तन्वी ॥
पीवरनितम्बबिम्बा पीवरवक्षोजमण्डला बाला ।
पीवरकपोलपाली सा सौभाग्यान्विता युवतिः ॥
पृथुनयना पृथुजघना पृथुवक्षाः पृथुकटिः पृथुश्रोणिः ।
पृथुशीला च पुरन्ध्री सुपूजिता जायते जगति ॥

पुरन्ध्री स्त्री ।
मृदुरोमा मृदुगात्री मृदुकोष्ठा मृदुशिरोरुहा रमणी ।
मृदुभाषिणी न गण्यैः पुण्यैरासाद्यते सद्यः ॥
दीर्घमुखी दीर्घाक्षी दीर्घभुजा दीर्घमूर्द्धजा तन्वी ।
दीर्घाङ्गुलिका प्राप्नोत्यादीर्घं पतिं सुखोपेतम् ॥
वृत्तमुखी वृत्तकुचा वृत्तप्रसृतोरुजानुगुल्फयुगा ।
वृत्तग्रीवानाभिर्वृत्तशिरा जायते धन्या ॥
व्यक्ता भवन्ति रेखा मणिबन्धे कण्ठदले मध्ये ।
पूर्णास्तिस्रो यस्या नृपस्य सा जायते जाया ॥
उत्तप्तस्वर्णरुचस्तनुत्वचः सकलकोमलावयवाः ।
लब्धसमुदायशोभाः प्रायः श्रीभाजनं सुदृशः ॥
कपिलविलोचननलिनां कपिलकचां कपिलरोमराजिचिताम्।
कपिलावयवां बालां सन्तः शंसन्ति न प्रायः ॥
विपुलमुखी विपुलकुचा विपुलपदा विपुलकर्णहृन्नासा ।
विपुलाङ्गुलिका प्रायो भर्तृघ्नी जायते योषित् ॥
कृष्णाक्षी कृष्णाङ्गी कृष्णनखी कृष्णरोमराजिचिता ।
कृष्णोष्ठतालुरसना सा नियतं गर्हिता लोके ॥
लम्बललाटा लम्बग्रीवा लम्बोष्ठनासिका न शुभा ।
लम्बपयोधरजठरा लम्बस्फिग्लम्बचरणमणिः ॥
निःसरति वदनकुहराल्लाला यस्याः शयानायाः ।
स्फारे किञ्चिन्नेत्रे सा बाला कथ्यते कुलटा ॥
यदि नाभ्यावर्त्तवलीरेखाहीनं पृथूदरं यस्याः ।
दुःखैराकुलचित्ता सा युवतिर्जायते सततम् ।
प्रसभं प्रहरति वाष्पं प्रहसन्त्या नेत्रकर्णयोर्यस्याः ।
लाला च मुखान्तरस्था कौतस्त्या शीलरक्षा स्यात् ॥

युगपद्भवन्ति यस्या दुर्गन्धाः श्वासमूत्रऋतवश्च ।
साक्षादेव कुठारी सा वंशविकर्त्तने वनिता ॥
यस्याः स्फुटं हसन्त्याः कपोलयोः कूपकौ सदा स्याताम् ।
नयने नितान्तचपले सा भर्तृघ्नी भवत्यसती ॥
यान्त्याः स्वैरं यस्या दैववशात्पटपटायते वसनम् ।
सततं सा कल्याणी कलयति कल्याणवैकल्यम् ॥
सर्वास्थिसन्धिबन्धा यस्या गमने कटकटायन्ते ।
सुतमपि पतिं चिकीर्षति सा सङ्गतयौवनं युवतिः ॥
अपराङ्गं रोमयुतं पूर्वाङ्गं रोमविरहितं यस्याः ।
भवति विपरीतमथ वा भयङ्करी सा पिशाचीव ॥
फल्गुप्रहसनशीला निष्कारणादिङ्निरीक्षणप्रवणा ।
निष्फलबहुलालापा सा नारी दूरतस्त्याज्या ॥
अतिह्रस्वमुखी धूर्त्ता दीर्घमुखी दुःखभागिनी वनिता ।
शुष्कमुखी वक्रास्या सौभाग्यैश्वर्यसुखहीना ॥
सततं विद्विष्टमनाः खरोष्ट्रकटुकस्वरा स्फुरद्भ्रुकुटी ।
स्वच्छन्दाचाररतिः सा स्यान्मूर्त्ता पुनरलक्ष्मीः ॥
पादौ यस्याः स्फुटितौ रोमशचिपिटाङ्गुली निगूढनखौ ।
कच्छपपृष्ठनखौ वा सा दुःखदरिद्रताहेतुः ॥
विकलाङ्गी व्याधियुता शुष्काङ्गी वामना तथा कुब्जा ।
नीचान्वयजा रमणी परिहरणीया सुरूपापि ॥
काकमुखी काकाक्षी काकरवा काकजङ्घिका नारी ।
काकगतिचेष्टिता स्यान्नूनं दारिद्र्यदुःखवती ॥
सन्ततकोपाविष्टा स्तब्धाङ्गी चञ्चला महाबाहुः ।
सा दारिद्र्यवती स्याद्युवतिर्यदि वा न दीर्घायुः ॥
कपिवक्त्रा कपिनेत्रा कपिनासा कपिकटिः कपिश्रवणा ।

कपिरोमशप्रतीका प्रतीपकृज्जायते योषित् ॥
प्रतीकः अङ्गम् ।
नगविहगनदीनामा वृक्षलतागुल्मनामिका नारी ।
नक्षत्रग्रहनामा न रज्यति स्वैरिणी पत्यौ ॥
शक्रसुरासुरनामा पुन्नामानामिका नियतम् ।
भीषणनामा रमणी स्वच्छन्दा जायते प्रायः ॥
कामस्य सततवसतिर्यस्मात्सा कामिनीति विदिता स्त्री ।
द्वादशवर्षादूर्ध्वं कामो विस्फुरति पुनरधिकः ॥
तत्कारणं तु यौवनमनन्तरं सुभ्रुवो भवन्त्येते ।
वक्रोक्तिनयनलीलानितम्बबिम्बस्तनोद्भेदाः ॥
शुभलक्षणापि रूपाधिकापि विख्यातगोत्रजातापि ।
सौभाग्यभागपि तथा न शुभा दुश्चारिणी रमणी ॥
वृत्तं सुलक्ष्म वृत्तं रूपं वृत्तं समग्रसौभाग्यम् ।
वृत्तं गुणादिकं यत्तद्वृत्तं शस्यते सुदृशाम् ॥
अपि दुर्लक्षणलक्ष्मा महार्हतां शीलसंयुता याति ।
शीलेन विना वनिता न शुभा शुभलक्षणभृतापि ॥
सत्यं यत्राकृतयस्तत्र गुणाः सततमेव निवसन्ति ।
रूपाधिका पुरन्ध्री वृत्तादिगुणान्विता प्रायः ॥ इति ।

इति मिश्रकलक्षणम् ।

इह वपुष आपादतलकेशान्तानि व्यञ्जनादीन्यपि लक्षणान्यभिहितानि । अधुना आवर्त्तलक्षणं स्कान्दवचनक्रमेणाभिधीयते ।

भविष्यपुराणे,

आवर्तः पृष्ठतो यस्या नाभिरावर्त्तवर्जिता ।

तस्या यस्तु भवेद्भर्त्ता तस्यायुर्ह्रस्वमादिशेत् ॥
गुह्यावर्त्ता पतिं हन्ति नाभ्यावर्त्ता पतिव्रता।
कट्यावर्त्ता तु स्वच्छन्दा न कदाचिद्धि रज्यते ॥ इति।
स्कान्दे काशीखण्डे,
पादे प्रदक्षिणावर्तो धर्मो वामे न शोभनः।
नाभौ श्रुतावुरसि वा दक्षिणावर्त्त ईडितः ॥
सुखाय दक्षिणावर्त्तः पृष्ठवंशस्य दक्षिणे।
अन्तःपृष्ठं नाभिसमो बह्वायुःपुत्रवर्द्धनः ॥
राजपत्न्याः प्रदृश्येत भगमौलौ प्रदक्षिणः।
स चेच्छकटभङ्गिः स्याद्भ्रूपत्यसुखप्रदः ॥
शकटभङ्गिश्चक्राकारः।
कटिगो गुह्यवेधेन पत्यपत्यनिपातनः।
स्यातामुदरवेधेन पृष्ठावर्त्तौ न शोभनौ ॥
एकेन हन्ति भर्त्तारं भवेदन्येन पुंश्चली।
कण्ठगो दक्षिणावर्त्तो दुःखवैधव्यहेतुकः ॥
सीमन्तेऽथ ललाटे वा त्याज्यो दूरात्प्रयत्नतः।
सा पतिं हन्ति वर्षेण यस्या मध्येकृकाटिकाम् ॥
प्रदक्षिणो वा वामो वा रोम्णामावर्त्तकः स्त्रियाः।
एको वा मूर्द्धनि द्वौ वा स्यातां वामगती अपि ॥
आदशाहात् पतिघ्नौ तु त्याज्यौ दूरात्सुबुद्धिना।
कट्यावर्त्ता च कुलटा नाभ्यावर्त्ता पतिव्रता ॥
पृष्ठावर्त्ता च भर्तृघ्नी कुलटा चाथ जायते ॥ इति।
जगन्मोहने समुद्रः,
त्रिष्वावर्त्तो भवेद्यस्या ललाट उदरे भगे।
त्रीणि सा भक्षयेन्नारी देवरं श्वशुरं पतिम् ॥

आवर्त्तः पृष्ठतो यस्या न सा कल्याणभागिनी ।
बहून् सा रमते नारी दुःखितान् कुरुते सदा ॥ इति ।

विवेकविलासे,

कटीकृकाटिकाशीर्षोदरभालेषु मध्यगः ।
नासान्ते च शुभो न स्यादावर्त्तो दृष्टिगोऽपि सन् ॥
आवर्त्तो वामभागेऽपि स्त्रीणां संहारवृत्तयः ।
न शुभास्ते शुभो भालदक्षिणेऽङ्गे स दृष्टितः ॥ इति ।

सामुद्रतिलके,

आवर्त्तो नारीणां प्रदक्षिणः पाणिपल्लवे व्यक्तः ।
दक्षे धनधान्यजनको न जातु शस्तः पुनर्वामे ॥ इति ।

इत्यावर्त्तलक्षणम् ।

अथ गन्धलक्षणम् ।

जगन्मोहने प्राह समुद्रः,

धान्यगन्धा च या नारी निम्बगन्धा च या भवेत् ।
वर्जनीया प्रयत्नेन यदीच्छेच्चिरजीवितम् ॥
क्षीरगन्धां त्यजेत्कन्यां तथा च क्षौद्रगन्धिनीम् ।
रक्तगन्धा च या नारी तां कन्यां परिवर्जयेत् ॥
गोमूत्रहरितालाभो गन्धो यस्याः प्रवर्तते ।
दुष्टगन्धा च या नारी वर्जनीया प्रयत्नतः ॥
तुम्बीपुष्पसमो गन्धोऽप्यथ लाक्षासमो भवेत् ।
न सा तु लभते गर्भं दुर्भगातीव जायते ।
चम्पकाशोकपुष्पाणां यदि गन्धो भवेत् स्त्रियाः ॥
सुभगा सा भवेन्नूनं भर्त्तुः स्याद्वंशवर्द्धिनी ॥
या च लुच्छुन्दरीगन्धा मत्स्यगन्धा च या भवेत् ।
उग्रगन्धा च या कन्या कन्यां तां परिवर्जयेत् ॥ इति ।

सामुद्रतिलके,

जातीचम्पकवित्तकिलशतपत्रबकुलकेतकीतुल्यः ।
स्वेदश्वसादिभवः प्रशस्यते योषितो गन्धः ॥
गन्धः सर्वाङ्गाणां मृगनाभीसन्निभो भवति यस्याः ।
सा योषिदग्रमहिषी विहीनरूपापि भूमिपतेः ॥ इति ।

इति गन्धलक्षणम् ।

अथ छायालक्षणम् ।

सामुद्रतिलके,

छादयति लक्षणानि स्त्रीणामङ्गे तदुच्यते छाया ।
लावण्यं सौभाग्यं तां लक्षणवेदिनो ब्रुवते ॥
वस्त्वतिरिक्तं किञ्चन महाकवीनां यथा गिरि स्फुरति ।
अङ्गे सुदृशां तद्वन्मनोहरा लवणिमच्छाया ॥
सौभाग्यच्छायैव प्रमुखा निखिलेषु लक्ष्मसु स्त्रीणाम् ।
यदभावे भुवि वनिता पाञ्चालीवन्न भोगार्हा ॥
चित्तचमत्कृतिजननी हृदि सन्तोषं तनोति जगतोऽपि ।
या दृष्टापि स्पष्टं सा हि च्छाया तु शस्यते सुदृशाम् ॥
यासां सर्वाङ्गीणा विराजते लवणिमच्छाया ।
चित्रमिमास्तास्त्रिजगति माधुर्यं समधिकं दधते ॥
रूपाकारविहीने शुभलक्षणविरहिते नियतमङ्गे ।
सौभाग्यमस्ति यस्याः सा ललना दुर्लभा भुवने ॥
यदि लावण्यच्छायाच्छन्नं शुभलक्ष्मरूपमङ्गं स्यात् ।
तत्तद्वयसो योगेन हि शृतदुग्धे शर्कराक्षेप इव ॥ इति ।

इति छायालक्षणम् ।

अथ सत्त्वलक्षणम् ।

सामुद्रतिलके,

आपद्यपि सम्पद्यपि मुक्तमनोदुःखसुखमेकम् ।
अपगतविषादहर्षं हतशोकोत्साहमिह सत्त्वम् ॥
सत्त्वोपेता प्रायः सदया सत्यस्थिरातिगम्भीरा ।
कौटिल्यशल्यरहिता हितकल्याणी भवति रमणी ॥ इति ।

इति सत्त्वलक्षणम् ।

अथ स्वरलक्षणम् ।

भविष्यपुराणे,

हंसकोकिलवीणाश्वाशिखिवेणुस्वराः स्त्रियः ।
प्राप्नुवन्ति बहून् भोगान् भृत्यानाज्ञापयन्ति च ॥
भिन्नकांस्यस्वरा नारी खरकाकस्वरा च या ।
रोगव्याधिभयं शोकं दारिद्र्यं चाधिगच्छति ॥ इति ।

हेमाद्रावप्युक्तम्—

मेघौघकुररक्रौञ्चहंसदुन्दुभिनिःस्वना ।
कलविङ्कहिरण्याभपरपुष्टैस्तु भाषिणी ॥
प्रशस्यते, इति शेषः ।

सामुद्रतिलके,

गतकौटिल्यमदीनं स्निग्धं दाक्षिण्ययुक्तमकठोरम् ।
सकलजनसान्त्वनकरं भाषितमिह योषितां शस्तम् ॥
नारी विभिन्नकांस्यक्रोष्टुखरोलूककाककङ्करवा ।
दुःखबहुशोकशङ्कावैधव्यव्याधिभाग्भवति ॥ इति ।

इति स्वरलक्षणम् ।

अथ गतिलक्षणम् ।

भविष्यपुराणे,

हंसगोवृषचक्राहसिंहमातङ्गगामिनी ।
स्वकुलं द्योतयेन्नारी माहिषी पार्थिवस्य च ॥

चक्राह्वश्चक्रवाकः।द्योतयेत् प्रकाशयेत् प्रासिद्धं कुर्यादित्यर्थः।

श्वशृगालगतिर्निन्द्या या च वायसवद्व्रजेत् ।
दासी मृगगतिर्नारी हुतगा स्याच्च बन्धकी ॥ इति ।

सामुद्रतिलके,

मृदुसन्निवेशितपदा मत्तमतङ्गजहंसगतितुल्या ।
सुभगा गतिः सुललिता विलसति वसुधेशपत्नीनाम् ॥इति।

इति गतिलक्षणम् ।

अथ वर्णलक्षणम् ।

भविष्यपुराणे,

फलिनीरोचनाहेमकुङ्कुमप्रभ एव च ।
वर्णः शुभकरः स्त्रीणां यश्च दूर्वाङ्कुरोपमः ॥ इति ।

फलिनी श्यामा ।

सामुद्रतिलके,

पङ्कजकिञ्जल्काभः स्त्रीणां नवतप्तकनकभङ्गनिभः ।
चम्पककुसुमसमानः स्निग्धो गौरः शुभो वर्णः ॥
नवदूर्वाङ्कुरतुल्यः सेरश्यामार्जुनप्रसूनाभः ।
कान्तः श्यामो वर्णः सौभाग्यं सुभ्रुवां तनुते ॥
शुद्धोऽपि मध्यमः स्यात् कृष्णस्निग्धश्च कज्जलच्छायः ।
वायसतुण्डविडम्बी पुनर्जघन्यो घनविरूक्षः ॥
द्युतिमान् यो हरितालीविमिश्रनीलीनिभो भवति वर्णः ।
श्यामासन्निभवर्णो लावण्यगुणाधिकः स्त्रीणाम् ॥ इति ।

इति वर्णलक्षणम् ।

अत्र नरलक्षणे यो विशेषो नोक्तः स अत्रत्यस्तत्रावगन्तव्यः । यश्चात्र विशेषो नोक्तः स चाविरुद्धः पुंरुपलक्षणप्रकरणोक्तोऽवगन्तव्यः । तदुक्तम्—

सामुद्रतिलके,
यन्नोक्तं पूर्वस्मिन्नौचित्यात्तन्नरेऽपि नारीवत् ।
यदमुष्मिन्नपि न पुनः सकलं तन्नरवदप्यूह्यम् ॥ इति ।
अथ प्रसङ्गात्कामशास्त्रोक्तानि पुरुषस्त्रीलक्षणान्युच्यन्ते ।
तत्र पुरुषः शशादिभेदेन चतुर्विधः । तदुक्तम्—
स्मरदीपिकायाम्,
शशो मृगो वृषश्चैव चतुर्थश्च हयस्तथा ।
कथितं च क्रमात्पुंसामेतज्जातिचतुष्टयम् ॥ इति ।
एतेषां लक्षणान्यपि क्रमेण तत्रैवोक्तानि । तत्र—
शशो यथा,
स्त्रीजितो गायनश्चैव नारीसत्त्वपरः सुखी ।
षडङ्गुलशरीरस्तु श्रीमांश्च शशको मतः ॥ इति ।
शरीरं लिङ्गम् ।
मृगो यथा,
अल्पभुग्धार्मिकश्चैव सत्यवादी प्रियम्वदः ।
अष्टाङ्गुलशरीरस्तु रूपयुक्तो मृगो मतः ॥ इति ।
वृषो यथा,
उपकारवशो नित्यं स्त्रीवशः श्लेष्मलस्तथा ।
स्वदशाङ्गुलमेढ्रस्तु मेदस्वी वृषभो मतः ॥ इति ।
हयो यथा,
लुब्धकः कृपणश्चैव मिथ्यावादी च निर्भयः ।
द्वादशाङ्गुलमेढ्रश्च कुशलो वै हयो मतः ॥ इति ।

अथ स्त्रीलक्षणम् ।

तत्र पद्मिन्यादिभेदेन स्त्री चतुर्विधा । तदुक्तम्—
स्मरदीपिकायाम्,

पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
प्रत्येकं च वरस्त्रीणां ख्यातं जातिचतुष्टयम् ॥ इति ।
रतिरहस्येऽपि,
पद्मिनीं तदनु चित्रिणीं ततः शङ्खिनीं तदनु हस्तिनीं विदुः।
उत्तमा प्रथमभाषिता ततो हीयते युवतिरुत्तरोत्तरा ॥इति।
विवेकविलासेऽपि,
पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा ।
तत्तदिष्टविधानेनानुकूल्या स्त्री विचक्षणैः ॥ इति ।
तत्र पद्मिनीलक्षणमुक्तम्—
स्मरदीपिकायाम्,
शशिवदना बिम्बोष्ठी तन्वी ताम्रनखी तथा ।
मृद्वङ्गी लज्जिता श्यामा रक्तोपान्तविलोचना ॥
गायनी सुरताढ्या च पारावतकलस्वना ।
स्वल्पाहारा सुकेशी च पद्मगन्धा च पद्मिनी ॥ इति ।
रतिरहस्ये,
कमलमुकुलमृद्वी फुल्लराजीवगन्धिः
सुरतपयसि यस्याः सौरभं दिव्यमङ्गे ।
चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे
स्तनयुगलमनल्पं श्रीफलश्रीविडम्बि ॥
तिलकुसुमसमानां बिभ्रती नासिकां या
द्विजगुरुसुरपूजाः श्रद्दधाना सदैव ।
कुवलयदलकान्तिः कापि चाम्पेयगौरी
विकचकमलकोशाकारकामातपत्रा ॥

विकसितकमलकोशाकारं कामातपत्रं गुह्यं यस्याः सेति विग्रहः ।

व्रजति मृदु सलीलं राजहंसीव तन्वी
त्रिवलिललितमध्या हंसवाणी सुवेषा ।
मृदु शुचि लघु भुङ्क्ते मानिनी गाढलज्जा
धवलकुसुमवासोवल्लभा पद्मिनी स्यात् ॥ इति ।

सामुद्रतिलकेऽपि,

स्निग्धश्यामलकान्तिस्तिलकुसुमाकारनासिका सुभगा ।
त्रिवलीतरङ्गमध्या वृत्तकुचा स्निग्धकृष्णकचा ॥
पद्ममुखी मधुगन्धा पद्मायतलोचना प्रियालापा ।
विम्बोष्ठी हंसगतिर्धर्मरतिः पद्मिनी भवति ॥ इति ।

मधुगन्धा पद्मरसगन्धा ।

इति पद्मिनीलक्षणम् ।

अथ चित्रिणीलक्षणम् ।

स्मरदीपिकायाम्,

गौराङ्गी त्यक्तलज्जा च बाह्यसम्भोगसंरता ।
उत्तानशायिनी चोष्णा पारावतकलस्वना ॥
स्निग्धाङ्गी मांसिकागन्धा स्वल्पकामा कृशोदरी ।
धूर्त्ता गुरुनितम्बा च चित्रिणी श्रीफलस्तनी ॥ इति ।

मांसिका जटामांसी ।

रतिरहस्येऽपि,

सुगतिरनातिदीर्घा नातिखर्वा कृशाङ्गी
स्तनजघनविशाला काकजङ्घोन्नतोष्ठी ।
मधुसुरभिरताम्बुः कम्बुकण्ठी चकोर-
स्वरवचनविभागा नृत्यगीताद्यभिज्ञा ॥
मदनसदनमस्या वर्त्तुलोच्छूनमन्त-
र्मृदु मदनजलाढ्यं रोमभिर्नातिसान्द्रैः ।

प्रकृतिचपलदृष्टिर्बाह्यसम्भोगरक्ता
रसयति मधुरालपं चित्रिणी चित्ररक्ता ॥ इति।

इति चित्रिणीलक्षणम्।

अथ शङ्खिनीलक्षणम्।

स्मरदीपिकायाम्,
शङ्खिनी कोपना चोष्णा दीर्घाऽदीर्घशिरोरुहा।
वृत्ताङ्गी क्षारगन्धा च नातिस्थूला न दुर्बला ॥
गौराङ्गी तीक्ष्णानासा च पीनस्तनविलक्षणा।
विशालजघना क्रूरा सुरताढ्या च शङ्खिनी ॥ इति।
रतिरहस्ये,
तनुरतनुरपि स्यादीर्घदेहाङ्घ्रिमध्या
ह्यरुणकुसुमवासःकाङ्क्षिणी कोपशीला।
अनिभृताशिरमङ्गं दीर्घनिम्नं वहन्ती
स्मरगृहमतिरोम क्षारगन्धि स्मराम्बुः ॥
सामुद्रतिलके,
विषमकुचा विषगन्धा दीर्घप्रसृतोरुनासिकानयना।
तनुकेशी खरचित्ता शङ्खरवा शङ्खिनी योषित् ॥ इति।

इति शङ्खिनीलक्षणम्।

अथ हस्तिनीलक्षणम्।

स्मरदीपिकायाम्,
स्थूला दृढकुचा क्रूरा फुल्लनासातिशीतला।
खर्वा च खर्वनासा च बहुलोत्पलकामुखी ॥
मदगन्धतनुर्नित्यं मत्तमातङ्गगामिनी।
लुब्धा पीनस्तनी श्यामा हस्तिनी सा प्रकीर्त्तिता ॥ इति।

रतिरहस्ये,
अललितगतिरुच्चैः स्थूलवक्राङ्गुलीकं
वहति चरणयुग्मं कन्धरां ह्रस्वपीनाम् ।
कपिलकचकलापा क्रूरचेष्टातिपीना
द्विरदमदसुगन्धिः स्वाङ्गकेऽनङ्गके च ॥
द्विगुणकटुकषायप्रायभुग्वीतलज्जा
ललदतिविपुलोष्ठी दुःखसाध्या प्रयोगे ।
बहिरपि तनुरोमात्यन्तमन्तर्विशालं
वहति जघनरन्ध्रं हस्तिनी गद्गदोक्तिः ॥ इति ।
सामुद्रतिलके,
स्थूलदशना सुमध्या गजखरनादा मदोत्कटा चपला ।
ह्रस्वोरुभुजग्रीवाजङ्घा वादित्रगीतरतिः ॥
स्निग्धतरङ्गितकेशी पीनोन्नतवृत्तकुचकलशा ।
मत्तमतङ्गजगमना मदगन्धा हस्तिनी भवति ॥ इति ।
रतिरहस्ये,
पद्मिनी पद्मगन्धा स्यान्मधुगन्धा च चित्रिणी ।
शङ्खिनी क्षारगन्धा च निम्बगन्धा च हस्तिनी ॥
इति हस्तिनीलक्षणम् ।
अथैतेषां योग उक्तः—
स्मरदीपिकायाम्,
शशकं पद्मिनी गच्छेच्चित्रिणीं च मृगस्तथा ।
शङ्खिनीं वृषभश्चैव हस्तिनीं च हयस्तथा ॥
रमते तुल्यभावेन तथा समरतं भवेत् ।
उच्चनीचातिनीचैश्च तथात्युच्चविवर्जितम् ॥
ख्यातं समरतं चैव तद्विहस्त्यन्यथा स्त्रियः ।

स्त्रीणां विषयसाम्यं तु ज्ञात्वा मैथुनमाचरेत् ॥
समाने सुखसम्पत्तिरन्यथा प्रद्विषन्ति ताः ।
मृदुह्रस्वध्वजो यत्र प्रियोऽशक्तो द्रुतच्युतिः ॥
यत्र स्त्रीणां च काठिन्यं तत्र नीचरतं भवेत् ।
श्रूयते चैव कार्णाटे कान्तया निहतः पतिः ॥
सामुद्रतिलके तु विशेषः ।
स्मरशास्त्रविनिर्दिष्टाः शशो वृषो हय इति त्रयो भेदाः ।
जायन्ते मनुजानां क्रमेण तल्लक्ष्म विवृणोमि ॥
लिङ्गं षडङ्गुलानि स्यादष्टौ वा स्फुटं शशः स पुमान् ।
नव दश चैकादश वा तदपि पुनर्यस्य स वृषाख्यः ॥
द्वादश यल्लिङ्गं स्यात्त्रयोदशादीनि वाङ्गुलानि भवेत् ।
जातोद्भवस्य मानं हयाख्यया निगदितः सोऽपि ॥
जातोद्भवस्य जातकामस्य ।
रतिषु शशवृषहयानां सह मृग्यादिभिरकृत्रिमा प्रीतिः ।
मेहनवराङ्गनाङ्योः परस्परेण प्रमाणैक्यात् ॥
इह भवति मृगीवडवाकरिणीभेदेन कामिनी त्रेधा ।
तासां लक्षणमधुना दिङ्मात्रमनूद्यते क्रमशः ॥
यस्याः षडङ्गुलानि स्यादष्टौ वा सरोजमुकुलाभा ।
नाडी वराङ्गमध्ये निगद्यते सा मृगी युवतिः ॥
सापि नव दशैकादश यस्याः स्यादङ्गुलानि वडवा सा ।
सैव द्वादश यदि वा त्रयोदशादीनि सा करिणी ॥
प्रायेण मृगीवडवाकरिणीनां जायते सह शशाद्यैः ।
प्रीतिः सहजा मनुजैर्यथाक्रमं सम्प्रयुक्तानाम् ॥ इति ।

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरी—

नीराजितचरणकमल–
श्रीमन्महाराजाधिराजप्रतापरुद्रतनूज–
श्रीमन्महाराजमधुकरसाहसूनु–
चतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकर–
श्रीमन्महाराजाधिराज–
श्रीवीरसिंहदेवोद्योजित–
श्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनु–
सकलविद्यापारावारपारीणजगद्दारिद्र्यमहागजपारीन्द्र–
विद्वज्जनजीवातु–
श्रीमन्मित्रमिश्रकृते श्रीवीरमित्रोदयाभिधनिबन्धे
लक्षणप्रकाशे स्त्रीलक्षणप्रकरणं समाप्तम्।

अथ राजचक्रलक्षणप्रकरणम् ।

तत्र राजलक्षणम् ।

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः ॥

इति ब्रह्मणा प्रजारक्षार्थं राजा सृष्ट इति मनुरुक्तवान्। तत्र—

उक्तैरनुक्तैस्तु गुणैरनेकैरलङ्कृतो भूमिपतिश्च कार्यः ।
सम्भूय राष्ट्रप्रवरैर्यथावत् राष्ट्रस्य रक्षार्थमदीनसत्त्वः ॥

इति विष्णुधर्मोत्तरवचनेन राज्ञि मृते राज्याधिकारिणि तदीये पुत्रादौ वाऽसति अन्यकुलीनो राजा राष्ट्ररक्षार्थं राष्ट्रमुख्यै राज्येऽभिषेक्तव्य इत्युक्तम् । स च किंलक्षणोपेत इति तल्लक्षणमभिधीयते ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।
सर्वलक्षणलक्षण्यो विनीतः प्रियदर्शनः ।
अदीर्घसूत्रो धर्मात्मा जितक्रोधो जितेन्द्रियः ॥

विनीतः विनययुक्तः । प्रियदर्शनः प्रियं दर्शनं यस्य सः यस्य राज्ञो दर्शने जाते स्वस्य इष्टं भवति । अदीर्घसूत्रः अवश्यकार्याणां कर्मणामारम्भे प्रारब्धानां च समाप्तौ योऽत्यन्तं न विलम्बते सः ।

स्थूललक्षो महोत्साहः स्मितपूर्वाभिभाषकः ।
सुरूपः शीलसम्पन्नः क्षिप्रकारी महाबलः ॥

स्थूललक्षो बहुदीर्घार्थदर्शी । महोत्साहः महानुत्साहः पुरुषार्थसाधनकर्मारम्भाध्यवसायो यस्य सः ।

ब्रह्मण्यश्चाविसंवादी दृढभक्तिः प्रियंवदः ।

अविसंवादी ब्राह्मणेषु । दृढभक्तिरपि ब्राह्मणादिष्वेव ।
अलोलुपः संयतवाग्गम्भीरः प्रियदर्शनः ॥
नातिदण्डो न निर्दण्डश्चारचक्षुरजिह्मगः ।
व्यवहारे समः प्राप्ते पुत्रेण रिपुणा सह ॥
रथे गजेऽश्वे धनुषि व्यायामे च कृतश्रमः ।
उपवासतपःशीलो यज्ञयाजी गुरुप्रियः ॥
मन्त्रिसांवत्सराधीनः समरेष्वनिवर्त्तकः ।
सांवत्सरो ज्योतिर्वित् ।
कालज्ञश्च कृतज्ञश्च नृविशेषज्ञ एव च ॥
कृतज्ञः परकृतोपकारापकारौ न विस्मरतीति सः ।
पूज्यपूजयिता नित्यं दण्ड्यदण्डयिता तथा ।
षाड्गुण्यस्य प्रयोक्ता च शक्त्युपेतस्तथैव च ॥
षड्गुणाः सन्धिविग्रहयानासनद्वैधीभावसंश्रयाः । तल्लक्षणं च विष्णुधर्मोत्तर एव उक्तम्—
सन्धिश्च विग्रहश्चैव यानमासनमेव च ।
द्वैधीभावः संश्रयश्च षाड्गुण्यं परिकीर्त्तितम् ॥
पणबन्धः स्मृतः सन्धिरपकारस्तु विग्रहः ।
जिगीषोः शत्रुविषये यानं यात्राभिधीयते ॥
विग्रहेऽपि स्वके देशेऽच्युतिरासनमुच्यते ।
बलाद्वैरिमारणं तु द्वैधीभावः स उच्यते ॥
उदासीने मध्यमे वा संश्रयात्संश्रयः स्मृतः । इति ।
एतेषां प्रयोगकालश्च तत्रैवोक्तः ।
समेन सन्धिरन्वेष्या हीनेन च बलीयसा ।
हीनेन विग्रहः कार्यः स्वयं राज्ञा बलीयसा ॥
तत्रापि तस्य पार्ष्णिस्तु बलीयान्न समाश्रयेत् ।

पार्ष्णिः सेनापृष्ठम्। न समाश्रयेत् विग्रहं न कुर्यादित्यर्थः।
आसीनः कर्मविच्छेदं शक्तः कर्त्तुं रिपुर्यदा ॥
अशुद्धपार्ष्णिर्बलवान्द्वैधीभावं समाश्रयेत्।
बलिना विगृहीतस्तु योऽसन्धेयेन पार्थिवः ॥
संश्रयस्तेन कर्त्तव्यो गुणानामधमो गुणः।
बहुक्षयव्ययायासं तेषां यानं प्रकीर्त्तितम् ॥
बहुलाभकरं च स्यात्तदा राम समाश्रयेत्।
सर्वशक्तिविहीनस्तु तदा कुर्यात्तु संश्रयम् ॥
एवं च बुद्ध्वा नृपतिर्गुणानां काले च देशे च तथा विभागे।
समाश्रयेद्भार्गववंशमुख्य एतावदुक्तं नृपतेस्तु कार्यम् ॥ इति।
शक्तयः प्रभावोत्साहमन्त्रजास्तिस्रः।
उक्तैरनुक्तैस्तु गुणैरनेकैरलङ्कृतो भूमिपतिश्च कार्यः।
सम्भूय राष्ट्रप्रवरैर्यथावत् राष्ट्रस्य रक्षार्थमदीनसत्त्वः ॥ इति।
याज्ञवल्क्यः,

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः।
विनीतः सत्त्वसम्पन्नः कुलीनः सत्यवाक् शुचिः ॥

वृद्धसेवकः तपोज्ञानादिवृद्धानां सेवकः। सत्त्वसम्पन्नः सम्पदापदोर्हर्षविषादरहितः। शुचिः बाह्याभ्यन्तरशौचयुक्तः।

अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा।
धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥

स्मृतिमान् अवगताविस्मरणशीलः। अक्षुद्रः असद्गुणद्वेषी। अपरुषः परदोषाकीर्त्तनः। धार्मिकः वर्णाश्रमधर्मान्वितः। अव्यसनः व्यसनरहितः। व्यसनान्याह—

मनुः,

मृगयाक्षा दिवास्वापः परिवादः स्त्रियो मदः।

तौर्यत्रिकं वृथात्यागः कामजो दशको गणः ॥
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ इति ।

एषु सप्त कष्टतमानि । यथाह—

स एव,

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत्कष्टतमं विद्यात् चतुष्कं कामजे गणे ॥
दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे ।
क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं सदा ॥ इति ।

प्राज्ञः गम्भीरार्थावधारणक्षमः । शूरः निर्भयः । रहस्यवित् गोपनीयार्थगोपनचतुरः ।

स्वरन्ध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च ।
विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः ॥

स्वरन्ध्रगोप्ता स्वस्य सप्तसु राज्याङ्गेषु यत्परप्रवेशद्वारशैथिल्यं तत्स्वरन्ध्रं तस्य गोप्ता प्रच्छादयिता । राज्याङ्गान्याह—

याज्ञवल्क्यः,

स्वाम्यमात्या जनो दुर्गं कोशो दण्डस्तथैव च ।
मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ॥ इति ।

महोत्साहाद्युक्तलक्षणो महीपतिः स्वामी । अमात्या मन्त्रिपुरोहितादयः । जनो ब्राह्मणादिप्रजा । दुर्गं धन्वदुर्गादि । कोशः सुवर्णादिद्रव्यराशिः । दण्डो हस्त्यश्वरथपदातिलक्षणं चतुरङ्गबलम् । मित्राणि सहजप्राकृतकृत्रिमाणि । एताः स्वाम्याद्या राज्यस्य प्रकृतयो मूलकारणानि । एवं सप्ताङ्गं राज्यमुच्यते । आन्वीक्षिक्यामात्मविद्यायाम्, दण्डनीत्यामर्थयोगक्षेमोपयोगिन्याम्, वार्तायां कृषिवाणिज्यपशुपालनरूपायां धनोपचयहेतुभूतायाम्,

त्रय्यां ऋग्यजुःसमसंज्ञायां च विनीतस्तत्तदभिज्ञैः प्रवीण्यं नीतः.। एवम्भूतो नराधिपः कार्य इति सम्बन्धः। अन्यदप्युक्तम्—

महाभारते,

मन्त्रिगुणानुक्त्वा—

एतैरेव गुणैर्युक्तो राजा शास्त्रविशारदः।
एष्टव्यो धर्मपरमः प्रजापालनतत्परः॥
धीरो मर्षी शुचिस्तीक्ष्णः काले पुरुषकारवित्।
शुश्रूषुः श्रुतवान् श्रोता ह्यूहापोहविशारदः॥
मेधावी धारणायुक्तो यथायुक्तोपपादकः।
दान्तः सदा प्रियाभाषी क्षमावांश्च विपर्यये॥
दानशूरः स्वयङ्कारी साध्वाचारः सुदर्शनः।
आर्त्तहस्तप्रदो नित्यमाप्तामात्यो नये रतः॥
नाहंवादी न निर्द्वन्द्वो न यत्किञ्चनकारकः।
न निर्द्वन्द्वः शीतोष्णादिसहिष्णुः।
कृते कर्मण्यमात्यानां कर्त्ता भृत्यजनप्रियः॥
सङ्गृहीतजनः स्तुत्यः प्रसन्नवदनः सदा।
सदा भृत्यजनावेक्षी अक्रोधी सुमहामनाः॥
युक्तदण्डो न निर्दण्डो धर्मकार्यानुशासकः।
चारनेत्रः प्रजावेक्षी धर्मार्थकुशलः सदा॥
राजा गुणशताकीर्ण एष्टव्यस्तादृशो भवेत्। इति।
एतैरेव गुणैर्युक्त इत्याद्यष्टगुणा मन्त्रिलक्षणे द्रष्टव्याः।

रामायणेऽपि,

धर्मात्मा सत्यवादी च शीलवाननसूयकः।
दान्तः सत्त्वहितः प्राज्ञः कृतज्ञो विजितेन्द्रियः॥
मृदुश्च स्थिरवृत्तिश्च नित्यं दीनानुकम्पकः।

प्रियवादी जितक्रोधो दीर्घदर्शी महामतिः ॥
बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ।
तेन तस्यातुला कीर्त्तिर्यशस्तेजश्च वर्द्धते ॥
समाप्तश्च धनुर्वेदे हयपृष्ठे गजे रथे ।
लब्धास्त्रः शब्दवेधी च दूरपाती दृढायुधः ॥ इति ।

इति राजलक्षणम् ।

अथ पट्टमहिषीलक्षणम् ।

अत्र—

एवं गुणगणोपेता नरेन्द्रेण सहाऽनघ ।
अभिषेच्या भवेत् राज्ये राज्यस्थेन नृपेण वा ॥
राज्ञाग्रमहिषी कार्या सर्वलक्षणलक्षिता ।

इति विष्णुधर्मोत्तरादिवचनै राज्ञा सहाग्रमहिषी अभिषेक्तव्या । अथ वा अभिषिक्तेन राज्ञा पश्चात्स्वयमभिषेक्तव्येत्युक्तम् । तत्र किंलक्षणोपेतेति तल्लक्षणमभिधीयते ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।
राज्ञाग्रमहिषी कार्या सर्वलक्षणलक्षिता ।
विनीता गुरुभक्ता च ईर्ष्याक्रोधविवर्जिता ॥
राज्ञः प्रियहितासक्ता चारुवेषा प्रियंवदा ।
भृताभृतजनज्ञा च भृतानामन्ववेक्षिणी ॥
अभृतानां जनानां च भृतिकर्मप्रवर्तिनी ।
रागद्वेषवियुक्ता च सपत्नीनां सदैव या ॥
भोजनासनपानेन सर्वेषामन्ववेक्षिणी ।
सपत्नीपुत्रेष्वपि या पुत्रवत्परिवर्त्तते ॥
मन्त्रिसांवत्सरामात्यान् या च पूजयते सदा ।

ब्रह्मण्या च दयायुक्ता सर्वभूतानुकम्पिका ॥
कृताकृतज्ञा राज्ञां च विदिता मण्डलेष्वपि।
पुरराजकलत्रेषु प्रीयमाणा मुदान्विता ॥
दूतादिप्रेषणकरी राजदारेषु सर्वदा।
तत्तद्द्वारे नरेन्द्राणां कार्यज्ञा च विशेषतः ॥
एवं गुणगणोपेता नरेन्द्रेण सहाऽनघ।
अभिषेच्या भवेद्राज्ये राज्यस्थेन नृपेण वा ॥
एवंविधा यस्य भवेत्तु पत्नी
नरेन्द्रचन्द्रस्य महानुभावा।
वृद्धिं व्रजेत्तस्य नृपस्य राष्ट्रं
सचारकं नात्र विचार्यमस्ति ॥ इति।

इति पट्टमहिषीलक्षणम्।

अथ मन्त्रिलक्षणम्।

इह राजलक्षणे—

मन्त्रिसांवत्सराधीनः—

इत्यनेन राज्ञा मन्त्र्यधीनेन भवितव्यम्,

स राज्ञः सर्वकार्याणि कुर्याद्भृगुकुलोद्वह।

इति वचनेन च मन्त्री राज्ञः सर्वकर्माणि कुर्यादित्युक्तम्। स च मन्त्री कथमपेक्षित इति तल्लक्षणमभिधीयते।

विष्णुधर्मोत्तरे,

पुष्कर उवाच।

सर्वलक्षणलक्षण्यो मन्त्री राज्ञस्तथा भवेत्।
ब्राह्मणो वेदतत्त्वज्ञो विनीतः प्रियदर्शनः ॥
स्थूललक्षो महात्मा च स्वामिभक्तः प्रियंवदः।
महोत्साह इति पाठान्तरम्।

बृहस्पत्युशनःप्रोक्तां नीतिं जानाति सर्वतः ॥
रागद्वेषेण यः कार्यं न च हन्ति महीक्षितः ।
लोकापवादाद्राजार्थे भयं यस्य न जायते ॥
क्लेशक्षमस्तु धर्मात्मा विजितात्मा जितेन्द्रियः ।
गूढमन्त्रश्च दक्षश्च प्राज्ञो भक्तजनप्रियः ॥
इङ्गिताकारतत्त्वज्ञ ऊहापोहविशारदः ।
शूरश्च कृतविद्यश्च न च मानी विमत्सरः ॥
चारप्रचारकुशलः प्राणिधिप्रणयात्मकः ।
षाड्गुण्यविधितत्त्वज्ञश्चोपायकुशलस्तथा ॥

उपायाः सामदानभेददण्डास्तेषु कुशलः यथायोग्यं तत्प्रयोगसमर्थः । उपायाश्च याज्ञवल्क्येनोक्ताः—

उपायाः साम दानं च भेदो दण्डस्तथैव च ।
सम्यक्प्रयुक्ता सिद्ध्येयुर्दण्डस्त्वगतिका गतिः ॥ इति ।
वेत्ता विधाता कार्याणां नैव कार्यातिपातिता ।
समश्च राजभृत्यानां तथैव च गुणप्रियः ॥
कालज्ञः समयज्ञश्च कृतज्ञस्तु जनप्रियः ।

कालज्ञः शकुनगणिताद्युपायैर्भविष्यत्कार्यकालवेत्ता । समयज्ञः कार्योचितावसरज्ञः ।

कृतानामकृतानां च कर्मणामन्ववेक्षिता ।
यथानुरूपमर्हाणां पुरुषाणां नियोजिता ॥
राज्ञः परोक्षे कार्याणि सम्पराये भृगूत्तम ।
कृत्वा निवेदिता राज्ञे कर्मणां गुरुलाघवम् ॥
शत्रुमित्रविभागज्ञो विग्रहास्पदतत्त्ववित् ।
स राज्ञः सर्वकार्याणि कुर्याद्भृगुकुलोद्वह ॥
विदितानि तथा कुर्यान्नाज्ञातानि महीक्षितः ।

अज्ञातानि नरेन्द्रस्य कृत्वा कार्याणि भार्गव ॥
अचिरेणापि विद्वेषं मन्त्री समधिगच्छति ।
करोति यस्तु कार्याणि विदितानि महीपतेः ॥
भेदो न तस्य भवति कदाचिदपि भूभुजाम् ।
एवङ्गुणो यस्य भवेत्तु मन्त्री
वाक्ये च तस्याभिरतस्य राज्ञः ।
राज्यं स्थिरं स्याद्विपुला च लक्ष्मी-
र्यशश्च दीप्तिर्भुवनत्रयेऽपि ॥ इति ।

महाभारते,

कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगम् ।
सर्वशास्त्रार्थतत्त्वज्ञं सहिष्णुं देशजं तथा ॥
कृतज्ञं बलवन्तं च क्षान्तं दान्तं जितेन्द्रियम् ।
अलुब्धं लब्धसन्तुष्टं स्वामिमित्रबुभूषकम् ॥
सचिवं देशकालज्ञं सत्त्वसङ्ग्रहणे रतम् ।
सत्त्वं द्रव्यम् ।
सततं युक्तमनसं हितैषिणमतन्द्रितम् ॥
युक्ताचारं स्वविषये सन्धिविग्रहकोविदम् ।
राज्ञस्त्रिवर्गवेत्तारं पौरजानपदप्रियम् ॥
त्रिवर्गश्चापि यः प्रोक्तस्तमिहैकमनाः शृणु ।
क्षयः स्थानं च वृद्धिश्च त्रिवर्गः परमस्तथा ॥
धर्मश्चार्थश्च कामश्च सेवितव्योऽथ कामतः ।
इङ्गिताकारतत्त्वज्ञं यात्रायानविशारदम् ॥
हस्त्यश्वशिक्षातत्त्वज्ञमहङ्कारविवर्जितम् ।
प्रगल्भं दक्षिणं कान्तं बलिनं युक्तकारिणम् ॥
चौक्षं चौक्षसमाकीर्णं सुवेषं सुखदर्शनम् ।

चौक्षं तीक्ष्णम् ।

नायकं नीतिकुशलं गुणचेष्टासमन्वितम् ॥

अस्तब्धं प्रसृतं श्लक्ष्णमृदुवादिनमेव च ।

धीरं श्लक्ष्णं महर्धिं च देशकालोपपादकम् ॥

श्लक्ष्णं स्निग्धम् ।

सचिवं यः प्रकुरुते न चैनमवमन्यते ।

तस्य विस्तीर्यते राष्ट्रं ज्योत्स्ना गृहपतेरिव ॥ इति ।

इति मन्त्रिलक्षणम् ।

अथ पुरोहितलक्षणम् ।

अत्र—

योगक्षेमो हि राष्ट्रस्य राजन्यायत्त उच्यते ।

योगक्षेमो हि राज्ञोऽपि समायत्तः पुरोहिते ॥

यत्रादृष्टं भयं ब्रह्म प्रजानां शमयत्युत ।

दृष्टं च राजा बाहुभ्यां तद्राष्ट्रं सुखमेधते ॥

इत्यादिमहाभारतवचनैः सर्वं राज्यं पुरोहितायत्तमवगम्यते । तत्र राष्ट्रसुखार्थम्—

द्विवेदं ब्राह्मणं राजा पुरोहितमथर्वणम् ।

पञ्चकल्पविधानज्ञं वरयेत्तु सुदर्शनम् ॥

इतिवचनेन पुरोहितं वृणुयादित्युक्तम् । तत्र स च पुरोहितः किंलक्षणोऽपेक्षित इति तल्लक्षणमुच्यते ।

याज्ञवल्क्यः,

पुरोहितं च कुर्वीत दैवज्ञमुदितोदितम् ।

दण्डनीत्यां च कुशलमथर्वाङ्गिरसे तथा ॥ इति ।

पुरोहितम् सर्वेषु दृष्टादृष्टार्थेषु कर्मसु पुरतोहितं दानमानसत्कारैरात्मसम्बद्धं कुर्यात् । कथम्भूतम् । दैवज्ञम् ग्रहोत्पाततच्छमनादे-

र्वेदितारम्। उदितोदितम् विद्यानुष्ठानादिभिरुदितैः शास्त्रोक्तैरुदितं समृद्धम्। दण्डनीत्यामर्थशास्त्रे कुशलम् । अथर्वाङ्गिरसे शान्त्यादिकर्मणि च कुशलम् ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

अव्यङ्गं लक्षणोपेतमनुकूलं प्रियंवदम् ।

अथर्ववेदविद्वांसं यजुर्वेदविशारदम् ॥

द्विवेदं ब्राह्मणं राजा पुरोहितमथर्वणम् ।

अथर्ववेदविद्वांसमित्याद्युक्तानेकगुणयुक्तः पुरोहितो यदा न प्राप्यते तदा अन्यगुणहीनः केवलमभिचाराद्युपयुक्ताथर्ववेदविदपि पुरोहितः कर्त्तव्य इत्येतदर्थमथर्वणमिति पुनरुपादानम् ।

पञ्चकल्पविधानज्ञं वरयेत्तु सुदर्शनम् ।

नक्षत्रकल्पो वैतानस्तृतीयः संहिताविधिः ।

चतुर्थोऽङ्गिरसां कल्पः सोऽतिकल्पस्तु पञ्चमः ॥

पञ्चकल्पविधानज्ञमाचार्यं प्राप्य भूपतिः ।

सर्वोत्पातप्रशान्तात्मा भुनक्ति वसुधां चिरम् ॥

स च राज्ञस्तथा कुर्यान्नित्यं कर्म सदैव तु ।

नैमित्तिकं तथा काम्यं दैवज्ञवचने रतः ॥

न त्याज्यस्तु भवेद्राजा दैवज्ञेन पुरोधसा ।

पतितस्तु भवेत्त्याज्यो नात्र कार्या विचारणा ॥

तथैवापतितौ राम न त्याज्यौ तौ महीभुजा ।

तयोस्त्यागे नरेन्द्रस्य राज्यभ्रंशं विनिर्दिशेत् ॥

दुर्गतिं परलोके च बहुकालमसंशयम् ।

अपतितौ न त्याज्याविति वदता पतितौ दैवज्ञपुरोहितौ त्याज्यावित्यभ्यनुज्ञातं भवति ।

सांवत्सरविरुद्धस्तु त्याज्यो राज्ञा पुरोहितः ।
पुरोहितस्तथा राज्ञां यथा माता यथा पिता ॥
अदृष्टमस्य व्यसनं हन्यात् दैवोपघातजम् ।
ब्राह्मणे निष्कृतिस्तस्य कुतः शक्या महीभुजा ॥
यौ तौ च राज्ञो विद्वांसौ सांवत्सरपुरोहितौ ।
वृत्युच्छेदे तयो राज्ञः कुलं त्रिपुरुषं व्रजेत् ॥
नरकं वर्जयेत्तस्माद्वृत्तिच्छेदं तयोः सदा ।
स्थावरेण विभागश्च तयोः कार्यो विशेषतः ॥
स्वामी राजा यथा राम तथा तौ नात्र संशयः ।
एकस्मिंस्तु मृते राज्यं तयोरेव यतः कथम् ॥
स्थावरेणार्चयेद्राजा वर्त्तमाने विशेषतः ।
अनुरूपेण धर्मज्ञौ सांवत्सरपुरोहितौ ॥

भाव्यं सदा भार्गववंशचन्द्र पुरोहितेऽनन्यसमेन राज्ञा ।
राज्ञो यथा सर्वजनेन भाव्यं विद्वान् प्रभुः स्यान्नृपतेः पुरोधाः॥ इति।

इति पुरोहितलक्षणम् ।

अथ ज्योतिर्विल्लक्षणम् ।

अत्र—

सांवत्सरं नृपो गत्वा वरयेत्प्रयतः शुचिः ।

इतिविष्णुधर्मोत्तरवचनेन राजा सांवत्सरं वृणुयात् । स च वृतः—

ततोऽभिषेकसम्भारांस्तस्य कुर्यात्स दैववित् ।

इतिवचनेन राज्ञोऽभिषेकसामग्रीं सम्पादयेदित्युक्तम् । तत्र राजा किंलक्षणं सांवत्सरं वृणुयादिति तल्लक्षणमुच्यते ।

विष्णुधर्म्मोत्तरे,

पुष्कर उवाच ।

सर्वलक्षणलक्षण्यं विनीतं प्रियदर्शनम् ।

सुरूपं वेषसम्पन्नं नित्यमूर्जितदर्शनम् ॥
अदीनवादिनं धीरं धर्मनिष्ठं जितेन्द्रियम् ।
अव्यङ्गं नाधिकाङ्गं च वेदवेदाङ्गपारगम् ॥
त्रिस्कन्धज्ञानकुशलं द्वादशाश्रमपारगम् ।
चतुःषष्ट्यङ्गतत्त्वज्ञमूहापोहविशारदम् ॥

त्रिस्कन्धाः होरागणितसंहिताः । आश्रमाः ग्रहसंस्थानानि, द्वादश मेषादिराशयः, तत्पारगम् शत्रुमित्रोच्चनीचादिविवेककुशलम् । चतुःषष्ट्यङ्गानि च यथा वेदस्य षडङ्गानि एवं ज्योतिःशास्त्रस्य । तेषां तत्त्वज्ञम् अर्थतत्त्वज्ञातारम् । तानि च अङ्गानि गर्गेणोक्तानि—

यथा,

यथैव वेदस्याङ्गानि षडुक्तानि मनीषिभिः ।
चतुःषष्टिस्तथाङ्गानि ज्योतिषस्य विदुर्बुधाः ॥
ज्योतिषामयनाङ्गानि चतुःषष्टिस्ततः पठेत् । इति ।

तत्र चतुर्विंशत्यङ्गानि चत्वारिंशदुपाङ्गानि । अङ्गान्यनुक्रमेणाऽऽह—

स एव,

येषामग्रे कर्मगुणश्चन्द्रमार्गस्त्वनन्तरम् ।
नक्षत्रकेन्द्रभं चैव द्विवर्गः प्रथमः स्मृतः ॥
राहौ बृहस्पतौ शुक्रे धूमकेतौ शनैश्चरे ।
अङ्गारके बुधेऽर्के च वारानष्टौ ततः पठेत् ॥
चक्रेष्वन्तरचक्रं च मृगचक्रं तथैव च ।
श्वचक्रं वातचक्रं च चक्राङ्गेषु चतुष्टयम् ॥
वास्तुविद्याऽङ्गविद्या च वायसानां तथैव च ।
ज्ञेयास्तिस्रस्तु विद्यैता वृद्धगर्गमताः शुभाः ॥

स्वातीयोगमथाऽऽषाढारोहिणीयोगमेव च ।
कृत्स्नानेतान् विजानीयाद्योगांश्चैव विशेषतः ॥
अगस्तिचारो जनपदव्यूहः सलिलं ततः ।
रहस्यं चेत्यथाङ्गानि चतुर्विंशतिदर्शिताः ॥
कर्मगुणः तिथिनक्षत्रकरणमुहूर्त्तानाम् । तदुक्तम्—
गर्गेण,
अथातस्तिथिनक्षत्रमुहूर्त्तकरणात्मकम् ।
चतुर्व्यूहं कर्मगुणं गर्गेणोक्तं यथाविधि ॥
तिथिनक्षत्रकरणमुहूर्त्तानां च सम्पदः ।
तस्माच्चतुर्णामेतेषां सम्पदा कर्म कारयेत् ॥ इति ।
चन्द्रमार्गः—
वेदविद्यातपोवृद्धं सर्वशास्त्रविशारदम् ।
क्रोष्टुकिः प्रयतो गर्गमपृच्छत्सोमसम्भवः ॥
कुतः समुत्थितः सोमः केन सृष्टः किमात्मकः ।

इत्यादिगर्गोक्तः । नक्षत्रकेन्द्रभम् कति नक्षत्राणि ध्रुवाणि कति मृदूनीत्यादि । चक्राणि शुभशकुनाः । अङ्गविद्या पुंसंज्ञकाद्यङ्गविशेषस्य दर्शनेन भाविप्रश्नफलविशेषकथनम् । वायसविद्या काकशकुनाः । आषाढा पूर्वाषाढा । योगः स्वातीपूर्वाषाढारोहिणीनक्षत्रचन्द्रयोगो वृष्टिसूचकः । जनपदव्यूहः—

दिग्देशजात्युपसर्गा येन जायन्त्यनागताः ।
तन्मे जनपदव्यूहं नैष्ठिकं गदतस्तथा ॥

इति गर्गोक्तः । सलिलं सलिलज्ञानम् । उपाङ्गान्यप्याह—
स एव,
अत ऊर्ध्वं प्रवक्ष्यामि उपाङ्गानीह नामतः ।
आनुपूर्व्याऽभिधानेन चत्वारिंशतमेकतः ॥

ग्रहकोशो ग्रहयुद्धं ग्रहशृङ्गाटकं ततः ।
कृत्स्नं ग्रहेश्वराणां च ग्रहपाकास्तथैव च ॥
नृपयात्राऽग्निवर्णाश्च सेनाव्यूहस्तथैव च ।
मयूरचित्रोपनिषदुपहाराश्च शान्तयः ॥
औत्पातिकतुलाकोशौ भवस्कन्दोपकारकम् ।
सर्वभूतरुतं चैव तथा पुष्पलतां विदुः ॥
उपानहोस्तथोच्छेदो वस्त्रच्छेदस्तथैव च ।
कृत्स्नं भुवनकोशं च गर्भाधानोदकार्गलौ ॥
निर्घाता भूमिकम्पाश्च परिवेषास्तथैव च ।
ऋतुस्वभावाः सन्ध्यैवं तथोल्काश्चोपधारयेत् ॥

ग्रहकोशो ग्रहाणामुत्पत्तिवर्णादिना शुभाशुभफलकथनम् । ग्रहयुद्धं भौमादिपञ्चकग्रहसंयोगः । ग्रहशृङ्गाटकं ग्रहाणामुत्पत्तिवर्णसंस्थानरश्मिभिः शुभाशुभफलनिर्देशः । ग्रहेश्वराणां कृत्स्नं ग्रहजन्मनिर्वचनादि । ग्रहपाकाः ग्रहाणां समयविशेषफलदातृत्वम् । नृपयात्रा राज्ञां यात्राकालः । अग्निवर्णाः होमकाले अग्नेः शुभाशुभसूचकं लक्षणम् । सेनाव्यूहः कालविशेषे सेनारचनाविशेषेण राज्ञो जयाजयकथनम् । मयूरचित्रं ग्रहोत्पातः । उपनिषत् भुवनपरिमाणग्रहनक्षत्रगत्यादि । उपहारो बलिः । शान्तयो जनमार्याद्युत्पातशान्तयः । उत्पातो नदीवृक्षवाप्यादिवैकृतम् । तुलाकोशः अन्नादितौल्येन तत्समघर्घसमर्घकथनम् । भवस्कन्दोपकारकः भूतभविष्यादियुगधर्मादिकथनरूपः शिवगुहसंवादः । सर्वभूतरुतं सर्वप्राणिनां शब्दज्ञानं शकुनोपयुक्तम् । पुष्पलता वृक्षादिपुष्पोद्गमेन धान्यवृद्ध्यादिज्ञानम् । उपानहोरुच्छेदः स्थलविशेषच्छेदेन फलविशेषकथनम् । एवं वस्त्रच्छेदोऽपि । भुवनकोश इन्द्रध्वजमेषगजपुंस्त्रीलक्षणादिः । गर्भाधानं

मेघगर्भधारणेन वृष्टिविचारः । उदकार्गलः जलवृद्धिक्षयप्रयुक्तसुभिक्षदुर्भिक्षविचारः । ऋतुस्वभावाः तत्तदृत्वसाधारणलक्षणानि । सन्ध्या उदयास्तकालरागेण फलविशेषकथनम् । उल्का नभसो ज्वालापातः । अत्र ग्रहपाकाः अष्टौ ऋतुस्वभावाः षट् एवं चत्वारिंशदुपाङ्गसङ्ख्यापूरणं भवति । एवं चाङ्गोपाङ्गमेलनेन चतुःषष्टिर्भवति ज्यौतिषस्याङ्गानि ।

भूतभव्यभविष्यङ्गं गणितङ्गं विशेषतः ।
विचन्द्रा शर्वरी यद्वन्मुकुटं च च्युतोपलम् ॥
गणितेन तथा हीनं ज्यौतिषं नृपसत्तम ।
आस्तिकं श्रद्दधानं च अनुकूलं महीपते ॥
सांवत्सरं नृपो गत्वा वरयेत्प्रयतः शुचिः ।
येनाभिषिक्तो नृपतिर्विनष्टस्तु नराधिपः ॥
सांवत्सरं न तं विद्वान् वरयेन्नृपसत्तम ।
न हीनाङ्गं न वाचालं न च निष्प्रतिभं नृप ॥
कुवेषं मलिनं चण्डं नास्तिकं पापनिश्चयम् ।
भिन्नवृत्तिं न वरयेद्वरयेत्सद्गुणं सदा ॥
वरयित्वा तु वक्तव्यः स्वयमेव महीभुजा ।
यथैवाग्निमुखा देवास्तथा राजमुखाः प्रजाः ॥
यथैवाग्नेर्मुखं मन्त्रा राज्ञां सांवत्सरस्तथा ।
त्वं मे माता पिता चैव देशिकश्च गुरुस्तथा ॥
दैवं पुंरुषकारश्च ज्ञातव्यः सततं त्वया ।
देशिकः आज्ञाप्रदः ।
समधर्ममधर्मं च राज्यं साधारणं हि नौ ॥
शमनीयोऽशुभो दैवस्त्वयैव मम शान्तिभिः ।
पौरुषेण पदं कार्यं समरे च सदा मया ॥

अशुभो दैवः अशुभादृष्टम् ।
तेनोद्दिष्टौ च वरयेद्राजा मन्त्रिपुरोहितौ ।
तेनोद्दिष्टां तु वरयेन्महिषीं नृपसत्तम ॥
ततोऽभिषेकसम्भारांस्तस्य कुर्यात्स दैववित् ।
कुञ्जरं तुरगं कुर्याच्तस्य राज्ञः परीक्षितम् ॥
भद्रासनं च छत्रं च बालव्यञ्जनमेव च ।
खड्गं चक्रं तथा चापं रत्नानि विविधानि च ॥
राज्ञो मृतस्य ये त्वासन् सर्व एते नराधिप ।
न ते कार्या नरेन्द्रस्य तेन दैवविदा तदा ॥
कामं सांवत्सरः कार्यो ह्यलाभेऽन्यस्य भूभुजा ।
गुणाधिकस्य नो कार्या येऽन्यत्राभिहिता मया ॥

मृतराज्ञो य एते प्राचीनाः पदार्थाः भद्रासनच्छत्रचामरखड्गप्रभृतय आसन् ते नूतनराज्ञे न देयाः । किन्तु नूतना एव कर्त्तव्याः । दैवज्ञश्च पूर्वज्योतिर्विदपेक्षया गुणाधिकश्चेत्प्राप्यते तदा प्राचीनं विहाय नूतनः कर्त्तव्यः । नूतनदैवज्ञस्य गुणाधिक्याभावे पुरातन एव दैवज्ञः स्थापनीयः । भद्रासनच्छत्रचामरखड्गादीनां तु पूर्वेषां गुणाधिक्ये नूतनानां निर्गुणत्वेऽपि सगुणान् पुरातनान् विहाय नूतना एव कर्त्तव्या इति ।

न तत्र नागाः सुभृता न योधा राज्ञो न माता न पिता न बन्धुः ।
यत्रास्य कार्यो भवतीह विद्वान् सांवत्सरो धर्मविदप्रमत्तः ॥ इति ।

इति ज्योतिर्विल्लक्षणम् ।

अथ वैद्यलक्षणम् ।

अत्र—

प्राणाचार्यः स विज्ञेयो वचनं तस्य भूभुजा ।
राम राज्ञा सदा कार्यं यथा कार्यं पृथग्जनैः ॥

इति विष्णुधर्मोत्तरवचनेन राज्ञा वैद्योक्तं सर्वं कर्त्तव्यम् ।

सर्ववैद्यगुणैर्युक्तं नित्यं सन्निहितागदम् ।
महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम् ॥

इति क्षेमकुतूहलवचनेन राजा स्वशरीररक्षार्थं वैद्यं महानसे प्रयुञ्जीतेत्युक्तम् । तत्र किंलक्षणो भिषगपेक्षित इति तल्लक्षणमभिधीयते ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

परम्परागतो यः स्यादष्टाङ्गेन चिकित्सते ।
अनाहार्यः स वैद्यः स्याद्धर्मात्मा च कुलोद्गतः ॥

कुलोद्गतः कुलीनः । अङ्गाष्टकं च हारीते उक्तम्–

शल्यं शालाक्यमगदं कुमारभरणं तथा ।
कायभूतक्रिया वाजीकरणं च रसायनम् ॥ इति ।
नाराचकाष्ठवल्लीभिः शक्तिकुन्तैश्च तोमरैः ।
खड्गैर्विभिन्नगात्रस्य तत्र स्याद्यदि शल्यकम् ॥
तस्य प्रतीकारकर्म यत्तत् शल्यचिकित्सितम् । इति ।

सुश्रुते,

न केवलं काष्ठतृणादिशल्यं चिरप्रवृद्धं मलदोषजं वा ।
यत्किञ्चिदाबाधकरं शरीरे तत्सर्वमेव प्रवदन्ति शल्यम् ॥
ऊर्ध्वजत्रुषु ये रोगाः श्रवणादिषु संस्थिताः ।
तेषां यत्क्रियते कर्म तत् शालाक्यं प्रकीर्त्तितम् ॥
स्थावराणां जङ्गमानां तथा संयोगजन्मनाम् ।
विषाणां यः प्रतीकारो विषतन्त्रं तदुच्यते ॥

तदेवागदम् ।

मनोपक्रमविज्ञानं कुमारभरणं तथा ।

धात्रीणां लक्षणं क्षीरदोषसंशोधनौषधम् ॥
योगिनीनां ग्रहाणां च लक्षणं तन्निवारणम्।
सूतिकारोगशमनमिति बालचिकित्सितम् ॥ इति।

रोगदर्पणे,

काये स्यात्कायदहनं तद्दोषविनिवारणम्।
प्रोक्ता कायचिकित्सेयं तत्त्वज्ञैर्भिषजां वरैः ॥
देवासुरैश्च गन्धर्वपितृभूतादिभिर्नृणाम्।
ग्रस्तानां शान्तिका भूतचिकित्सा सा निगद्यते ॥
वाजं शुक्रं समाख्यातं तत्पुष्टीकरणं नृणाम्।
वाजीकरणमित्याहुर्मुनयस्तत्त्वदर्शिनः ॥
रसरक्तादिधातूनां यदाऽऽप्यायनकारकम्।
रसायनं तदुद्दिष्टं भिषग्भिः शास्त्रपारगैः ॥ इति।

वाग्भटेऽप्यङ्गाष्टकमुक्तम्—

कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान्।
अष्टावङ्गानि तस्याहुः चिकित्सा येषु संश्रिता ॥ इति।
प्राणाचार्यः स विज्ञेयो वचनं तस्य भूभुजा।
राम राज्ञा सदा कार्यं यथाकार्यं पृथग्जनैः ॥ इति।

चरके,

हेतौ लिङ्गे प्रशमने रोगाणामपुनर्भवे।
ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक् मतः ॥ इति।

हेतुः रोगनिदानम्। लिङ्गं रोगज्ञापकं चिन्हम्। रोगपदं देहलीप्रदीपन्यायेनोभयत्रान्वेति।

क्षेमकुतूहले,

राजा राजगृहासन्ने प्राणाचार्यं निवेशयेत्।

सर्वदा स भवत्येव सर्वत्रैवाप्रमादवान् ॥
तस्माद्वैद्येन सततं विषाद्रक्ष्यो नराधिपः ।
न विश्वसेदतो राजा कदाचिदपि कस्य चित् ॥
आयुर्वेदकृताभ्यासः सर्वत्र प्रियदर्शनः ।
उक्तिहेतुसमायुक्त एष वैद्योऽभिधीयते ॥
क्रोधपारुष्यमात्सर्यमायादम्भविवर्जितम् ।
जितेन्द्रियं क्षमावन्तं शीलशौचदयान्वितम् ॥
कुलीनं धार्म्मिकं स्निग्धं सुभृतं सन्मते स्थितम् ।
अलुब्धमशठं भक्तं कृतज्ञं प्रियदर्शनम् ॥
मेधाविनमसम्भ्रान्तमनुरक्तं हितैषिणम् ।
पटुं प्रगल्भं निपुणं दक्षमालस्यवर्जितम् ॥
सर्ववैद्यगुणैर्युक्तं नित्यं सन्निहितागदम् ।
महानसे प्रयुञ्जीत वैद्यं तद्विद्यपूजितम् ॥
वैद्यः पुरोहितो मन्त्री दैवज्ञश्च चतुर्थकः ।
प्रातरेव हि द्रष्टव्या नित्यं स्वश्रेय इच्छता ॥
दैवज्ञो मन्त्रविद्वैद्यश्चतुर्थश्च पुरोहितः ।
एते राज्ञा सदा पोष्याः कृच्छ्रेणापि स्त्रियो यथा ॥
वैद्यविद्वज्जनामात्या यस्य राज्ञः प्रियंवदाः ।
आरोग्यधर्मकोशाश्च प्रवर्द्धन्ते हि सर्वदा ॥
गतश्रीर्गणकान् द्वेष्टि गतायुश्च चिकित्सकान् ।
गतश्रीश्च गतायुश्च ब्राह्मणान् द्वेष्टि भारत ॥
क्वचिद्वित्तं क्वचिन्मित्रं क्वचिद्धर्मः क्वचिद्यशः ।
क्वचिदभ्यासयोगश्च नाफलं हि चिकित्सितम् ॥
चिकित्सितशरीरं हि न निष्क्रीणाति यो नरः ।
पुरुषेणासहायेन किमु राज्यं महत्पदम् ॥

तेन यत्क्रियते पुण्यं तत्फलं भिषगश्नुते ॥
सञ्चयं च प्रकोपं च प्रसरं स्थानमेव च ।
दोषाणां च हि यो वेद स भवेद्भिषगुत्तमः ॥
दोषाणामिति प्रत्येकं सम्बध्यते ।
व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः ।
एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥
कुचैलः कर्कशो दीनः स्वग्रामी स्वयमागतः ।
पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि ॥
कुचैलः कुत्सितवस्त्रः ।
सुश्रुतं न श्रुतं येन हारीतं येन हारितम् ।
नालोकि चरकं येन स वैद्यो वैद्यनिन्दितः ॥
सुश्रुतं न श्रुतं येन किमन्यैर्बहुभिः श्रुतैः ॥
श्रुतचरितसमृद्धे कर्मदक्षे दयालौ
भिषजि निरनुबन्धे देहभारं निवेश्य ।
भवति विपुलतेजाः स्वच्छकीर्तिप्रभावः
स्वकुलफलविभोगी भूमिपालश्चिरायुः ॥ इति ।

इति वैद्यलक्षणम् ।

अत्र—
अपि यत्सुकरं कर्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किमु राज्यं महोदयम् ॥
इति मनुवचनेन,

अभिषेकार्द्रशिरसा राज्ञा राजीवलोचन ।
सहायवरणं कार्यं तत्तद्राज्यं प्रतिष्ठितम् ॥
यदप्यल्पतरं कर्म तदप्येकेन दुष्करम् ।

तस्मात्सहायान् वरयेत्कुलीनान् नृपतिः स्वयम् ।
सुभृताश्च तथा पुष्टाः सततं प्रतिमानिताः ॥
राज्ञा सहायाः कर्त्तव्याः पृथिवीं जेतुमिच्छता ।

इत्यादिविष्णुधर्मोत्तरवचनैश्च राज्ञा राज्यसिद्ध्यर्थं पृथिवीजयार्थं च सहायवरणं कार्यमित्युक्तम् । तत्र किंलक्षणाः सहायाः कर्त्तव्या इति तल्लक्षणमुच्यते ।

विष्णुधर्मोत्तरे,

शूरानुत्तमजातीयान् बलयुक्तांश्च भावितान् ।
रूपसत्त्वगुणौदार्यसंयुतान् क्षमया युतान् ॥
क्लेशक्षमान्महोत्साहान् धर्मज्ञांश्च प्रियंवदान् ।
हितोपदेशकान् प्राज्ञान् स्वामिभक्तान् यशोऽर्थिनः ॥
एवंविधान् सहायांस्तु शुभकर्मणि योजयेत् ।
गुणहीनानपि तथा विज्ञाय नृपतिः स्वयम् ॥
कर्मस्वेवं नियुञ्जीत यथायोग्येषु भार्गव । इति ।

महाभारते,

अमात्यांश्चातिशूरांश्च ब्राह्मणांश्च बहुश्रुतान् ।
सुसन्तुष्टांश्च कौन्तेय महोत्साहांश्च कर्मसु ॥
एतान् सहायान् लिप्सेथाः सर्वापत्सु च भारत । इति ।

इति सहायलक्षणम् ।

इह—

यथार्हं चाथ सुभृतान् राजा कर्मसु योजयेत् ।
धर्मिष्ठान् धर्मकार्येषु शूरान् सङ्ग्रामकर्मसु ॥
निपुणानर्थकृत्येषु सर्वत्र च तथा शुचीन् ।
स्त्रीषु षण्ढान्नियुञ्जीत तीक्ष्णान् दारुणकर्मसु ॥
धर्मे चार्थे च कामे च भये च भृगुनन्दन ।

राजा यथार्हं कुर्याच्च उपधाभिः परीक्षितान् ॥
तत्पादान्वेषणे यत्तानध्यक्षांस्तत्र कारयेत्।
एवमादीनि कर्माणि पापैः कार्याणि भार्गव ॥
सर्वथा नेष्यते राज्ञस्तीक्ष्णोपकरणक्षयः।
पापसाध्यानि कर्माणि यानि राज्ञां भृगूत्तम ॥
सन्तस्तानि न कुर्वन्ति तस्माच्चान् बिभृयान्नृपः।
नेष्यते पृथिवीशानां तीक्ष्णोपकरणक्षयः ॥
यस्मिन् कर्मणि यस्य स्याद्विशेषेण च कौशलम्।
तस्मिन् कर्मणि तं राजा परीक्ष्य विनियोजयेत् ॥
पितृपैतामहान् भृत्यान् सर्वकर्मसु योजयेत्।
विना दायादकृत्येषु तत्र ते हि समा मताः ॥
राजा दायादकृत्येषु परीक्ष्य स्वकृतान्नरान्।
नियुञ्जीत महाभाग तस्य ते हितकारिणः ॥

इति विष्णुधर्मोत्तरवचनैः स्वकार्येषु तत्र तत्राभिज्ञान् पुरुषान् राजा नियुञ्जीतेत्युक्तम्। तत्र कार्यविशेषे योग्यपुरुषाणां विशेषलक्षणान्युच्यन्ते। तत्र मित्रलक्षणमुक्तम्—

महाभारते,

यस्तु वृद्ध्या न तृप्येत क्षये दीनतरो भवेत्।
एतदुत्तममित्रस्य निमित्तमिति चक्षते ॥
निमित्तं लक्षणम्।
यं मन्येत ममाभावादस्याभावो भवेदिति।
तस्मिन् कुर्वीत विश्वासं यथा पितरि वै तथा ॥
तं शक्त्या वर्धमानश्च सर्वतः परिबृंहयेत्।
नित्यं क्षताद्वारयति यो धर्म्येष्वपि कर्मसु ॥
क्षताद्रीतं विजानीयादुत्तमं मित्रलक्षणम् ॥

व्यसनाभित्यभीतो यः समृद्ध्या यो न तृप्यते ।
यत्स्यादेवंविधं मित्रं तदात्मसममुच्यते ॥ इति ।

इति मित्रलक्षणम् ।

अथ शत्रुलक्षणम् ।

मनुः,
प्राज्ञं कुलीनं शूरं च दक्षं दातारमेवच ।
कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः ॥ इति ।
महाभारते,
यं मन्येत ममाभावादिममर्थागमः स्पृशेत् ।
नित्यं तस्माच्छङ्कितव्यममित्रं तं विदुर्बुधाः ॥
यस्य क्षेत्रादप्युदकं क्षेत्रमन्यस्य गच्छति ।
तत्रानियच्छतस्तस्य भिद्येरन् सर्वसेतवः ॥
तथैवात्युदकाधीनस्तस्य भेदनमिच्छति ।
यमेवंलक्षणं विद्यात्तममित्रं विनिर्दिशेत् ॥
ये यस्य क्षतिमिच्छन्ति ते तस्य रिपवः स्मृताः । इति ।

इति शत्रुलक्षणम् ।

अथ सभासल्लक्षणम् ।

महाभारते,
ह्रीनिषेवाः सदा सन्तः सत्यार्जवगुणान्विताः ।
शक्ताः कथयितुं सम्यक् ते तव स्युः सभासदः ॥ इति ।

इति सभासल्लक्षणम् ।

अथ परिच्छदलक्षणम् ।

महाभारते,
कुलीना देशजाः प्राज्ञा रूपवन्तो गुणान्विताः ।

प्रगल्भाश्चानुरक्ताश्च ते तव स्युः परिच्छदाः ॥ इति ।

इति परिच्छदलक्षणम् ।

अथ पार्श्ववर्त्तिलक्षणम् ।

महाभारते,

न बालिशा न च क्षुद्रा नाप्राज्ञा नाजितेन्द्रियाः ।
नाकुलीना नराः पार्श्वे स्थाप्या राज्ञा गुणैषिणा ॥
साधवः कुशलाः शूरा ज्ञानवन्तोऽनसूयकाः ।
अक्षुद्राः शुचयो दक्षाः स्युर्नराः पारिपार्श्वकाः ॥ इति ।

इति पार्श्ववर्त्तिलक्षणम् ।

अथ रक्षकलक्षणम् ।

विष्णुधर्मोत्तरे,

मांशवो व्यायताः शूरा दृढभक्ता निराकुलाः ।
राज्ञाऽपि रक्षिणः कार्याः सदा क्लेशसहा हिताः ॥ इति ।

इति रक्षकलक्षणम् ।

अथ ताम्बूलधारिलक्षणम् ।

विष्णुधर्मोत्तरे,

अहार्यश्चानृशंसश्च दृढभक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥ इति ।

इति ताम्बूलधारिलक्षणम् ।

अथ ताम्बूललक्षणम् ।

यन्मुखं वेदविभ्रष्टं ताम्बूलरसवर्जितम् ।
सुभाषितपरिभ्रष्टं तन्मुखं बिलमुच्यते ॥
सपूगञ्च सुपर्णञ्च सुधया च समन्वितम् ।
दत्त्वा च द्विजराजेभ्यस्ताम्बूलं भक्षयेत्ततः ॥
सुताम्बूलं च यो दद्याद् ब्राह्मणाय विशेषतः ।

कन्दर्पसदृशो रूपे निरोगी जायते नरः ॥
क्रमुकात्तृप्यति ब्रह्मा विष्णुस्तृप्यति पर्णतः ।
चूर्णादीशस्तु तृप्येत ताम्बूलदानमक्षयम् ॥
ताम्बूलं श्रीप्रदं भद्रं ब्रह्मविष्णुशिवात्मकम् ।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः ॥
एकपूगं सदा श्रेयो द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च त्वधिकं नैव दुष्यति ॥
द्वात्रिंशत्पर्णकं चैव दद्यात्सर्वमहीभुजे ।
चतुर्विंशतिपर्णं च सामन्तानामनुस्मृतम् ॥
दशाष्टपर्णकं देयं जामातृणां विशेषतः ।
द्विषट्पर्णं च विदुषे वधूनां दशपर्णकम् ।
त्रिपर्णं तु न दातव्यं रिपूणां च विशेषतः ॥
एकद्वित्रिचतुष्पञ्चषड्भिः पूगैः फलं क्रमात् ।
लाभालाभौ सुखं दुःखमायुर्मरणमेव च ॥
पर्णमूले भवेत् व्याधिः पर्णाग्रे पापसम्भवः ।
चूर्णपर्णं हरत्यायुः शिरा बुद्धिविनाशिनी ॥
ऊर्ध्वाग्रं विकटं धार्यं पर्णमेकं तथैव च ।
अङ्गुष्ठचूर्णलेपं च चर्वितं धनदायकम् ॥
पर्णाग्रं पर्णमूलं च चूर्णपर्णं द्विपर्णकम् । (?)
अनिधाय मुखे पर्णं पूगं खादति यो नरः ॥
सप्तजन्म दरिद्री स्यादन्ते विष्णुं न विन्दति ।
तर्जन्या पर्णमादाय ताम्बूलं न तु खादयेत् ॥
यदि वा खादयेन्मूढः शोकं च नरकं व्रजेत् ।
कनिष्ठानामिकामध्यातर्जन्यङ्गुष्ठयोगतः ।
शोको हानिस्तथा मृत्युरनैश्वर्यायुषी तथा ॥

अङ्गुष्ठेन तु लेपेन ताम्बूलं शर्म शोभनम् ।
दिवा खादिरसारेण सकलर्द्धिप्रदायकम् ॥
जयस्त्रीवस्त्रलाभादि भविष्यति न संशयः ।
रात्रौ खादिरसारेण शक्रस्यापि श्रियं हरेत् ॥
वामहस्ते न खादेत स्त्रीहस्तेन तथैव च ।
यदि वा खादयेन्मूढस्तस्य लक्ष्मीर्विनश्यति ॥

इति ताम्बूललक्षणम् ।

अथ भाण्डागारिकलक्षणम् ।

विष्णुधर्मोत्तरे,

लोहवस्त्राजिनादीनां रत्नानां च विभागवित् ।
विज्ञाता फल्गुसाराणामनाहार्यः शुचिः सदा ॥
फल्गुसाराणां विज्ञाता सारासारविवेकवान् ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः ॥
आयद्वारेषु सर्वेषु धनाध्यक्षसमा नराः ।
व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवीक्षिता ॥
आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ।
कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादर्थरक्षकः ॥ इति ।

मनुः,

आयव्ययज्ञान् कुर्वीत धर्मशास्त्रार्थकोविदान् ।
कुलीनान् वित्तसम्पन्नान् समर्थान् कोशगुप्तये ॥ इति ।

इति भाण्डागारिकलक्षणम् ।

अथ खड्गधारिलक्षणम् ।

विष्णुधर्मोत्तरे,

सुरूपस्तरुणः प्रांशुर्दृढभक्तिः कुलोचितः ।

शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्त्तितः ॥ इति ।

इति खड्गधारिलक्षणम् ।

अथान्तःपुराध्यक्षलक्षणम् ।

विष्णुधर्मोत्तरे,

वृद्धः कुलोद्गतः षण्ढः पितृपैतामहः शुचिः ।
राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥ इति ।

इत्यन्तःपुराध्यक्षलक्षणम् ।

अथान्तःपुरचरलक्षणम् ।

विष्णुधर्मोत्तरे,

पञ्चाशदधिका नार्यः पुरुषाः सप्ततेः पराः ।
अन्तःपुरचराः कार्या राज्ञा सर्वेषु कर्मसु ॥ इति ।

पञ्चाशद्वर्षाधिका नार्यस्तथा सप्ततिवर्षाधिकाः पुरुषा अन्तःपुरे स्थाप्या इत्यर्थः ।

इत्यन्तःपुरचरलक्षणम् ।

अथ सूदाध्यक्षलक्षणम् ।

विष्णुधर्मोत्तरे,

अनाहार्यः शुचिर्दक्षश्चिकित्सकवचोहरः ।
सूदशास्त्रविधानज्ञः सूदाध्यक्षः प्रशस्यते ॥ इति ।

इति सूदाध्यक्षलक्षणम् ।

अथ सूदलक्षणम् ।

विष्णुधर्मोत्तरे,

सूदशास्त्रविधानज्ञाः पराभेद्याः कुलोद्गताः ।
सर्वे महानसे कार्या नीचकेशनखास्तथा ॥ इति ।

इति सूदलक्षणम् ।

अथ धर्माधिकारिलक्षणम्।

विष्णुधर्मोत्तरे,

समः शत्रौ च मित्रे च धर्मशास्त्रविशारदः।
विप्रमुख्यः कुलीनश्च धर्माधिकरणो भवेत्॥
कार्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः। इति।

इति धर्माधिकारिलक्षणम्।

अथ धर्माधिकरणलक्षणम्।

मदनरत्ने बृहस्पतिः,

दुर्गमध्ये गृहं कुर्याज्जलवृक्षाश्रितं पृथक्।
प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां लक्षयेत्सभाम्॥
माल्यधूपासनोपेतां बीजरत्नसमन्विताम्।
प्रतिमालेख्यदेवैश्च युक्तामग्न्यम्बुना तथा॥ इति।

सैव धर्माधिकरणमित्याह माधवीये कल्पतरौ च—

कात्यायनः,

धर्मशास्त्रानुसारेण मूलशास्त्रविवेचनम्।
यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत्॥ इति।

मूलं व्यवहारः। शास्त्रं तत्प्रतिपादकं स्मृत्यादि।

इति धर्माधिकरणलक्षणम्।

अथ लेखकलक्षणम्।

विष्णुधर्मोत्तरे,

सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः।
लेखकः कथितो राम सर्वाधिकरणेषु वै॥
शीर्षोपेतान् सुसम्पूर्णान् समश्रेणिगतान् समान्।
अक्षरान् विलिखेद्यस्तु स लेखकवरः स्मृतः॥

उपायवाक्ये कुशलः सर्वशास्त्रविशारदः ।
बह्वर्थवक्ता चाल्पेन लेखकः स्याद्भृगूत्तम ॥
वाक्याभिप्रायतत्त्वज्ञो देशकालविभागवित् ।
अनाहार्यः समर्थश्च लेखकः स्याद्भृगुत्तम ॥ इति ।

इति लेखकलक्षणम् ।

अथाह्वानकलक्षणम् ।

विष्णुधर्मोत्तरे,

पुरुषान्तरततत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः ।
धर्माधिकरणे कार्या जनाह्वानकरा नराः ॥ इति ।

इत्याह्वानकलक्षणम् ।

अथ दौवारिकलक्षणम् ।

तत्रैव,

एवंविधास्तथा कार्या राज्ञा दौवारिका जनाः । इति ।
एवमिति पूर्वोक्ताऽऽह्वानकगुणातिदेशः ।

अथ प्रतीहारलक्षणम् ।

विष्णुधर्मोत्तरे,

प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तग्राहश्च सर्वेषां प्रतीहारो विधीयते ॥ इति ।

इति प्रतीहारलक्षणम् ।

अथ शस्त्रशालाध्यक्षलक्षणम् ।

विष्णुधर्मोत्तरे,

स्थाने राजनि तत्त्वज्ञः सततं प्रतिजाग्रतः ।
राज्ञः स्यादायुधागारे दक्षः कर्मसु चोद्यतः ॥ इति ।

इति शस्त्रशालाध्यक्षलक्षणम् ।

अथ शस्त्राध्यक्षलक्षणम् ।

विष्णुधर्मोत्तरे,

यन्त्रमुक्ते पाणिमुक्ते अमुक्ते मुक्तधारिते ।
शस्त्राचार्ये नियुद्धे च कुशलश्च तथेष्यते ॥ इति ।

इति शस्त्राध्यक्षलक्षणम् ।

अथ स्थपतिलक्षणम् ।

विष्णुधर्मोत्तरे,

वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः ।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः ॥ इति ।

इति स्थपतिलक्षणम् ।

अथ सारथिलक्षणम् ।

विष्णुधर्मोत्तरे,

शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
हयायुर्वेदतत्त्वज्ञो भूमिभागविशेषवित् ॥
बलाबलज्ञो रथिनः स्थिरदृष्टिर्विशारदः ।
शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः ॥ इति ।

इति सारथिलक्षणम् ।

अथ दूतलक्षणम् ।

तदाह—

मनुः,

दूतं चैव प्रकुर्वीत सर्वशास्त्रार्थकोविदम् ।
इङ्गिताकारचेष्टाज्ञं शुचिं दक्षं कुलोद्गतम् ॥
अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित् ।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥ इति ।

महाभारते,

कुलीनः शीलसम्पन्नो वाग्मी दक्षः प्रियंवदः ।
यथोक्तवादी द्युतिमान् दूतः स्यात्सप्तभिर्गुणैः ॥ इति ।

विष्णुधर्मोत्तरे,

यथोक्तवादी दूतः स्यादेशभाषाविशारदः ।
शब्दक्लेशसहो वाग्मी देशकालविभागकः ॥
विज्ञाय देशं कालं च हितं यत्स्यान्महीक्षितः ।
वक्तापि तस्य यः काले स दूतो नृपतेर्भवेत् ॥ इति ।

इति दूतलक्षणम् ।

अथ चारलक्षणम् ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

परराजगृहात्प्राप्तान् जनसङ्ग्रहकाम्यया ।
दुष्टान् वाप्यथ वाऽदुष्टान् संश्रयेत प्रयत्नतः ॥
दुष्टान् विज्ञाय विश्वासं न कुर्यात्तत्र भूमिपः ।
वृत्तिं तस्यापि वर्त्तेत जनसङ्ग्रहकाम्यया ॥
राजा देशान्तरप्राप्तं पुरुषं पूजयेद्भृशम् ।
ममायं देशसम्प्राप्तो बहुमानेन चिन्तयेत् ॥
कामं भृत्यार्जनं राजा नैव कुर्याद्भृगूत्तम ।
न त्वेवासंविभक्तं तु भृत्यं कुर्यात्कथञ्चन ॥
शत्रवोऽग्निर्विषं सर्पा निस्त्रिंशमपि चैकतः ।
भृत्या मनुजशार्दूल कुभृत्याश्च तथैकतः ॥
तेषां चारेण विज्ञानं राजा विज्ञाय नित्यशः ।
गुणिनां पूजनं कुर्यान्निर्गुणानां च शासनम् ॥
कथिताः सततं राम राजानश्चारचक्षुषः ।

स्वदेशे परदेशे च ज्ञानशीलान् विचक्षणान् ॥
अनाहार्यान् क्लेशसहान्नियुञ्जीत सदा चरान् ।
जनस्याविदितान् सौम्यांस्तथाऽज्ञातान् परस्परम् ॥
वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।
तथा प्रव्राजिताकारान् चारान् राजा नियोजयेत् ॥
नैकस्य राजा श्रद्दध्याच्चारस्यापि च भाषितम् ।
द्वयोः संवादमाज्ञाय आदध्यान्नृपतिस्ततः ॥
परस्परं सुविदितौ यदि स्यातां न तावुभौ ।
तस्माद्राजा प्रयत्नेन गूढांश्चारान् प्रयोजयेत् ॥
राज्यस्य मूलमेतावद्या राज्ञश्चारदृष्टिता ।
चाराणामपि यत्नेन राज्ञा कार्यं परीक्षणम् ॥
रागापरागौ भृत्यानां जनस्य च गुणागुणान् ।
शुभानामशुभानां च विज्ञानं राम कर्मणाम् ॥
सर्वं राज्ञां चरायत्तं तेषु यत्नः सदा भवेत् ।
कर्मणा केन मे लोके जनः सर्वोऽनुरज्यते ॥
विरज्यते तथा केन विज्ञेयं तन्महीक्षिता ।
अनुरागकरं लोके कर्म कार्यं महीक्षिता ॥
विरागजननं सर्वं वर्जनीयं प्रयत्नतः ।
जनानुरागप्रभवा हि लक्ष्म्यो
राज्ञां यतो भार्गववंशचन्द्र ।
तस्मात्प्रयत्नेन नरेन्द्रमुख्यैः
कार्योऽनुरागो भुवि मानवेषु ॥ इति ।

इति चारलक्षणम् ।

अथ नियोज्यसामान्यलक्षणम् ।

विष्णुधर्मोत्तरे,

कर्माण्यपरिमेयाणि राज्ञां भृगुकुलोद्वह ।
उत्तमाधममध्यानि बुद्ध्वा कार्याणि पार्थिवैः ॥
उत्तमाधममध्यांस्तु पुरुषान् विनियोजयेत् ।
नरकर्मविपर्यासाद्राजा नाशमवाप्नुयात् ॥
नियोज्यं पुरुषं भक्तिं श्रुतं शौर्यं कुलं बलम् ।
ज्ञात्वा वृत्तिर्विधातव्या पुरुषाणां महीक्षिता ॥
पुरुषान्तरविज्ञानतत्त्वमात्रनिबन्धना ।
नरेन्द्रलक्ष्मीर्धर्मज्ञ तत्रायत्तो भवेन्नृप ॥ इति ।

इति नियोज्यसामान्यलक्षणम् ।

अथ राजसेवकलक्षणम् ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।
यथानुवर्त्तितव्यं स्याद्राम राजोपजीविभिः ।
तथा ते कथयिष्यामि निबोध गदतो मम ॥
आज्ञा सर्वात्मना कार्या स्वशक्त्या भृगुसत्तम ।
आक्षिप्य वचनं तस्य न वक्तव्यं तथा वचः ॥
अनुकूलं प्रियं तस्य वक्तव्यं जनसन्निधौ ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥
परार्थमस्य वक्तव्यं स्वस्थे चेतसि भार्गव ।
स्वार्थं सुहृद्भिर्वक्तव्यं न स्वयं तु कथञ्चन ॥
कालातिपातः कार्येषु रक्षितव्यः प्रयत्नतः ।
न च हिंस्यं धनं किञ्चिन्नियुक्तेन च कर्मणि ॥
नोपेक्ष्यं नश्यमानं च तथा राज्ञः प्रियो भवेत् ।
राज्ञश्च न तथा कार्यं विपभाषितचेष्टितम् ॥
राजलीला न कर्त्तव्या तस्य चेष्टां विवर्जयेत् ।

राज्ञः समधिको वेषो न तु कार्यो विजानता ॥
द्यूतादिषु तथैवास्य कौशलं तु प्रदर्शयेत् ।
प्रदर्श्य कौशलं चास्य राजानं न विशेषयेत् ॥
अन्तःपुरधनाध्यक्षवैद्यद्यूतैर्निराकृतैः ।
संसर्गं न व्रजेद्राम विना पार्थिवशासनात् ॥
निःस्नेहतां चावमानं तत्प्रयुक्तं च गोपयेत् ।
यच्च गुह्यं भवेद्राज्ञस्तन्न लोके प्रकाशयेत् ॥
नृपेण श्रावितं यत्स्याद्गुह्याद्गुह्यं भृगूत्तम ।
न तत्संश्रावयेल्लोके तथा राज्ञः प्रियो भवेत् ॥
आज्ञप्यमाने चान्यस्मिन् समुत्थाय त्वरान्वितः ।
अहं किं करवाणीति वाच्यो राजा विजानता ॥
कार्यावस्थां च विज्ञाय कार्यमेतत्तथा भवेत् ।
सततं क्रियमाणेऽस्मिल्लाघवं तु व्रजेद्ध्रुवम् ॥
राज्ञः प्रियाणि वाच्यानि न चात्यर्थं पुनःपुनः ।
न हास्यशीलश्च भवेन्न चापि भ्रुकुटीमुखः ॥
नातिवक्ता न निर्वक्ता न च मत्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेद्धि कथञ्चन ॥
दुष्कृतानि नरेन्द्रस्य न च सङ्कीर्त्तयेत्क्वचित् ।
वस्त्रं पत्रमलङ्कारं राज्ञा दत्तं तु धारयेत् ॥
औदार्येण न तद्देयमन्यस्मै भूतिमिच्छता ।
न चैवाभ्यसनं राज्ञः स्वपनं चापि कारयेत् ॥
नानिर्दिष्टे तथा द्वारे प्रविशेत कथञ्चन ।
न च पश्येत राजानमयोग्यासु च भूमिषु ॥
राज्ञस्तु दक्षिणे पार्श्वे वामे वोपविशेत्तथा ।
पुरस्तात्तु तथा पश्चादासनं तु विगर्हितम् ॥

जृम्भानिष्ठीवनं कामं कोपं पर्यङ्किकाश्रयम् ।
भ्रुकुटिं वातमुद्गारं तत्समीपे विवर्जयेत् ॥
स्वयं तथा न कुर्वीत स्वगुणख्यापनं बुधः ।
स्वगुणख्यापने नूनं परानेव प्रयोजयेत् ॥
हृदयं निर्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञामतन्द्रितैः ॥
शाठ्यं लौल्यं च पैशुन्यं नास्तिक्यं क्षुद्रता तथा ।
चापल्यं च परित्याज्यं नित्यं राजानुजीविना ॥
श्रुतेषु विद्याशिल्पेषु संयोज्यात्मानमात्मना ।
राजसेवां ततः कुर्याद्भूतये भूतिवर्धनः ॥
नमस्कार्याः सदा चास्य पुत्रवल्लभमान्त्रिणः ।
सचिवैश्चास्य विश्वासं न तु कार्यं कथञ्चन ॥
अपृष्टश्चास्य न ब्रूयात्कामं ब्रूयात्तथाऽऽपदि ।
हितं धर्म्यं च वचनं हितैः सह विनिश्चितम् ॥
ब्रूयादिति पूर्वेण सम्बन्धः ।
चित्तं चैवास्य विज्ञेयं नित्यमेवानुजीविना ।
भर्तुराराधनं कुर्याच्चित्तज्ञो मानवः सुखम् ॥
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
त्यजेद्विरक्तं नृपतिं रक्ताद्वृत्तिं तु कामयेत् ॥
कर्मोपकारयोर्नाशं विपक्षाभ्युदयं तथा ।
आशासंवर्द्धनं कृत्वा फलनाशं करोति च ॥
अकोपोऽपि सकोपाभः प्रसन्नोऽपि च निष्फलः ।
फलं वाक्यं समं वेद वृत्तिच्छेदं करोति च ॥
प्रदेशवाक्ये उदिते न सम्भावयतीत्यथ ।
आराधनासु सर्वासु सुप्तवच्च विचेष्टते ॥

कथासु दोषान् क्षिपति वाक्यच्छेदं करोत्यथ ।
लक्ष्यते विमुखश्चैव गुणसङ्कीर्त्तने कृते ॥
दृष्टिं क्षिपत्यथान्यत्र क्रियमाणे च कर्मणि ।
विरक्तलक्षणं ह्येतत् शृणु रक्तस्य लक्षणम् ॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्नं सम्प्रयच्छति चाऽऽसनम् ॥
विवाक्ति दर्शने चास्य रहस्यं न च शङ्कते ।
जायते हृष्टवदनः श्रुत्वा तस्य तु सङ्कथाम् ॥
अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दते ।
उपायनं च गृह्णाति स्तोकमप्यादरात्तथा ॥
कथान्तरे स्मरति च प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्त्तव्या सेवा भृगुकुलोद्वह ॥
आपत्सु न त्यजेत्पूर्वं विरक्तमपि सेविनम् ।
मित्रं न चापत्सु तथा च भृत्यं त्यजन्ति ये निर्गुणमप्रमेयम् ।
प्रायो विशेषेण च ते व्रजन्ति सुरेन्द्रधाम सुरवृन्दजुष्टम् ॥ इति ।

इति राजसेवकलक्षणम् ।

अथ सान्धिविग्रहिकलक्षणम् ।

विष्णुधर्मोत्तरे,

षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ।
सान्धिविग्रहिकः कार्यो राज्ञा नयविशारदः ॥ इति ।

इति सान्धिविग्रहिकलक्षणम् ।

अथ युद्धकर्तृपुरुषलक्षणम् ।

महाभारते,

युधिष्ठिर उवाच ।
किंशीलाः किंसमाचाराः कथंरूपाश्च भारत ।

किंसन्नाहाः कथंशस्त्रा जनाः स्युः संयुगे नृप ॥
भीष्म उवाच ।
यथाचरितमेवात्र शस्त्रं पत्रं विधीयते ।
आचरन् वीरपुरुषस्तथा धर्मेषु वर्त्तते ॥
गन्धाराः सिन्धुसौवीराः नखरप्रासयोधिनः ।
अभीरवः सुवालिनस्तद्वलं सर्वपारगम् ॥
सर्वशास्त्रेषु कुशलाः सत्यवन्तो ह्युशीनराः ।
प्राच्या मातङ्गयुद्धेषु कुशलाः कूटयोधिनः ॥
तथा यवनकाम्बोजा मधुराभिमताश्च ये ।
एते नियुद्धकुशला दक्षिणा असिपाणयः ॥
सर्वत्र शूरा जायन्ते महासत्त्वा महाबलाः ।
प्राय एवं समुद्दिष्टा लक्षणानि तु मे शृणु ॥
सिंहशार्दूलवाङ्मात्रा सिंहशार्दूलगामिनः ।
पारावतकलिङ्गाक्षाः सर्वे शूराः प्रमाथिनः ॥
मृगस्वरा द्वीपिनेत्रा ऋषभाक्षा मनस्विनः ।
द्वीपी चित्रकः ।
प्रमादिनश्च मन्दाश्च योधनाः किङ्किणीस्वनाः ॥
मेघस्वनाः क्रोधमुखाः केचित्करभनिःस्वनाः ।
जिह्मनासाग्रजिह्वाश्च दूरगा दूरपातिनः ॥
विडालकुञ्जतनवस्तनुकेशास्तनुत्वचः ।
शीघ्राश्चपलवृत्ताश्च भवन्ति च दुरासदाः ॥
गोधानिमीलिताः केचिन्मृदुप्रकृतयस्तथा ।
तुरङ्गगतीनिर्घोषास्ते नराः पारयिष्णवः ॥
सुसंहताः प्रतनवो व्यूढोरस्काः सुसंस्थिताः ।
सुवादितेषु हृष्यन्ति नृत्यन्ति कलहेषु च ॥

गम्भीराक्षा निःसृताक्षाः पिङ्गला भ्रुकुटीमुखाः ।
नकुलाक्षास्तथा चैव सर्वे शूरास्तनुत्यजः ॥
जिह्माक्षाः प्रललाटाश्च निर्मांसहनवोऽपि च ।
वक्रबाहङ्गुलीवक्राः कृशा धमनिसन्तताः ॥
प्रवेपन्तीव वेगेन सम्पराये ह्युपस्थिते ।
वारणा इव संमत्तास्ते भवन्ति दुरासदाः ॥
प्रदीप्तस्फुटकेशान्ताः स्थूलपार्श्वहनूमुखाः ।
उन्नतांसाः पृथुग्रीवा विकटाः स्थूलपिण्डिकाः ॥
ऊर्ध्वगा इव सुग्रीवा विनता विहगा इव ।
पिण्डशीर्षातिवक्राश्च टंकदंशमुखास्तथा ॥
उग्रस्वरा मन्युमन्तो युद्धेष्वाराव्सारिणः ।
अधर्मज्ञावलिप्ताश्च घोरा रौद्रप्रदर्शनाः ॥
त्यक्तात्मानः सर्व एते अन्त्यजा ह्यनिवर्त्तिनः ।
पुरस्कार्याः सदा सैन्ये हन्यन्ते घ्नन्ति चापि ते ॥
अधार्मिका भिन्नवृत्ताः सान्त्वं तेषां पराभवः ।
एवमेव प्रकुप्यन्ति राज्ञोऽप्येते ह्यभीक्ष्णशः ॥ इति ।

इति युद्धकर्तृपुरुषलक्षणम् ।

अथ सेनापतिलक्षणम् ।

विष्णुधर्मोत्तरे,

कुलीनः शीलसम्पन्नो धनुर्वेदविशारदः ।
हस्तिशिक्षाश्वशिक्षासु कुशलः श्लक्ष्णभाषितः ॥
निमित्ते शकुने ज्ञाने वेत्ता वैद्यश्चिकित्सिते ।
पुरुषान्तरविज्ञाने षाड्गुण्ये च विनिश्चितः ॥
कृतज्ञः कर्मणां शूरस्तथा क्लेशसहोऽनृजुः ।
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् ॥

व्यूहः सैन्यसन्निवेशविशेषः । फल्गुसारविशेषवित् सारासारविवेककुशलः ।

राज्ञा सेनापतिः कार्यो ब्राह्मणः क्षत्रियोऽथ वा । इति ।

इति सेनापतिलक्षणम् ।

अत्र सेनापतिलक्षणे व्यूहतत्त्वविधानज्ञ इत्यनेन सेनापतिर्व्यूहविदपेक्षित इत्युक्तम् । तत्र व्यूहलक्षणमुच्यते ।

राजविजये,

बलं व्यूहमौढं परबलविभेदेऽल्पमपि य—
द्भवेदूनं व्यूहैर्महदपि जये न क्षमबलम् ।
अतो वक्ष्ये व्यूहानसुरपृतनां पूर्वममराः
पराजिग्युर्व्यूहैरुपचितबलां वीर्यमहतीम् ॥
बलाकापङ्क्तिवद्व्यूहो बलाकाख्यः कृतो रणे ।
काकव्यूहः काकसङ्घो बलाकाव्यूहभञ्जकः ॥
तावुभावपि भज्येते श्येनव्यूहेन निश्चितम् ।
एको रथोऽग्रे कर्तव्यः पश्चाद्द्विरदसप्तकम् ॥
त्रिंशदश्वाः खड्गिशतं पार्श्वे कुन्तधरास्तथा ।
मध्येऽष्टौ रथिनस्त्रिंशदश्वाः पार्श्वे गजद्वयम् ॥
ततश्च पृष्ठतः सर्वे श्येनव्यूहः स उच्यते ।
अग्रे द्वौ पृष्ठगाश्चान्ये क्रौञ्चव्यूहः स उच्यते ॥
बलाककाकौ क्रौञ्चेन क्रौञ्चं श्येनेन भज्यते ।
अग्रे रथद्वयं पश्चाद्गजाः सप्त व्यवस्थिताः ॥
तत्पृष्ठे विंशतिरिभाः पञ्चाशद्वाजिवाहकाः ।
सप्त सप्त रथाः पार्श्वे गजौ द्वौ द्वौ ततः स्थितौ ॥
तत्प्रमाणै रथैर्वेदी बाह्यतस्तद्वजाः स्थिताः ।
मध्ये पदातयश्चान्ते पार्श्वयोश्च तुरङ्गमाः ॥

विज्ञेयः शकटव्यूहो न भेद्यस्त्रिदशैरपि ।
अग्रे रथत्रयं पृष्ठे गजाकारो गजव्रजः ॥
स्यन्दनाः पञ्च पञ्चैव अथो षष्टिर्धनुष्मताम् ।
मध्ये पदातयः षष्टिः पार्श्वयो रथिनो गजाः ॥
पृष्ठे तु सकला सेना सिंहव्यूहः प्रजायते ।
शकटव्यूहकालेऽयं सूचीव्यूहेन भिद्यते ॥
पद्मव्यूहस्तु सिंहेन सूची काकेन भिद्यते ।
गजषोडशकं मध्ये वृत्ताकारेण कल्पयेत् ॥
बाह्यतो रथिभिर्वेष्टयं तद्बाह्ये कुन्तधारकैः ॥
शरचापधरा बाह्ये खड्गचर्मधरास्ततः ।
बाह्यतोऽश्वैः समावेष्टयं पङ्क्तित्रितयतः क्रमात् ॥
पुनः पुनः प्रकुर्वीत यावद्भवति वाहिनी ।
चक्रव्यूहः स विज्ञेयो दुर्भेद्यस्त्रिदशैरपि ॥
अन्तरे रथमेकैकं स्थानेष्वष्टसु कल्पयेत् ।
तदन्तरे गजान् पञ्च नवाश्वान् स्थापयेत्ततः ॥
ततः पत्तीन् पञ्चदश पत्रे पत्रे प्रकल्पयेत् ।
तन्मध्ये स्यन्दनान् सप्त गजांश्चैव त्रयोदश ॥
एकोनविंशतिहयान् पदातीनष्टविंशतिम् ।
गजै रथैः पूरणीया पद्ममध्यस्य कर्णिका ॥
तन्मध्ये गजमारूढश्चमूपो वा नृपोऽथ वा ।
अन्तरे द्रोणिकायां तु रथा द्विरदवाजिनः ॥
त्रयस्त्रयश्च सर्वत्र त्रयस्त्रिंशत् पदातयः ।
पद्मव्यूहः स विज्ञेयः पद्माकारः कृतो यतः ॥
रथं गजं हयं पत्तिं मालाकारेण विन्यसेत् ।
पुनः पुनः श्रेणिबन्धान्मालाव्यूहः स उच्यते ॥

चतुर्दिक्षु रथौ द्वौ तत्पृष्ठे तु द्विरदा दश ।
चतुर्विंशतिरश्वाश्च त्रिंशत्खड्गधरास्ततः ॥
शरचापधराश्चैव खेटपट्टिशधारिणः ।
तेषां पृष्ठे कुन्तधरा यन्त्रधारास्तथैव च ॥
सर्पाकारं रथेभाश्वैः पूरयेत्सैनिकैरपि ।
सर्पव्यूहः स विज्ञेयः कृतान्तो युद्धकर्मणि ।
सप्तधा स्युः सप्त रथा गजवाजिपदातयः ॥
रथेभाश्वाः पत्तयश्च सप्त सप्तगुणाः क्रमात् ।
अधोऽधः कल्पयेदेवमग्निव्यूहः स उच्यते ॥
सर्वोत्तमोऽयं व्यूहानामग्निवन्नाशकारकः ।
चतूरेखाङ्कितां सेनां वेद्याकारां प्रकल्पयेत् ॥
रथैर्गजैर्हयैः खड्गैः क्रमेण च चतुर्दिशम् ।
ततश्चतुर्षु द्वारेषु रथौ द्वौ द्वौ तथा गजौ ॥
अश्वानपि पदातींश्च चतुर्दिक्षु प्रकल्पयेत् ।
तन्मध्ये नृपतिस्तिष्ठेद्वेद्याकारेऽन्तरे सुधीः ॥
विज्ञेयः खलकव्यूहः खलको द्वारसंस्थितः ।
सौपर्णः श्येनकः कार्यस्तत्सङ्ख्याद्विगुणः पुनः ॥
सार्पाग्निचक्रसंज्ञाश्च व्यूहेषु बलवत्तराः ।
दण्डाकारो भवेद्दण्डो मकरो मकराकृतिः ॥
सूचीव्यूहः सूचीसमः स्वनामसदृशाः परे ।
रविश्चक्रे मण्डलेऽजः सूचीमकरयोः कुजः ॥
सुपर्णादौ बुधः श्येने गुरुर्दण्डोरगे शनिः ।
शुक्रः पद्मे च शकटे व्यूहेषु स्वामिनो मताः ॥
सानुकूलो ग्रहव्यूहः कर्त्तव्यो व्यूहकर्मणि ।
रिपूणां प्रतिकूलस्य कार्यो व्यूहो ग्रहस्य वा ॥

बलोत्तरेण रिपुणा परव्यूहविभेदिना । इति ।

इति व्यूहलक्षणम् ।

अथ सामान्यनिवासस्थानलक्षणम् ।

इह पूर्वं राज्ञः सहायानामधिकारिपुरुषाणां च लक्षणान्यभिहितानि । इदानीं सहाययुक्तो राजा किंलक्षणं देशमावसेदिति तन्निवासस्थानलक्षणमुच्यते ।

विष्णुधर्मोत्तरे,

राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानतसामन्तं पशव्यं देशमावसेत् ॥

यवसं तृणम् । सामन्ता भौमिकाः । पशव्यं पशुहितकरम् ।

वैश्यशूद्रजनप्रायमनाहार्यं तथा परैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्मकरं तथा ॥
अदेवमातृकं कर्मस्वनुरक्तजनान्वितम् ।
करैरपीडितं चापि बहुपुष्पफलं तथा ॥

अदेवमातृकं नदीमातृकम् वृष्ट्यपेक्षं न भवति नदीबाहुल्यात् । करः करभागः ।

अगम्यं परचक्राणां तद्बाधाविषयं पुनः ।
समदुःखसुखं राज्ञः सततं च प्रिये स्थितम् ॥
तद्बाधाविषयं शत्रुकृतदुःखायोग्यम् ।
सरीसृपविहीनं च व्यालतस्करवर्जितम् ॥
एवंविधं यथाकामं राजा विषयमावसेत् । इति ।

विषयो देशः । सरीसृपा व्याघ्रादयः । व्यालाः सर्पाः ।

याज्ञवल्क्योऽप्याह,

रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् । इति ।

आजीव्यमनुजीव्यं कन्दमूलफलादिना । जाङ्गलं यद्यपि

अल्पोदकतरुपर्वतो देशो जाङ्गलस्तथाप्यत्र समसजलतरुपर्वतो देशो जाङ्गलशब्देन विवक्षणीयः ।

मनुरपि,

जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम् ।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥ इति ।

इति सामान्यनिवासस्थानलक्षणम् ।

अथ दुर्गलक्षणम् ।

याज्ञवल्क्यः,

तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये । इति ।

तत्र पूर्वोक्तगुणोपलक्षिते देशे ।

मनुः,

एकः शतं योधयति प्राकारस्थो धनुर्द्धरः ।
शतं दशसहस्राणि तस्मात् दुर्गं विधीयते ॥
तस्मादायुधसम्पन्नं धनधान्येन वाहनैः ।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च ॥ इति ।

विष्णुधर्मोत्तरे,

दुर्गं च परिखोपेतं वप्राट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च तथा युतम् ॥

वप्रः प्राकारः ।

दुर्गे च यन्त्राः कर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राम तैस्तु रक्षा विधीयते ॥
दुर्गे द्वाराणि गुप्तानि कार्याण्यपि च भूभुजा ।
यन्त्रायुधाट्टालचयोपपन्नं
समग्रधान्यौषधसम्प्रयुक्तम् ।
वणिग्जनैः शोभनमावसेत्

दुर्गं सुगुप्तं नृपतिः सदैव ॥ इति ।

अत्रापेक्षितसर्वपदार्थानां सङ्ग्रहः कर्त्तव्यः ।

इति दुर्गलक्षणम् ।

अथ दुर्गभेदाः ।

तत्र मनुः,

धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेवच ।

नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरम् ॥ इति ।

तत्र धन्वदुर्गं यथा—धन्वनि मरुभूमौ दुर्गं कुर्यात् । निर्जलत्वादिदोषैर्दुर्गमत्वादित्यर्थः । तथा च—

औशनसे धनुर्वेदे,

सलिलवर्जितमतिशर्करान्वितं रूक्षनिराश्रयं विषमैर्विषकीटैश्चितं विषमप्रदेशे दुःसञ्चरं बलवद्भिः पालकैरुपेतं रोगविनिर्मुक्तं धन्वदुर्गं श्रेयसे भवेत् । इति ।

अथ वा निराश्रया निरुदका भूमिर्धन्वा तेन युक्तं दुर्गं धन्वदुर्गम् । स्वनिवासस्थानात्परितो निर्जलं वृक्षादिरहितं च भूमिप्रदेशं कुर्यादित्यर्थः । अत एव महाभारतेऽप्युक्तम्—

यदा तु पीडितो राजा भवेद्बाह्या बलीयसा ।
तदाभिसंश्रयेद्दुर्गं बुद्धिमान् पृथिवीपतिः ॥

इत्युपक्रम्यानन्तरमेवाभिहितम्—

सस्याभिहारं कुर्याच्च स्वयमेव नराधिपः ।
असम्भवे प्रवेशस्य दाहयेदग्निना भृशम् ॥
क्षेत्रस्थेषु च सस्येषु शत्रोरुपचयो भवेत् ।
विनाशयेद्वा तत्सर्वं बलेनार्थं स्वकेन वै ॥
नदीषु दुर्गेषु सदा सङ्क्रमानवसादयेत् ।
जलं निस्रावयेत् सर्वमनिस्राव्यं च दूषयेत् ॥

दूषयेत् विषादिनेत्यर्थः ।

दुर्गाणां चाभितो राजा मूलच्छेदं प्रकारयेत् ।

सर्वेषां क्षुद्रवृक्षाणां चैत्यवृक्षं विवर्जयेत् ॥

प्रवृद्धानां च वृक्षाणां शाखाः प्रच्छेदयेत्तथा । इति ।

केचित्तु धन्वनां धनुषां लक्षणयाऽधिष्ठातृपुरुषाणां धन्विनां मण्डलरूपं दुर्गमित्याहुः । तन्न युक्तम् । लक्षणादोषप्रसङ्गात् । एतादृशदुर्गस्याश्रुतत्वाददुस्तरत्वाच्च । वक्ष्यमाणनरदुर्गेण पौनरुक्त्यापत्तेश्च । नरदुर्गं नाम बलदुर्गं तच्च गजरथाश्वधनुर्धराद्यैः सम्पद्यते । तत्र बलदुर्गे सम्पादिते धनुर्धरदुर्गं नान्तरीयकतया सिद्धमेवेति ।

महीदुर्गं यथा—मह्याम् इष्टकापाषाणादिनिर्मितं दुर्गं महीदुर्गम् । मह्येवोच्चावचप्रदेशप्रचुरा दुर्गमिति के चित् ।

औशनसे धनुर्वेदे,

सर्वोपकरणोपेतं गुप्तं चोपायसंयुतम् ।

अत्युत्सेधातिनिम्नं च महीदुर्गं तदिष्यते ॥ इति ।

सर्वोपकरणोपेतं सर्वापेक्षितपदार्थसमन्वितम् । गुप्तम् अविज्ञातमार्गं पराप्रवेश्यं पराभेद्यमिति वा । उपायसंयुतं उपायाः परैरवरुद्धे दुर्गे तन्निराकरणसमर्थाः शतघ्नीयन्त्रमुखास्तद्युक्तम् । अथ वा अतिप्रबलैः शत्रुभिरुपरुद्धे स्वनिर्गमनप्रकारा उपायाः । अत्युत्सेधः अत्युच्चता ।

जलदुर्गं यथा—नद्यादिप्रवाहेणोभयतः समेतेनागम्यप्रदेशो जलदुर्गम् ।

औशनसे धनुर्वेदे,

सङ्क्षिप्तैनैकमार्गेण सविषैस्तु जलेचरैः ।

सलिलैर्विषमैः स्पर्शनखादनवधप्रियैः ॥ इति ।

एतैर्युक्तं विषममित्यर्थः।

वनदुर्गं यथा—वनतरुगहनवेष्टितो भूभागविशेषो वनदुर्गम्।

औशनसे धनुर्वेदे,

अज्ञातमार्गं गहनं वृक्षगुल्मलतादिभिः।
सकण्टकैर्वनं दुर्गं भूतये स्यात्सुविस्तृतम्॥ इति।

बलदुर्गं यथा—बलस्य स्वसैन्यस्य स्थितिविशेषेण सम्पादनं व्यूहादिवत् बलदुर्गम्।

औशनसे धनुर्वेदे,

मौलं वश्यं सुसन्तुष्टं शिक्षायुक्तं सनायकम्।
भीमं चैवाप्रमत्तं च बलदुर्गं प्रशस्यते॥ इति।

बलदुर्गं तदिष्यते इति पाठान्तरम्। मौलं परम्परागतकुलीननृपतियुक्तम्। एतस्य प्रशंसाप्युक्ता—

महाभारते,

दुर्गेषु च महाराज षट्सु ये शास्त्रनिश्चिताः।
सर्वे दुर्गेषु शस्यन्ते नरदुर्गं सुदुस्तरम्॥ इति।

अन्योन्यसंश्लिष्टहस्तमानुषमण्डलं नृदुर्गमिति केचित्। तन्न हृदयङ्गमम्। एतादृशदुर्गस्य दुस्तरत्वाभावात्।

गिरिदुर्गं यथा—गिरिशिरोभूभागः परिमण्डलगिरिवलयवेष्टितो देशविशेषो वा गिरिदुर्गम्।

औशनसे धनुर्वेदे,

दुरारोहं परैर्दूरं शरपातस्य गोचरात्।
सर्वसम्पत्समायुक्तं दुर्गं स्यात्पार्वतं श्रिये॥ इति।

एतत्प्राशस्त्यमुक्तम्—

विष्णुधर्मोत्तरे,

सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते। इति।

एतेषु षट्सु दुर्गेषु नृपतिरन्यतमं दुर्गमाश्रयेत् । तदुक्तम्—
विष्णुस्मृतौ,
धन्वमहीवारिवृक्षगिरिदुर्गाणामन्यतमं दुर्गमाश्रयेत् । इति ।
विष्णुधर्मोत्तरेऽपि,
तत्र दुर्गं नृपः कुर्यात्षण्णामेकतमं बुधः । इति ।

इति दुर्गभेदाः ।

अथ दुर्गपरिमाणम् ।

सिद्धान्तशेखरे,
चत्वारिंशत्समायुक्तं दण्डानां षट्शतं मतम् ।
दुर्गस्य विस्तरं दैर्घ्यं विदध्यादधमस्य च ॥
शतैश्च सप्तभिः कुर्याच्चतुर्भिः सह मध्यमम् ।
अष्टषष्टियुतैः श्रेष्ठं दण्डानां सप्तभिः शतैः ॥
विस्तारं चायतं कुर्यात् दुर्गलक्षणमीरितम् । इति ।

इति दुर्गपरिमाणम् ।

अथ दुर्गाध्यक्षलक्षणम् ।

विष्णुधर्मोत्तरे,
अनाहार्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राम उद्युक्तः सर्वकर्मसु ॥

इति दुर्गाध्यक्षलक्षणम् ।

अथ ग्रामलक्षणम् ।

सिद्धान्तशेखरे,
स्वर्गार्थमपवर्गार्थं यशोऽर्थं च धनार्थकम् ।
रक्षार्थं च जयार्थं च वक्ष्ये ग्रामस्य लक्षणम् ॥
खेटग्रामाग्रहाराश्च कुब्जं दुर्गं च पत्तनम् ।
पुरं च राजधानीति कीर्त्तिता अष्टधा बुधैः ॥

शूद्रैरधिष्ठितं खेटं ग्रामः शूद्रैर्द्विजोत्तमैः ।
विप्रैरेवाग्रहारः स्यात् कुब्जं सीमान्तवासतः ॥
दुर्गं देशादिरक्षार्थं जलादिवनदुर्गमम् ।
चतुरङ्गबलोपेतमगम्यं सर्वशत्रुभिः ॥
द्वीपान्तरगतद्रव्यक्रयविक्रयकान्वितम् ।
पत्तनं चेति विख्यातं पुरलक्षणमुच्यते ॥
अनेकजातिसंयुक्तं तन्तुवाययुतं पुरम् ।
नृपमन्दिरसंयुक्ता चतुरङ्गबलान्विता॥
भृत्यैर्देवालयैर्युक्ता राजधानीति चोच्यते ।
विन्यासलक्षणं तेषां वक्ष्ये शैवागमोदितम् ॥
दण्डो हस्तचतुष्केण यष्टिश्चापश्च तत्समः ॥
खेटग्रामादिकानां च प्रमाणं तेन कारयेत् ।
आयव्ययादिकं प्रोक्तदण्डेनैव समाचरेत् ॥
वक्ष्ये विस्तारमायामं नीचं मध्यममुत्तमम् ।
खेटादीनां च सर्वेषां प्रत्येकं त्रिविधं यथा ॥
नीचं ग्रामं चतुःषष्ट्या मध्यमं द्विगुणैस्तथा ।
उत्तमं त्रिगुणैर्दण्डैः कुर्याद्दीर्घं च विस्तृतम् ॥
शतद्वयेन दण्डानां षट्पञ्चाशद्युतेन च ।
कुर्वीत खेटकं हीनं मध्यमं चोच्यतेऽधुना ॥
शतत्रयेण विंशत्या दण्डानां सहितेन च ।
त्रिभिः शतैः सहाशीत्या चतुर्भिः खेटमुत्तमम् ॥
ग्रामस्य चाग्रहारस्य विप्रादीनां च सङ्ख्यया ।
न्यूनाधिक्यप्रभेदेन विस्तारायामनिर्णयः ॥
कुब्जस्यापि तथा प्रोक्तं दुर्गस्याथ निगद्यते ।
दुर्गस्य विस्तार आयामश्च दुर्गलक्षणे द्रष्टव्यः ।

पत्तनस्याथ वक्ष्यामि लक्षणं तन्त्रचोदितम् ।
चत्वारिंशत्समायुक्तैरष्टयुक्तैश्चतुःशतैः ॥
दण्डानां पत्तनं नीचं कुर्याद्दीर्घं च विस्तृतम् ।
सद्वादशैः शतैः कुर्यात्पञ्चभिर्मध्यपत्तनम् ॥
षट्सप्ततिसमायुक्तैरुत्तमं पञ्चभिः शतैः ।
एवं पत्तनमाख्यातं राजधानीति कथ्यते ॥
सार्धद्वात्रिंशता कुर्याद्दण्डानामष्टभिः शतैः ।
विस्तृतामायतां हीनां राजधानीं विचक्षणः ॥
षडशीतियुतैः कुर्यान्मध्यमां चाष्टभिः शतैः ।
दण्डानामायतां तज्ज्ञो राजधानीं च विस्तृताम् ॥
दण्डानामुत्तमां कुर्यात् षष्ट्या च नवभिः शतैः ।
एवं दैर्घ्यं च विस्तारो ग्रामादीनां च कीर्त्तितः ॥
ग्रामाग्रहारयोश्चाथ विप्रसङ्ख्या निगद्यते ।
एकादिदशविप्रान्तं ग्रामं क्षुद्राधमं विदुः ॥
द्वादशब्राह्मणोपेतं विप्रैः षोडशभिर्युतम् ।
चतुर्विंशतिविप्रान्तं क्षुद्रग्रामं प्रकल्पयेत् ॥
द्वात्रिंशद्ब्राह्मणैर्युक्तं ग्रामं पञ्चशता तथा ।
चतुःषष्ट्याथ विप्रैश्च साशीति सचतुष्टयम् ॥
क्षुद्रग्राम इति प्रोक्तः कथ्यते मध्यमः क्रमात् ।
शतमष्टोत्तरैर्विप्रैर्द्विगुणैस्त्रिगुणैस्तथा ॥
ब्राह्मणैरन्वितं ग्रामं मध्यमं परिचक्षते ।
शतैश्च पञ्चभिर्युक्तमुत्तमं सप्तभिः शतैः ॥
सहस्रब्राह्मणोपेतं त्रिविधं तं प्रचक्षते ।
सहस्रद्वयविप्राढ्यमग्रहारं तथाऽधमम् ॥
सहस्रैश्च त्रिभिर्युक्तं चतुर्भिरधमं विदुः ।

पञ्चषट्सप्तसहस्रविप्रैस्तन्मध्यमं विदुः ॥
सहस्रैरष्टभिर्युक्तं ब्राह्मणैरग्रहारकम् ।
उत्तमं दशसाहस्रं विदुः सूर्यसहस्रकम् ॥
विप्रसङ्ख्या समाख्याता तत्र कुर्याद्यथारुचि ।
शासने ताम्रजे सङ्ख्या विप्राणां ग्रामनाम च ॥
सकरं वाऽकरं वापि सीमान्तं लेखयेद्बुधः ।
एवं निश्चित्य तं ग्रामं ब्राह्मणेभ्यो निवेदयेत् ॥ इति ।

महाभारते,

दृढप्राकारपरिखं हस्त्यश्वरथसङ्कुलम् ।
ऊर्जस्विनरनागं च चत्वरापणशोभितम् ॥
प्रसिद्धव्यवहारं च प्रशान्तमकुतोभयम् ।
शूराढ्यं प्राज्ञसम्पूर्णं तत्पुरं स्वयमाविशेत् ॥ इति ।

विष्णुधर्मोत्तरे,

गोपुरं सकपाटं च तत्र स्यात्सुमनोहरम् ।
सपताको गजारूढो येन राजा विशेत् पुरम् ॥
चतस्रश्च तथा तत्र कार्याश्चापणवीथयः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म विधीयते ॥
वीथ्यग्रे च द्वितीये वै राजवेश्म विधीयते ।
धर्माधिकरणं कार्यं वीथ्यग्रे च तृतीयके ॥
चतुर्थे चैव वीथ्यग्रे गोपुरं च विधीयते ।
आयतं चतुरस्रं वा वृत्तं वा कारयेत्पुरम् ॥
स्रक्तिहीनं त्रिकोणं च यवमध्यं तथैव च ।
अर्धचन्द्रप्रकारं च वज्राकारं च वर्जयेत् ॥
स्रक्तिहीनं कोणरहितम् ।
अर्द्धचन्द्रं प्रशसन्ति नदीतीरेषु यद्वरम् ।

अन्यत्र तन्न कर्त्तव्यं प्रयत्नेन विजानता ॥

इति ग्रामलक्षणम् ।

अथ राजगृहविन्यासः ।

विष्णुधर्मोत्तरे,

वीथ्यग्रे च द्वितीये वै राजवेश्म विधीयते ।

इत्यनुसन्ध्यायाऽऽह—

राज्ञः कोशगृहं कार्यं दक्षिणे राजवेश्मतः ॥

तस्यापि दक्षिणे भागे गजस्थानं विधीयते ।

गजानां प्राङ्मुखी शाला कर्त्तव्या वाप्युदङ्मुखी ॥

आग्नेये च तथा भागे आयुधागार इष्यते ।

महानसं च धर्मज्ञ कर्मशालास्तथाऽपराः ॥

गृहं पुरोधसः कार्यं वामतो राजवेश्मतः ।

मन्त्रिदैवविदां चैव चिकित्साकर्त्तुरेव च ॥

तत्रैव च तथा भागे गोष्ठागारं विधीयते ।

गवां स्थानं हि यत्रैव तुरङ्गाणां तथैव च ॥

यत्र गोस्थानं तत्रैव तुरङ्गाणां स्थानमित्यर्थः ।

उत्तराभिमुखी श्रेणी तुरङ्गाणां विधीयते ॥

प्राङ्मुखी वापि धर्मज्ञ परिशेषा विगर्हिता ।

परिशेषा दक्षिणाभिमुखी प्रत्यङ्मुखी चेत्यर्थः ।

ततस्तत्र यथास्थानं राजा विज्ञाय सारवित् ।

दद्यादावसथस्थानं सर्वेषामनुपूर्वशः ॥ इति ।

आवसथस्थानं वासाय गृहार्थं स्थलमित्यर्थः ।

इति राजगृहविन्यासः ।

इह राजगृहादिलक्षणमभिधायाधुना तदुपयोगिनां गवादीनामन्येषामपि केषां चिल्लक्षणान्युच्यन्ते । तत्र गोलक्षणमुक्तम्—

बराहसंहितायाम्,

पराशरः प्राह बृहद्रथाय गोलक्षणं व्याक्रियते ततोऽयम् ।
मया समासः शुभलक्षणास्ताः सर्वास्तथाप्यागमतोऽभिधास्ये॥
सास्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः ।
प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाश्च ॥

सास्राणि अश्रुयुक्तानि आविलानि कलुषाणि रूक्षाणि चाक्षीणि यासां ताः । प्रचलन्ति कम्पमानानि चिपिटानि शृङ्गाणि यासां ताः । करटाः कुसुम्भकुसुमवर्णाः ।

षट्सप्तचतुर्दैत्यः प्रलम्बमुण्डानना विनतपृष्ठाः ।
ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च ॥
श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिर्बृहद्भिर्वा ।
अतिककुदा कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च ॥ इति ।

इति गोलक्षणम् ।

अथ वृषलक्षणम् ।

विष्णुधर्मोत्तरे,

मार्कण्डेय उवाच ।
तस्याः सुतं परीक्षेत वृषभं लक्षणान्वितम् ।
उन्नतस्कन्धककुदं मृदुलाङ्गूलकम्बलम् ॥
कम्बलः सास्ना ।
महाकटितटस्कन्धं वैडूर्यमणिलोचनम् ।
प्रवालशफशृङ्गाग्रग्रीवाकम्बलवालधिम् ॥
वालधिः पुच्छम् ।
नवाष्टदशसङ्ख्यैर्वा तीक्ष्णाग्रैर्दशनैः शुभैः ।
माल्लिकाभैश्च मुक्ताभैर्गृहेऽपि धनधान्यदः ॥
वर्णतस्ताम्रकपिलो ब्राह्मणस्य प्रशस्यते ।

श्वेतो रक्तश्च कृष्णश्च गौरः पाटल एव च ॥
भद्रनासः सुपृष्ठश्च शबलः पञ्चवर्णकः ।
पृथुकर्णो महास्कन्धः श्लक्ष्णरोमा च यो भवेत् ॥
रक्तश्च कपिलो यश्च रक्तशृङ्गशफो भवेत् ।
श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य प्रशस्यते ॥
अनुरक्तेन वर्णेन क्षत्रियस्य प्रशस्यते ।
काञ्चनाभेन वैश्यस्य कृष्णेनाप्यन्तजन्मनः ॥
यस्य कर्णायते शृङ्गे सुमुखाभिमुखे सदा ।
सर्वेषामेव वर्णानां स तु सर्वार्थसाधकः ॥
मार्जारपादः कपिलो धन्यः कपिलपिङ्गलः ।
श्वेतो मार्जारपादस्तु धन्यो मणिनिभेक्षणः ॥
करटः पिङ्गलश्चैव श्वेतपादस्तथैव च ।
सर्वपादसितो यश्च द्विपादश्वेत एव च ॥
कपिञ्जलनिभो धन्यस्तथा तित्तिरिसन्निभः ।
आकर्णमूलाच्छ्वेतं च मुखं यस्य प्रकाशते ॥
नदीमुख इति ज्ञेयो रक्तवर्णो विशेषतः ।
श्वेतं च जठरं यस्य भवेत्पृष्ठं च गोपतेः ।
वृषभः स समुद्राख्यः सततं कुलवर्द्धनः ॥
मल्लिकापुष्पचित्रश्च धन्यो भवति पुङ्गवः ।
कमलैर्मण्डलैश्चापि चित्रो भवति भोगदः ॥
अतसीपुष्पवर्णश्च तथा धन्यतरः स्मृतः ।
एते धन्यास्तथाऽधन्यान् कीर्त्तयिष्यामि ते नृप ॥

एते धन्याः । कथिता इति, शेषः । अधन्यान् कीर्त्तयिष्यामीत्यग्रेतनेन सम्बन्धः ।

कृष्णताल्वोष्ठदशना रूक्षशृङ्गशफाश्च ये ।

अव्यक्तवर्णा ह्रस्वाश्च व्याघ्रभस्मनिभाश्च ये ॥
ध्वाङ्क्षगृध्रसवर्णाश्च उद्भ्रान्तनयनास्तथा ।
नैते वृषाः प्रमोक्तव्या न च धार्यास्तथा गृहे ॥
मोक्तव्यानां च धार्याणां भूयो वक्ष्यामि लक्षणम् ।
स्वस्तिकाकारशृङ्गाश्च मेघौघसदृशस्वनाः ॥
महाप्रमाणाश्च तथा मत्तमातङ्गगामिनः ।
महोरस्का महाश्वासा महाबलपराक्रमाः ।
शिरः कर्णौ ललाटं च वालधिश्चरणास्तथा ॥
नेत्रे पार्श्वे च कृष्णानि शस्यन्ते चन्द्रसत्विषः ।
श्वेतान्येतानि शस्यन्ते कृष्णस्य तु विशेषतः ॥
भूमौ कर्षति लाङ्गूलं प्रशस्तः स्थूलवालधिः ।
पुरस्तादुद्यतो नीचः पृष्ठतश्च विशिष्यते ॥
शक्तिध्वजपताकाभा येषां राजिर्विराजते ।
अनड्वाहस्तु ते धन्या ऋद्धिसिद्धिजयावहाः ॥
प्रदक्षिणं निवर्त्तन्ते स्वयं ये विनिवर्त्तिताः
समुन्नतशिरोग्रीवा धन्यास्ते कुलवर्धनाः ॥
रक्तशृङ्गाग्रनयनः श्वेतवर्णो भवेद्यदि ।
शफैः प्रवालसदृशैर्नास्ति धन्यतरस्ततः ॥
एते धार्याः प्रयत्नेन मोक्तव्या यदि वा वृषाः ।
धारिताश्च तथा मुक्ता धनधान्यविवर्द्धनाः ॥
चरणाश्च मुखं पुच्छं यस्य श्वेतानि गोपतेः ।
लाक्षारससवर्णश्च तं नीलमिति निर्दिशेत् ॥
वृष एव स मोक्तव्यो न स धार्यो गृहे भवेत् ।
तदर्थमेषा चरति लोके गाथा पुरातनी ॥
पृष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।

यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
गौरीं वाप्युद्वहेद्भार्यां नीलं वा वृषमुत्सृजेत्—इति पाठान्तरम् ।
एवं वृषं लक्षणसम्प्रयुक्तं
गृहोद्भवं क्रीतमथापि राजन् ।
मुक्त्वा न शोचेन्मरणं महात्मा
मोक्षे विधिं चाहमतोऽभिधास्ये ॥ इति ।

इति वृषलक्षणम् ।

अथ छागलक्षणम् ।

वराहसंहितायाम्,

छागशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ते ।
धन्याः स्थाप्या वेश्मनि सन्त्याज्याः सप्तदन्ता ये ॥
दक्षिणपार्श्वे मण्डलमसितं शुक्लस्य शुभफलं भवति ।
ऋष्यनिभकृष्णलोहितवर्णानां श्वेतमतिशुभदम् ॥
ऋष्यो मृगजातिभेदः ।
ऋष्यो नीलाण्डको लोके सरोम इति भण्यते ।
इति वैद्यकतन्त्रवचनात् ।
स्तनवदवलम्बते यः कण्ठेऽजानां मणिः स विज्ञेयः ।
एकमणिः शुभफलकृद्धन्यतमा द्वित्रिमणयो ये ॥
मुण्डाः सर्वे शुभदाः सर्वसिताः सर्वकृष्णदेहाश्च ।
अर्धासिताः सितार्द्धा धन्याः कपिलार्द्धकृष्णाश्च ॥
मुण्डाः शृङ्गरहिताः ।
विचरति यूथस्याग्रे प्रथमं चाम्भोऽवगाहते योऽजः ।
स शुभः सितमूर्द्धा वा मूर्द्धनि वा मृत्तिका यस्य ॥
यस्य मूर्द्धनि मृत्तिका तिलकाकृतिः ।

सपृषतकण्ठशिरा वा तिलपिष्टनिभश्च ताम्रदृक् शस्तः ।
कृष्णचरणः सितो वा कृष्णो वा श्वेतचरणो यः ॥
पृषताः बिन्दवः । ताम्रदृक् रक्ताक्षः ।
यः कृष्णाण्डः श्वेतो मध्ये कृष्णेन भवति पल्येन ।
पल्येन पल्याणाकृतिना । युक्तो भवतीति शेषः ।
यो वा चरति सशब्दं मन्दं च स शोभनश्छागः ।
ऋष्यशिरोरुहपादो यो वा प्राक्पाण्डुरोऽपरे नीलः ॥
स भवति शुभकृच्छागः श्लोकाश्चाप्यत्र गर्गोक्ताः ।
ऋष्याशिरोरुहपादः नीलशिरःकेशपादः । प्राक्पाण्डुरः पूर्वभागपाण्डुरः । अपरे पश्चिमभागे नीलः । गर्गोक्ताः श्लोकाश्चेत्थम्—
कुट्टकः कुट्टिकश्चैव जटिलो वामनस्तथा ।
ते चत्वारः श्रियः पुत्रा नालक्ष्मीके वसन्ति वै ॥
कुट्टकः, विचरतीत्यादिना उक्तः । कुट्टिकः, सपृषत इत्यादिना उक्तः । जटिलः, यः कृष्णाण्ड इत्यनेनोक्तः । वामनस्तु ऋष्याशिरोरुह पाद इत्यनेनोक्तः ।
अथाप्रशस्ताः खरतुल्यनादाः प्रदीप्तपुच्छाः कुनखा विवर्णाः ।
निकृत्तकर्णा द्विपमस्तकाश्च भवन्ति ये चासिततालुजिह्वाः ॥
वर्णैः प्रशस्तैर्मणिभिश्च युक्ता मुण्डाश्च ये ताम्रविलोचनाश्च ।
ते पूजिता वेश्मसु मानवानां सौख्यानि कुर्वन्ति यशः श्रियं च ॥ इति ।

इति छागलक्षणम् ।

अथ कुक्कुरलक्षणम् ।

वराहसंहितायाम्,

पादाः पञ्चनखास्त्रयोऽग्रचरणः षड्भिर्नखैर्दक्षिण—
स्ताम्रौष्ठाग्रनसो मृगेश्वरगतिर्जिघ्रन् भुवं याति च ।
लाङ्गूलं ससटं दृगृक्षसदृशी कर्णौ च लम्बौ मृद्

यस्य स्यात्स करोति पोष्टुरचिरात्पुष्टां श्रियं श्वा गृहे ॥
सस्टं जटिलम्। दक् ऋक्षसदृशी आरक्तेत्यर्थः। पुष्टां महतीम्
गर्गसंहितायामपि,
त्रयः पादाः पञ्चनखा अग्रगो दक्षिणस्तथा ।
षण्नखस्ताम्रनासो यस्ताम्रौष्ठः सिंहविक्रमः ॥
महीं जिघ्रन् समायाति लाङ्गूलं जटिलं तथा ।
ऋक्षाभे चक्षुषी कर्णौ मृदू चातिप्रलम्बिनौ ॥
स श्वा नृपस्य महतीं श्रियं यच्छति पोषितः ।

इति कुक्कुरलक्षणम् ।

अथ कुक्कुरीलक्षणम् ।

वराहसंहितायाम्,
पादे पादे पञ्चपञ्चाग्रपादे वामे यस्याः षट् नखा मल्लिकाक्षी ।
वक्रं पुच्छं पिङ्गला लम्बकर्णी श्रेष्ठोरस्का कुक्कुरी पाति पुष्टा॥इति ।
मल्लिकाक्षी कुसुमनेत्रा। पुष्टा पोषिता। पाति, राष्ट्रं राज्ञ इति शेषः।

इति कुक्कुरीलक्षणम् ।

अथ कुक्कुटलक्षणम् ।

वराहसंहितायाम्,
कुक्कुटस्त्वृजुतनूरुहाङ्गुलिस्ताम्रवक्रनखचूलिकः सितः ।
रौति सुस्वरमुषोऽत्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनाम् ॥
चूला शिखा । उषः प्रभातम् ।
यवग्रीवो यो वा बदरसदृशो योऽपि विहगो
बृहन्मूर्द्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः ।
स शस्तः सङ्ग्रामे मधुमधुपवर्णश्च जयकृ-
न्न शस्तो योऽतोऽन्यः कृशतनुरवः खञ्जचरणः ॥ इति ।
यवग्रीवः यवसदृशग्रीवः । यवशिरा लोकप्रसिद्धः । बद-

रसदृशो लोहितवर्णः । बृहन्मूर्द्धा विस्तीर्णशीर्षः । खञ्जचरणः विकलपादः ।

इति कुक्कुटलक्षणम् ।

अथ कुक्कुटीलक्षणम् ।

वराहसंहितायाम्,

कुक्कुटी मृदुलचारुभाषिणी स्निग्धमूर्त्तिरुचिराननेक्षणा ।
सा ददाति सुचिरं महीक्षितां श्रीयशोविजयनीतिसम्पदः ॥ इति ।

इति कुक्कुटीलक्षणम् ।

अथ कूर्मलक्षणम् ।

वराहसंहितायाम्,

स्फटिकरजतवर्णो नीलराजीविचित्रः
कलशसदृशमूर्त्तिश्चारुवंशश्च कूर्मः ।
अरुणसमवपुर्वा सर्षपाकारचित्रः
सकलनृपमहत्त्वं मन्दिरस्थः करोति ॥
अञ्जनभृङ्गश्यामतनुर्वा बिन्दुविचित्रोऽव्यङ्गशरीरः ।
सर्षशिरा वा स्थूलगलो यः सोऽपि नृपाणां राज्यविवृद्ध्यै॥

भृङ्गो भ्रमरः । अव्यङ्गशरीरः परिपूर्णशरीरः ।

वैडूर्यत्वक् स्थूलकण्ठस्त्रिकोणो
गूढच्छिद्रश्चारुवंशश्च शस्तः ।
क्रीडावाप्यां तोयपूर्णे मणौ वा
कूर्मः कार्यो मङ्गलार्थं नरेन्द्रैः ॥ इति ।

त्रिकोणः शृङ्गाटकाकृतिः । गूढच्छिद्रः अदृश्यरन्ध्रः । मणिः कूपमुखसमीपे जलपूर्णप्रदेशः ।

इति कूर्मलक्षणम् ।

अथ सम्मार्जनीलक्षणम् ।

सिद्धान्तशेखरे,

नारिकेलस्य पत्राणां सारान् श्लक्ष्णीकृतान् बहून् ।
चतुस्तालसमायामान् मुष्टिमात्रप्रमाणकान् ॥
रज्जुना बन्धयेन्मूले प्रोक्ता हर्म्यादिमार्जनी । इति ।

तालस्तु—

तालः स्मृतो मध्यमया गोकर्णश्चेत्यनामया ।

इति प्रसिद्धः ।

इति सम्मार्जनीलक्षणम् ।

अथ शूर्पलक्षणम् ।

तत्रैव—

विंशत्यङ्गुलमायामं तावद्विस्तारसंयुतम् ।
एकाङ्गुलौष्ठसन्नद्धमश्वत्थच्छदनोपमम् ॥
वेणुवेत्रादिसम्बद्धं शूर्पं तुषविमोक्षकम् । इति ।

इति शूर्पलक्षणम् ।

अथोलूखललक्षणम् ।

तत्रैव,

उलूखलमथो वक्ष्ये दारुसारसमुद्भवम् ।
विंशत्यष्टादशकलामात्रैः स्यादुन्नतिः क्रमात् ॥

कलाः षोडश । मात्रमङ्गुलम् ।

त्रिधोत्तमादिकं दैर्घ्यं त्रिगुणं परिणाहकम् ।
कण्ठमूलपरिणाहमुत्सेधार्धप्रमाणतः ।
चतुर्भागकृते दैर्घ्ये गर्त्तमध्ये त्रिभागतः ।
अङ्गुलं पादपादोनमोष्ठः स्यादुत्तमादिके ॥

उलूखलमिति ख्यातं वक्ष्ये मुसललक्षणम् ।

इत्युलूखललक्षणम् ।

अथ मुसललक्षणम् ।

तत्रैव,

पञ्चतालं चतुस्तालं त्रितालं वार्द्धसंयुतम् ।
मुसलस्योन्नतिः प्रोक्ता श्रेष्ठा मध्याऽधमा क्रमात् ॥
स्वराष्टरन्ध्रमात्रैः स्यादुत्तमादिषु नाहकम् ।
स्वराः सप्त । रन्ध्राणि नव ।
अयोवलयसंयुक्तं मूलेऽग्रे व्यङ्गुलेन तत् ।
कीर्तितं मुसलं ह्येवम्—इति ।

इति मुसललक्षणम् ।

अथ जलद्रोणीलक्षणम् ।

सिद्धान्तशेखरे,

स्वर्णदुर्वर्णताम्रैर्वा विदध्यात्पित्तलेन वा ।
चतुर्भारजलैः पूर्णा वृत्ता वा चतुरस्रिका ॥
दुर्वर्णो रूप्यम् ।
पार्श्वयोर्वलयोपेता ओष्ठकण्ठाविवर्जिता ।
जलद्रोणीतिविख्याता जलाधारमथोच्यते ॥ इति ।

इति जलद्रोणीलक्षणम् ।

अथ जलाधारलक्षणम् ।

तत्रैव,

उदरस्य चतुर्विंशत्यङ्गुला विस्तृतिर्मता ।
विंशत्यङ्गुलमुन्नत्या वदनं तु कलाङ्गुलम् ॥
ओष्ठमेकाङ्गुलं कुर्यात् व्यङ्गुलं वा क्वचित्समम् ।

यवत्रयेण च द्वाभ्यां कुर्यादुदरबन्धनम् ॥ इति ।

इति जलाधारलक्षणम् ।

अथ दीपलक्षणम् ।

वराहसंहितायाम्,

वामावर्त्तो मलिनकिरणः सस्फुलिङ्गोऽल्पमूर्त्तिः
क्षिप्रं नाशं व्रजति विमलस्नेहवर्त्त्यन्वितोऽपि ।
दीपः पापं कलयति फलं शब्दवान् वेपनश्च
व्याकीर्णार्चिर्विशलभमरुद्यश्च नाशं प्रयाति ॥
स्फुलिङ्गोऽग्निकणः । विशलभमरुत् शलभवायूपद्रवरहितः ।
दीपः संहतमूर्त्तिरायततनुर्निर्वेपनो दीप्तिमान्
निःशब्दो रुचिरप्रदक्षिणगतिर्वैदूर्यहेमद्युतिः ।
लक्ष्मीं क्षिप्रमभिव्यनक्ति सुचिरं यश्चोच्चकैर्दीप्यते
शेषं लक्षणमग्निलक्षणसमं योज्यं तथा युक्तितः ॥

इति दीपलक्षणम् ।

अथ शय्यासनलक्षणम् ।

वराहसंहितायाम्,

सर्वस्य सर्वकालं यस्मादुपयोगमेति शास्त्रमिदम् ।
राज्ञां विशेषतोऽतः शयनासनलक्षणं वक्ष्ये ॥
असनस्यन्दनचन्दनहरिद्रासुरदारुतिन्दुकीशालाः ।
काश्मर्यार्जुनपद्मकशाका वा शिंशपा च श्रुता ॥

असनः जीवकः, विजयसार इति प्रसिद्धः । स्यन्दनः तिनिशः, तिनस इति प्रसिद्धः । शालः सर्ज्जकः, साल इति प्रसिद्धः । काश्मरी श्रीपर्णी, कुमारीति प्रसिद्धा । अर्जुनं सौवीरं, बदरमित्यर्थः ।

अशनिजलानिलहास्तिप्रपातिता मधुविहङ्गकृतनिलयाः ।
चैत्यश्मशानपथजोर्ध्वशुष्कवल्लीनिबद्धाश्च ॥

अशनिर्वज्रम् । मधुविहङ्गकृतनिलयाः मधुपक्षिकाभिः पक्षिभिश्च कृतं निलयं स्थानं येषु ते । चैत्यः प्रसिद्धवृक्षः, प्रधानबौद्धदेवायतनस्थितश्च । पथजाः मार्गस्थिताः । ऊर्ध्वशुष्का ऊर्ध्वभागे शुष्काः । वल्लीभिः लताभिः निबद्धाः वेष्टिताः ।

कण्टकिनो ये च स्युर्महानदीसङ्गमोद्भवा ये च ।
सुरभवनजाश्च न शुभा ये चापरयाम्यदिक्पतिताः ॥

अपरप्रदेशः प्रतीचीदिक्, याम्यदिक् दक्षिणदिक् तत्र पतिताः ।

प्रतिषिद्धवृक्षनिर्मितशयनासनसेविनां कुलविनाशः ।
व्याधिभयव्ययकलहा भवन्त्यनर्था अनेकविधाः ॥
पूर्वच्छिन्नं यदि वा दारु भवेत्तत्परीक्ष्यमारम्भे ।
यद्यारोहेत्तस्मिन् कुमारकः पुत्र पशुदं तत् ॥
सितकुसुमपत्तवारणदध्यक्षतपूर्णकुम्भरत्नानि ।
माङ्गल्यान्यन्यानि च दृष्ट्वाऽऽरम्भे शुभं ज्ञेयम् ॥
कार्याङ्गुलं यवाष्टकमुदरासक्तं तुषैः परित्यक्तम् ।
अङ्गुलशतं नृपाणां महती शय्या जयाय कृता ॥

अयमर्थः । निस्तुषोदरासक्तयवाष्टकं मानाङ्गुलम् । तच्छताङ्गुलपरिमिता शय्या नृपाणां कार्या ।

नवतिः सैव षड्ना द्वादशहीना त्रिषट्हीना च ।
नृपपुत्रमन्त्रिबलपतिपुरोधसां स्युर्यथासङ्ख्यम् ॥

अस्यार्थः । नृपपुत्राणां नवत्यङ्गुलपरिमिता । मन्त्रिणां षड्ना नवतिः चतुरशीत्यङ्गुलानि तत्परिमिता । बलपतयः सेनापतयस्तेषां द्वादशहीना नवतिः अष्टसप्ततिः तत्सङ्ख्याङ्गुलपरिमिता । पुरोधसां त्रिषट्कहीना अष्टादशहीना नवतिः द्विस-

प्रतिः तत्सङ्ख्याङ्गुलपरिमिता । श्रय्या कार्येति सर्वत्र सम्बन्धः ।

अर्धमतोऽष्टांशोनं विष्कम्भो विश्वकर्मणा प्रोक्तः ।
आयामत्र्यंशसमः पादोच्छ्रायः सकुप्यशिराः ॥

अस्यार्थः । उक्तपरिमाणादष्टांशोनमर्धं विष्कम्भो व्यासः परिणाहः कर्तव्य इत्यर्थः । आयामत्र्यंशसमः पादोच्छ्रायः सकुप्यशिराः । उक्तदैर्घ्यस्य तृतीयांशेन समानः पादोच्छ्रायः पादोत्सेधः कर्त्तव्य इत्यर्थः । पादमस्तकानि च कुप्यघटितानि कर्त्तव्यानि । कुप्यं हेमरूप्यातिरिक्तं ताम्रपित्तलकादि । अयमत्र विवेकः । नृपशय्यायाः दैर्घ्यं शताङ्गुलानि । व्यासस्तु यवद्वयन्यूनचत्वारिंशदङ्गुलानि । पादोच्छ्रायश्च किञ्चिन्न्यूनयवत्रयाधिकत्रयस्त्रिंशदङ्गुलानि । नृपपुत्रशय्यायाश्च आयामः नवत्यङ्गुलानि, व्यासश्च यवत्रयाधिकैकोनचत्वारिंशदङ्गुलानि, पादोच्छ्रायश्च त्रिंशदङ्गुलानि । मन्त्रिशय्याया आयामः चतुरशीत्यङ्गुलानि, व्यासश्च यवद्वयन्यूनसप्तत्रिंशदङ्गुलानि, पादोच्छ्रायश्च अष्टाविंशत्यङ्गुलानि । सेनापतिशय्यायाश्च आयामः अष्टसप्तत्यङ्गुलानि, व्यासश्च एकयवाधिकचतुस्त्रिंशदङ्गुलानि, उच्छ्रायश्च चतुर्विंशत्यङ्गुलानि । पुरोहितशय्यायाश्च आयामो द्विसप्तत्यङ्गुलानि, व्यासश्च यवचतुष्टयाधिकैकत्रिंशदङ्गुलानि, उच्छ्रायश्च चतुर्विंशत्यङ्गुलानि ।

यः सर्वः श्रीपर्ण्या पर्यङ्को निर्मितः स धनदाता ।
असनकृतो रोगहरस्तिन्दुकसारेण वित्तकरः ॥
यः केवलशिंशपया विनिर्मितो बहुविधः स वृद्धिकरः ।
चन्दनमयो रिपुघ्नो धर्मयशोदीर्घजीवितकृत् ॥
पद्ममयः पर्यङ्कः श्रियमायुर्दीर्घमुत शुभं वृत्तम् ।
कुरुते शालेन कृतः कल्याणं शाकरचितश्च ॥
केवलचन्दनरचितं काञ्चनगुप्तं विचित्ररत्नयुतम् ।

अध्यास्ते पर्यङ्कं विबुधैरपि पूज्यते नृपतिः ॥
अन्येन समायुक्ता न तिन्दुकी शिंशपा च शुभफलदा।
न श्रीपर्णेन युतो न देवदारुवृक्षो न चाप्यसनः ॥
शुभदौ तु शाकशालौ परस्परं संयुतौ पृथक्त्वे च।
तद्वत्पृथक् प्रशस्तौ सहितौ हरिद्रकदम्बौ च ॥
सर्वस्यन्दनरचितो न शुभः प्राणान् हिनस्ति चाम्रयुतः।
असनोऽन्यदारुसहितः क्षिप्रं दोषान् करोति बहून् ॥
आम्रोदुम्बरचन्दनवृक्षाणां स्यन्दनाः शुभाः पादाः।
स्यन्दनाः स्यन्दनवृक्षकाष्ठानिर्मिताः। अथ वा स्यन्दनाः प्रस्रवत्क्षीरवृक्षकाष्ठानिर्मिता इत्यर्थः।
फलतरुणां शयनासनमिष्टफलं भवति सर्वेषाम् ॥
गजदन्तः सर्वेषां प्रोक्ततरूणां प्रशस्यते योगे।
कार्योऽलङ्कारविधिर्गजदन्तेन प्रशस्तेन ॥
दन्तस्य मूलपरिधिं द्विरायतं प्रास्य कल्पयेच्छेषम्।
अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित् ॥
द्विरायतं द्विगुणम्। अनूपं बहूदकप्रदेशः।
श्रीवृक्षवर्द्धमानच्छत्रध्वजचामरानुरूपेषु।
छेदेषु दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि ॥
वर्धमानः शरावः।
प्रहरणसदृशेषु जयो नन्द्यावर्त्ते मनष्टदेशाप्तिः।
प्रहरणमायुधं खड्गः।
स्त्रीरूपे त्वरिनाशो भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः ॥
भृङ्गारः करकः।
कुम्भेन निधिप्राप्तिर्यात्राविघ्नश्च दण्डेन।
कृकलासकपिभुजङ्गेष्वसुभिक्षव्याधयो रिपुबहुत्वम् ॥

गृध्रोलूकध्वाङ्क्षश्येनाकारेषु जनमरकः ।
पाशेऽथ वा कबन्धे नृपमृत्युर्जनविपत् स्रुते रक्ते ॥
स्रुते निर्गते ।
कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति ।
शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः ॥
अशुभशुभच्छेदा ये शयनेष्वपि ते तथा शुभदाः ।
ईषायोगे दारु प्रदक्षिणाग्रं प्रशस्तमाचार्यैः ॥
अपसव्येन दिगग्रे भवति भयं भूतसञ्जनितम् ।

ईषाशब्देन खट्वाया उभयपार्श्वभागस्थित्यर्हपट्टिकाद्वयमुच्यते । तत्र पट्टिकापादयोगे पूर्वोक्तवृक्षैकशाखाया मूलाग्रभागेन घटितस्य पट्टिकाद्वयस्य मध्ये या शाखाग्रभागघटिता पट्टिका सा खट्वाया दक्षिणभागपार्श्वे योजनीया । या च शाखामूलभागघटिता सा वामभागे योजनीया । उक्तवैपरीत्येन पट्टिकायोजने तच्छय्यायां च निद्राकर्त्तुर्भूतग्रहादिजनितं भयं भवतीत्याशयः ।

एकेनार्वाक्शिरसा भवति हि पादेन पादवैकल्यम् ।
द्वाभ्यां न जीर्यतेऽन्नं त्रिचतुर्भिः क्लेशवधबन्धाः ॥

एकेन पादेन अर्वाक्शिरसा अधोमुखेन मूलाग्रविपर्ययस्थितेन स्वामिनः पादवैकल्यं भवति । एतदुक्तं भवति । छिन्नायाः पूर्वोक्तवृक्षशाखाया यो मूलभागस्तेन पादघटनासमये पादमूलं कर्त्तव्यम् । एवं च यथा शाखामूलाग्रभागेनैव पादमूलाग्रभागः कर्त्तव्यस्तेन यदि शाखाग्रभागेन पादमूलं क्रियते ततः शय्यापादस्याधोमुखत्वं भवतीति ।

सुषिरेऽथ वा विवर्णे ग्रन्थौ पादस्य शीर्षगो व्याधिः ।
पादे कुम्भे यस्य ग्रन्थौ तस्मिन्नुदररोगः ॥
कुम्भाधस्ताज्जङ्घा तत्र कृतो जङ्घयोः करोति भयम् ।

तस्याश्चाधारोऽधः क्षयकृत् द्रव्यस्य तत्र कृतः ॥
खुरदेशे यो ग्रन्थिः खुरिणां पीडाकरः स निर्दिष्टः ।
ईषाशीर्षणयोश्च त्रिभागसंस्थो भवेन्न शुभः ॥

पादस्य छिद्रे विवर्णे वर्णान्तरयुक्ते सति, अथ वा तत्र ग्रन्थौ सति भर्तुः शिरोव्याधिर्भवति । ग्रन्थिरतिकाठिन्यभागः । कुम्भः छिद्राधोभागः । खुरिणामश्वादीनाम् । ईषा व्याख्याता । शीर्षणा शिरःकाष्ठम् । तयोः स्वमानात्त्रिभागे तृतीयेऽशे ग्रन्थिर्न शुभः । चकारात्पादभागपट्टिकाकाष्ठतृतीयांशेऽपि ।

निष्कुटमथ कोलाक्षं शूकरनयनं च वत्सनाभं च ।
कीलकमन्यद्बन्धुकमिति कथिताश्छिद्रसङ्क्षेपः ॥
घटवच्छुषिरं मध्ये सङ्कटमास्ये च निष्कुटं छिद्रम् ।
निष्पावमाषमात्रं नीलं छिद्रं च कोलाक्षम् ॥
शूकरनयनं विषमं विवर्णमध्यर्धपर्वदीर्घं च ।
वामावर्त्तं भिन्नं पर्वमितं वत्सनाभाख्यम् ॥
कीलकसंज्ञं कृष्णं बन्धुकमिति यद्भवेद्विनिर्भिन्नम् ।
दारुसवर्णं छिद्रं न तथा पापं समुद्दिष्टम् ॥
निष्कुटसंज्ञे द्रव्यक्षयस्तु कोलेक्षणे कुलध्वंसः ।
शस्त्रभयं शूकरके रोगभयं वत्सनाभाख्ये ॥
कीलकबन्धुकसंज्ञं कीटैर्विद्धं च न शुभदं छिद्रम् ।
सर्वग्रन्थिप्रचुरं सर्वत्र न शोभनं दारु ॥
एकद्रुमेण धन्यं वृक्षद्वयनिर्मितं च धन्यतरम् ।
त्रिभिरात्मजवृद्धिकरं चतुर्भिरर्थो यशश्चाग्र्यम् ॥
पञ्चवनस्पतिरचिते पञ्चत्वं याति तत्र यः शेते ।
षट्सप्ताष्टतरूणां काष्ठैर्घटिते कुलविनाशः ॥ इति ।

इति शय्यासनलक्षणम् ।

अथ भद्रपीठलक्षणम् ।

सिद्धान्तशेखरे,

कलाङ्गुलोन्नतं कुर्यात्क्षीरवृक्षविनिर्मितम् ।
द्वात्रिंशदङ्गुलास्तीर्णं दैर्घ्यं तत्त्रिगुणं मतम् ॥
कमलाङ्कं चतुष्पादं भद्रपीठं कनिष्ठिकम् ।
त्रितयं मध्यमं श्रेष्ठं चतुरङ्गुलवृद्धितः ॥ इति ।

इति भद्रपीठलक्षणम् ।

भद्रासनं च छत्रं च बालव्यजनमेव च ।
लक्षणोक्तानि कार्याणि नूतनानि नृपस्य तु ॥

इति वचनेन नूतनराज्ञो भद्रासनादीनि लक्षणोपेतानि नूतनानि कर्त्तव्यानीत्युक्तम् । तत्र किंलक्षणोपेतानि तानि कर्त्तव्यानीति तल्लक्षणान्युच्यन्ते । तत्र भद्रासनलक्षणमुक्तम्—

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

भद्रासनं नरेन्द्रस्य क्षीरवृक्षेण कारयेत् ।
उच्छ्रायश्च तथा तस्य अध्यर्धकरसम्मितः ॥
अध्यर्धकरः सार्धकरस्तेन परिमितः ।
हस्तत्रयं तथा किन्तु विस्तारेण च कारयेत् ।
आयामस्तस्य कर्त्तव्यो विस्तारेणार्द्धसम्मितः ॥
चतुरस्रं च कर्त्तव्यं राज्ञो भद्रासनं तथा ।
अष्टास्रं च तथा वृत्तं न च दीर्घं भृगूत्तम ॥
सुवर्णरूप्यताम्रैश्च चित्रं कार्यं विशेषवत् ।
रत्नैः प्रशस्तैर्न तथा न रत्नप्रतिरूपकैः ॥
चत्वारः पुरुषास्तत्र विन्यस्ता भृगुनन्दन ।
द्विगुणाश्च तथा सिंहाः स्तम्भतो द्विगुणास्तथा ॥

भद्रासनं तत्र भवेन्नृपस्य कुलेन पूर्णस्य सुखं परार्द्ध्यम्।
वैय्याघ्रचर्मास्तरणं सुखार्थं वरासनं तस्य समामनन्ति॥इति।

इति भद्रासनलक्षणम्।

अथ चामरलक्षणम्।

विष्णुधर्मोत्तरे,

पुष्कर उवाच।

चमरीवालसम्भूताः शशाङ्कांशुसमप्रभाः।
संहताः स्निग्धदीर्घाश्च तथाल्पास्थिनिबन्धनाः॥
सुशब्दाश्चामरा राज्ञां विजयारोग्यवर्द्धनाः।
दण्डश्च चामरे कार्यो रूप्यरुक्ममयस्तथा॥

रुक्मं सुवर्णम्।

प्रवालवैडूर्यमयो मध्ये च कनकान्वितः।
क्षीरवृक्षस्य वा कार्यो रूप्यरुक्मनिबन्धनः॥
रत्नैः प्रशस्तैश्चित्रो वा काञ्चनस्य प्रशस्यते।
चन्दनस्याथ दन्तस्य शाकस्याप्यथ वा भवेत्॥
अर्द्धहस्तान्न चान्यूनो अध्यर्धान्न तथाऽधिकः।

अध्यर्धात्तथाधिको न सार्धहस्तपरिमितो दण्डः कार्य इत्यर्थः।

कर्त्तव्यं चामरं राज्ञां नवं भार्गव रञ्जितम्॥

रञ्जितमारक्तम्।

आपीतवर्णं तु भवेत् प्रशस्तं सांवत्सरामात्यपुरोहितानाम्।
नरेन्द्रपत्नीयुवराजसैन्यबालस्य शेषस्य जनस्य कृष्णम्॥ इति।

वराहसंहितायाम्,

देवैश्चमर्यः किल बालहेतोः सृष्टा हिमक्ष्माधरकन्दरेषु।
आपीतवर्णाश्च भवन्ति तासां कृष्णांश्च लाङ्गूलभवाः सिताश्च॥

स्नेहो मृदुत्वं बहुवालता च वैशद्यमल्पास्थिनिबन्धनत्वम् ।
शौक्ल्यं च तेषां गुणसम्पदुक्ता विद्धाल्पलुप्तानि न शोभनानि॥

स्नेहः स्निग्धता। वैशद्यं केशानां निर्मलता परस्परमश्लेषश्च। अल्पास्थिनिबन्धनत्वं यत्रास्थिकेशाः संलग्नास्तिष्ठन्ति तस्यास्थ्न अल्पत्वम् । विद्धाल्पलुप्तानि विद्धाः खण्डिताः अल्पाश्च लुप्ताः परस्पराश्लिष्टाः केशाः येषु तानि । येषु चामरेषु खण्डिताल्पाश्लिष्टाः केशास्तिष्ठन्ति तानि न शस्तानीत्यर्थः ।

अध्यर्धहस्तप्रमितोऽस्य दण्डो
हस्तोऽथ वाऽरत्निसमोऽथ कार्यः ।
काष्ठाच्छुभात्काञ्चनरूप्यगुप्तो
रत्नैर्विचित्रैश्च हिताय राज्ञाम् ॥
यष्ट्यातपत्राङ्कुशवेत्रचाप-
वितानकुम्भध्वजचामराणाम् ।
व्यापीतताम्रा मधुकृष्णवर्णा
वर्णक्रमेणैव हिताय दण्डाः ॥

व्यापीताः श्वेताः ब्राह्मणस्य, ताम्राः क्षत्रियस्य, मधुवर्णाः पीतवर्णाः वैश्यस्य, कृष्णवर्णाः शूद्रस्येति । अत एव राजविजयेऽप्युक्तम्—

यष्टिकुन्तध्वजच्छत्रवेत्रचामरधन्वनाम् ।
श्वेतरक्तापीतकृष्णा दण्डा वर्णक्रमाच्छुभाः ॥ इति ।

मातृभूधनकुलक्षयावहा
रोगमृत्युजननाश्च पर्वभिः ।
द्व्यादिभिर्द्विकविवर्द्धितैः क्रमात्
द्वादशान्तविरतैः समैः फलम् ॥

एते दण्डा द्व्यादिभिः द्विप्रभृतिभिर्द्विकविवर्द्धितैर्द्वाभ्यां प-

र्वभ्यां विवर्द्धितैः, द्वादशान्तविरतैः द्वादशान्ते विरतैः समाप्तैः, समैः पर्वभिः युक्ता मातृक्षयादिफलं क्रमात् प्रयच्छन्ति । तद्यथा, द्वाभ्यां पर्वभ्यां युक्ता दण्डा मातृक्षयं मातृमरणं कुर्वन्ति । चतुर्भिः पर्वभिः भूमिनाशं, षड्भिर्धनक्षयम्, अष्टभिः कुलक्षयं, दशभी रोगं, द्वादशभिर्मृत्युजनना इति ।

यात्राप्रसिद्धिर्द्विषतां विनाशो
लाभः प्रभूतो वसुधागमश्च ।
वृद्धिः पशूनामभिवाञ्छितापि-
स्त्र्याद्यैरयुग्मैश्च महीश्वराणाम् ॥

पूर्वोक्तरीत्यैव त्र्याद्यैर्द्विकविवर्द्धितैरसमैः पर्वभिर्युक्ता दण्डाः क्रमात् यात्राप्रसिद्ध्यादिफलं प्रयच्छन्ति । तद्यथा –त्रिभिः पर्वभिर्यात्रायाः प्रसिद्धिर्विजयः, पञ्चभिः शत्रुनाशः, सप्तभिर्द्रव्यादीनां बहुलाभः, नवभिर्भूम्यागमः, एकादशभिः पशुवृद्धिः, त्रयोदशभिः अभिवाञ्छितप्राप्तिः ।

इति चामरलक्षणम् ।

अथ छत्रलक्षणम् ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।
हंसपक्षैर्विरचितं मयूरस्य शुकस्य वा ।
पक्षैर्वाऽथ बलाकायाश्छत्रं राज्ञां प्रशस्यते ॥
मिश्रपक्षं न कर्त्तव्यं हीनापरिमितं तथा ।
चतुरस्रं तु कर्त्तव्यं ब्राह्मणस्य भृगूत्तम ॥
वृत्तं राज्ञः प्रशस्तं स्यात् शुक्लवस्त्रविभूषितम् ।
सितं दुकूलसच्छन्नं पताकाभिर्विभूषितम् ॥

एकस्मिन् दिग्विभागे तु कार्याश्चन्द्रांशुनिर्मलाः ।
चतस्रस्तस्य धर्मज्ञ पताका रुक्मभूषिताः ॥
दण्डश्चामरवत्कार्यो वैणवस्य प्रशस्यते ।
त्रिचतुष्पञ्चषट्सप्तअष्टपर्वः प्रशस्यते ॥
दशद्वादशभिर्वापि पर्वभिः परिवर्जयेत् ।
छत्रदण्डाग्रपर्वाणां दण्डः सर्वत्र शस्यते ॥
धारयन्ति च दण्डं वै वैणवं गृहमेधिनः ।
राज्ञां प्रशस्तः षड्हस्तश्छत्रदण्डः प्रशस्यते ॥
अर्धपञ्चमहस्तस्तु महिषीयुवराजयोः ।
सेनापतिपुराध्यक्षसांवत्सरपुरोहितैः ॥
पञ्चहस्तस्तु कर्त्तव्यश्छत्रदण्डो भृगूत्तम ।
चतुर्हस्तस्तु कर्त्तव्यो मया येऽत्र न कीर्त्तिताः ॥
व्यासो दण्डार्धमानेन सदा छत्रस्य शस्यते ।
छत्रं विभूषयेद्राज्ञामर्धचन्द्रदिवाकरैः ॥
वज्रेन्द्रनीलस्फटिकैरुपेतं
वैडूर्यमुक्ताफलसुप्रवालैः ।
विभूषितं रश्मियुतं प्रशस्तं
सदाऽऽतपत्रं तु महीपतीनाम् ॥ इति ।

गर्गसंहितायाम्,

हंसकुक्कुटपक्षैश्च मायूरैः सारसैस्तथा ।
निचितं पट्टसञ्छन्नं शुक्लं मुक्ताफलान्वितम् ॥
पट्टं दुकूलम् ।
छत्रं स्फटिकमूलं च तत्र दण्डं तु पद्मरम् ।
कारयेद्धेमसञ्छन्नं नवपर्वनगान्वितम् ॥
तदातपत्रं नृपतेः कल्याणातिजयावहम् । इति ।

नवपर्वान्वितं नगान्वितं च। नगान्वितं सप्तपर्वान्वितम्।

इति छत्रलक्षणम्।

अथ पट्टलक्षणम्।

वराहसंहितायाम्,

विस्तरतो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः।
तत्सङ्क्षेपात्क्रियते मया च सकलार्थसम्पन्नम्॥
पट्टः शुभदो राज्ञामप्यष्टावङ्गुलानि विस्तीर्णः।
सप्त नरेन्द्रमहिष्याः षट् युवराजस्य निर्दिष्टः॥
चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मेध्यः।
यश्च प्रसादपट्टः पञ्चैते कीर्त्तिताः पट्टाः॥
सर्वे द्विगुणायामा मध्यादर्धेन पार्श्वविस्तीर्णाः।
सर्वे च शुद्धकाञ्चनविनिर्मिताः श्रेयसो वृद्ध्यै॥
यद्दर्शने पीततरं निकषे च रक्तं
वह्नौ सुतप्तमतिरक्ततरं विभाति।
छेदे च चिक्कणवपुर्विशदं च भङ्गे
यत्ताडितं नमति तत्कनकं प्रशस्तम्॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिवमहिष्योः।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया॥
क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।
वृद्धिजयौ भूमिपतेस्तथा प्रजानां च सुखसम्पत्॥
जीवितराज्यविनाशं करोति मध्ये व्रणः समुत्पन्नः।
मध्यस्फुटितस्त्याज्यो विघ्नकरः पार्श्वयोः स्फुटितः॥
अशुभनिमित्ते पट्टे शास्त्रज्ञः शान्तिमादिशेद्राज्ञाम्।
शस्तानिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति॥ इति।

इति पट्टलक्षणम्।

अथ रत्नलक्षणम् ।

रत्नान्येतानि धार्याणि सर्वाण्येव महीभुजा ।
सुवर्णप्रतिबद्धानि जयारोग्यसमृद्धये ॥

इति विष्णुधर्मोत्तरवचनेन,

रत्नानि धारयेत्कोशे शुद्धानि गुणवन्ति च ।
सम्भूतिं च तथा जातिं गुणं तेषां परीक्ष्य च ॥
परीक्षापरिशुद्धानां रत्नानां पृथिवीभुजा ।
धारणं सङ्ग्रहो वापि कार्यः श्रियमभीप्सता ॥
रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन ।
यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः ॥

इति सङ्ग्रहगरुडपुराणवराहसंहितावचनैश्च राज्ञा परीक्ष्य रत्नधारणं कर्त्तव्यमित्युक्तम् । तत्र च किंलक्षणानि रत्नानि धार्याणि किंलक्षणानि न धार्याणि । कथञ्च तेषां परीक्षा कर्त्तव्येत्यतो रत्नपरीक्षा प्रस्तूयते ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

वज्रं मरकतं चैव पद्मरागं च मौक्तिकम् ।
इन्द्रनीलं महानीलं वैडूर्यमथ सस्यकम् ॥
चन्द्रकान्तं सूर्यकान्तं स्फटिकं पुलकं तथा ।
कर्केतनं पुष्परागं तथा ज्योतिरसं द्विज ॥
स्फटिकं राजावर्त्तं च तथा राजमयं शुभम् ।
सौगन्धिकं तथा सङ्ख्यं शङ्खं ब्रह्ममयं तथा ॥
गोमेदं रुधिराक्षं च तथा भल्लातकं द्विज ।
धूलीमरकतं चैव तुत्थकं शेषमेव च ॥
वेलुं प्रवालकं चैव गिरिवज्रं च भार्गव ।

भुजङ्गेशमणिं चैव तथा वज्रमणिं शुभम् ॥
टिट्टिभं च तथा पिच्छं भ्रामरं च तथोत्पलम् ।
रत्नान्येतानि धार्याणि सर्वाण्येव महीभुजा ॥
सुवर्णप्रतिबद्धानि जयारोग्यसमृद्धये ।
तेषां गुरुत्वं रागश्च स्वच्छत्वं रश्मिमालिता ॥
अन्तःप्रभत्वं वैमल्यं सुसंस्थानत्वमेव च ।
गुणवन्तो विनिर्दिष्टा धार्यास्ते गुणसंयुताः ॥
खण्डाः सशर्करा ये च निष्प्रभा मलिनास्तथा ।
न ते धार्या नरेन्द्राणां जयश्रीजीवितैषिणाम् ॥
समस्तरत्नवर्गेऽपि वज्रधारणमिष्यते ।
अम्भस्तरति यद्वज्रमभेद्यं विमलं च यत् ॥
तथा च शुद्धं षट्कोणं लघु भार्गवनन्दन ।
प्रभा च शक्रचापाभा यस्यार्काभिमुखी भवेत् ॥
तं वज्रं धारयन् राजा सर्वान् जयति शात्रवान् ॥
शुकपक्षनिभः स्निग्धः कान्तिमान् विमलस्तथा ।
सुवर्णचूर्णसङ्काशैः सूक्ष्मैर्बिन्दुभिरन्वितः ॥
शस्तो मरकतो राम गम्भीरश्चोन्नतस्तथा ।
धार्यश्च पृथिवीशानां सर्वोपद्रवनाशनः ॥
कुरुविन्दाद्भवेज्जन्म तथा सौगन्धिकात् द्विज ।
स्फटिकात्पद्मरागाणां श्रेष्ठास्ते ह्युत्तरोत्तरम् ॥
जलरङ्गा भवन्तीह कुरुविन्दभवाश्च ये ।
कषायरङ्गा निर्दिष्टा ये च सौगन्धिकोद्भवाः ॥
स्वच्छाश्च रागवन्तश्च विज्ञेयाः स्फटिकोद्भवाः ।
मुक्ताफलाः शुक्तिभवा बहवो मत्स्यजास्तथा ॥
उत्कृष्टा न तथा तेभ्यो ये तु शङ्खोद्भवा द्विज ॥

तेभ्यः प्रशस्ता विज्ञेया नागकुम्भसमुद्भवाः ।
निष्प्रभास्ते समुद्दिष्टाः श्रेष्ठाः क्रोडसमुद्भवाः ।
तेभ्यो वेणुदलाः श्रेष्ठास्तेभ्यो भुजगसम्भवाः ।
तेभ्योऽपि भुवि दुष्प्रापं मौक्तिकं मेघसम्भवम् ।
धारणात्तस्य नृपतेः सर्वसिद्धिः प्रकीर्त्तिता ॥
मौक्तिकानां तु सर्वेषां वृत्तत्वं गुण उच्यते ।
स्वच्छता च सुशुक्लत्वं महत्त्वं च भृगूत्तम ॥
इन्द्रनीलस्तु यः क्षीरं राजते भाजने स्थितम् ।
रञ्जयेत्स्वप्रभावेण तममूल्यं विनिर्दिशेत् ।
नीलरक्तं तु वैडूर्यं सर्वतः श्रेष्ठमुच्यते ॥
सर्वेषामेव रत्नानां धार्यं कर्केतनं स्मृतम् ।
पुष्परागं तथा राम ये चान्ये कीर्त्तिता मया ॥
प्रशस्तरत्नैर्भूपानां मुकुटान्यङ्गदानि च ।
हाराणि राम कार्याणि केयूराभरणानि च ॥
अप्रशस्तानि रत्नानि वर्जनीयानि दूरतः ।
सर्वरत्नोत्तमं राजा सुवर्णं मलिनं तथा ।
न धारयेत्स धर्मज्ञः सुशुद्धं धारयेत्सदा ॥
धृतिः प्रशस्ता भृगुवंशचन्द्र
रत्नोत्तमानां सततं नराणाम् ।
रत्नांशुदग्धात्तु नरस्य देहा-
दनर्थमाशु प्रशमं प्रयाति ॥ इति ।

इति रत्नलक्षणम् ।

अथ कस्तूरीलक्षणम् ।

निघण्टुराजे,

कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात् ।

नेपालेऽपि च काश्मीरे कामरूपे च जायते ॥
साप्येका खरिका ततश्च तिलका ज्ञेया कुलित्था परा
पिण्डाऽन्यापि च नायिकेति च परा या पञ्चभेदाभिधा ।
सा जाता मृगनाभितः क्रमवशादेशात्क्षितीशोचिता ·
पक्षान्त्यादिदिनत्रयेषु जनिता कस्तूरिका स्तूयते ॥
चूर्णाकृतिस्तु खरिका तिलका तिलाभा
कौलित्थबीजसदृशी च कुलित्थका हि ।
स्थूला ततः कियदियं किल पिण्डका
स्यात्तस्याश्च किञ्चिदधिका यदि नायिका सा ॥
तिक्ता स्वादे पिञ्जरा केतकीनां
गन्धं धत्ते लाघवं तोलने च ।
याऽप्सु न्यस्ता नैव वैवर्ण्यमेयात्
कस्तूरी सा राजयोग्या प्रशस्ता ॥
या नूनं केतकीनां वहति परिमलं वर्णतः पिञ्जराभा
स्वादे तिक्ता कटुर्वा लघुरथ तुलिता मर्दिता चिक्कणा या ।
दाहं या नैति वह्नौ चिमिचिमिकुरुते चर्मगन्धा हुताशे
·सा शुद्धा शोभनीया वरमृगतनुजा राजयोग्या प्रदिष्टा ॥
या स्निग्धा धूम्रगन्धा वहति विनिहिता पीततां पाथसोऽन्त-
र्निःशेषं या निविष्टा भवति हुतवहे भस्मसादेव सद्यः ।
या च न्यस्ता तुलायां कलयति गुरुतां मर्दिता रूक्षतां च
ज्ञेया कस्तूरिकेयं खलु कृतमतिभिः कृत्रिमा नैव सेव्या ॥ इति।
वृन्दे तु विशेषः ।
करतलजलमध्ये स्थापयित्वा महद्भिः
पुनरपि तदवश्यं चिन्तनीयं मुहूर्त्तम् ।
भवति यदि सरक्तं तज्जलं पीतवर्णं

न भवति मृगनाभिः कृत्रिमोऽसौ विकारः ॥ इति ।

निघण्टुराजे,

बाले जराति च हरिणे क्षीणे रोगिणि च मन्दगन्धयुता ।
कामातुरे च तरुणे कस्तूरी बहलपरिमला भवति ॥ इति ।

इति कस्तूरीलक्षणम् ।

इति श्रीवीरमित्रोदये लक्षणप्रकाशे राजचक्रलक्षणप्रकरणम् ।

अथ नानायुधलक्षणप्रकरणम् ।

इह—

तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः ।

इति मनुवचनेन राज्ञा सर्वोपायै राष्ट्ररक्षा कार्येत्युक्तम् । सा च राष्ट्रपीडाकरशत्रुहननमन्तरेणाशक्येति शत्रुहननं कर्त्तव्यमित्यवगम्यते । तत्र यद्यपि अनेकगजवाजिपदातिरथादिभिः समेता पृथुला सेनास्ति, तथापि शस्त्रैर्विना शत्रुवधः कर्त्तुं न शक्यते । अतः शत्रुवधार्थं स्वशरीरसंरक्षणार्थं च युधि राज्ञा तत्सहायैश्च नानायुधानि धार्याणि । तानि च किंलक्षणोपेतानीत्यतस्तल्लक्षणान्युच्यन्ते ।

तत्रादौ चापलक्षणमुच्यते—

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

धनुर्द्रव्यत्रयं लोहं शृङ्गं दारु च भार्गव ।
ज्याद्रव्यत्रितयं चर्म वंशभङ्गास्त्वचस्तथा ॥
वंशभङ्गः त्वक्सहितो वंशखण्डः ।
वंशत्वग्वंशचापं तु कर्त्तव्यं भृगुनन्द ।
अन्येषु राम चापेषु शेषद्रव्यमयं भवेत् ॥
प्रमाणं नात्र निर्दिष्टं चापयोः शार्ङ्गलोहयोः ।
दारुचापप्रमाणं तु श्रेष्ठं हस्तचतुष्टयम् ॥
तदर्धसमहीने तु प्रोक्ते मध्यकनीयसी ।

तदर्धसमहीने, तस्य चतुर्हस्तपरिमितधनुषः अर्धहीनमर्धहस्तहीनं सार्धहस्तत्रयमितं धनुः मध्यमम्, समहीनं सार्धत्रिहस्तधनुषः अर्धहस्तहीनं हस्तत्रयमितं धनुः कनिष्ठं प्रोक्तमित्यर्थः।

मुष्टिग्राह्याणि वृत्तानि मध्ये सर्वाणि कारयेत् ॥

स्वल्पा कोटिस्तु वार्क्षाणां शार्ङ्गलोहमये द्विज ।
कामिनीभ्रूलताकारा कोटिः कार्या सुसंस्कृता ॥

कोटिर्धनुषोऽग्रभागः । वार्क्षाणां दारूणामित्यर्थः । शार्ङ्ग-लोहमये धनुषि दारुणा कोटिः कार्येत्यन्वयः ।

पृथग्वा दारुमिश्रे वा लोहशार्ङ्गे तु कारयेत् ।

धनुषी इति शेषः ।

शार्ङ्गं स्नायुचितं कार्यं रुक्मबिन्दुविभूषितम् ॥
कुटिलं स्फुटितं चापं सच्छिद्रं तु न शस्यते ।

कुटिलम् अनुपयुक्तभागे ।

हस्तिभग्ना द्रुमा ये च विद्युद्दग्धास्तथा च ये ॥
आरामदेवतावेश्मतापसाश्रमसम्भवाः ।
श्मशानसम्भवा ये च न ते कार्याः कथञ्चन ॥
प्राणिनां यः सजात्येन शृङ्गी युधि निपातितः ।
तच्छृङ्गं वर्जयेच्चापे नित्यं शार्ङ्गविचक्षणः ॥
लोहानि राम चत्वारि शस्यन्ते चापकर्मणि ।
सुवर्णं रजतं ताम्रं तथा कृष्णायसं द्विज ॥
काञ्चनं चापरत्नं तु सरत्नमपि कारयेत् ।
माहिषं शारभं शार्ङ्गं रौहीजं चापि कारयेत् ॥

शरभो मृगजातिभेदः । तल्लक्षणं चोक्तम्-

वैद्यकतन्त्रे,

काश्मीरदेशे शरभोऽष्टपात्स्या-
दुत्साहयुक्तश्चतुरूर्ध्वपादः ।
उष्ट्रप्रमाणः स महाविषाणः
ख्यातो वनस्थश्च महामृगाख्यः ॥ इति ।

वार्क्षं चन्दनजं श्रेष्ठं वैतसं धान्वनं तथा ।

शालशाल्मलिशाखानां ककुभस्याञ्जनस्य च ॥

. शाल्मलिः पिच्छिला। सेंवरि इति प्रसिद्धः। शाकः सागवन इति प्रसिद्धः। ककुभोऽर्जुनः। कौह इति प्रसिद्धः।

वंशस्य च महाभाग सर्वश्रेष्ठतमं विदुः।
शरद्गृहीतैः काष्ठैस्तु चापं कार्यं प्रयत्नतः ॥
वंशानामपि तत् श्रेष्ठं यत्र गङ्गा महानदी।
गङ्गातीरोत्पन्नवंशानां श्रेष्ठं धनुरित्यर्थः। एवमग्रेऽपि ज्ञेयम्।
शालानामपि तत् श्रेष्ठं गोमती यत्र भार्गव।
वितस्ताकूलजं श्रेष्ठं वेतसानां तथैव च ॥
एवं द्रव्यमयं कार्यं चापं लक्षणसंयुक्तम्।
व्रणानां लक्षणं चास्य भविष्यति च खड्गवत् ॥
सुखग्राह्यं दृष्टिकान्तं शरमोक्षसुखं तथा।
श्लक्ष्णं श्लिष्टं सुसंस्थानं सारवन्तं सुसंहतम् ॥
श्लक्ष्णं सुसृष्टसंस्थानं सारवन्तं सुसंमहत्—इति पाठान्तरम्।
अवनामिमुखं नित्यं पुंसामतिबलोत्कटम्।
एतदीदृशकं श्रेष्ठं चापरत्नं विदुर्बुधाः ॥
राज्ञां चापस्य कर्त्तव्या पूजा बाणवरस्य च।
नित्यं देवकुले राम खड्गस्य च विशेषतः ॥
अयसश्चापवंशस्य शरस्याथ शरो भवेत्।
शरवंशौ ग्रहीतव्यौ शरत्काले भृगूत्तम ॥
शराः किरातजाः श्रेष्ठाः काञ्चीपुरसमीपतः।
तेभ्योऽपि ते श्रेष्ठतमाः स्कन्दजन्ममहीभवाः ॥
स्निग्धा निमग्नपर्वाणः सारवन्तः समाहिताः।
ऋजवो मधुवर्णाभाः सुजाताः शरजा दृढाः ॥
स्नायुश्लिष्टाः सुनेत्राश्च सुमुखाः कलनासमाः।

तैलधौताश्च कर्त्तव्या रुक्मपुङ्खविभूषणाः ॥
चैलपृष्ठाश्च कर्तव्या—इति पाठान्तरम् ।
तथा विषमपर्वाणः फलैश्च व्रणवर्जितैः ।
एकत्रिपुङ्खं कर्त्तव्यं राजहंसच्छदोत्तरम् ॥
रुक्मं पुङ्खं सुवर्णाग्रमयःफलमनुत्तमम् ।
स्नायुबद्धफलं तस्य रुक्मबद्धं तु कारयेत् ॥
वज्रैश्च लक्षणोपेतैश्चित्रितं तं तु कारयेत् ।
ग्रहणं तस्य कर्तव्यं सांवत्सरकरान्नृपैः ॥
तस्य पूजा सदा कार्या साऽभिषेकसमा भवेत् ।
यात्रायामभिषेके च माङ्गल्येषु च कर्मसु ॥
सप्ताङ्गं तु वरं चापं सप्ताङ्गं तत्तु कारयेत् ।
सप्ताङ्गं सप्तपर्वान्वितम् ।
माङ्गल्यं तन्नरेन्द्राणां कथितं भृगुनन्दन ॥

ये चापरत्नं विनतं तु भूपाः
सुवर्णरत्नोपचितं सदैव ।
बाणेन साकं परिपूजयन्ति
भवन्ति ते राम विपन्नदुखाः ॥

विस्तरेण धनुर्लक्षणमुक्तम्—
त्रैयम्बके धनुर्वेदे,
धनुर्विधिं प्रवक्ष्यामि शृणु वत्स यथाक्रमम् ।
यादृशं कारयेच्चापं तादृशं च वदाम्यहम् ॥
प्रथमं यौगिकं चापं क्रियाचापं द्वितीयकम् ।
शलाकायां तृतीयं च ज्याघातेन चतुर्थकम् ॥
पञ्चमं श्रमिकं चापं षष्ठं साङ्ग्रामिकं स्मृतम् ।
सप्तमं दूरपातेषु दृढभेदेषु चाष्टमम् ॥

विकर्षे नवमं प्रोक्तं फलार्थे दशमं स्मृतम्।
धनुषं दशविख्यातं शुभमागमसम्मतम्॥
तेषां मध्ये शृणु वत्स मानं यस्य च यादृशम्।
अर्द्धपञ्चमहस्तं तु श्रेष्ठं निर्दिश्यते धनुः॥

अर्धपञ्चमहस्तम्, अर्धो हस्तः पञ्चमो येषां हस्तानां तत्, सार्धचतुष्टयहस्तपरिमितमित्यर्थः।

तद्भवेद्वैविकं चापं शङ्करेण तु धारितम्।
ततः परशुरामेण ततो रामेण धारितम्॥
भरतेन च द्रोणेन द्रोणाचार्य्यार्जुनेन च।
अर्जुनात्सात्यकिश्चैव देवचापं निवर्त्तते॥

चापम् अग्रहीदिति शेषः। ततो निवर्त्तते, अग्रे कोऽपि न गृहीतवानित्यर्थः।

चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम्।
तद्भवेन्मानवं चापं सर्वलक्षणसंयुतम्॥
त्रिपर्व पञ्चपर्व वा सप्तपर्व च वा भवेत्।
नवपर्व च कोदण्डं भवतीति चतुर्विधम्॥
त्रिपर्व कुरुते श्रेयः पञ्चपर्वार्थ आगमम्।
सर्वलक्षणसम्पूर्णं सप्तपर्व जयावहम्॥
नवपर्व च कोदण्डं नातिश्रेयो न मध्यम्।
चतुष्पर्व च षट्पर्वमष्टपर्व विवर्जयेत्॥
अस्त्रं चैव प्रमाणेन ज्ञेयं नवितास्तिभिः।
द्वादशाङ्गुलमानेन विस्तिः परिकीर्त्तिता॥
उभे जिह्वासने कुर्यादङ्गुलत्रयमुन्नते।
ईदृशं कारयेच्चापं चापानां चैव नायकम्॥
व्याख्यातं विविधं चापमस्त्रं कोदण्डमेव च।

कुमार उवाच ।

विज्ञप्तिं शृणु देवेश धनुषां च प्रमाणतः ।
ब्रूहि मे विविधं चापं श्रमचापं च कीदृशम् ॥
श्रीश्वर उवाच ।
शृणु पुत्रक सङ्गृह्य त्रिषु लोकेषु दुर्लभम् ।
सर्वेषां चैव चापानां प्रमाणं कथयाम्यहम् ॥
चतुःसर्षपो यवः प्रोक्तः कण्डिका च चतुर्यवा ।
माषकश्चतुरष्टौ च तालो द्वादशमाषकः ॥
चत्वारोऽष्टौ, द्वादश, कण्डिका माष इत्यर्थः ।
पञ्चतालाः पलं चैव तत्पलैश्च पलं शतम् ।
तेन शास्त्रेण चापानां प्रमाणं चैव लभ्यते ॥
ततो न सिध्यते चापं गुणे भारं प्रदापयेत् ।

चापं गुणे न सिध्यते, गुणे आकर्षणयोग्यं न भवतीत्यर्थः । भारं विनेत्यर्थादुक्तं भवति । ततः कारणात् भारं प्रदापयेत् । बलानुरूपं यथाक्रमं भारं दद्यादित्यर्थः ।

तावद्भारः प्रदातव्यो यावद्भारसहं भवेत् ।
द्विशतं यौगिकं चापं त्रिशतं च क्रियाधनुः ॥
चतुःशतं शलाकायां धनुश्चैव तदा स्मृतम् ।
वामं सप्तशतं चापं दक्षिणं द्विशताधिकम् ॥
उभे सव्यापसव्ये च ताभ्यां वै कारयेच्छुभम् ।

उभे सव्यापसव्ये, धनुषी इति शेषः ।

सङ्ग्रामेषु धनुर्वत्स कृत्वा सप्तशतैरपि ।
दृढस्फोटे सहस्रेण विकर्षे द्वादशैः शतैः ॥
द्विसहस्रं च वै पुत्र फलार्थे कारयेद्धनुः ।
ईदृशं च प्रमाणं च धनुषां कीर्त्तितं मया ॥ इति ।

वीरचिन्तामणौ धनुर्वेदे,

प्रथमं यौगिकं चापं युद्धचापं द्वितीयकम् ।
निजबाहुबलोन्मानं किञ्चिदूनं शुभं धनुः ॥
वरं प्राणाधिको धन्वी न तु प्राणाधिकं धनुः ।
धनुषा पीड्यमानस्तु धन्वी लक्ष्यं न पश्यति ॥
अतो निजबलोन्मानं चापं स्याच्छुभकारकम् ।
देवानामुत्तमं चापं ततो न्यूनं च मानवम् ॥
अतिजीर्णमपक्वं च जातिभ्रष्टं तथैव च ।
दग्धाच्छिद्रं न कर्त्तव्यं बाह्याभ्यन्तरहस्तकम् ॥
गुणहीनं गुणाक्रान्तं काण्डदोषसमन्वितम् ।
गलग्रन्थि न कर्त्तव्यं तलमध्ये तथैव च ॥
अपक्वं भङ्गमायाति अतिजीर्णं तु कर्कशम् ।
जातिभ्रष्टं तु सोद्वेगं कलहो बान्धवैः सह ॥
दग्धेन दह्यते गेहं छिद्रं युद्धविनाशनम् ।
बाह्ये लक्ष्यं न लभ्येत तथैवाभ्यन्तरेऽपि च ॥
हीने तु सन्धितो बाणः सङ्ग्रामे भङ्गकारकः ।
आक्रान्तेऽपि पुनः क्वापि लक्ष्यं न प्राप्यते दृढम् ॥
गलग्रन्थि तलग्रन्थि धनहानिकरं धनुः ।
एभिर्दोषैर्विनिर्मुक्तं सर्वकार्यकरं शुभम् ॥
शार्ङ्गं पुनर्धनुर्दिव्यं विष्णोः परममायुधम् ।
वितस्तिसप्तसम्मानं निर्मितं विश्वकर्मणा ॥
न स्वर्गे न च पाताले न भूमौ कस्य चित्करे ।
तद्धनुर्वेशमायाति मुक्त्वैकं पुरुषोत्तमम् ॥
पौरुषेयं तु यच्छार्ङ्गं बहुवत्सरशोभितम् ।
वितस्तिभिः सार्धषड्भिर्मितं सर्वार्थसाधनम् ॥

प्रायो योग्यं धनुः शार्ङ्गं गजरोहाश्वसादिनाम् ।
रथिनां च पदातीनां वांशं चापं प्रकीर्तितम् ॥ इति ।

राजाविजये,

शार्ङ्गं वांशं दारवीयं तृणराजोद्भवं धनुः । इति ।
प्रशस्तमिति शेषः । तृणराजोद्भवं वैतसम् ।

इति धनुर्लक्षणम् ।

अथ गुणलक्षणम् ।

त्रैयम्बके धनुर्वेदे,

गुणानां लक्षणं चैव यादृशं कारयेच्छृणु ।
सुवृत्तश्च त्रितन्तुश्च ब्रह्मविष्णुमहेश्वराः ॥
गुणस्य तन्तवो ज्ञेया द्रव्यं शृणु च षण्मुख ।
प्रथमा हरिणीस्नायुस्तदभावे तु माहिषी ॥
कर्त्तव्या महिषाभावे गोस्नायुं साधयेद्बुधः ।
एत एव गुणा ग्राह्या उत्तमाधममध्यमाः ॥
प्राप्ते भाद्रपदे मासे अथ स्नायुः प्रवर्त्तते ।
तस्मात्ततो गुणः कार्यः पवित्रः स्थावरो दृढः ॥ इति ।

धनुर्वेदे वीरचिन्तामणौ,

गुणानां लक्षणं वक्ष्ये यादृशं कारयेद्गुणम् ।
पट्टसूत्रो गुणः कार्यः कनिष्ठामानसम्मितः ॥
धनुष्प्रमाणो निःसन्धिः शुद्धैस्त्रिगुणतन्तुभिः ।
वर्त्तितः स्यादगुणः श्लक्ष्णः सर्वकर्मसहो युधि ॥
अभावे पट्टसूत्रस्य हरिणीस्नायुरिष्यते ।
गुणार्थमथ वा ग्राह्याः स्नायवो महिषीगवाम् ॥
तत्कालहतगोकर्णचर्मणा छागलेन वा ।
निर्लोमतन्तुरूपेण कुर्याद्वा गुणमुत्तमम् ॥

पक्ववंशत्वचः कार्यो गुणस्तु स्थावरो दृढः ।
पट्टसूत्रेण सन्नद्धः सर्वकर्मसहो युधि ॥
प्राप्ते भाद्रपदे मासि त्वगर्कस्य प्रशस्यते ।
तस्यास्तत्र गुणः कार्यः पवित्रः स्थावरो दृढः ॥
वृत्तार्कस्तत्र तन्तूनां हस्तास्त्वष्टादश स्मृताः ।
तद्वृत्तं त्रिगुणं कार्यं प्रमाणोऽयं गुणः स्मृतः ॥ इति ।
राजाविजये,
सुवृत्तः सुदृढो दीर्घः सुमृष्टो गुप्तहीरकः ।
स्निग्धः श्लक्ष्णः सुस्वरश्च गुणस्याष्टौ गुणाः स्मृताः ॥

इति गुणलक्षणम् ।

अथ शरलक्षणम् ।

धनुर्वेदे वीरचिन्तामणौ,
अतः परं प्रवक्ष्यामि शराणां लक्षणं शुभम् ।
स्थूलं न चातिसूक्ष्मं च नापक्वं न कुभूमिजम् ॥
हीनग्रन्थि विदर्णि च वर्जयेदीदृशं शरम् ।
पूर्णग्रन्थि सुपक्वं च पाण्डुरं समयाहृतम् ॥
समये शरादि गृहीतम् ।
शरवंशौ ग्रहीतव्यौ शरत्काले मृगूत्तम ।
इति विष्णुधर्मोत्तरे उक्तत्वात् ।
कठिनं वर्त्तुलं काण्डं गृह्णीयात्सुप्रदेशजम् ।
द्वौ हस्तौ मुष्टिहीनौ च दैर्घ्ये स्थौल्ये कनिष्ठिका ॥
विधेया शरमानेषु यन्त्रेष्वाकर्षयेत्ततः ।
कङ्कहंसशशादानां मत्स्यादक्रौञ्चकेकिनाम् ॥
गृध्राणां कुरराणां च पक्षा एते सुशोभनाः ।
शशादः श्येनः । मत्स्यादा मत्स्यभक्षका जलगताः पक्षिणः ।

एकैकस्य शरस्यैव चतुष्पक्षाणि योजयेत् ।
षडङ्गुलप्रमाणेन पक्षच्छेदं च कारयेत् ॥
दशाङ्गुलमिताः पक्षाः शार्ङ्गचापस्य मार्गणे ।
योज्या दृढाश्चतुष्पञ्चसम्बद्धाः स्नायुतन्तुभिः ॥
शराश्च त्रिविधा ज्ञेयाः स्त्री पुमांश्च नपुंसकः ।
अग्रे स्थूला भवेन्नारी पश्चात्स्थूलो भवेत्पुमान् ॥
समं नपुंसकं ज्ञेयं न लक्ष्यार्थे प्रशस्यते ।
दूरपातं युवत्या च पुरुषो भेदयेत् दृढम् ॥ इति ।

राजविजये,

भग्नपृष्ठं तथा वक्रं चलितोन्नतपर्वकम् ।
अतिदीर्घाल्पपर्वाणं वर्जयेदिषुमीदृशम् ॥
इषुर्ब्रह्मा गुणो विष्णुर्धनुर्देवो महेश्वरः ।
एतेषां स्मरणादेव सर्वपापैः प्रमुच्यते ॥ इति ।

इति शरलक्षणम् ।

अथ नाराच-नालीकलक्षणम् ।

धनुर्वेदे वीरचिन्तामणौ,

सर्वलोहास्तु ये बाणा नाराचास्ते प्रकीर्त्तिताः ।
पञ्चभिः पृथुलैः पक्षैर्युक्ताः सिध्यन्ति कस्य चित् ॥
नालीका लघवो बाणा नलयन्त्रेण नोदिताः ।
अत्युच्चदूरपातेषु दुर्गयुद्धेषु ते मताः ॥ इति ।

इति नाराच-नालीकलक्षणम् ।

अथ फललक्षणम् ।

वीरचिन्तामणौ धनुर्वेदे,

फलं तु शुद्धलोहस्य सुधारं तीक्ष्णमक्षतम् ।

योजयेद्वज्रलेपेन शरे पक्षानुमानतः।
आरामुखं क्षुरप्रं च गोपुच्छं चार्धचन्द्रकम्॥
सूचीमुखं च भल्लं च वत्सदन्तं द्विभल्लकम्।
कर्णिकं काकतुण्डं च तथान्यान्यप्यनेकशः॥
फलानि देशभेदेषु भवन्ति बहुरूपतः।
आरामुखेन वै चर्म क्षुरप्रेण च कार्मुकम्।
सूचीमुखेन कवचमर्द्धचन्द्रेण मस्तकम्॥
भल्लेन हृदयं वेध्यं द्विभल्लेन गुणः शराः।
लौहं च काकतुण्डेन लक्षं गोपुच्छकेन च॥
अन्यद्गोपुच्छकं ज्ञेयं शुद्धकाष्ठविनिर्मितम्।
मुखे च लोहकण्टेन विद्धं त्र्यङ्गुलसम्मितम्॥ इति।
त्रैयम्बके धनुर्वेदे विशेषः।
अर्धचन्द्रेण बाणेन शिरश्छेदं तु कारयेत्।
भुजच्छेदं धनुश्छेदं गुणच्छेदं तु युक्तितः॥
छेदत्रयं क्षुरप्रेण कारयेद्गुरुमुष्टिना॥ इति।

इति फललक्षणम्।

अथ प्रसङ्गादन्यदप्युपयुक्तं किञ्चिल्लिख्यते।
वीराचिन्तामणौ धनुर्वेदे,
फलस्य पायनं वक्ष्ये दिव्यौषधिविलेपनैः।
येन दुर्भेद्यवर्माणि भेदयेत्तरुपत्रवत्॥
पिप्पली सैन्धवं कुष्ठं गोमूत्रेण तु पेषयेत्।
अनेन लेपयेच्छस्त्रं लितं चाग्नौ प्रतापयेत्॥
अतिशीतमनाविद्धं पीतनष्टं तथौषधम्।
ततो निर्वापितं तैले लोहं तत्र विशिष्यते॥
पञ्चभिर्लवणैः पिष्टं मधुसिक्तैः ससर्षपैः।

एभिः प्रलेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत् ॥
शिखिग्रीवानुवर्णाभं तप्तपीतं तथाविधम् ।
ततस्तु विमलं तोयं पाययेच्छस्त्रमुत्तमम् ॥ इति ।

इति फलपायनविधिः ।

अथ धनुर्वेदः ।

तत्र स्थानमुष्ट्याकर्षणलक्षणानि ।
स्थानान्यष्टौ विधेयानि योजने भिन्नकर्मणाम् ।
मुख्याः पञ्च समाख्याता व्यापाः पञ्च प्रकीर्त्तिताः ॥
अग्रतो वामपादं च दक्षिणं जानु कुञ्चितम् ।
आलीढे तु प्रकर्त्तव्यं हस्तद्वयं सुविस्तरम् ॥
प्रत्यालीढे तु कर्त्तव्यं सव्यं चैवानुकुञ्चितम् ।
दक्षिणं तु पुरस्तद्वद्दूरपाते प्रशस्यते ॥
पादौ सविस्तरौ कार्यौ समौ हस्तप्रमाणतः ।
विशाखस्थानकं ज्ञेयं कूटलक्ष्यस्य वेधने ॥
समपादे समौ पादौ निष्कम्पौ च सुसङ्गतौ ।
अंसमेव पुरो वामो हस्तमात्रेण तं वपुः ॥
आकुञ्चितोरू द्वौ यत्र जानुभ्यां धरणीं गतौ ।
दर्दुरक्रममित्याहुः स्थानकं दृढभेदनम् ॥
सव्यं जानु गतं भूमौ दक्षिणं च सकुञ्चितम् ।
अग्रतो यत्र दातव्यं तं विद्याद्गरुडक्रमम् ॥
पद्मासनं प्रसिद्धं तु उपविश्य यथाक्रमम् ।
धन्विनां तत्तु विज्ञेयं स्थानकं शुभलक्षणम् ॥ इति ।

इति स्थानानि ।

अथ गुणमुष्टयः ।

पताका वज्रमुष्टिश्च सिंहकर्णौ तथैव च ।

मुत्सरी काकतुण्डी च योजनीया यथाक्रमम् ॥
दीर्घा तु तर्जनी यत्र आश्रिताङ्गुष्ठमूलकम् ।
पताका सा च विज्ञेया नालिकादूरमोक्षणे ॥
तर्जनीमध्यमामध्यमङ्गुष्ठो विशते यदि ।
वज्रमुष्टिश्च सा ज्ञेया स्थूलनाराचमोक्षणे ॥
अङ्गुष्ठनखमध्ये तु तर्जन्यग्रं सुसंस्थितम् ।
सिंहकर्णी तु सा ज्ञेया शराणां लक्ष्यवेधने ॥
अङ्गुष्ठनखमूले तु तर्जन्यग्रं सुसंस्थितम् ।
मुत्सरी सा च विज्ञेया चित्रलक्ष्यस्य वेधने ॥
अङ्गुष्ठाग्रे तु तर्जन्या मुखं यत्र निवेशितम् ।
काकतुण्डी तु सा ज्ञेया सूक्ष्मलक्ष्ये तु योजिता ॥

इति गुणमुष्टयः ।

अथ धनुर्मुष्टिसन्धानम् ।

सन्धानं त्रिविधं प्रोक्तमध ऊर्ध्वं समं तथा ।
योजयेत्त्रिःप्रकारं हि कार्येष्वपि यथाक्रमम् ॥
अधश्च दूरपातित्वं समे लक्ष्यं सुनिश्चलम् ।
दृढस्फोटं प्रकुर्वन्ति ऊर्ध्वं साधनयोगतः ॥

इति धनुर्मुष्टिसन्धानम् ।

अथ व्यापाः ।

कौशिकः केशमूले च शिरःशृङ्गे च सात्त्विकः ।
श्रवणे वत्सकर्णश्च ग्रीवायां भरतो भवेत् ॥
अंसके स्कन्धनामा च व्यापाः पञ्च प्रकीर्त्तिताः ।
कौशिकश्चित्रयुद्धेषु अधोलक्ष्येषु सात्त्विकः ॥
वत्सकर्णश्च विज्ञेयो भरतो दृढभेदने ।

दृढभेदे च दूरे च स्कन्धनामानमुद्दिशेत् ॥

इति व्यापाः ।

अथ लक्ष्यम् ।

लक्ष्यं चतुर्विधं चैव स्थिरं चैव चलं तथा ।
चलाचलं द्वयचलमिति प्रोक्तं मनीषिभिः ॥
आत्मानं सुस्थिरं कृत्वा लक्ष्यं चैव स्थिरं पुनः ।
वेधयेत्त्रिःप्रकारं तु स्थिरवेधी स उच्यते ॥
चलं तु वेधयेद्यस्तु आत्मना स्थिरसंस्थितः ।
चललक्ष्यं तु तत्प्रोक्तमाचार्येण तु धीमता ॥
धन्वी तु चलते यत्र स्थिरलक्ष्ये समाहितः ।
चलाचलं भवेत्तत्र अप्रमेयमनिन्दितम् ॥
उभावेव चलौ यत्र लक्ष्यं चापि धनुर्द्धरः ।
तद्विज्ञेयं द्वयचलं श्रमेणैव हि साध्यते ॥
श्रमेणास्खलितं लक्ष्यं दूरं च बहुभेदनम् ।
श्रमेणास्खलिता दृष्टिः शीघ्रं सन्धानमाप्यते ॥
श्रमेण चित्रयोधित्वं श्रमेण प्राप्यते जयः ।
तस्माद्गुरुसमक्षं हि श्रमः कार्यो विजानता ॥
प्रथमं वामहस्तेन यः श्रमं कुरुते नरः ।
तस्य चापक्रियासिद्धिरचिरादेव जायते ॥
वामहस्ते तु संसिद्धे पश्चाद्दक्षिणमारभेत् ।
उभाभ्यां च श्रमं कुर्यान्नाराचैश्च शरैस्तथा ॥
वामेनैव श्रमं कुर्यात्सुसिद्धे दक्षिणे करे ।
विशाखेनासनेनैव तथा व्यापे च कौशिके ॥
उदिते भास्करे लक्ष्यं पश्चिमायां निवेशयेत् ॥
अपराह्णे च कर्तव्यं लक्ष्यं पूर्वादिगाश्रितम् ।

उत्तरेण सदा कार्यं प्रशस्तमविरोधकम् ॥
सङ्ग्रामेण विना कार्यं न लक्ष्यं दक्षिणामुखम् ।
षष्टिधन्वन्तरे लक्ष्यं ज्येष्ठं लक्ष्यं प्रकीर्त्तितम् ॥
चत्वारिंशन्मध्यमं च विंशतिश्च कनिष्ठकम् ।
शराणां कथितं ह्येतन्नाराचानामथोच्यते ॥
चत्वारिंशच्च त्रिंशच्च षोडशैव भवेत्ततः ।
चतुःशतैश्च काण्डानां यो हि लक्ष्यं विसर्जयेत् ॥
सूर्योदये चास्तमये स ज्येष्ठो धन्विनां भवेत् ।
त्रिंशतैर्मध्यमश्चैव द्विंशताभ्यां कनिष्ठकः ॥
लक्ष्यं च पुरुषोन्मानं कुर्याच्चन्द्रकसंयुतम् ।
ऊर्ध्ववेधी भवेज्ज्येष्ठो नाभिवेधी च मध्यमः ॥
यः पादवेधी लक्ष्यस्य स कनिष्ठो मतो मम ।

इति लक्ष्यम् ।

अथ श्रमक्रिया ।

क्रियाकलापान् वक्ष्यामि श्रमसाध्यान् शुचिष्मताम् ।
येषां विधानमात्रेण सिद्धिर्भवति नान्यथा ॥
विज्ञातमात्रेणेति पाठान्तरम् ।
प्रथमं चापमारोप्य चूलिकां बन्धयेत्ततः ।
स्थानकं तु ततः कृत्वा बाणोपरि करं न्यसेत् ॥
तुलनं धनुषश्चैव कर्त्तव्यं वामपाणिना ।
आदानं च ततः कृत्वा सन्धानं च ततः परम् ॥
सकृदाकृष्टचापेन भूमिवेधं च कारयेत् ।
नमस्कुर्याच्छिवं विघ्नराजं गुरुधनुः क्रमात् ॥
याचितव्या गुरोराज्ञा चापस्याकर्षणं प्रति ।
प्राणवायुं प्रयत्नेन बाणेन सह पूरयेत् ॥

कुम्भकेन स्थिरं कृत्वा हुङ्कारेण विसर्जयेत् ।
इत्यभ्यासक्रिया कार्या धन्विना सिद्धिमिच्छता ॥
षण्मासात्सिध्यते मुष्टिः शराः संवत्सरेण तु ।
नाराचास्तस्य सिद्ध्यन्ति यस्य तुष्टो महेश्वरः ॥
पुष्पवद्धारयेद्बाणं सर्पवत्पीडयेद्धनुः ।
धनवच्चिन्तयेल्लक्ष्यं यदीच्छेत्सिद्धिमात्मनः ॥
क्रियामिच्छन्त्यथाचार्या दूरमिच्छन्ति भार्गवाः ।
राजानो दृढमिच्छन्ति लक्ष्यमिच्छन्ति चेतराः ॥
जनानां रञ्जनं येन लक्ष्यघातात्प्रजायते ।
हीनेनापीषुणा तस्मात्प्रशस्तं लक्ष्यवेधनम् ॥

इति भ्रमक्रिया ।

अथ लक्ष्यास्खलनविधिः ।

विशाखस्थानके स्थित्वा समं सन्धानमाचरेत् ।
गोपुच्छमुखबाणेन सिंहकर्ण्या च मुष्टिना ॥
आकर्षेत्कौशिकव्यापे न शिखां चालयेत्ततः ।
पूर्वापरौ समौ कार्यौ समांसौ निश्चलौ करौ ॥
समौ अंसौ स्कन्धौ ययोस्तौ ।
चक्षुषी स्पन्दयेन्नैव दृष्टिं लक्ष्ये नियोजयेत् ॥
मुष्टिना च्छादितं लक्ष्यं शरस्याग्रे नियोजयेत् ।
मनोदृष्टिगतं ज्ञात्वा ततः काण्डं विसर्जयेत् ॥
स्खलत्येवं कदाचिन्न लक्ष्ये योधो जितश्रमः ।

इति लक्ष्यास्खलनविधिः ।

अथ शीघ्रसन्धानम् ।

आदानं चैव तूणीरात्सन्धानं कर्षणं तथा ।
क्षेपणं च त्वरायुक्तो बाणस्य कुरुते तु यः ॥

नित्याभ्यासवशात्तस्य शीघ्रसन्धानता भवेत्।

इति शीघ्रसन्धानम्।

अथ दूरपातित्वम्।

मत्यालीढे कृते स्थाने अधः सन्धानमाचरेत्।
मुष्ट्या पताकया बाणं स्त्रीचिह्नं दूरपातितम्॥

इति दूरपातित्वम्।

अथ दृढभेदिता।

दर्दुरस्थानमास्थाय ऊर्ध्वं सन्धानमाचरेत्।
स्कन्धव्यापेन वज्रस्य मुष्ट्या पुंमार्गणेन च॥
अत्यन्तसौष्ठवाद्बाहोर्जायते दृढभेदिता।

इति दृढभेदिता।

अथ हीनगतयः।

सूचीमुखा मीनपुच्छा भ्रमरी च तृतीयका।
शराणां गतयस्तिस्रः प्रशस्ताः कथिता बुधैः॥
सूचीमुखगतिस्तस्य सायकस्य प्रजायते।
पत्रं विलोलितं यस्य अथ वा हीनपत्रकम्॥
कर्कशेन तु चापेन यः कृष्टो हीनमुष्टिना।
मत्स्यपुच्छा गतिस्तस्य सायकस्य प्रकीर्त्तिता॥
भ्रमरी कथिता ह्येषा सद्भिस्तु श्रमकर्मणि।
ऋजुत्वेन विना याति क्षेप्यमाणस्तु सायकः॥

इति हीनगतयः।

अथ बाणानां लक्ष्यस्खलनगतयः।

वामगा दक्षगाश्चैव ऊर्ध्वगाधोगमास्तथा।
चतस्रो गतयः प्रोक्ता बाणस्खलनहेतवः॥

कम्पते गुणमुष्टिस्तु मार्गणस्य हि पृष्ठतः ।
सम्मुखी स्याद्धनुर्मुष्टिस्तदा वामे गतिर्भवेत् ॥
ग्रहणं शिथिलं यस्य ऋजुत्वेन विवर्जितम् ।
पार्श्वे तु दक्षिणं याति सायकस्तु न संशयः ॥
ऊर्ध्वं भवेच्चापमुष्टिर्गुणमुष्टिरधो भवेत् ।
स मुक्तो मार्गणो लक्ष्यादूर्ध्वं याति न संशयः ॥
मोक्षणे चैव बाणस्य चापमुष्टिरधो भवेत् ।
गुणमुष्टिर्भवेदूर्ध्वं तदाधोगामिनी गतिः ॥

इति लक्ष्यस्खलनगतयः ।

अथ शुद्धगतयः ।

लक्ष्यबाणाग्रदृष्टीनां सङ्गतिस्तु यदा भवेत् ।
तदानीं मुष्टितो बाणो लक्ष्यान्न स्खलति ध्रुवम् ॥
निर्दोषः शब्दहीनश्च सममुष्टिर्द्वयोः स्थितः ।
नरनागाश्वकायेषु न स तिष्ठति मार्गणः ॥
यस्य तृणसमा बाणा यस्येन्धनसमं धनुः ।
यस्य प्राणसमा मौर्वी स धन्वी धन्विनां वरः ॥

इति शुद्धगतयः ।

अथ दृढचतुष्कम् ।

अयश्चर्म घटश्चैव मृत्पिण्डं च चतुष्टयम् ।
यो भिनत्ति हि तस्येषुर्वज्रेणापि न धार्यते ॥
सार्धाङ्गुलप्रमाणेन लोहयन्त्राणि कारयेत् ।
तानि भित्त्वैकबाणेन दृढघाती भवेन्नरः ॥
चतुर्विंशतिचर्माणि यो भिनर्त्तीषुणा नरः ।
तस्य बाणो गजेन्द्रस्य कायं निर्भिद्य गच्छति ॥
भ्रमन् जले घटो वेध्यश्चक्रे मृत्पिण्डकस्तथा ।

भ्रमन्तं वेधयेद्यो हि दृढवेधी स उच्यते ॥
अयस्तु काकतुण्डेन चर्म चारामुखेन च ।
मृत्पिण्डं च घटं चैव विध्येत्सूचीमुखेन च ॥

इति दृढचतुष्कम् ।

अथ चित्रविधिः ।

बाणभङ्गं करावर्तं काष्ठभेदनमेव च ।
बिन्दुकं गोलकयुगं यो वेत्ति स जयी भवेत् ॥
लक्ष्यस्थाने धृतं काण्डं सम्मुखं छेदयेन्नरः ।
किञ्चिन्मुष्टिं विधाय स्वां तिर्यक् द्विफलकेषुणा ॥
सम्मुखं च समायान्तं तिर्यग्वाऽऽयान्तमम्बरे ।
शरं शरेण यश्छिन्द्याद्बाणच्छेदी स जायते ॥

इति बाणभङ्गः ।

काष्ठैश्च केशं संयम्य तत्र बद्धा वराटिकाम् ।
हस्तेन भ्राम्यमाणां च यो हन्ति स धनुर्द्धरः ॥

इति वराटिकावर्तः ।

लक्ष्यस्थाने न्यसेत्काष्ठं सान्द्रगोपुच्छसन्निभम् ।
यश्छिन्द्यात्तं क्षुरप्रेण काष्ठच्छेदी स जायते ॥

इति काष्ठभेदः ।

लक्ष्ये बिन्दुं न्यसेत् शुभ्रं शुभ्रबन्धूकपुष्पवत् ॥
हन्ति तं बिन्दुकं यस्तु चित्रवेधी स जायते ।

इति बिन्दुकभेदः ।

काष्ठगोलयुगं क्षिप्तं दूरमूर्ध्वं पुरःस्थितम् ।
असम्प्राप्तं धरापृष्ठे तद्गोपुच्छमुखेन हि ॥
यो हन्ति शरयुग्मेन शीघ्रसन्धानयोगतः ।

सः स्याद्धनुर्भृतां श्रेष्ठः पूजितः सर्वपार्थिवैः ॥

इति गोलकयुगप्रभृतिचित्रविधिः ।

अथ धावल्लक्ष्यम् ।

रथस्थेन गजस्थेन हयस्थेन पदातिना ।
धावता वै श्रमः कार्यो लक्ष्यं हन्तुं सुनिश्चितम् ॥

इति धावल्लक्ष्यम् ।

अथ शब्दवेधित्वम् ।

लक्ष्यस्थाने न्यसेत्कांस्यपात्रं हस्तद्वयान्तरे ।
ताडयेच्छर्कराभिस्तत् शब्दः सञ्जायते यथा ॥
यत्रैवोत्पद्यते शब्दस्तं सम्यक् तत्र चिन्तयेत् ।
कर्णेन्द्रियसमायोगाल्लक्ष्यं निश्चयतां नयेत् ॥
पुनः शर्करया तच्च ताडयेत् शब्दहेतवे ।
पुनर्निश्चयतां नेयं शब्दस्थानानुसारतः ॥
ततः किञ्चित्कृतं दूरे नित्यं नित्यविधानतः ।
लक्ष्यं समभ्यसेद्वाते शब्दध्वननहेतवे ॥
ततो बाणेन हन्यात्तदवधानेन तीक्ष्णधीः ।
एतच्च दुष्करं कर्म भाग्यैः कस्यापि सिद्ध्यति ॥

इति शब्दवेधित्वम्

अथ धनुर्धरप्रशंसा ।

एकोऽपि यत्र नगरे प्रसिद्धः स्याद्धनुर्द्धरः ।
ततो यान्त्यरयो दूरं मृगाः सिंहग्रहादिव ॥

इति धनुर्धरप्रशंसा ।

इति धनुर्वेदः समाप्तः ।

अथ खड्गप्रशंसा।

औशनसे धनुर्वेदे,

जमदग्निं प्रति शुक्रो भगवानुवाच।
असिरेव परं शस्त्रं स्वहस्ते नित्यशोऽक्षयम्।
अमोघाकारसदृशं सर्वशस्तु क्षयप्रदम्॥
सर्वप्रकारेण क्षयप्रदं, शत्रूणां क्षयकारकमित्यर्थः।
उत्ताने वाथ कुब्जे वा बले साचीगतेऽपि वा।
संविष्टे चोपविष्टे च खड्ग एव परायणम्॥
सङ्कटे च विषमे गिरिदुर्गे
निम्नगर्तसिकतास्थगिते वा।
कण्टकद्रुमवृतेऽपि च देशे
खड्ग एव शरणं जमदग्ने॥
क्षितौ रथे वाजिनि कुञ्जरे वा
गृहे द्रुमे नागरके प्रमादे।
सर्वत्र सर्वस्य च भार्गवेन्द्र
परायणं स्यादसिरेव नित्यम्॥
धनुरिह शरपातादेव वै हन्ति शत्रून्
दहति रिपुसमूहं वाजिवद्विर्जवेन।
सुभटकरगतस्तु क्षिप्रमभ्यासमात्रे
शमयति रिपुसेनां पातयोगेन खड्गः॥
मतङ्गजस्थो रथवाजिगो वा
शरक्षये शस्त्रगणक्षये च।
समस्थितो वा विषमस्थितो वा
नरोऽसिना मर्दयतीह सर्वान्॥
स्वच्छन्दे चापभङ्गे च विरथस्य विवाजिनः।

शत्रुमध्यावतीर्णस्य नान्यत् खड्गात्परायणम् ॥ इति ।

नकुलेनाप्युक्तम्—

खड्गाल्लक्ष्मीस्तथा राज्यं यशः खड्गादवाप्यते ।
खड्गाद्वैरिविनाशं च यत्रात्तमभिदध्महे ॥ इति ।

इति खड्गप्रशंसा ।

अथ खड्गलोहोत्पत्तिः ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

पुरा सुमेरुशिखरे काञ्चने रत्नपर्वते ।
स्वर्गगङ्गातटे ब्रह्मा यज्ञं यजति भार्गव ॥
तस्मिन् यज्ञे स ददृशे विघ्नार्थं लोहदानवम् ।
विघ्नस्य शमनं तस्य चिन्तयामास तत्त्ववित् ॥
तदा चिन्तयतस्तस्य पुरुषः पावकाद्भौ ।
नीलोत्पलदलश्यामतनुश्चातिसितेक्षणः ॥
प्रांशुः सुवदनः श्रीमान् बलेनाप्रतिमो भुवि ।
स ववन्दे तदा गत्वा देवं कमलसम्भवम् ॥
अभ्यनन्दन्त जातेन तेन देवाः सवासवाः ।
तस्मात्स नन्दको नाम खड्गरत्नमभूत्तदा ॥
तं दृष्ट्वा भगवान् ब्रह्मा केशवं वाक्यमब्रवीत् ।
खड्गं गृह्णीष्व गोप्तारं धर्मस्य जगतां पते ॥
यज्ञविघ्नकरं मह्यं खड्गेनानेन केशव ।
निपातय महाबाहो बलिनं लोहदानवम् ॥
इत्येवमुक्तो जग्राह ग्रीवायां तं जनार्दनः ।
एतस्मिन्नन्तरे तत्र व्यदृश्यत तदा महान् ॥
करालकृष्णवदनः शतबाहुर्महोदरः ।

प्रांशुः सुवृत्तदंष्ट्राग्रो बलवान् लोहदानवः ॥
यज्ञविघ्नार्थिनं प्राप्तं स दृष्ट्वा लोहदानवम् ।
खड्गमादाय हस्तेन ययौ तं प्रति केशवः ॥
स केशवमनादृत्य देवान् शक्रपुरोगमान् ।
विद्रावयामास तदा गदया भीमवेगया ॥
तदा भग्नेषु देवेषु युद्धं कृत्वा हरिश्चिरम् ।
खड्गेन तस्य गात्राणि चिच्छेद मधुहा रणे ॥
खड्गच्छिन्नानि गात्राणि नानादेशेषु भूतले ।
निपेतुस्तस्य धर्मज्ञ शतशोऽथ सहस्रशः ॥
नन्दकस्य तु संस्पर्शात्तानि गात्राणि भार्गव ।
लोहीभूतानि सर्वाणि प्रसादात्केशवस्य तु ॥
हतायास्मै वरं प्रादाद्भगवान् मधुसूदनः ।
त्वदङ्गानि पवित्राणि भविष्यन्ति महीतले ॥
आयुधानि च तैर्लोके करिष्यन्ति हि मानवाः ।
एवमुक्त्वा हरिर्देवो ब्रह्माणं वाक्यमब्रवीत् ॥
विना विघ्नं मखमिमं कुरु शीघ्रं जगद्गुरो ।
एवमुक्तस्तदा ब्रह्मा यज्ञेन मधुसूदनम् ॥
आत्मना पूजयामास सुसमिद्धमनोरथः ।
उत्पत्तिरुक्ता लोहस्य खड्गस्य च मया तव ॥ इति ।

इति खड्गलोहोत्पत्तिः ।

अथ खड्गलोहलक्षणम् ।

लोहार्णवे,

लोहानां लक्षणं वक्ष्ये यथोक्तं मुनिपुङ्गवैः ।
निरङ्गसाङ्गभेदेन ते लोहा द्विविधा मताः ॥
निरङ्गाः काञ्चिणज्यादिभेदाद्धंहुविधा मताः ।

रसकर्मसु ते शस्ता नानाव्याधिविनाशनाः ॥
शस्यन्ते प्रायशो यस्मात्साङ्गाः खड्गादिकर्मसु ।
नामभेदेन चिन्हानि लोहानामभिदध्महे ॥
क्षुद्राङ्गं सुदृढं यस्य नीलमीषत्प्रतीयते ।
रौहिणं तद्विजानीयात्तत्क्षणे बहुवेदिना ॥
नीलपिण्डं समाङ्गं च नीलपिण्डं विदुर्बुधाः ।
मयूरकण्ठसंस्थानमङ्गं यस्य प्रतीयते ॥
मयूरग्रीवकं लोहं तत् विदुर्मुनिपुङ्गवाः ॥
नागकेसरपुष्पाभमङ्गं यस्य प्रतीयते ।
मयूरवज्रकं प्राहुर्लोहशास्त्रविदो जनाः ॥
यस्मिन् तित्तिरपक्षाभमङ्गं लोहे प्रतीयते ।
दुर्लभं तन्महामूल्यं तित्तिराङ्गं सुपाकजम् ॥
सुवर्णसदृशाकारा त्वङ्भूमिः प्रतीयते ।
सुवर्णवज्रकं विद्याद्बहुमूल्यं महागुणम् ॥
मृणालनालप्रतिमं विवरैरग्रसंश्रितैः ।
कङ्कोलवज्रकं प्राहुः स्वर्णाङ्गं वज्रचिन्तकाः ॥
अङ्गं प्रतीयते यत्र बहुग्रन्थिसमन्वितम् ।
दुर्लभं तन्महामूल्यं ग्रन्थिवज्रकमुच्यते ॥ इति ।
खड्गकोषे,
धारा शुभ्रा भवेद्यस्य मध्यं कज्जलसन्निभम् ।
कृष्णैरङ्गैश्चितं गात्रं विद्यात्कज्जलवज्रकम् ॥
निरङ्गं रौप्यपत्राभमीषन्नीलनिभं च यत् ।
दुर्लभं तन्महामूल्यं कान्तिलोहं प्रचक्षते ॥
अङ्गं दमनपत्राभमङ्गे यस्मिन् प्रतीयते ।
विद्यादमनवज्रं तु तीक्ष्णधारं महागुणम् ॥

ऊर्ध्वाङ्गं कपिलाभासमङ्गं यस्मिन् प्रतीयते ।
नकुलाङ्गं तु तद्विद्यात् स्पर्शस्तस्याहिनाशनः ॥ इति ।

इति खड्गलोहलक्षणम् ।

अथ खड्गलक्षणम् ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

अतः परं प्रवक्ष्यामि खड्गलक्षणमुत्तमम् ।
प्रधानदेहसम्भूतैर्दैत्यास्थिभिररिन्दम ॥
लोहप्रधानं खड्गार्थं प्रशस्तं तद्विशेषतः ।
खटीकदूरऋषिकवङ्गसूर्यारकेषु च ॥
विदेहेषु तथाङ्गेषु मध्यमग्रामचेदिषु ।
सहग्रामेषु चीनेषु तथा कालञ्जरेऽपि च ॥
लोहप्रधानं तज्ज्ञानां खड्गानां शृणु लक्षणम् ।
खटीकदूरजाता ये दर्शनीयाश्च ते स्मृताः ॥
कायच्छिदस्त्वार्षिका ये मर्मघ्ना गुरवस्तथा ।
तीक्ष्णच्छेदसहा वङ्गा दृढाः सूर्यारकोद्भवाः ॥
सुहस्ताश्चैव विज्ञेयाः प्रभावन्तो विदेहजाः ।
अङ्गदेशोद्भवास्तीक्ष्णाः सुहस्ताः सुदृढास्तथा ॥
वेगवन्तस्तथा तीक्ष्णा मध्यमग्रामसम्भवाः ।
असारा लघवस्तीक्ष्णाश्चेदिदेशसमुद्भवाः ॥
सहग्रामोद्भवाः खड्गाः सुतीक्ष्णा लघवस्तथा ।
निर्व्रणा निर्मलास्तीक्ष्णाश्चीनदेशसमुद्भवाः ॥
कालञ्जरा भारसहास्तेषां वक्ष्यामि लक्षणम् ।
शतार्द्धमङ्गुलानां तु श्रेष्ठः खड्गः प्रकीर्तितः ॥
श्रेष्ठः खड्गः प्रमाणत इत्यपि क्वचित्पाठः ।

तदर्धो मध्यसंज्ञो यस्ततो हीनं न धारयेत् ।
प्रमाणाभ्यधिकं देव छिन्नवंशं तथैव च ॥

खड्गं विद्यादिति शेषः । उक्तप्रमाणान्न्यूनाधिकखड्गधारणे वंशच्छेदो भवेदित्यर्थः ॥

दीर्घः सुमधुरः शब्दो यस्य खड्गस्य भार्गव ।
किङ्किणीसदृशस्तस्य धारणं श्रेष्ठमुच्यते ॥
खड्गः पद्मपलाशाग्रो मण्डलाग्रश्च शस्यते ।
करवीरपलाशाग्रसदृशश्च विशेषतः ॥
महीघृतसुगन्धश्च पद्मोत्पलसुगन्धिकः ।
वर्णतश्चोत्पलाकारः सवर्णो गगनस्य च ॥
समाङ्गुलस्थाः शस्यन्ते व्रणाः खड्गेषु भार्गव ।
श्रीवृक्षपर्वताकारा लिङ्गपद्मनिभाश्च ये ॥
मङ्गल्यानां तथाऽन्येषां सदृशा ये च भार्गव ॥
काकोलूककबन्धाभा विषमाङ्गुलिसंस्थिताः ।
वंशानुगाः प्रभूताश्च न शस्तास्ते कदाचन ॥

वंशः खड्गस्य मध्यभागः । तत्र ये स्वाकृतयोऽपि व्रणास्तेऽप्यशुभदा ज्ञेयाः

खड्गे न पश्येद्वदनं वृथा विवृणुयान्न च ।

वृथा न विवृणुयात्, विगतावरणं न कुर्यात् । वृथा कोशात्खड्गं नोद्घाटयेदित्यर्थः ।

न वास्य कथयेन्मूल्यं जातिं देशं कथञ्चन ।
उच्छिष्टो न स्पृशेत्खड्गं निशि कुर्याच्च शीर्षके ॥
दिवा च पूजयेदेनं गन्धमाल्यान्नसम्पदा ।

खड्गं प्रशस्तं मणिहेमचित्रं
कोशे सदा चन्दनचूर्णयुक्तम् ।

संस्थापयेद्भूमिपतिः प्रयत्नवा—
द्रक्षेत्तथैनं स्वशरीरवच्च ॥ इति ।

देवीपुराणे,

खड्गस्य लक्षणं वक्ष्ये त्रिशिखस्य तु सुन्दरि ।
नान्यशस्त्रोद्भवं कार्यं मृदुलोहमयं तथा ॥
स्फुटितं खण्डितं ह्रस्वं सव्रणं सन्धितं तथा ।
मृदुलोह अपूज्यस्तु सन्धिते मरणं भवेत् ॥
सव्रणे चापि हृद्रोगः स्फुटिते पातकी भवेत् ।
भार्या माता तथा पुत्रो म्रियते खण्डितेन तु ॥
ह्रस्वेन लाघवं लोके दीर्घे वापि ह्यसिद्धिदम् ।
अन्यशस्त्रोद्भवेनापि सम्भवेन्मरणं ध्रुवम् ॥
पञ्चाशदङ्गुलं खड्गं त्रिशिखं च सुरेश्वरि ।
ईदृशं कारयेत्प्राज्ञ आयु सिद्धिफलप्रदम् ॥ इति ।

वराहसंहितायां तु विशेषः ।

अङ्गुलशतार्धमुत्तममूनं स्यात्पञ्चविंशतिः खड्गः ।
अङ्गुलमाने ज्ञेयः समाङ्गुलस्थो व्रणः शुभदः ॥
श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम् ।
सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च ॥
कृकलासकाककङ्कक्व्यादकबन्धवृश्चिकाकृतयः ।
खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च ॥
स्फुटितं ह्रस्वं कुण्ठं-संछिन्नं न दृश्यनोऽनुगतम् ।
अस्वनमिति वानिष्टं प्रोक्तविपर्यस्तमिष्टफलम् ॥
क्वणितं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात् ।
स्वयमुद्दीर्णे युद्धं ज्वलिते विजयो भवति खड्गे ॥
कोशात्प्रवर्त्तनम् अनिर्गमनं बहिः । स्वयमुद्दीर्णे खड्गे, स्वय-

मेव बहिर्निर्गते ।

नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम् ।
देशं न चास्य कथयेत्प्रतिमानयेच्च
नैव स्पृशेन्नृपतिरेव यतोऽसियष्टिम् ॥

न विघट्टयेत् न चालयेत् । न प्रतिमानयेत् नाङ्गुलैर्मिनुयात् ।

गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च ।
करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः ॥
निष्पन्नो न च्छेद्यो निकषैः कार्यः प्रमाणयुक्तः सः ।
मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ॥

निष्पन्नः सिद्धः खड्गो न च्छेद्यः । प्रमाणाधिकश्चेत् निकषैः घर्षणैः प्रमाणयुक्तः कार्यः । छेदने तु दोषो मूले म्रियत इत्यादिनोक्तः ।

यस्मिन्त्सरुप्रदेशे व्रणो भवेत्तद्वदेव खड्गेऽपि ।
वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा ॥

खड्गस्य या शिखा मुष्ट्या गृह्यते सा त्सरुशब्देनोच्यते । खड्गग्रहणभाग इत्यर्थः ।

अथ वा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तदवधार्य ।
कोशस्थस्यादेश्यो व्रणोऽस्ति शास्त्रं विदित्वैवम् ॥

अस्यार्थः । कोशस्थं सकोशं खड्गं हस्ते गृहीत्वा अस्मिन् खड्गे व्रणोऽस्ति न वेति प्रष्टा प्रश्नकर्त्ता स्वीयं यदङ्गं स्पृशति तदङ्गमवधार्य विलोक्य कोशस्थस्य कोशान्तर्गतस्य खड्गस्य अमुकत्र व्रणोऽस्तीति व्रणादेशः कार्यः । इत्थमसिशास्त्रं विदित्वा । तच्चाह—

स एव,

शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे ।
भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च ॥
नासोष्ठकपोलहनुश्रवणग्रीवांसकेषु पञ्चाद्याः ।
उरसि द्वादशसंस्थास्त्रयोदशे कक्षयोर्ज्ञेयः ॥
स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशादयो ज्ञेयाः ।
नाभीमूले कट्यां गुह्ये चैकोनविंशतितः ॥
ऊर्वोर्द्वाविंशे स्यादूर्वोर्मध्ये व्रणस्त्रयोविंशे ।
जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च ॥
जङ्घामध्ये गुल्फे पार्ष्णौ पादे तथाङ्गुलीष्वपि च ।
षड्विंशादिषु यावत्त्रिंशदिति मतेन गर्गस्य ॥
पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च बन्धश्च ।
एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशेत्क्रमशः ॥
सुतलाभः कलहो वा गजलाभः पुत्रमरणधनलाभौ ।
क्रमशो विनाशवनितामित्रचित्तदुःखानि षट्प्रभृति ॥
लब्धिर्हानिस्त्रीलब्धयो वधो वृद्धिमरणपरितोषाः ।
ज्ञेयाश्चतुर्दशादिषु, धनहानिश्चैकविंशे वा ॥
वित्तामित्रनिर्वाणं धनागमो मृत्युसम्पदोऽस्वत्वम् ।
ऐश्वर्यमृत्युराज्यानि च क्रमात्त्रिंशदितियावत् ॥

अयमर्थः । प्रश्नकर्त्रा स्वभावादेव प्रश्नसमये स्वशिरसि स्पृष्टे कोशान्तर्गतस्य खड्गस्य मूलादेव प्रथमेऽङ्गुले व्रणो वाच्यः, खड्गस्वामिनः फलं च पुत्रमरणं निर्देश्यम् । ललाटसंस्पर्शे द्वितीयेऽङ्गुले व्रणो निर्देश्यः, फलं च धनप्राप्तिः । भ्रूमध्यस्पर्शे तृतीयेऽङ्गुले, फलं च धनहानिः । नेत्रस्पर्शे चतुर्थाङ्गुले, फलं च सम्पदः । नासास्पर्शे पञ्चमाङ्गुले, फलं च बन्धः । ओष्ठस्पर्शे षष्ठेऽङ्गुले, फलं च सुतलाभः । कपोलस्पर्शे सप्तमाङ्गुले, फ-

लं च कलहः । हनुस्पर्शे अष्टमेऽङ्गुले, गजलाभश्च फलम् । कर्णस्पर्शे नवमेऽङ्गुले पुत्रमरणं च फलम् । ग्रीवास्पर्शे दशमेऽङ्गुले, धनलाभश्च फलम् । अंसस्पर्शे एकादशाङ्गुले, फलं च विनाशः मरणमित्यर्थः । उरःस्पर्शे द्वादशाङ्गुले,फलं च स्त्रीप्राप्तिः । कक्षास्पर्शे त्रयोदशाङ्गुले, फलं च चित्तदुःखं, मनसः खेदः । स्तनस्पर्शे चतुर्दशेऽङ्गुले, फलं च लब्धिः, अर्थलाभ इत्यर्थः । हृदयस्पर्शे पञ्चदशेऽङ्गुले,फलं च हानिः,अर्थनाश इत्यर्थः । उदरस्पर्शे षोडशेऽङ्गुले, फलं स्त्रीप्राप्तिः । कुक्षिस्पर्शे सप्तदशे,फलं च वधः । नाभिस्पर्शे अष्टादशे, फलं च वृद्धिः, द्रव्यादेः । नाभीमूलस्पर्शे एकोनविंशे फलं च मरणम् । कटिस्पर्शे विंशे, फलं च सन्तोषः । गुह्यस्पर्शे एकविंशे, फलं च धनहानिः । ऊरुस्पर्शे,द्वाविंशे फलं च वित्तापि्तः, द्रव्यप्राप्तिरित्यर्थः । ऊरुमध्यस्पर्शे त्रयोविंशे,फलं च निर्वाणं मृत्युरित्यर्थः । जानुस्पर्शे चतुर्विंशे,फलं च धनागमः । जङ्घास्पर्शे पञ्चविंशे, फलं च मृत्युः । जङ्घामध्यस्पर्शे षड्विंशे, फलं च सम्पदः । गुल्फस्पर्शे सप्तविंशे, फलं चास्वत्वं, निर्द्धनता दारिद्र्यमित्यर्थः । पार्ष्णिस्पर्शे अष्टाविंशे, फलं च ऐश्वर्यम् । पादस्पर्शे एकोनत्रिंशे, फलं च मृत्युः । अङ्गुलीस्पर्शे त्रिंशेऽङ्गुले, फलं राज्यं वदेत् । व्रणो निर्देश्य इति प्रत्येकं सम्बन्धः ।

परतो न विशेषफलं विषमसमस्थाश्च पापशुभफलदाः ।

परतः, त्रिंशत्परतो नैवं विशेषफलम् । किंतु विषमाङ्गुलस्था अशुभाः समाङ्गुलस्था व्रणाः शुभा इति सामान्यफलमेव ।

कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽयमितियावत् ॥

कैश्चित् पराशरादिमुनिभिस्त्रिंशत्परतो व्रणा निष्फला उक्ताः । तथा चोक्तम्—

पराशरेण, खड्गलक्षणमधिकृत्य ।

तेषां प्रमाणानि जघन्यमङ्गुलानि पञ्चविंशतिर्मध्यमं त्रिंशदुत्तमं चत्वारिंशदतो हीनमतिरिक्तं वा न धारयेत् । मूलात्प्रभृत्यङ्गुलान्तरितेषु व्रणेष्वनाकृतिषु यावत्त्रिंशदङ्गुलं तावत्क्रमात्फलनियमः पुत्रनाशोऽर्थागमोऽर्थनाशः सञ्चयो गृहदाहो मित्रलाभो व्याधिभयं सुखावाप्तिर्ज्ञातिवध आज्ञाप्राधान्यं विपक्षोत्पत्तिर्वाहनलाभः शोकः प्रव्रज्या सुतज्ञातिकुलच्छेदो माहात्म्यं बललाभः सन्तापः क्लेशः पुत्रलाभो धनागमः शोकः प्रामाण्यमाधिपत्यमुपभोगो भयं दौर्भाग्यमैश्वर्यं राजपूजेति । परतः सर्वं प्रशस्तं विद्यात् । इति ।

औशनसे धनुर्वेदे तु त्रिंशत्परतोऽपि विशेषफलमुक्तम् ।

तद्यथा, तथा एकत्रिंशदङ्गुले सभृत्यस्त्रीवाहनं भर्त्तारं विनाशयति । द्वात्रिंशदङ्गुले पराजयमरिभिः करोति । त्रयस्त्रिंशदङ्गुले परैर्भर्त्तारं पीडयति, नीचस्य च कर्मणो वशगं करोति। चतुस्त्रिंशदङ्गुले धन्यं दानं धर्मभाजनम् । पञ्चत्रिंशदङ्गुले मरणं सद्यः करोति । षट्त्रिंशदङ्गुले युधि जयं भर्त्तुर्ददाति । सप्तत्रिंशदङ्गुले पराजयमरिभिः करोति। अष्टत्रिंशदङ्गुले शत्रुमर्दनं करोति। नवत्रिंशदङ्गुले कुलधनैरेव क्लेशं नयति । चत्वारिंशदङ्गुले कन्यालाभमरिजयं च प्राप्नोति । व्रणेन खड्गास्थितेन । तथैकचत्वारिंशदङ्गुले शत्रुपीडनाद्भयं लभते। द्विचत्वारिंशदङ्गुले स्वराष्ट्रवर्धनम्।त्रिचत्वारिंशदङ्गुले दुःखं प्राप्नोति, सेनापतिरेव भर्त्ता भवति। चतुश्चत्वारिंशदङ्गुले श्रियं विपुलां लभते । पञ्चचत्वारिंशदङ्गुले व्रणो भयङ्करः स्यात् । षट्चत्वारिंशदङ्गुले व्रणः सुखावहो भवति । सप्तचत्वारिंशदङ्गुले स्वपक्षं पीडयति परपक्षं वर्धयति । अष्टचत्वारिंशदङ्गुले राजश्रियं भुङ्क्ते । एकोनपञ्चाशदङ्गुले शत्रोर्विजयं लभते । पञ्चाशदङ्गुले कुलवृद्धिर्भवति। केचित्पुनराहुर्मङ्गल्यं चक्र-

वर्त्तित्वं नृपतेर्भवतीति ।

करवीरोत्पलगजमदघृतकुङ्कुमकुन्दचम्पकसुगन्धः ।
शुभदोऽनिष्टो गोमूत्रमेदपङ्कामिषसगन्धः ॥
कूर्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गन्धः ।

पङ्कः कर्दमः । आमिषं मांसम् ।

वैडूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः ।

इदमौशनसं तु शस्त्रपानं
रुधिरेण श्रियमिच्छता प्रदीप्ताम् ।
हविषा गुणवत्सुताभिलिप्सोः
सालिलेनाक्षयामिच्छतश्च वित्तम् ॥

प्रदीप्तामुत्कृष्टाम् ।

वडवोष्ट्रखरेभदुग्धपानं
यदि पापेन समीहतेऽर्थसिद्धिम् ।
ऋषपित्तमृगाविवस्तदुग्धैः
करिहस्तच्छिदये सतालगर्भैः ॥

पापेन शत्रुवधादिना । ऋषपित्तं मत्स्यपित्तम् । वस्तः छागः । एतेषां पूर्वोक्तानां दुग्धैः तालगर्भस्तालवृक्षनिर्यासस्तत्सहितैः गजहस्तच्छेदनकामः पानं कारयेत् ।

आर्कं पयो हुडविषाणमषीसमेतं
पारावताखुशकृता च युतः प्रलेपः ।
शस्त्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चात् सितस्य न शिलासु भवेद्विघातः ॥

आर्कं पयः अर्कक्षीरम् । हुडविषाणं मेषशृङ्गं तस्य मषी तया समेतम् ।

क्षारैः कदल्या मथितेन युक्तै–

र्दिनोषितैः पायितमायसं यत् ।
सम्यक्सितं वाश्मनि नैति भङ्गं
न चान्यलोहेष्वपि तस्य कौण्ठ्यम् ॥

मथितेन युक्तैः कदल्याः क्षारौरित्यन्वयः । मथितं तक्रम् । सम्यक्सितं तीक्ष्णीकृतम् । कौण्ठ्यं कुण्ठत्वम् ।

लोहरत्नाकरे,

यस्य यस्य यदा चिन्हं तच्चेत्सर्वाङ्गसुन्दरम् ।
तं खड्गमुत्तमं प्राहुः सर्वसम्पत्तिकारकम् ॥
अर्द्धचन्द्राकृतिर्यस्मिन् खड्गे स्वाभाविकी भवेत् ।
अपि दोषसहस्राणि हन्ति चन्द्रस्तमो यथा ॥
गदा चक्रं तथा शूलं डमरुर्मण्डलं तथा ।
यत्र स्वाभाविकं खड्गे स खड्गो नृपदुर्लभः ॥
एकवर्णो भवेद्यस्तु लक्षणैकेन संयुतः ।
स खड्गराजो नृपतेर्विज्ञेयः शुभकारकः ॥
निम्बुकल्को भवेद्यत्र रात्रन्दिवविलेपितः ।
मधुरो मधुवर्णाभः स खड्गो देवदुर्लभः ॥
आहते यत्र मधुरो ध्वनिः समुपजायते ।
पूज्यः स खड्गो नृपतेः शत्रुसञ्चयनाशनः ॥
कांस्यस्वन इवाभाति यस्मिन् खड्गे हते ध्वनिः ।
खड्गोत्तमं तं वदति गिरिशः शुभवर्धनम् ॥
खड्गेषु लक्षणं यद्यद्येषु येषु प्रकाशितम् ।
तच्छुद्धं प्रभुसम्पत्त्यै मिश्रितं शत्रुसम्पदे ॥
यस्याधो दृश्यते चिन्हं मध्ये नैव प्रदृश्यते ।
स्वहितार्थं न गृह्णन्ति तं खड्गं नरपुङ्गवाः ॥
यस्याग्रे दृश्यते चिन्हं मध्ये नाधोऽपि दृश्यते ।

खड्गं मध्यगुणं प्राहुः खड्गशास्त्रविशारदाः ॥
अधोऽर्धे लक्षणं यस्य परार्द्धे नैव दृश्यते ।
अधमः स भवेत्खड्गः क्षितिपानां भयावहः ॥
ऊर्ध्वार्धे लक्षणं यस्य नाधोऽर्द्धे लक्षणं भवेत् ।
तं खड्गं मध्यमं प्राहुः खड्गशास्त्रविशारदाः ॥
तिर्यक् यस्य भवेच्चिह्नमपि सर्वाङ्गगोचरम् ।
खड्गाधमं तं नृपतिर्दूरादेव विवर्जयेत् ॥
तिर्यक्चिह्नमधोऽर्धे स्यादुपर्यर्धे न वा भवेत् ।
नापकृष्टं न प्रकृष्टं तं प्राहुः खड्गकोविदाः ॥
अधोऽर्धे वर्ण एकः स्यादूर्द्धार्धे भिन्नवर्णकः ।
वर्णसङ्करवान् खड्गो नृपाणां भयवर्धनः ॥
आहते यत्र खड्गे स्यात् ध्वनिः काकस्वरोपमः ।
हुङ्कारो ध्वनितं वा स्यात्स वर्ज्यो नरपुङ्गवैः ॥ इति ।

अथ विस्तरेण खड्गवर्णादिलक्षणमुक्तम्—

औशनसे धनुर्वेदे,

जमदग्निं प्रति शुक्रो भगवानुवाच ।

अथ प्रशस्तान् वर्णान् वक्ष्यामि निबोध । मुक्ताफलस्फटिकवर्णसदृशस्तरुणादित्यकिरणसप्रभो वैडूर्योत्पलवर्णः समुद्रसन्निभो नीलनीरदाभोऽभिनवेन्द्रनीलसच्छायो मयूरग्रीवावर्णो विमलाकाशसङ्काशः कांस्यनीलसवर्णः सुवर्णरजतवर्णसम्वादी महानीलमणिवर्णानुकारी चेति खड्गानां वर्णः प्रशस्तो भवेत् । श्वेतवर्णोऽनुवर्णः खड्गो ब्राह्मणस्य पूजितः । स हि पुत्रवंशकरः सर्वसम्पत्करश्च तस्य स्यात् । रक्तवर्णानुवर्णः क्षात्रियस्याभिपूजितः । स हि स्थानवंशकरः सर्वकामार्थकरस्तु स्यात् । हेमवर्णानुवर्णो वैश्यस्य पूजितो भवति । स हि धनधान्यकरः सौ-

भाग्यकरश्च तस्य स्यात् । नीलजलधरवर्णोऽपि शूद्रस्य भवति । स हि स्थानायुर्वृद्धिकरः शुभकरश्च स्यान्नीलवर्णानुवर्णश्च तस्य सर्वकामार्थसाधको भवति । वैडूर्योत्पलवर्णो नृपस्य विजयावहो निर्दिष्टो यस्तु श्वेतवर्णः पीतो रक्तो वा तद्वर्णं शूद्रो न धारयेत् । तेषामन्यतमं वर्णं धारयतो वैश्यस्य व्यापादो भवति । राज्ञस्तु समुद्रसलिलवर्णं खड्गं धारयतश्चक्रं प्रवर्त्तते । वैश्यस्य च नीलजीमूतसदृशवर्णः कुलवर्धनो भवति । तं खड्गं प्राप्य महीपतिः स्वराष्ट्रवृद्धिमाप्नुयात् । एवं च यदि वैश्य आवहेत तदा तस्य धनधान्यसमृद्धिस्तुमुला स्यात् । शूद्रोऽपि यदि दैवयोगादेनं लभेत् ततो महदैश्वर्यं प्राप्नुयात् । इन्द्रनीलात् खड्गान्मेदिनीपतिः सार्वभौमो भवति । मयूरग्रीववर्णः खड्गो विधारितः परराष्ट्रं पीडयति ऊर्ध्वं स्वं स्वं राष्ट्रं च कुलं च वर्धयति । यद्यन्योऽपि कश्चित्तं लभेत्तदा सोऽपि महतीं श्रियमाप्नुयात् । तथा निर्मलनभस्तलवर्णः कांस्यनीलसप्रभः सुवर्णरजतप्रख्यश्च खड्गो विधृतो भूमिलाभं विपुलां श्रियं च दद्यात् । महानीलवर्णोऽपि धनरत्नप्रदो भवति । नृपस्य च विजयं सुवृष्टिं च तेन निर्दिशेत् । द्विजः कृष्णं न धारयेत् सच्छूद्रोऽपि श्वेतं न धारयेद्वैश्यस्तु रक्तं न धारयेन्नरपतिश्च पीतं न धारयेदित्येते सफला वर्णैरभिहिताः । इति प्रशस्ता वर्णा उक्ताः । निन्दिता वर्णा वक्ष्यन्ते । केशवर्णो मषीमालिनः सीससन्निभः समानश्च लोहवर्णेन माक्षिकापक्षधूमसन्निभवर्णो गृहधूमसवर्णो रूक्षः कल्माषो निष्प्रभश्चेति वर्णाः समासतो विगर्हिताः । तत्र केशवर्णाभः खड्गः क्लेशकरो भवति मषीसवर्णो भयप्रदो भवति सीसवर्णो भर्तुर्विनाशाय कुलविनाशाय च लोहवर्णो मातुलस्य कुक्षिव्याधिकरो माक्षिकापक्षसवर्णो भयङ्करस्तस्य च भोग-

विनाशाय धूमसवर्णो वह्निभयं दद्यात् । गृहधूमसवर्णः कुलक्षयं करोति कल्माषो रूक्षो निष्प्रभश्च दौर्भाग्यायार्थनाशाय च कल्पते खड्ग इति । वर्णाः शुभाशुभाः कथिताः । स्वरा वक्ष्यन्ते । मृदङ्गवीणाघण्टाकोकिलध्वनिमनोहरो वृषभजीमूतहिरण्यस्वनसदृशो हुतहुताशनबृंहितसदृशो वेदघोषसमानः शब्दः खड्गस्य पूजितः समासाद्भवति । पुष्कलेन वेदध्वनिना नरस्य विप्रवासो जायते । तथा स्निग्धं विमुञ्चेच्छिन्नं दूरनादितं गम्भीरमतिगम्भीरं शब्दं यतः सोऽपि पूजितः खड्गः समो विशदश्च । पूजिता नामेषां प्रत्येकं फलं वक्ष्यते । मृदङ्गध्वनिगम्भीरेण ऋद्धिर्भवति घण्टाघोषो जयावहः स्याद्वीणाकोकिलशब्दः सौभाग्यकारकः पुत्रलाभं विजयं च ददाति वृषस्वनः खड्गो जीमूतनिःस्वनश्चात्यर्थं लाभाय भवेत् हिरण्यघोषो बहुविधधनप्रदो वह्निबृंहितघोषो ब्राह्मणस्य वाञ्छितार्थसिद्धिदो ध्रुवं संस्थानमसम्भ्रान्तं करोति । स्निग्धः शब्दः परिजनप्रियत्वमाधत्ते । उच्चैःस्वरोऽपि बलं गम्भीरो वृद्धिं दूरनादेन सारस्वतीं श्रियं समस्थानसम्पत्तिं विशदः सिद्धिमतिगम्भीरो विजयमिति ।

खड्गशब्दः कुरुत इति शेषः ।

स्वरलक्षणफलम् । एतद्विपरीतः स्वरो विगर्हितो भवति । स्वर उक्तः शुभः साम्प्रतमशुभो वक्ष्यते । शुष्कचर्मसमानस्तालपत्रध्वनिर्जर्जरनिःस्वनो भिन्नकांस्यसदृश इत्येते शब्दाः समासतो निन्दिता भवन्ति । तत्र यः शुष्कचर्मसदृशस्वनः खड्गः स नित्यं भर्त्तुर्व्याधिकरः छिन्नचर्मनिस्वनः क्लेशमात्रं वदति तालपत्रध्वनिर्धननाशं करोति जर्जरशब्दो विनाशाय नित्यं भवेद्भिन्नकांस्योपमशब्दोवित्तनाशाय कल्पते खड्ग इति ।

एते खड्गशब्दा विगर्हिताः ।

अन्यत्सर्वं खड्गन्धादिलक्षणमौशनसादिधनुर्वेदेषु द्रष्टव्यम्। विस्तरभयान्न लिख्यते।

इति खड्गलक्षणम्।

अथ खड्गभेदाः।

औशनसे धनुर्वेदे,

अतः परं खड्गनाम वक्ष्यते। क्रिया मरको मारो मार्गस्थोऽथ चित्रतालित इति पञ्चैते पञ्चैव सन्नाह्याः खड्गा कनीयांसो वेदितव्याः। सुखसञ्चारः सुखसन्नाह्यो मध्यमोत्तमश्चेति पञ्च मध्यमाः खड्गा भवन्ति। दुर्धर्षो विजयः सुनन्दो नन्दनः श्रेष्ठः पञ्चोत्तमाः खड्गा भवन्ति। तेषां मध्ये द्वाविंशत्यङ्गुलः प्रथमः खड्गो भवति। ततः परेषां द्व्यङ्गुलादिवृद्धिरुत्तरोत्तरा भवति। तथा विंशतिपलिक आद्यः शेषाणामष्टपला विवृद्धिः पलानामयुग्मं वाङ्गुलानां न प्रशस्तं भवति। अग्रपृथुर्मूलपृथुः सङ्क्षिप्तमध्यः समकायश्चेति खड्गाश्चतुर्विधा वेदितव्याः। पिण्डितः पत्र इति तेषां द्विविधः काय्यो भवति एकधारो द्विधारश्च। मुखानि तु द्वादश भवन्ति। शूलाग्रः शिखराग्रः समाग्रो मण्डलाग्रो गोजिह्वाग्रः पार्श्वाग्रोऽथ कुटिलाग्रः सहकारपत्राग्रो मण्डलाग्रोऽथ कुमुदाग्रः पद्मोत्पलपुष्पफलोपममुखोऽहिमुखाग्रो मुखान्येवमस्य खड्गस्य द्वादश भवन्ति। द्व्यङ्गुलोऽधमस्य विस्तारो मध्यमस्य चतुरङ्गुलो विस्तार उत्तमस्य षडङ्गुलो विस्तारो भवति।

इति खड्गभेदाः।

अथ चक्रलक्षणम्।

औशनसे धनुर्वेदे,

जमदग्निं प्रति शुक्र उवाच।

वत्स यथाप्रश्नमुपदिश्यमानं निबोध। तत्रोत्तममध्यमाध

मभेदेन चक्रं त्रिविधं भवति । संयुक्तमष्टभिरारैरुत्तमं षडारं मध्यमं चतुर्भिरारैः सम्पन्नमधमं भवति । तत्र श्लोकः—

अष्टारमुत्तमं चक्रं षडारं मध्यमं भवेत् ।
जघन्यं चतुरारं स्यादिति चक्रं भवेत्त्रिधा ॥

द्वादशपलमुत्तममेकादशपलं मध्यमं दशपलमधमं चेति बालानां चक्रम् । अबालानां तु पञ्चाशत्पलमुत्तमं चत्वारिंशत्पलं मध्यमं त्रिंशत्पलं कनिष्ठमिति । तथाष्टाङ्गुलमुत्तमं सप्ताङ्गुलं मध्यममधमं तु षडङ्गुलं भवति बालानाम् । अबालानां तु षोडशाङ्गुलमुत्तमं चतुर्दशाङ्गुलं मध्यममधमं द्वादशाङ्गुलं भवति । तत्र श्लोकौ—

द्वादशैकादश दश पलानि क्रमशः शिशोः ।
त्रिंशच्च चत्वारिंशच्च पञ्चाशत्प्रतिलोमतः ॥
बालानां त्रिविधं चक्रमष्टसप्तषडङ्गुलम् ।
अबालस्य द्विरष्टौ स्युर्द्विः सप्त द्वादशापि च ॥

त्रिविधं च नेमिप्रमाणं श्रेष्ठं मध्यं कनिष्ठं चेति । तत्र त्र्यङ्गुला प्रथमा नेमिः सार्धद्व्यङ्गुला मध्यमा नेमिः द्व्यङ्गुला तु कनिष्ठा नेमिः । नेम्युत्तममध्यमकनीयसां मध्ये परिमण्डला नेमिः स्यूतमणिरत्नालङ्कृता स्थूलमूला च या नेमिः सा चक्रे पूजिता भवति । तत्र शिल्पिभिर्विचित्रमनेकविधसंस्थानमतिमनोहरं सुधारमव्रणं च चक्रं कर्त्तव्यमिति ।

इति चक्रलक्षणम् ।

अथ परशुलक्षणम् ।

औशनसे धनुर्वेदे,
जमदग्निं प्रति शुक्रः प्रोवाच ।

यथोपदेशमुपदिश्यमानं निबोध परशोर्द्रव्यं प्रमाणं चोत्तममध्यमाधमानाम्। नराणां सपाणिः पाणिमुक्तश्चेति द्विकर्मा परशुर्भवति। तत्र पञ्चाशत्पलिकः श्रेष्ठश्चत्वारिंशत्पलिको मध्यमस्त्रिंशत्पलिकः कनिष्ठ इति। जातप्रमाणस्य पुरुषस्य सर्वायसमपारास्त्रिविधः परशुर्भवति । श्रेष्ठस्य सार्धचतुरङ्गुलं मूलं सार्धत्र्यङ्गुलं मूलं मध्यमस्य सार्धद्व्यङ्गुलं निकृष्टस्य मूलं विस्तृतं भवति । तथा मध्यं सार्धपञ्चाङ्गुलं विस्तृतं चोत्तममध्यमकनिष्ठानां भवति। तथाङ्गमपि पञ्चदशाङ्गुलमुत्तमस्य सार्धत्रयोदशाङ्गुलं मध्यमस्य द्वादशाङ्गुलं निकृष्टस्येति परशोः फलम् । तथोत्तमं द्वादशाङ्गुलायामं मध्यमं दशाङ्गुलायाममधममष्टाङ्गुलायामित्येवमपि त्रिविधं भवति । कुणपदण्डप्रमाणमुत्तममध्यमकनिष्ठत्वभेदात्त्रिविधम्। सल्लकीधवाशोकार्जुनशिरीषशिंशपासनराजवृक्षेन्द्रवृक्षतिन्दुकप्रभृतीनां द्रुमाणां दण्डः प्रायो भवेत् । यस्तु सपाणिः परशुः स यथाकामं प्रयोध्य इति ।

राजवृक्षः शम्पाकः, धनवेहड इति प्रसिद्धः। इन्द्रवृक्षः देवदारुः।

इति परशुलक्षणम् ।

अथ तोमरलक्षणम् ।

औशनसे धनुर्वेदे,

शुक्रो भगवानुवाच जमदग्निं प्रति ।

वत्स निबोध यथाप्रश्नमुच्यमानम् । तत्र दण्डान्वितं सर्वलोहं चेति तोमरं द्विविधं भवति । यत्तोमरं सदण्डं तल्लक्ष्ये पाते च भवेत् । यत्तोमरं सर्वायसं तत्कार्यपाते प्रयोजयेत् । तच्च निकृष्टमध्यमोत्तमं भूयस्त्रिविधं भवति। तत्र चतुर्हस्तप्रमाणं निकृष्टं सार्धचतुर्हस्तप्रमाणं मध्यमं पञ्चहस्तप्रमाणं तूत्तमं भवति । तथा च

कलनायां चाद्यं द्वितीयं तृतीयं चेति त्रिधा । मध्ये द्व्यङ्गुलकलितमेकं स्यान्मध्यमादूर्ध्वं त्र्यङ्गुलकलितं द्वितीयं स्यान्मध्यात्पूर्वं षडङ्गुलकलितं स्थानकलनया तृतीयं स्यात् । तत्र एकं निकृष्टं त्र्यङ्गुलं मध्यमं षडुत्तमं कलनायाम् । तथा तोमरास्त्रस्य परिणाहः परः षडङ्गुलो भवति सार्धपञ्चाङ्गुलो मध्यमः पञ्चाङ्गुलः कनिष्ठ इति त्रयाणां देशानां त्रयश्छन्दाः ।

छन्द आरुयेत्यर्थः ।

छन्दतया आवन्त्यो मागधो दाक्षिणात्यश्चेति । तत्रावन्त्यं यत्तोमरं ततः शाणसंस्थानं भवति मागधं तोमरं योक्त्रसंस्थानं भवति दाक्षिणात्यं तोमरं वृत्तं भवति ।

शाणः करपत्रम् । तेषां नामानि तदेशतो वेदितव्यानि । दण्डस्तु सर्वायसमयस्ताम्रमयो वेणुमयश्चेति त्रिविधो वोच्छकालङ्कृत इति ।

इति तोमरलक्षणम् ।

अथ कुणपलक्षणम् ।

औशनसे धनुर्वेदे,

जमदग्निं प्रति भगवानुशना प्रोवाच ।

साधु पृष्टं कुणपानां विधानं यथोपदेशं कथयामि । शृणु, विंशत्यङ्गुलो दशाङ्गुलः षोडशाङ्गुलश्चेति श्रेष्ठमध्यमाधमत्वेन कुणपोऽङ्गुलमानेन त्रिविधा भवेत् एवं पलमानेन विंशतिपलः षोडशपलो द्वादशपलश्चेति बालयोग्यानामेतत्प्रमाणमुक्तम् । अबालानां तु कुणपः त्रिंशत्पलः श्रेष्ठः पञ्चविंशतिपलो मध्यमो विंशतिपलस्तु निकृष्टश्चतुर्विंशत्यङ्गुलः श्रेष्ठो द्वाविंशत्यङ्गुलो मध्यमः कनिष्ठस्तु विंशत्य-

गुल एव भवेत् । खेटकमपि कुणपस्य त्रिविधमुत्तमं द्वादशाङ्गुलं दशाङ्गुलं मध्यममष्टाङ्गुलं तु निकृष्टं बालानामेतत् खेटकम् । अबालानां तु निबोध । विंशत्यङ्गुलमुत्तममष्टादशाङ्गुलं मध्यमं षोडशाङ्गुलं निकृष्टमिति । ऋजुकायो मन्यः सङ्कुचितकोणश्चेति त्रिविधा भवन्ति करणैः ।

मन्यः असमान इत्यर्थः ।

कुणपानां तु यानि गात्राणि तानि बलवन्ति निर्व्रणानि च कर्त्तव्यानि । तेषां मुखानि वेदितव्यानि चतुरस्रं कुसुमाग्रं व्रीहिवक्त्रं शिखराग्रं चेति । यः पीनाग्रो निर्व्रणो वलयाढ्यः सुजातो दृढ ऋज्वग्रः शुभशब्दालुः प्रियदर्शनश्चेति जातप्राणस्य पुरुषस्य प्रशस्तः कुणपो भवतीति ।

इति कुणपलक्षणम् ।

अथ शक्तिलक्षणम् ।

औशनसे धनुर्वेदे,

जमदग्निं प्रति शुक्र उवाच ।

वत्स जमदग्ने शृणु यन्मां त्वं परिपृच्छसि । उत्तमा मध्यमा कनिष्ठा चेति तिस्रः शक्तयो भवन्ति । तासां दण्डश्चतुर्विधो वैणवो दारुमयो दन्तमय आयसश्चेति । सुस्निग्धत्वं निर्व्रणत्वं व्रणपूजितत्वं चेति दण्डगुणाः स्युस्तासु पञ्चहस्ता उत्तमा मध्यमा द्वित्रितस्तिहीना त्रित्रितस्तिहीना त्वधमा भवन्ति । तासां कक्षाद्वयोपघटितलक्षणमुभयतः फलद्वयं भवति । हस्तमात्रमतितीक्ष्णं कायभेदनसमर्थमतिघनं सुदृढं तच्च निस्त्रिंशाकारं कार्यं सङ्क्षिप्तमध्यभागं भवति । मध्यफलमितराभ्यां कक्षाफलाभ्यां युक्तं श्रितं वा भवति । तच्च द्विविधं मूलयुक्तं मूलाश्रितमुखयुक्तं चेति ।

तच्च दण्डे पत्रभङ्गादिचित्रान्वितं नागबन्धैर्बध्नीयात् । अथोत्तमायाः शक्तेः फलाग्रेण शतपलवर्द्धितं गौरवं भवति । मध्यमायास्त्वशीतिपलं कनिष्ठायाः षष्टिपलमिति शक्तिलक्षणमुक्तमिति ।

इति शक्तिलक्षणम् ।

अथ चोत्थकलक्षणम् ।

औशनसे धनुर्वेदे,

जमदग्निं प्रति शुक्रः प्रोवाच ।

शृणु चोत्थकानां लक्षणम् । चोत्थकस्यार्थे दण्डमुपकल्पयेत् । तस्य ग्रहणविधिर्वक्ष्यते । नातिबालो न वृद्धो न कीटैः कर्शितो न छिन्नो न भिन्नो न सव्रणो न सगर्भाधानकाले नापि फलकाले न पुष्पकाले गृहीतः प्रोक्तद्रुमाणां मध्ये द्रुमोऽन्यतमः प्रशस्तो यः स्यात्तस्य दण्डस्तमेवंविधं द्रुममुक्तक्रमेण गृहीत्वा समाहितो नात्युष्णे नातिशीतले च देशे विन्यस्य विपर्यासेन संस्थाप्य द्रव्यं प्रशान्तो रक्षत्ततोऽग्निकर्मणि सुसमाहितं विधाय चतुरस्रं कृत्वा पुनरष्टास्रं षोडशास्रं च कृत्वा तप्तवर्णमयं कारयेत्समन्तादिति दण्डकल्पः । एतेनैव च विधिना सर्वान् प्रकल्पयेत् । दशहस्तो दण्डः श्रेष्ठो नवहस्तो मध्यमः कनिष्ठश्चाष्टहस्तो भवति । तस्य दण्डस्योभयोः पक्षयोः सम्यक्प्रयोजयेदागमानुरूपमयोमयमम्भोजकर्णिकासंस्थानं वृत्तं वा चतुरस्रं वा प्रमाणेन यथेष्टं फलद्वयम् । तथा हस्तमात्रप्रवेशेन प्रमाणतो द्वौ कोशौ स्यातां द्व्यङ्गुलहीनौ मध्यमस्य चतुरङ्गुलहीनौ कनिष्ठस्य । तेषां त्रयाणामपि मध्ये कल्पना भवति । चोत्थकानां पलमानं वक्ष्यते । तत्र पलानां शतमुत्तमस्य नवतिः पलानि मध्यमस्याशीतिपलान्यधमस्य भवन्तीति ।

इति चोत्थकलक्षणम् ।

अथ गदालक्षणम् ।

औशनसे धनुर्वेदे,

जमदग्निं प्रति शुक्र उवाच ।

गदालक्षणं वक्ष्यते। समाहितो निबोध । तत्र गदा पञ्चाशदङ्गुलायामा श्रेष्ठा चत्वारिंशदङ्गुलायामा मध्यमा त्रिंशदङ्गुलायामा निकृष्टा भवेदिति त्रिविधा गदा बुधैरुपदिष्टा । पलानां सहस्रमुत्तमायाः शतान्यष्टौ मध्यमायाः षट्शतानि कनिष्ठाया इति गदायाः त्रिविधं गौरवं भवति । सैव लक्षणलक्षिता गदा प्रपौत्रशास्त्रतो ग्रहीतव्या। यस्तु बलदर्पितः समर्थगौरवो देव देववराधिष्ठितः स तां गृह्णाति । तस्य मुक्तस्य च दोषाः सम्भवेयुः । तथा या गदा लघीयसी भवति न सा सङ्ग्रामे युद्धविशारदैः प्रशस्यते । तस्मात्समा सर्वेषां प्रशस्ता भवति। या हि प्रतीचारे प्रहारे चारिकासु च सञ्चारमोक्षा समेत्यभिधीयते । श्यस्रा वृत्ताश्रिर्वा सुगात्रा व्रणरहिता सुविहिता प्रियदर्शना कर्त्तव्या । ग्रहो दशाङ्गुलायामो दशाङ्गुलपरिणाहश्च त्रयाणां पुरुषाणाम् । मूलतः सुद्रव्याणि पद्मगर्भोपमं पूर्णचन्द्रोपमं वा ग्रहमूलं चित्रज्ञैश्चित्रितं भवति। स्थूलाग्रा विशिष्टा चतुरस्रा मध्यमा तालमूलाकृतिर्निकृष्टा भवति । तप्तकाञ्चनपदै रजतपदैर्वा बहुचित्रितरूपैर्मूलमध्याग्रबन्धनैर्विचित्रीकृता गदा श्रेष्ठा भवति सर्वशास्त्रेषु । सा हि क्रियाविधौ वपुष्मत्त्वाद्बलवत्त्वाच्च सुखयोगा भवति । नानाचित्रैरलङ्कृता सर्वेभ्यः शस्त्रेभ्यश्चाक्षय्या । सा हि गदा शस्त्रज्ञैरायुधवरेत्यभिधीयते इति ।

राजविजये,

पञ्चाशदङ्गुलो दण्डो दलेष्वर्काङ्गुला गदा ।

दलानि षोडशैव स्युः कलशोऽङ्गुलिमात्रकः । इति ।

इति गदालक्षणम् ।

अथ कुन्तलक्षणम् ।

औशनसे धनुर्वेदे,

उक्ता कुन्तोत्पत्तिरनन्तरं कुन्तद्रव्यं वक्ष्यते । वेणुवेत्रतालचन्दनशिंशपासनखदिरदेवदारुश्चेति कुन्तस्य दण्डद्रव्याणि । तत्र दण्डः सप्तहस्तप्रमाणः श्रेष्ठः षड्भिर्हस्तैर्मध्यमः पञ्चहस्तश्च निकृष्टो भवति । लोहस्याकरौ द्वौ भवतः । एकं पुष्कलावर्त्तं द्वितीयं वीनोत्थितं चेति । तत्र वीनोत्थितं यल्लोहं तीक्ष्णम् । यत्तु पुष्कलावर्तकं तल्लोहं मृदु । तयोस्त्वियं परीक्षा यत्ताडितं नदति तत्तीक्ष्णम् । यन्निःशब्दं तन्मृदु । निपाते च यद्भज्यते तत् वीनोत्थितं तीक्ष्णम्, यन्नमति तत्पुष्कलावर्त्तं मृदु भवेत् । कुन्तस्य च फलं मृदुना लोहेन कर्त्तव्यं तीक्ष्णेन लोहेन धारा कार्या । तयोरलाभे शेषाणि लोहानि शोधयित्वा कुन्तफलं तैः कारयेत् । तच्च सप्तपर्णशाकखर्ज्जूरीवेत्रकरवीरवेणुतालानाम् । केतक्यास्तु पत्राकारं कुशाग्रसन्निभं तथा कर्णसंस्थानं वा कर्त्तव्यम् । तच्च निर्व्रणं मनोदृष्टिहरं तीक्ष्णं शुभं च श्रेष्ठं च षोडशाङ्गुलायामं मध्यमं चतुर्दशाङ्गुलायाममधमं द्वादशाङ्गुलायामं भवति । त्र्यङ्गुलविस्तारं त्र्यङ्गुलविस्तारं च क्रमाद्भवति । द्वियवबाहुल्यं सार्द्धैकयवबाहुल्यमेकयवबाहुल्यं च । तत्र श्लोकाः—

वेण्वादिद्रुमजातीनां कार्यो दण्डः स च त्रिधा ।
सप्तषट्पञ्चहस्तोऽसावुत्तमो मध्यमोऽधमः ॥
तस्याकरौ च द्वौ स्यातां वीनपुष्कलावर्त्तकौ ।
तत्रैकस्तीक्ष्णलोहस्य द्वितीयो मृदुनस्तथा ॥

तत्फलं मृदुलोहेन धारां तीक्ष्णेन कारयेत्।
सप्तपर्णादिपत्राणां समाकारं फलं भवेत्॥
षोडशाङ्गुलमायामं द्व्यङ्गुलं चापि विस्तृतम्।
यवद्वितयबाहुल्यं श्रेष्ठं कुन्तफलं भवेत्॥
मध्यमाधमयोर्हानिर्द्व्यङ्गुलार्धाङ्गुलेन च।
आयामो विस्तृतो वत्स बाहुल्येन यथाक्रमम्॥

सुगन्धत्वं सुरसत्वं सुवर्णत्वं व्रणपूजितत्वं छायापूजितत्वं चेति फलगुणाः। चम्पकोत्पलचन्दनागरुपत्रोशीरसुगन्धदाफलस्य गन्धसम्पत्। तया युक्तं फलं पूजितं भवति। वसागन्धि विण्मूत्रगन्धि मोत्रगन्धि दुर्गन्धि च निन्दितं भवति। मधुरं यच्चाम्लं यत्कषायं भवति तल्लक्ष्मीमवर्द्धनम्। यल्लवणं कटु तिक्तं तन्निन्दितं भवति। शब्दस्तु हिरण्यस्थालीशब्दवत् घण्टाशब्दवत्प्रशस्तः। भिन्नपात्रशब्दवद्भेरीशब्दवच्च शब्दो निन्दितो भवति। वैडूर्यचन्द्रसमानवर्णं नीलोत्पलसदृशवर्णं निर्मलाकाशसवर्णमतसीपुष्पनिभं वा कुन्तफलं श्रियं भर्तुर्ददाति। मधुकोशमषीसमानवर्णं सीसनीलोत्पलमक्षिकावर्णं च निन्दितं भवति। हंसशुकमयूरताम्रचूडषट्पदनन्द्यावर्त्तकूर्ममत्स्याः अन्ये च मङ्गलशंसिनः पदार्थाः कुन्तव्रणेषु यदि दृश्यन्ते तदा ते धर्मकामार्थसाधका निर्दिष्टाः। पाण्डुकोलूकवायसश्वगृध्रजम्बूकशृगालकृकलाशा अन्ये च निन्दिताः पदार्था दृश्यन्ते व्रणेषु ते दृष्टाः श्रियमपहरन्ति वत्सेति व्रणलक्षणम्। छाया वक्ष्यते। ध्वजपताकाचामरच्छत्रतोरणशिबिकावेश्माङ्कुशवर्धमानभृङ्गारगजतुरङ्गा यस्मिन् कुन्तफले दृश्यन्ते धौतच्छायान्तरगताः स कुन्तः प्रशस्तस्तमपुण्यकृतो न लभन्ते।

भृङ्गारः करकः ।

वानरकुररकुलर्क्षवृकसूकरमहिषवायसोलूका अन्ये च निन्दिता यदि कुन्ते स्युर्धौते व्यक्तास्तदा स कुन्तः श्रियं भुज्यमानामपि विनाशयेत् यस्तादृशं कुन्तं बिभृयात् स बन्धं सद्यो लभेत् । महिषीवृकव्याघ्रनखस्य शुक्तिचूर्णं चेति समभागानि कारयेत्। चूर्णितं कृत्वा तेन चूर्णेन फलं घर्षयेत्। घर्षितं कुन्तफलं निर्मलं भवति दुर्गन्धं न भवेत् । तथा मलेन न लिप्यते । तच्च चर्मकोशसमन्वितं समाहितं कारयेत् । नालिका निर्व्रणा सुदृढा पत्रायामेन अनुबन्धैश्च सुश्लिष्टैर्दृढैः सुवर्णमयै रजतमयैर्वा मणिरत्नालङ्कृतैर्नालिका कर्त्तव्या। तथा चोत्थकं कुन्तस्य कर्त्तव्यम् । नालिका सहजा वा नालिका चात्र श्लिष्टा कार्या । हरीतकीसदृशं तले बिल्वफलाकारं कपित्थफलसदृशं वा वृत्तमष्टास्रं वा कलशामलकाकारं चोत्थकसम्भवे सर्वोपस्करान्वितं कुन्तायुधं षष्टिपलं श्रेष्ठं पञ्चाशत्पलं मध्यमं चत्वारिंशत्पलं निकृष्टमिति प्रबलरिपुविनाशकं च कुन्तं कारयेत्। न तु स्वप्रमाणादधिकगौरवम्। यो हि स्वस्य बलमविदित्वा कुन्तमायुधमावहेत्सादी तस्याजीर्णमजानतः पुरुषस्येवातिभक्तमशनं कुन्तायुधं विषीभवतीति ।

राजविजये,

एकादशकरः कुन्तो नवहस्तस्तु शर्वलः ।
सप्तहस्तो भवेद्भल्लः क्षेपणी पञ्चहस्तिकी ॥ इति ।

इति कुन्तलक्षणम् ।

अथ प्रसङ्गात्पताकादिलक्षणान्युच्यन्ते ।

राजविजये,

त्रिकोणा नवहस्ता च सैन्यस्था स्यात्पताकिका ।

गजस्थैकादशकरा सप्तहस्ता तथोपरि ॥
पञ्चहस्ता पदातीनां यष्टिः स्यात्तत्प्रमाणिका ।
श्वेतारुणा क्रमात्पीता कृष्णा वर्णचतुष्टये ।
नीलान्त्यजानां चित्रा तु पूर्ववर्णत्रये शुभा ॥ इति ।

इति पताकालक्षणम् ।

अथ दुन्दुभिलक्षणम् ।

राजविजये,

मूले वितस्तिर्निःसाणे सार्धहस्तं मुखं स्मृतम् ।
हस्तत्रयं समुत्सेधश्चतुरस्रस्त्रिलोहजः ॥
यमलैः कीलकैर्बद्धमावृतं सार्द्रचर्मणा ।
उष्ट्रस्थे वादनं द्वन्द्वेनाहतं युगपत् पृथक् ॥ इति ।

इति दुन्दुभिलक्षणम् ।

इति श्रीवीरमित्रोदये लक्षणप्रकाशे नानायुध-
लक्षणप्रकरणम् ।

अथ गजलक्षणप्रकरणम् ।

तत्र—

रिपुविजयः फलमेषां नागानां नागलक्षणोक्तानाम् ।
सञ्चरणसाहसनिरतस्य भवति नित्यं नरेन्द्रस्य ॥
साङ्ग्रामिका द्विपा राजन् सम्यग्लक्षणलक्षिताः ।
राज्ञा तथापि लक्षणवर्जितो वर्जनीयश्च ॥
सर्वलक्षणसम्पूर्णो यो भवेद्गज उत्तमः ।
सङ्ग्रामादिषु कार्येषु पार्थिवस्तं समारुहेत् ॥

इत्यादिबार्हस्पत्यसंहितावचनैः सुलक्षणगजैरेव रिपुविजयो भवतीत्यतो राजा लक्षणहीनं गजं विहाय सङ्ग्रामादिषु सुलक्षणमेव गजमारुहेदित्युक्तम् । तत्र च किंलक्षणोऽभिमत इति तल्लक्षणमुच्यते । तत्रादौ गजप्रशंसा उच्यते ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।
कुञ्जरा[1]ः परमा शोभा शिबिरस्य बलस्य च ।
आयत्तः कुञ्जरेष्वेव विजयः पृथिवीक्षिताम् ॥
शिबिरं गृहम् ।
तेषां समर्जने यत्नं पालने च भृगूत्तम ।
यथावन्नृपतिः कुर्याद्गन्धर्वाः कुञ्जरा मताः ॥
तावन्तश्च तथा धार्या यावतां पोषणं सुखम् ।
कर्तुं शक्यं न धार्यास्ते क्षुधिता दुःखितास्तथा ॥
दुःखितास्ते नृणां हन्युः कुलानि भृगुसत्तम ।
तस्मात्तेषां सुखं कार्यं यशःश्रीविजयप्रदम् ॥
सन्नद्धपुरुषारूढैः सुसन्नद्धैस्तुरङ्गमैः ।

अनल्पैरपि यत् युक्तं बलं परबलप्रणुत्।
तदेकस्यापि समरे कुञ्जरस्य विचर्मणः॥
न शक्येत मुखे स्थातुं वेगादापततो द्विज।
भिन्नानां राम सङ्घानां संहतानां च भेदनम्॥
एकः क्रुद्धो रणे कुर्यात्कुञ्जरः साधुचोदितः।
मदक्लिन्नकपोलस्य किञ्चिदञ्चितचक्षुषः॥
षट्पदाभोगगण्डस्य कः शोभां कथितुं क्षमः।
वेगेन धावमानस्य प्रसारितकरस्य च॥
कः समर्थः पुरः स्थातुं स्तब्धकर्णस्य दन्तिनः।
यस्य फूत्कारमात्रेण तुरङ्गमशतान्यपि॥
स्वारूढान्यपि वेगेन विद्रवन्ति दिशो दश॥
तत्सैन्यं कुञ्जरा यत्र स नृपो यस्य कुञ्जराः।
मूर्तिमान् विजयो नाम कुञ्जरा मदगर्विताः॥
सपक्षा देववाह्यास्ते मनुजानामपक्षकाः।
वाहनार्थं कृता राम स्वयमेव तु वेधसा॥

दृष्ट्वा पताकाभिरलङ्कृतं तु
नागेन्द्रसैन्यं प्रबलं यथाद्रिम्।
पतन्ति शीघ्रं हृदयान्यरीणां
तस्मात्प्रधानाः सततं करीन्द्राः॥ इति।

पालकाप्ये,

प्रत्यक्षदेवता नागा देवजात्या यतस्ततः।
स्वामिनश्च भवन्त्येते तस्मात्प्रोक्तास्तु भूमिदाः॥
राज्ञाऽऽरूढो गजो भाति गजस्थः शोभते नृपः।
उभयोरविशेषत्वाद्राज्ञामात्मसमा गजाः॥
क्षुधितास्तृषिताश्चापि व्यापत्सु महतीषु च।

न त्यजन्ति नृपं यस्माद्बान्धवास्तेन वारणाः ॥
पुत्रदारात्मसन्देहे सन्धौ चैवात्र भूभृताम् ।
विनये ऋषिभिस्तुल्याः क्रुद्धा नागास्तु राक्षसाः ॥
निस्त्रिंशादधिकत्वाच्च शस्त्रं नागा महीपतेः ।
भूपं युद्धन्ति रक्षन्ति वहन्ति रणमूर्द्धनि ॥
भूपं रणमूर्द्धनि वहन्ति रक्षन्तीति सम्बन्धः ।
प्राणाँस्त्यजन्ति कृच्छ्रेण श्रेष्ठाङ्गास्तेन वारणाः ।
प्राकारगोपुराट्टालकपाटोच्चाटनादिषु ॥
भञ्जने मर्दने चैव नागा वज्रोपमाः स्मृताः ।
स्वसैन्यं परिरक्षन्ति परसैन्यविमर्दनाः ॥
घटाभिरन्विता नागाः प्राकारा इव दुर्जयाः ।
सहसैवागतं सैन्यं घटास्था वारणाः पुनः ॥
घटा गजसमूहः ।
दर्पतः प्रतिरुन्धन्ति सेतुबन्ध इवार्णवम् ।
सहसोत्पतिते कार्ये नागारूढो महीपतिः ॥
रणाङ्गं विजयं कुर्यादेकश्च विजयः कृतः ।
शरजालाश्चितमुखः कोऽन्यः शक्तः परं गजात् ॥
हन्तुं प्राकारमुन्मथ्य रथाश्वनरकुञ्जरम् ।
एकशक्तिप्रहारेण म्रियतेऽश्वो नरोऽपि च ॥
सहेच्छक्तिप्रहाराणां शतं युद्धेषु वारणः ।
मोक्षात्परा गतिर्नास्ति नास्ति वेदात्परा स्मृतिः ॥
नास्ति कृष्णात्परं भूतं नास्ति यानं गजात्परम् ।
पृथिव्या भूषणं मेरुः शर्वर्य्या भूषणं शशी ॥
नराणां भूषणं विद्या सैन्यानां भूषणं गजः ।
तत्सौख्यं किल तद्राज्यं धार्मिको यत्र पार्थिवः ॥

तन्मित्रं यत्र विश्वासस्तत्सैन्यं यत्र कुञ्जराः।
शीलात्तु शोभते रूपं वारिभ्यः शोभते कुलम्॥
कुलं जनपदः।
पुष्पितं शोभतेऽरण्यं शोभते सगजं बलम्।
नासौ पुमान् यस्य हिता न भार्या
नासौ नृपो यस्य शुभा न नागाः।
यद्वद्वनमसिंहं तु यद्वद्राष्ट्रमपार्थिवम्।
यद्वत् शौर्यमशस्त्रं तु तद्वत्सैन्यमकुञ्जरम्॥
यतः सत्यं ततो धर्मो यतो धर्मस्ततः फलम्।
यतो रूपं ततः शीलं यतो नागस्ततो जयः॥
खड्गतोमरचक्रैस्तु नागस्कन्धहता नराः।
क्षणात्स्वर्गं तु गच्छन्ति तस्मात्स्वर्गोपमा गजाः॥
प्रासादासनशय्यासु निषणां शिबिकासु च।
वहन्ति प्रमदां राजन्नुद्यानेषु सरस्सु च॥
क्रीडासु च नरेन्द्राणां जले पुष्पितपङ्कजे।
स्नपयन्ति गजा हस्तैर्लग्नपुष्करपुष्करैः॥
पुष्करः कराग्रम्। पुष्करं कमलम्।
स्त्रियोऽवतारयन्त्येते मृन्मया इव निश्चलाः।
नास्ति हस्तिसमो बन्धुर्नास्ति हस्तिसमो रिपुः॥
नास्ति हस्तिसमः कायो नास्ति हस्तिसमो बली।
वारणेषु तु सामर्थ्यं विशेषेणेह दृश्यते॥
त्रयाणामपि सैन्यानां विद्यन्ते नैव ते गुणाः।
दृश्यन्ते ये सदा राजन् हितेष्वपि च बन्धुषु॥
चन्द्रहीना यथा रात्रिः सस्यहीना यथा मही।
नागहीना तथा सैन्या विस्तीर्णापि न शोभते॥

ये चैवान्ये च बहवो वारणानां गुणाः स्मृताः ।
तस्मात्प्रयत्नाद्रक्षेत्तु स्वपुत्रानिव नित्यशः ॥
तेषाममितसत्त्वानां कर्त्तव्यमनुपालनम् । इति ।

इति गजप्रशंसा ।

अथ गजोत्पत्तिः ।

पालकाप्ये,

पुरा हि वारणा राजन् कामगाः कामरूपिणः ।
चरन्ति मानुषे लोके देवलोके च पार्थिव ॥
अथोत्तरे हिमवति महान्न्यग्रोधपादपः ।
द्वियोजनशतं राजन्नुच्छ्रितस्तद्वदायतः ॥
ऋषिर्दीर्घतमा नाम तस्यासीत्स परिग्रहः ।
न्यग्रोधं ते कदाचित्तु समाजग्मुरनेकधा ॥
निपेतुस्तस्य शाखायां सर्वे ते सहिता गजाः ।
अतिभारेण तेषां तु सा शाखा शतयोजना ॥
विदारयन्ती तं देशं निपपात महीतले ।
ते चापि वारणाः सर्वे शाखामन्यां समाश्रिताः ॥
ततः कोपसमाविष्टस्तान् गजानृषिरब्रवीत् ।
मददर्पोच्छ्रयाद्यस्मान्मम भग्नः परिग्रहः ॥
विमुक्ताः कामचारेण भविष्यथ न संशयः ।
नराणां वाहनत्वं च तस्मात्प्राप्स्यथ वारणाः ॥
अथान्तरिक्षान्महती वाणी राजन् विनिर्गता ।
यैः क्षयं दानवा नीतास्तान् हित्वा मुनिसत्तम ॥
वाणीं श्रुत्वा शुभामेतामेवमस्त्विति सोऽब्रवीत् ।
अथ ते वारणाः श्रुत्वा शापमात्मापराधजम् ॥
परं दैन्यमुपागम्य ब्रह्माणमुपतस्थिरे ।

अथ तान् पूर्वमेवाह ब्रह्मा लोकपितामहः ॥
त्यजध्वं वारणाः शोकं न हि शापो मदन्यथा ।
कर्तुं यत्नेन मुनिना वचनं समुदाहृतम् ॥
एतद्वाक्यं ततः श्रुत्वा प्रत्यूचुस्ते दिशां गजाः ।
अस्माकमन्वयानां तु गजानां ग्रामवासिनाम् ॥
रोगाः प्रादुर्भविष्यन्ति विषमाभ्यशनादिभिः ।
दिग्गजानां वचः श्रुत्वा प्रत्युवाच पितामहः ॥
न विषादे मनः कार्यं व्यस्तं प्रति मतङ्गजाः ।
उत्पत्स्यते चिरेणाथ गजबन्धुर्महामुनिः ॥
आयुर्वेदस्य विज्ञाता मत्कृतस्य भविष्यति ।
तेषां रोगान् समुत्पन्नान् हरिष्यत्यौषधीबलात् ॥
एवमुक्त्वा तु दिङ्नागान् विससर्ज यथादिशम् ।
ततस्ते प्रययुः स्थानं स्वं स्वमैरावतादयः ॥
दिग्वारणान्वयास्ते तु लोकं मानुषमाश्रिताः ।
विचरन्ति महीं कृत्स्नां पद्भिः सागरमेखलाम् ॥
शतधा यूथसङ्ख्याभिः प्रवृद्धाश्च सहस्रशः ।
राजन् हिमवतः पार्श्वे महर्षिः सामगायनः ॥
सागरं प्रति लौहित्यं तपस्तीव्रमतप्यत ।
तस्याश्रमपदाभ्याशमाजगाम यदृच्छया ॥
स वृद्धबालं सुमहत् गजयूथं सयूथपम् ।
तं स्वप्ने धर्षयामास यक्षिणी कामरूपिणी ॥
का त्वियं शयनात्तूर्णमुत्थितः स व्यचिन्तयत् ।
आश्रमादभितः क्रम्य मुनिर्मूत्रं चकार सः ॥
तस्य मूत्रेण संसृष्टं तत्रैवेन्द्रियमस्रवत् ।
प्रविष्टमात्रे निलये तस्मिंस्तु मुनिसत्तमे ॥

अथाजगाम तं देशं गजयूथं सयूथम् ।
दैवात्करेणुसंयुक्तं तत्र तद्रेतसान्वितम् ॥
अपिबद्धस्तिनी मूत्रं ततो गर्भमधत्त सा ।
तस्य तद्वचनं श्रुत्वा राजा वचनमब्रवीत् ॥
कथं करेणुस्तच्छुक्रं पीत्वा गर्भमधत्त सा ।
को हेतुः करणं किंवा भगवन् वक्तुमर्हसि ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ।
शृणु सर्वं महाराज शुक्रं पीतवती च सा ॥
गर्भवती यदर्थं च सा शुक्रेण च हस्तिनी ।
ब्रह्मणा विहिता मूर्ती रुचिरा नामदेवता ॥
आदिकाले प्रजासर्गे विजित्य भगवान् प्रभुः ।
देवानां मानुषाणां च गन्धर्वाणां च रक्षसाम् ॥
गृहीत्वाऽसौ सृजंस्तेजः स्वयं स्वायम्भवीमिव ।
तां दृष्ट्वा रुचिरां देवा ऋषयश्च तपोधनाः ॥
इत्यूचुरमृतं प्राप्य विस्मयं सर्वपारगाः ।
रुचिरेत्यभिविख्याता लोकेषु भविता त्रिषु ॥
आचिन्तयित्वा सा देवान् प्रजापतिपुरोगमान् ।
यौवनस्यैव गर्वाद्वा केवलं लीलयापि वा ॥
तत्रैवं मुनिभिः ख्याता कीर्त्यमाना ययौ तदा ।
तां रुष्टो भगवान् ब्रह्मा शशाप वसुधाधिप ॥
भविष्यसि करेणुस्त्वं कदाचिद्वसुधातले ।

रुचिरोवाच ।

मम शापवशात्प्राप्तिं ब्रूहि नाथ क्षितौ तदा ।
इत्युक्त्वा ब्रह्मणः सा तु पादयोरपतत्तदा ॥
तामुवाचाश्रुपूर्णाक्षीं प्रमदां प्रमदां शुभाम् ।

करेणुभावो मेदिन्यां मतङ्गात्ते भविष्यति ॥
प्रसूय भार्गवाख्याते वसुवंशे च कन्यकाः ।
भविष्यसि तदा भद्रे पुनः शापवशाद्वशा ॥
प्राप्तशापा वसुकुले जन्म कामयते तदा ।
उपायं चिन्तयत्यत्र जन्मार्थं पश्चिमां गता ॥
महर्षेर्भार्गवस्याथ वृक्षव्यालनिषेवितम् ।
आश्रमं मुनिभिः श्रेष्ठैः शोभितं ब्रह्मनिःस्वनैः ॥
ब्रह्मसद्मनिभं चित्रं सिद्धगन्धर्वसेवितम् ।
शैलराजस्य पार्ष्णिस्थं मणिराजिविराजितम् ॥
अप्सरोभिः समाकीर्णं किन्नरीगीतनादितम् ।
आकुलं यज्ञधूमैश्च स्वाध्यायस्वरसंयुतैः ॥
पावकादित्यसङ्काशैरशोकस्तबकैरपि ।
शोभितं वृक्षखण्डैश्च नीलधाराधरोपमैः ॥
कमलोत्पलनद्धैश्च सरोभिरुपशोभितम् ।
ददर्श तत्र धीमन्तं पावकोपमतेजसम् ॥
सुवर्णस्तम्भवर्ष्माणं जटामुकुटधारिणम् ।
तं मेरुशिखराकारं श्रिया विगतकल्मषम् ॥
उवाच वदतां श्रेष्ठं कृत्वा मूर्द्धनि चाञ्जलिम् ।
ऋषीणां भार्गवश्रेष्ठ क्रोधस्यान्तं कदा भवेत् ॥
इत्युक्त्वा ब्रह्मणस्तस्य साऽपतत्पादयोस्तदा ।
मा भैषीः केन वित्रस्ता कलुषा वा शुभानने ॥
तामुवाच महाप्राज्ञो ह्यवस्थां चिन्तयंस्तदा ।
ददर्श सर्वं निर्वृत्तं दिव्यचक्षुःसमन्वितः ॥
वसूनामुत्तमे वंशे जननं ते भविष्यति ।
तत्र वर्षसहस्रं तु नीत्वा शापमवाप्स्यसि ॥

एतत्ते कथितं राजन् पुनश्चेदं निगद्यते । इति ।

विष्णुधर्मोत्तरे,

मार्कण्डेय उवाच ।

पुलहस्य प्रजासर्गं श्रुत्वा गन्धर्वसत्तमः ।
भूयः पप्रच्छ तं विप्रं गजोत्पत्तिं सुविस्तरात् ॥

शैलूष उवाच ।

कुञ्जराणां समुत्पत्तिं श्रोतुमिच्छामि विस्तरात् ।
कुञ्जरा हि महाभागा भृशं च दयिता मम ॥

नारायण उवाच ।

यदा प्रसूता मार्त्तण्डमदितिर्भास्करारणिः ।
तदा तदण्डमुद्भाव्य दृष्टवान् कश्यपः स्वयम् ॥
तेजोऽधिकत्वादण्डस्थं नापश्यत यदा शिशुम् ।
उवाच देव्या अण्डेऽस्मिन् किमसौ बालको मृतः ॥
ततः सभासः सकलं तेजसा भासयन् जगत् ।
तेन मार्त्तण्डनाथस्य कथिता द्विजसत्तमैः ॥
ततस्त्वण्डकपाले द्वे गृहीत्वा तु प्रजापतिः ।
पृथक्पृथगवस्थाप्य रथन्तरमगायत ॥

रथन्तरं साम ।

मनुः प्रवेशयामास इडायास्ताविडेप्सया ।
उदरे पुलहात्तेन जनयामास सा गजान् ॥
अष्टौ महाबलान् नागान् तेषां नामानि मे शृणु ।
ऐरावतस्तथा पद्मः पुष्पदन्तश्च वामनः ॥
सुप्रतीकोऽञ्जनो नीलः कुमुदश्च मतङ्गजाः ।
शक्राद्यानां दिगीशानां यथासङ्ख्येन वाहनाः ॥
चत्वारो जातयस्तेषामेकैकस्यान्वयें स्मृताः ।

भद्रा मन्दा मृगा चैव सङ्कीर्णा च नराधिप ॥ इति ।

इति गजोत्पत्तिः ।

अथ गजजातिनिर्देशः ।

तत्र गजा भद्रमन्दमृगमिश्रजातिभेदेन चतुर्विधा जायन्ते । तदुक्तम्—

पराशरसंहितायाम्,

तत्र जातयश्चतस्रो भवन्ति । भद्रा मन्दा मृगा मिश्रा चेति ।

तथा च,

भद्रो मन्दो मृगो मिश्रश्चतुर्द्धा जायते गजः । इति ।

विष्णुधर्मोत्तरे,

ऐरावताद्यष्टौ दिग्गजाननुक्रम्य--

चत्वारो जातयस्तेषामेकैकस्यान्वये स्मृताः ।

भद्रा मन्दा मृगा चैव सङ्कीर्णा च नराधिप ॥ इति ।

एतासामुत्तममध्यमकनिष्ठत्वमपि स्मर्यते—

तत्रैव,

भद्रा तेषां भवेच्छ्रेष्ठा मन्दा मध्या कनीयसी ।

मृगा ज्ञेया च बाहुल्यात्सङ्कीर्णा पार्थिवोत्तम ॥ इति ।

पराशरसंहितायामपि,

भद्रा श्रेष्ठा भवेत्तासां मन्दा मध्या कनीयसी ।

मृगा मिश्राधिकैर्ज्ञेया गुणदोषैः समासतः ॥ इति ।

इति गजजातिनिर्देशः ।

अथ भद्रादिगजलक्षणम् ।

तत्र भद्रगजलक्षणमुक्तम्—

विष्णुधर्मोत्तरे,

व्यूढोच्चमस्तकोऽस्वच्छपृथ्वायतमुखाङ्गुलिः ।

उदग्रश्चोग्रसत्त्वश्च समसाध्यो महाकरः ॥
ताम्रतालवीक्षणः स्निग्धः सहिष्णुः स्वासनस्तथा ।
अन्वर्थवेदी बलवान् भद्रो ज्ञेयो मतङ्गजः ॥ इति ।

व्यूढोच्चमस्तकः विपुलोच्चशिराः । उदग्र उच्चः । अन्वर्थवेदी सङ्केताभिज्ञः ।

पालकाप्ये,

प्रतिमाने सुविपुलश्चारुपृष्ठायताननः ।
मुखे सुराभिनिःश्वासस्ताम्रजिह्वौष्ठतालुकः ॥
तथाऽस्य तुल्यसंस्थानौ दन्तौ शुभ्रौ विशेषतः ।
मधुपिङ्गलनेत्रश्च महाकायो महाबलः ॥
पुरस्तादुच्छ्रितश्चापि पश्चादवनतोऽपि यः ।
धनुर्विनतवंशश्च समपादतलः शुभः ॥
विंशत्या च नखैर्युक्तो योऽष्टादशभिरेव च ।
विद्युद्दावाग्निसिंहेभ्यो न बिभेत्यङ्कुशादपि ॥
अन्वर्थवेदी शूरश्च क्षमावान्न च कर्कशः ।
कल्याणमेधास्तेजस्वी स भद्रः परिकीर्त्तितः ॥ इति ।

पराशरसंहितायाम्,

तत्र भद्रजातिश्चारुपृष्ठायतमुखो व्यूढोच्चमस्तक उदग्रोग्रसत्त्वोऽनुवृत्तकरः श्रोता दीर्घपुष्कराङ्गुलिवालधिर्महामन्योरोग्रीवः स्थूलमेढ्रोदरस्ताम्रतालुजिह्वौष्ठः सुपार्श्वः स्निग्धः सवर्णमृदुरोमा कूर्मपादतलस्थितिः पृथ्वासनः सुच्छविः सूक्ष्मबिन्दुचित्रो बह्वणुरोमोपचितश्रोत्रः सुनखो धनुःपृष्ठवंशो मधुवर्णवान् यूथाभिरक्षिता सहिष्णुरन्वर्थवेदी बलवान् कामातुरो मृदुनोपा-

---

१ वाहित्थस्याधोभागे दन्तयोर्मध्यं प्रतिमानम् । अधः कुम्भस्य वाहित्थं प्रतिमानमधोऽस्य यत् । इत्यमरः ।

येन साध्य आशूपदेशग्राही च भवतीति ।

अनुवृत्तकरः अनुक्रमेण वृत्तशुण्डादण्डः । मन्या कन्धरा ।

चित्रत्वं बाहुशिरसोरन्तर्मणिगणं तथा ।
दन्तयोर्मधुवर्णत्वं नेत्रयोर्मधुपिङ्गता ॥
आसंनस्य[1] पृथुत्वं च पूर्णता कुक्षिपार्श्वयोः ।
पृथुत्वं पृष्ठभागस्य घनत्वं समसन्धिता ॥
स्निग्धच्छायात्वमायामपरिणाहोच्छ्रयौ तथा ॥
सश्रीकत्वं गुरुत्वं च कायस्यैते गुणाः स्मृताः ।
इत्यादिवचनैः शरीरस्यैते गुणा उक्ताः ।
सर्वलक्षणसम्पूर्णो दृश्यते न मतङ्गजः ।
इत्यनेन च सुलक्षणसम्पूर्णावयवगजस्य दुर्लभत्वमुक्तम् ।

अतः शरीरगतगुणज्ञानार्थं कानिचिदङ्गलक्षणान्युच्यन्ते । तत्र बार्हस्पत्यसंहितायां भद्रगजलक्षणमुपक्रम्य—

हीनं कृष्णं च कल्माषं पुष्करं न प्रशस्यते ।
सम्पूर्णं मांसलं रक्तं सुकुमारं शुभं स्मृतम् ॥
त्र्यङ्गुलं तु भवेद्धीनं हीनं पतिविनाशनम् ।
कृष्णं भर्तुर्विरोधाय कल्माषं भर्तृरोगदम् ॥
सम्पूर्णं राज्यदं भर्तुः पुष्करं चतुरङ्गुलम् ।
सौभाग्यं मांसलं कुर्यात्सुकुमारं तथार्थदम् ॥
रक्तपद्मदलच्छायं तथा मिष्टान्नपानदम् ।
अतः परं शुभे ज्ञेये स्रोतसी पाटलोदरे ॥
स्रोतसी तालुमध्यगतौ प्रदेशौ ।
पञ्चाङ्गुलप्रमाणेन वर्तुलत्वेन चार्थदे ।
अतो मृदु च ताम्रं च करनालं सुखप्रदम् ॥

---

१ स्कन्धप्रदेशस्य । आंसनं स्कन्धदेशः स्यात् इत्यमरः ।

अतः परं प्रवक्ष्यामि क्रमेण करलक्षणम् ।
न करादीर्घमिच्छन्ति वालधिं शास्त्रपण्डिताः ॥
न वालधिसमं हस्तं नातिदीर्घं क्रमायतम् ।
न तनुं नातिकायं च न रूक्षं न कृतव्रणम् ॥
नाक्रमेण कृतोत्सेधं न हीनं दशनान्तरे ।
न ह्रस्वाङ्गुलिसंयुक्तं नातिसङ्कटपुष्करम् ॥
एतल्लक्षणसंयुक्तं करं शंसन्ति कोविदाः ।
वालधिस्तु समो हीनः समो वा दन्तिदुःखदः ॥
समः, करेणेत्यनुषङ्गः ।
अतिदीर्घो भवेद्भर्तुरायुर्नाशकरः करः ।
तनुर्व्याधिकरो भर्तुरतिकायोऽर्थनाशनः ॥
रूक्षो व्याधिव्रणं कुर्याद्यातुव्रणकृतो व्यथाम् ।
प्रतिलोमेन च स्थूलो गजस्य सुखनाशनः ॥
असमञ्जसहीनश्च असमञ्जसवर्त्तुलः ।
दुःखशोकभयायासकर्ता भवति नित्यशः ॥
दशनान्तरहीनश्च जायते दन्तरोगकृत् ।
कथितं पूर्वमेवैतत्पुष्कराङ्गुलिलक्षणम् ॥
अतो मया ते कथितं साम्प्रतं करलक्षणम् ।
निर्वलिर्दीर्घरोमा च क्रमवृत्तान्तसंयुतः ॥
अणुबिन्दुविचित्रश्च दैर्घ्ये नृप शतान्वितः ।
वाहित्थपुष्करं यावदायामो जात्यपेक्षया ॥
अरत्नित्रयनाशश्च हीनो हीनतरः क्रमात् ।
युक्तस्त्वनेन मानेन करः पूज्यतमो भवेत् ॥
निर्वलीकश्च सौभाग्यं दीर्घरोमार्थदः स्मृतः ।
क्रमवृत्तो जयं कुर्यादणुबिन्दुयुतो धनम् ॥

सुप्रमाणो भवेद्राज्ञः शक्त्यायुःपरिवर्धनः ।
आनाहवांश्च सततं राज्यस्फीतिकरो भवेत् ॥
करस्य कीर्त्तितं ह्येतल्लक्षणं शुभसंज्ञितम् ।
अतः परं प्रक्ष्यामि लक्षणं दन्तवेष्टयोः ॥
कचहीनावतिस्थूलौ शिथिलौ विषमौ तथा ।
दन्तवेष्टौ सदा भर्त्तुः प्रमाणाभ्यामसौख्यदौ ॥
दन्तमूले सुसम्बद्धौ सकचौ किञ्चिदुन्नतौ ।
दन्तवेष्टौ सदा भर्तुर्वृद्धिदौ परिकीर्तितौ ॥
अतः परं प्रवक्ष्यामि लक्षणं तु विषाणयोः ।
विषाणयोः दन्तयोः ।
व्यस्तता सङ्कटत्वं च तनुता भस्मशुभ्रता ॥
वक्रत्वं ह्रस्वता चैव धूसरत्वं च रूक्षता ।
मृदुताऽधोगतित्वं च हीनता मूलमध्ययोः ॥
सर्पच्छत्रककान्तित्वं दोषास्त्वेते चतुर्दश ।
प्रान्त्ययोः स्थूलता चैव दीर्घता चातिमात्रयोः ॥
दन्तास्त्वेते समाख्याताः फलं चैषां निबोध मे ।
व्यस्तौ च सङ्कटौ दन्तौ महाहानिकरौ तु तौ ॥
दान्तिनस्तनुतायुक्तौ व्याधिदौ परिकीर्तितौ ।
भस्मशुभ्रौ तथा भर्त्तुर्महाक्लेशकरौ मतौ ॥
वक्रावर्थविनाशाय ह्रस्वौ च परिकीर्त्तितौ ।
धूसरौ रूक्षतायुक्तौ गजस्यायुर्विनाशनौ ॥
मृदुत्वयुक्तौ नागस्य शल्यव्रणकरौ मतौ ।
स्थूलावधोगतित्वं च हीनत्वं मूलमध्ययोः ॥
सर्पच्छत्रककान्तित्वं दन्तयोर्दुःखदं मतम् ।
अतिदीर्घौ तथा दन्तौ भर्तुर्यातुश्च दुःखदौ ॥

अशुभं लक्षणं ह्येतद्दन्तयोः कथितं मया ।
शुभं च साम्प्रतं वक्ष्ये यथावदनुपूर्वशः ॥
स्निग्धौ समौ सुनिष्क्रान्तौ सम्पूर्णौ व्रणवर्जितौ ।
मुकुलाग्रौ दृढौ वापि ताम्रचूडाहलोपमौ ॥
दक्षिणाभ्युन्नतौ किञ्चित् मृणालकुमुदप्रभौ ।
दुग्धकुन्ददलच्छायौ हेमचम्पकपिञ्जरौ ॥
मधुपिङ्गौ घृतच्छायौ पीयूषसदृशप्रभौ ।
केतकीकुसुमाभौ च मृगाङ्ककिरणप्रभौ ॥
अध्यर्द्धारत्निमानौ च तदर्धानाहसंयुतौ ।

अध्यर्धारत्निमानौ सार्धारत्निदीर्घौ । तदर्धानाहसंयुतौ पादोनारत्निपरिमितसूत्रगर्भस्थूलौ । अरत्निलक्षणं च पूर्वोक्तमानलक्षणादवगन्तव्यम् ।

अमीभिर्लक्षणैर्युक्तौ दन्तौ नागस्य संमतौ ।
स्निग्धौ धनप्रदौ भर्त्तुरायुषश्च करौ समौ ॥
अरिघ्नौ तु सुनिष्क्रान्तौ सम्पूर्णौ राज्यदौ मतौ ।
निर्व्रणौ राज्यलाभाय मुकुलाग्रौ जयप्रदौ ॥
दृढौ रोगविनशाय ताम्रचूडाहलोपमौ ।
अरिराज्यविनाशाय कीर्त्तितौ शास्त्रपण्डितैः ॥
दक्षिणाभ्युन्नतौ भर्त्तुः कीर्त्तिसौभाग्यकारकौ ।
मृणालकुमुदच्छायौ सुभिक्षारोग्यकारकौ ॥
हेमचम्पकसङ्काशौ वस्त्राभरणदौ स्मृतौ ।
कुरुतो मधुपिङ्गौ च निःसपत्नं महीतले ॥
पशुलाभकरौ ज्ञेयौ घृतपीयूषसन्निभौ ।
केतकीकुसुमाभौ च भर्त्तुर्वंशविवर्द्धनौ ॥
अध्यर्द्धारत्निकौ दन्तौ सुतभृत्यजयप्रदौ ।

आनाहमानसंयुक्तौ सदा स्फीतिकरौ मतौ ॥
दुग्धकुन्ददलच्छायौ पीयूषसदृशप्रभौ ।
चन्द्रांशुसन्निभौ दन्तौ सर्वसौख्यप्रदायकौ ॥
इदं शुभकरं राजन् दन्तयोर्लक्षणं मतम् ।
अत्र—
कुरुतो मधुपिङ्गौ च निःसपत्नं महीतले ।
इति पूर्वमुक्तम् । तत्र मधुपिङ्गलक्षणमुक्तम्—
तत्रैव,
शूलं चन्द्रांशुशुभ्रं स्याच्चक्रं च ज्वलनप्रभम् ।
वज्रं काञ्चनसङ्काशं कालदण्डः स्फुलिङ्गकः ॥
अग्निकणसदृशः कालदण्डः ।
एतेषां च समायोगे दन्तानां मधुपिङ्गता ।
जाता गजविषाणानामतो मधुनिभाः शुभाः ॥
छायापञ्चकमेतद्धि दन्तयोस्तु शुभं स्मृतम् ।
भद्रजातिगजस्येतन्मन्दस्य मृगमिश्रयोः ॥
घृतपीयूषशङ्खेन्दुकेतकीछविपञ्चकम् ।
एवं जातित्रयस्यापि सामान्यं शोभनं मतम् ॥
कपोतधूमभस्मास्थिसर्पच्छत्रकसन्निभा ।
दन्तयोस्त्वशुभा राजन् छाया पञ्चविधा अपि ॥
अध्यर्धारात्रिका राजन् प्रमाणं दन्तयोः शुभम् ।
युद्धकर्माणि नागानां प्रयोजनकरं भवेत् ॥
अस्मात्प्रमाणादीर्घा ये ह्रस्वा ये च नराधिप ।
प्रतिनागप्रभेदेषु न ते दन्तास्तु पूजिताः ॥
अतः परं प्रवक्ष्यामि नेत्रयोरपि लक्षणम् ।
मार्जारनकुलक्रौञ्चशाखामृगनिभेक्षणान् ॥

सर्वदोषकरान् राजन् दूरेण परिवर्जयेत् ।
स्निग्धे मधुनिभे दीप्ते कलविङ्काक्षिसन्निभे ॥
रक्तपद्मदलच्छाये पद्मरागमणिप्रभे ।
निर्धूमाग्निशिखाकारे इन्द्रनीलसमप्रभे ॥
सौम्यदृष्टिसमायुक्ते व्यङ्गुले लोचने शुभे ।
स्निग्धे वृद्धिकरे भर्तुर्मधुपिङ्गे जयप्रदे ॥
दीप्ते दीप्तिकरे चैव प्रतापतपने यथा ।
कलविङ्काक्षिरूपे च धनधान्यविवर्द्धने ॥
चामीकरकरे नित्यं रक्तपद्मदलप्रभे ।
पद्मरागनिभे चैव रत्नालङ्कारकारके ॥
निर्धूमाग्निशिखाकारे प्रतिपक्षक्षयङ्करे ।
इन्द्रनीलनिभे नेत्रे सर्वसौख्यप्रदायके ॥
मानयुक्ते च सौम्ये च लोचने बलवर्द्धने ।
अक्षिकूटकटोदेशौ निम्नौ राज्यविनाशनौ ॥
सम्पूर्णौ च बलोत्साहमदवृद्धिकरौ मतौ ।
दन्तोद्गमे भवेन्नित्यं तालुकं षोडशाङ्गुलम् ॥
षडङ्गुलं पृथुत्वेन वंशमध्यगतं भवेत् ।
तथा शुभाशुभं चैव लक्षणज्ञैः प्रकीर्तितम् ॥
कृसरं परिदग्धं च कृष्णं कल्माषमेव च ।
चतुर्विधमनिष्टं स्याद्यथावदभिधीयते ॥
कृष्णं मषीसमं ज्ञेयं कल्माषं कृष्णलोहितम् ।
मांसलं धूम्रवर्णं च परिदग्धं प्रकीर्तितम् ॥
कृसरं च तिलच्छायं कथितं शास्त्रवेदिभिः ।
गर्भस्थस्य यदा पित्तं जायते तालुके भृशम् ॥
कृष्णतालुस्तदा नागो जायते पापलक्षणः ।

व्याधिभिः पीड्यते नित्यं वातपित्तकफोद्भवैः ॥
तृतीयां वा चतुर्थीं वा दशां प्राप्य विनश्यति ।
सङ्ग्रामे वा पलायेत बहुशस्त्रकृतव्रणः ॥
शस्त्रप्रघातपूर्णाङ्गः कृतान्तभवनं व्रजेत् ।
वातपित्तकफा यस्य चयं कुर्वन्ति तालुके ॥
गर्भस्थस्यैव कलमापतालुकं तस्य जायते ।
कृष्णतालुनि ये दोषा रक्ते ये च गुणाः स्मृताः ॥
कलमापतालुनस्ते तु भवन्ति च द्वयोरपि ।
रक्तच्छायं यदा वंशे पार्श्वयोस्त्वसितं भवेत् ॥
तदा मध्यफलं ज्ञेयं गुणदोषसमाश्रयात् ।
यदा वंशे च कृष्णं स्यात्पार्श्वयोस्ताम्रता भवेत् ॥
भर्तुरुद्वेगजनकं कलमापं तालुकं तथा ।
किञ्चिदप्यत्तेन यत्तालु परिदग्धं तु जायते ॥
नागस्याधोरणस्यापि बलक्षयकरं हि तत् ।
आधोरणो हस्तिपकः ।
कृसरं च यदा तालु पित्तोत्कर्षसमुद्भवम् ।
महामात्रविनाशाय वारणस्योपजायते ॥
महामात्रो हस्तिपकः ।
कृष्णतालोरपि यदा दक्षिणावर्त्तनं भवेत् ।
दृश्यते नित्यमेवं हि तदाऽसौ दोषवर्जितः ॥
यथा गृह्णाति रागेण दोषान् लोकः समाहितः ।
गुणान् करोति हृदये न तथा कथितानपि ॥
दोषघ्नं लक्षणं शस्तं यदाचार्यैरुदाहृतम् ।
तत्तथैवावगन्तव्यं नान्यथा ऋषिभाषितम् ॥
एवं जिह्वापि मन्तव्या तालुनः समलक्षणा ।

अरत्निमात्रा दैर्घ्येण विस्तारेऽष्टाङ्गुला मता ॥
अशुभं लक्षणं ह्येतत्तालुकस्य मयोदितम् ।
शुभं च साम्प्रतं वक्ष्ये लक्षणं शृणु चानघ ॥
रक्तं श्वेतं च पीतं च कषायं तालुकं शुभम् ।
रक्तं वृद्धिकरं भर्तुस्तथा चायुर्विवर्द्धनम् ॥
किंशुकाशोकपुष्पाभं रिपुक्षयकरं मतम् ।
श्वेतं पुष्टिकरं चापि वारणस्योपजायते ॥
चम्पकाभं तथा भर्तू रौप्यहेमविवर्द्धनम् ।
कषायं सर्वदा तालु प्रयातुः शोकवर्धनम् ॥
एवं जिह्वापि रक्ताभा सर्वसौख्यप्रदा मता ।
अतः परं प्रवक्ष्यामि सृक्कमाश्रित्य लक्षणम् ॥
निन्दिते मानहीने तु सृक्किणी मांसवर्जिते ।
सृक्किणी ओष्ठसन्धी ।
मुखरोगकरे नित्यं पण्डितैः परिकीर्तिते ॥
सर्वसौख्यप्रदे तस्य सम्पूर्णे द्वादशाङ्गुले ॥
अतः परं प्रवक्ष्यामि लक्षणं चिबुकोष्ठयोः ।
अरोमशं बलीमुक्तमनाताम्रं लघु तथा ॥
गजस्योष्ठं न शंसन्ति मुनयो दन्तरोगदम् ।
दीर्घरोमा सुसम्पूर्ण ओष्ठः पद्मदलप्रभः ॥
षोडशाङ्गुलनाहश्च हस्तार्धं चायतः शुभः ।
भर्तुरायुष्करो दीर्घो दीर्घरोमा च कीर्त्तितः ॥
पूर्णः पूरयते कोशं रक्तः सौभाग्यदो भवेत् ।
अरोमशं तथा हीनं चिबुकं न प्रशस्यते ॥
तद्धि वारणनाथस्य मुखरोगकरं मतम् ।
चतुरङ्गुलमानं तु स्थूलं रोमाविलं च यत् ॥

तत्प्रशस्तं गजेन्द्राणां मुखालङ्कारकम् ।
निम्ने च विषमे चैव हीने चैवाशुभे मते ॥
मदहानिकरे नित्यं सगदे कर्णरोगदे ।
सगदे कपोलाधःप्रदेशौ ।
अरिष्टिनाहयुक्ते च समे च सुखदे सदा ।
मानं च कर्णपाल्यास्तु मूलादारभ्य गृह्यते ॥
बाहित्थं वातकुम्भं च हीनं निम्नं च गर्हितम् ।
मुखरोगकरं निम्नं हीनं हानिकरं च यत् ॥
पूर्णं चैवोन्नतं साधु हस्तमात्रायतं भवेत् ।
त्रिरत्निपरिणाहं च करिणां सत्त्वशक्तिदम् ॥
रत्निश्च बद्धमुष्टिः करो रत्निरिति प्रसिद्धः ।
वामनं हस्तहीनं च परिणाहविवर्जितम् ॥
अव्यक्तं च न शंसन्ति वातकुम्भं विपत्करम् ।
द्वादशाङ्गुलविस्तारं दैर्घ्येणाष्टादशाङ्गुलम् ॥
व्यक्तं शुक्तिपुटाकारं भर्तुर्भूलाभकारकम् ।
गर्भाकारे च निर्याणे कठिने चातिकुत्सिते ॥
शिरसो रोगजनने गजस्यारोहकस्य च ।
सम्पूर्णे सुकुमारे च सुप्रशस्ते प्रकीर्तिते ॥
गजवृद्धिकरे नित्यं भर्तुर्विजयकारके ।
इदमेव हि विज्ञेयं लक्षणं कटपार्श्वयोः ॥
अतः परं प्रवक्ष्यामि लक्षणं कुम्भयोरपि ।
विषमत्वमरोमत्वं देहच्छायाविवर्णितम् ॥
समता कण्ठपृष्ठाभ्यां समाधिक्यमपूर्णता ।
व्यस्तता वामनत्वं च परिणाहविहीनता ॥
अनुभावः शिखरयोः कुम्भदोषा दश स्मृताः ।

भर्त्तुश्चापत्करौ ज्ञेयौ विषमौ रोमवर्जितौ ॥
देहच्छायाविवर्णौ तु शत्रुशोकविवर्द्धनौ ।
कण्ठपृष्ठसमौ चैव प्रमातुः प्रविनाशनौ ॥
मानाधिकौ च हीनौ च भर्त्तुरुच्छेदकारकौ ।
व्यस्तौ च वामनौ चैव भर्त्तुः कीर्तिविनाशनौ ॥
परिणाहविहीनौ च कोशक्षयकरौ मतौ ।
शिखरस्य तनुत्वेन युक्तौ कुम्भौ तु रोगदौ ॥
अशुभं लक्षणं ह्येतत्साम्प्रतं च शुभं शृणु ।
समौ दीर्घकचाक्रान्तौ विस्तीर्णविवरौ तथा ॥
कर्णमूलात्समारभ्य हस्तार्धजनितोच्छ्रयौ ।
सुसंहतौ च पीनौ च कामिनीकुचसन्निभौ ॥
समाक्रान्तललाटौ च देहच्छायासमप्रभौ ।
आरोहकशरीरार्धदर्शनावरणक्षमौ ॥
सश्रीकौ च सुवृत्तौ च शुभौ कुम्भौ प्रकीर्त्तितौ ।
समौ च दीर्घरोमाणौ भर्त्तुः श्रीसौख्यकारकौ ॥
समानौ रिपुनाशाय तथैव च समुन्नतौ ।
सुसंहतौ च पीनौ च वरस्त्रीलाभकारकौ ॥
शत्रुनाशकरौ ज्ञेयौ कामिनीकुचसन्निभौ ।
समाक्रान्तललाटौ च सुप्रभौ रोगनाशनौ ॥
आरोहकाच्छादितार्धौ सश्रीकौ विजयप्रदौ ।
वृत्तौ च हस्तिनां कुम्भौ पुष्पालङ्कारकारकौ ॥
अतः परं प्रवक्ष्यामि कर्णयोरपि लक्षणम् ।
निर्लोमशौ स्तसाकीर्णौ तनुच्छिद्रौ तनुत्वचौ ॥
स्तसा शिरा ।
सङ्कटौ विषमौ रूक्षौ छुटिताग्रौ सुनिष्ठुरौ ।

स्तब्धौ च वर्तुलौ चैव कर्णौ नागस्य निन्दितौ ॥
फलं च साम्प्रतं वक्ष्ये यथावदनुपूर्वशः ।
निर्लोमशौ स्तब्धाकीर्णौ गजस्य कटरोगदौ ।
निष्ठुरौ त्रुटिताग्रौ च यातृकोशहरौ मतौ ॥
स्तब्धौ च वर्तुलौ चैव गजस्यायुर्विनाशनौ ।
तनुत्वचौ तनुच्छिद्रौ सङ्कटौ विषमौ तथा ॥
रूक्षौ कर्णौ तु नागस्य भर्तुर्यातुश्च दुःखदौ ।
अतः परं प्रवक्ष्यामि शुभं कर्णविनिश्चयम् ॥
द्विरन्विमानसंयुक्तौ शिराजालविवर्जितौ ।
समत्वचौ महाच्छिद्रौ स्निग्धच्छायासमप्रभौ ॥
कपोलमण्डलास्फालकृतशब्दौ मुहुर्मुहुः ।
कर्णौ चामरसङ्काशमृदुरोमकृतार्चनौ ॥
अजर्जरमृदुप्रान्तावीषद्द्विगुणचूलिकौ ।
मयूरतालवृन्ताभौ सुविस्तीर्णसमौ शुभौ ॥
द्विरन्विमानसंयुक्तौ भर्तृ राज्यकरौ मतौ ।
स्तब्धाजालविनिर्मुक्तौ शिरोरोगविनाशनौ ॥
समत्वचौ महाच्छिद्रौ गजलाभकरौ मतौ ।
स्निग्धौ कान्तिकरौ नित्यं जयदौ दुन्दुभिस्वनौ ॥
शत्रुनाशकरौ प्रोक्तौ मृदुरोमकृतार्चनौ ।
अजर्जरमृदुप्रान्तौ प्रमातुः सौख्यकारकौ ॥
गजस्योपचयायैव ईषद्द्विगुणचूलिकौ ।
मयूरतालवृन्ताभौ तुरङ्गबलवर्धनौ ।
सुविस्तीर्णौ समौ भर्तुर्भूमिलाभकरौ मतौ ॥
कर्णयोस्तु समाख्यातं मयैतत् शुभलक्षणम् ।
फणिमार्जारमण्डूकशृगालैश्च समंप्रभम् ॥

वानरस्य समं चैव मुखं नागस्य निन्दितम् ।
स्निग्धान्यापूर्णगण्डानि गिरिकूटनिभानि च ॥
अपूर्णमेघरूपाणि पूजितानि मुखानि वै ।
रोमहीनं कृशं ह्रस्ववाहित्थं निष्प्रभं तथा ॥
वराहलोचनाक्रान्तमदृष्टचिबुकं तथा ।
ललाटतटपर्यन्तं गर्त्ताकृतिभिरन्वितम् ॥
सगदाहीनतायुक्तं मुखं नागस्य निन्दितम् ।
मुखस्य लक्षणं सम्यक्कथितं तव सुव्रत ॥
कण्ठस्य साम्प्रतं वक्ष्ये यथावदनुपूर्वशः ।
वक्रो हीनश्च दीर्घश्च कण्ठस्त्वशुभदो भवेत् ॥
आरोहकप्रभूणां च क्रमशः कुञ्जरस्य च ।
अवक्रः परिणाहेन सप्तषष्ट्यधिकं शतम् ॥
अङ्गुलानां तथाऽऽयामे द्वादशैवाङ्गुलानि तु ।
सम्पूर्णपिण्डितोदग्रश्चान्तर्मणिविभूषितः ॥
कण्ठो वारणनाथस्य एवम्भूतस्तु पूजितः ।
ऋजुः प्रमोदजननः सम्पूर्णः कार्यसिद्धिदः ॥
अह्रस्वो जयकृद्धर्त्तुः कीर्तितः पूर्णपिण्डकः ।
उदग्रो वंशवृद्धिं च प्रतापं कुरुते तथा ॥
अन्तर्मणिसमायुक्तो मणिरत्नप्रदो भवेत् ।
करालं चातिनिम्नं च आसनं न प्रशस्यते ॥
करालं यातुरशुभं निम्नं च व्रणकारकम् ।
दैर्घ्येण हस्तमात्रं तु विस्तीर्णं तु शुभं स्मृतम् ॥
विस्तीर्णं विस्तृतं राज्यं सम्पूर्णं कुरुते जयम् ।
वंशस्याथ प्रवक्ष्यामि लक्षणं तु शुभाशुभम् ॥
अत्युच्छ्रितो निम्नपरो ह्रस्वो वंशो न शस्यते ।

राज्ञश्चोदररोगाणां कर्त्ता च स भवेत्सदा ॥
षण्णवत्यङ्गुलायाममासनात्पश्चिमासनम् ।
यावत्पूरितपार्श्वश्च वंशश्चापलताकृतिः ॥
शुभो ज्ञेयो गजेन्द्राणामायामः कुरुते सुखम् ।
सम्पूर्णपार्श्वो लाभाय धनूरूपो ततो भवेत् ॥
अरत्निद्वयमानं तु पेचकात्पश्चिमासनम् ।
पेचकः पुच्छमूलप्रदेशः ।
घनास्थिविषमं निम्नं गर्हितं पुच्छरोगदम् ।
मांसोपचयपूर्णं च विस्तीर्णं च शुभं मतम् ॥
जघनोपरि रोगाणां तद्विनाशकरं मतम् ।
पेचकः पुच्छमूलाच्च अतिदीर्घोऽतिलम्बितः ॥
करोति महतीं पीडां राज्ञश्चाधोरणस्य च ।
द्व्यङ्गुलस्तु पृथुत्वेन दैर्घ्येणाष्टादशाङ्गुलः ॥
स पूज्यः पेचको ज्ञेयो गजभर्त्तुः सुखप्रदः ।
वक्रं स्थूलं च ह्रस्वं च पुच्छं कचविवर्जितम् ॥
समानाहं च नागस्य सर्वदोषकरं भवेत् ।
अवक्र ऋजुदीर्घश्च ग्रन्थिहीनः सुपेचकः ॥
गोपुच्छतालवृन्ताभः कचप्रान्तविभूषितः ।
भूमिं तु न स्पृशेद्यस्तु चतुर्भिश्चाङ्गुलैः सदा ॥
शुभोऽयं वालधिर्ज्ञेयो गजभर्तृसुखप्रदः ।
अतिप्रमाणं ह्रस्वं च कर्बुरं विगतप्रभम् ॥
शिरालं चाशुभं मेढ्रं गजभर्तृषु दुःखदम् ।
स्निग्धं षष्ट्यङ्गुलायामं नाहतः षोडशाङ्गुलम् ॥
शिराजालविनिर्मुक्तमाम्रपल्लवसप्रभम् ।
द्व्यङ्गुलस्रोतसा युक्तं रत्नबिन्दुविवर्जितम् ॥

मेदं प्रशस्तं विज्ञेयं भर्त्तुर्जीवितवर्धनम् ।
अतः परं प्रवक्ष्यामि लक्षणं गात्रयोरपि ॥
गात्रं गजाग्रजङ्घादिभागः ।
सार्धा रत्निर्द्विरत्निश्च त्रिरत्निश्च शताङ्गुला ।
सदानभागः क्रमशः परिणाहस्तु कीर्त्तितः ॥
आयामो द्वित्रिरत्निः स्यात्समत्वं कचहीनता ।
मांसलत्वं घनत्वं च गात्रयोस्तु गुणाः स्मृताः ॥
सुनाहे च सुयामे च भर्तुरारोग्यकारके ।
समे च कचहीने च गजलाभकरे तथा ॥
गजस्य पुष्टिदे नित्यं मांसले च घने स्मृते ।
गात्रे वारणनाथस्य एवम्भूते शुभे मते ॥
चिपिटे चांसफलके गात्रे रोगकरे सदा ।
सम्पूर्णे राज्यदे भर्तुर्गजस्य च सुखप्रदे ॥
तथैवोरोमणिहीनो गजस्य गर्भरोगकृत् ।
कायोपचयकर्त्ता च सम्पूर्णः कमठाकृतिः ॥
अतः परं प्रवक्ष्यामि नखानां च शुभाशुभम् ।
हीनाः कृष्णाः सुखण्डाश्च रूक्षाश्च न नखाः शुभाः ॥
सदा च रोगदा हीनाः कृष्णा भर्तृविनाशनाः ।
खण्डा रूक्षाश्च राज्ञस्तु पादव्याधिविवर्द्धनाः ॥
स्निग्धाश्चन्द्रार्धसङ्काशा मानेनैव पुरोनखाः ।
सप्तषट्पञ्चसङ्ख्यानि अङ्गुलानि क्रमेण हि ॥
एवंविधा नखाः शस्ता भर्त्तुरारोग्यकारकाः ।
अतः परं प्रवक्ष्यामि पादयोरपि लक्षणम् ॥
हीनौ मृदुतलौ रूक्षौ चरणौ दन्तिदुःखदौ ।

---

(१) द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रावरे क्रमात् । इत्यमरः ।

हस्तप्रमाणौ दैर्घ्येण कूर्माकारौ सुखप्रदौ ॥
अतः परं प्रवक्ष्यामि लक्षणं चापराश्रितम् ।
अभ्युच्छ्रिते च हीने च निन्दिते चापरे तनू ॥
सम्पूर्णे च शुभे ज्ञेये तथा आयामसंयुते ।
निन्दिते रोगदे भर्तुः पूजिते प्रभुसौख्यदे ॥
द्वादशाङ्गुलहीनं तु आसनात्पश्चिमासनम् ।
अपरापादयोश्चापि आयामोऽरत्निमात्रकः ॥
नखानां च तथा मानं षट्पञ्चचतुरङ्गुलम् ।
प्रधानावयवानां तु लक्षणं कथितं तव ॥
कचानां साम्प्रतं भेदान् वक्ष्यमाणान्निबोध मे ।
नेत्रयोः पुटपालिस्थाः कचाः पक्ष्माणि कीर्त्तिताः ॥
बालभेः प्राप्तसंस्थाश्च बाला इति हि संज्ञिताः ।
मस्तकस्थाश्च केशाः स्युः शेषा देहगताश्च ये ॥
ते रोमशब्दवाच्यास्तु भेदास्त्वेते कचाश्रिताः ।
न सङ्ख्या नैव मानं तु रोम्णां चैव प्रकीर्त्तितम् ॥
देहच्छायासवर्णत्वं मृदुत्वं च तथा परम् ।
अनाविलत्वं घनता तथा चास्फुटिताग्रता ॥
ऋजुता चैव सूक्ष्मत्वं रोम्णां सप्त गुणाः स्मृताः ।
दोषाश्च सप्तसङ्ख्याः स्युर्गुणानां च विपर्ययात् ॥
शुभानि शुभकर्तृणि दुःखदान्यशुभानि च ।
अतः परं प्रवक्ष्यामि लक्षणं पक्ष्मसंश्रयम् ॥
बाह्योत्तानानि रूक्षाणि दीर्घाण्यपि घनानि च ।
मृदूनि पिङ्गवर्णानि पक्ष्माणि करिणः सदा ॥
भर्तुरन्तःपुरेऽत्यन्तं दुःखं कुर्वन्ति मानसे ।
स्निग्धच्छायानि कृष्णानि समानि च दृढानि च ॥

अघनानि सच्छिद्राणि पक्ष्माण्यतिशुभानि च ।
गजानां स्वामिनः सौख्यं कुर्वन्ति रमणीयताम् ॥
दृढाः स्निग्धाः प्रलम्बाश्च सुवृत्ताः षट्पदप्रभाः ।
तालवृन्तसमाकारा बाला भर्तुर्जयप्रदाः ॥
शुनः पुच्छसमा रूक्षाः कपिलाः स्फुटितास्तथा ।
घनत्वातिशयोपेताः सावर्त्तास्त्वतिनिन्दिताः ॥
भर्तृयातृगजानां तु नित्योद्वेगकरास्तु ते ।
अतः परं प्रवक्ष्यामि केशानामपि लक्षणम् ॥
अभिन्ना ऋजवः स्निग्धाः घना मेघसमप्रभाः ।
केशा वारणनाथस्य क्षेमवृद्धिकरा मताः ॥
रूक्षाश्च निष्ठुराः पिङ्गाः स्फुटिताश्च जुगुप्सिताः ।
कुर्वन्ति दन्तिनां नित्यं केशा भर्त्तुर्हि चाशुभम् ॥
पक्ष्मबालकेशरोम्णां लक्षणं कथितं मया । इति ।

इति भद्रगजलक्षणम् ।

अथ मन्दगजलक्षणम् ।

विष्णुधर्मोत्तरे,

गम्भीरवेदी निःशङ्कस्तीक्ष्णः साध्यो महोदरः ।
दीर्घमेढ्राङ्गुलिश्चैव सुविभक्तशिरोधरः ॥
स्थिरः कचच्छिलः स्थूलो दीर्घवालधिपुष्करः ।
हर्यक्षः सूक्ष्मनाभिश्च मन्दो ज्ञेयो मतङ्गजः ॥ इति ।

हर्यक्षः सिंहदृक् ।

सैंहीव दृक् मन्दमतङ्गजस्य–इति वराहोक्तेः ।

पालकाप्ये,

महाग्रीवो महावक्त्रो महाप्रोथो महोदरः ।
पीनोरुवंशः सान्द्रत्वक् सुविभक्तमहाशिराः ॥

बहुलैर्मृदुभिर्दीर्घैर्युक्तः स्निग्धैस्तनूरुहैः ।
स्थिराकृतितलैः पादैश्चिपिटैः पृथुभिः समैः ॥
स्थिरास्निग्धे विशाले च पीने चापि प्रकीर्तिते ।
विषाणे तस्य विद्वद्भिरोष्ठो दीर्घश्च रोमशः ॥
कूर्मसंस्थानगमनो मन्दो मन्दगतिक्रमः ।
सम्मील्य लोचने नित्यं निद्रान्ध इव गच्छति ॥
धीरोऽनुरक्तो हस्तिन्यां गतोद्वेगो जितश्रमः ।
निर्भयो मन्दबुद्धिश्च धृतिमान्मन्द उच्यते ॥ इति ।

अथाङ्गलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

नहुष उवाच ।

साम्प्रतं श्रोतुमिच्छामि सर्वशास्त्रविशारद ।
पूर्वमुक्तं विशेषेण लक्षणं मृगमन्दयोः ॥

पूर्वमुक्तमपि साम्प्रतं मृगमन्दयोर्लक्षणं विशेषेण श्रोतुमिच्छामीति सम्बन्धः ।

तच्छ्रुत्वा तु महातेजा बृहस्पतिरुवाच तम् ।
नोक्तं यद्दृषिभिः पूर्वं गजज्ञानरतैरपि ॥
लक्षणं मन्दमृगयोस्तत्प्रत्यक्षं करोमि ते ।
भद्रस्य सदृशाः केचित्केचिदप्यधिकाः स्मृताः ॥
मांसलत्वेन मन्दस्य प्रदेशोऽमरपुङ्गव ।
सारत्वान्नेत्रयोरेव प्रथमं लक्षणं शृणु ॥
यतो हि वारणेन्द्राणां सत्त्वं नेत्रेषु संस्थितम् ।
स्निग्धे मधुनिभे दीप्ते कलविङ्काक्षिसन्निभे ॥
रक्तपद्मदलच्छाये पद्मरागमणिप्रभे ।

---

१ अत्र सन्धिरार्षः ।

नीलच्छायेऽतितीक्ष्णे च मन्दस्यापि हि लोचने ॥
मार्जारवानरादीनां सदृशैर्लोचनैर्गजाः ।
हीनसत्त्वाश्च जायन्ते गिरिकूटोपमा अपि ॥
अधिकं पुष्करं चैव मांसलत्वेन जायते ।
प्रभया यत्कषायं स्यान्मानोनाङ्गुलिपञ्चकम् ॥
किञ्चिदूने च विज्ञेये श्रोतसी चतुरङ्गुले ।
हस्तोऽपि पूर्वमानस्य स्थूलत्वेनाधिको भवेत् ॥
रोमशो नातिवृद्धश्च पृथुलः षड्भिरङ्गुलैः ।
आयामेन च हीनः स्यात्पूर्वमानात् षडङ्गुलैः ॥
नातिगोपुच्छसंस्थानौ कृष्णबिन्दुविभूषितौ ।
आनाहे हस्तमात्रौ च सार्धहस्तद्वयायतौ ॥
पीयूषकुमुदच्छायौ किञ्चिच्चम्पकपिङ्गलौ ।
स्निग्धौ चाधोमुखौ चैव दन्तौ मन्दस्य कीर्त्तितौ ॥
दन्तवेष्टावतिस्थूलौ कचाक्रान्तौ सुनिष्ठुरौ ।
त्र्यङ्गुलौ तु कटौ ज्ञेयौ मांसोपचयपूरितौ ॥
ज्ञेये कटोपरि तथा स्रोतसी द्व्यङ्गुले स्थिरे ।
एकाशीत्यङ्गुलानाहं द्वाविंशत्यङ्गुलायतम् ॥
किञ्चिन्नतं कचाक्रान्तं वाहित्थं तु प्रकीर्त्तितम् ।
प्रतिमानं तु विज्ञेयं हस्तः सचतुरङ्गुलः ॥
प्रतिमानं गजदन्तद्वयान्तरालम् ।
आयामेन तु विज्ञेयस्त्वधरस्तु दशाङ्गुलः ।
विंशत्यङ्गुलमानस्तु परिणाहोऽभिधीयते ॥
पञ्चाङ्गुलं तु चिबुकं सृक्किणी तु नवाङ्गुले ।
षड्विंशदङ्गुलायामे सगदे परिकीर्त्तिते ॥

---

१ माने ऊनमङ्गुलिपञ्चकं यस्मिन् । किञ्चिन्न्यूनपञ्चाङ्गुलमित्यर्थः ।

अध्यर्द्धारत्निकौ कर्णौ विस्तारेण कचाविलौ ।
कषायपल्लवौ स्थूलौ कृष्णबिन्दुविचित्रितौ ॥
कर्णात् कर्णान्तरं यावत्षण्णवत्यङ्गुलं शिरः ।
वातकुम्भं तथा ज्ञेयं स्थूलं सप्तदशाङ्गुलम् ॥
अङ्गुलीनां शतं सार्धमानाहे द्व्यङ्गुलाधिकम् ।
आयतत्वं च कण्ठस्य दशाङ्गुलमिति स्मृतम् ॥
भद्रस्येवासनं ज्ञेयं ततो वंशस्त्वरत्निकः ।
षडङ्गुलोच्छ्रितः स्थूलस्तुल्यो लाङ्गूलतो भवेत् ॥
पुच्छमूलाद्विहस्तं तु जायते पश्चिमासनम् ।
उच्छ्रायेण तु हीनं स्यादासनं षड्भिरङ्गुलैः ॥
पेचकोऽष्टाङ्गुलायामो लम्बत्वेनाङ्गुलत्रयम् ।
विंशत्यङ्गुलमानाहे भवेत्पुच्छस्तथोद्गमे॥
प्रान्तं यावत्क्रमेणैव कथ्यते चाङ्गुलत्रयम् ।
दैर्घ्यवांस्तु स विज्ञेयो भूमेरष्टाङ्गुलस्थितः ॥
इदं वालधिमानं तु मन्दस्य परिकीर्त्तितम् ।
सार्धद्व्यरत्निके मूले अपरे सम्प्रकीर्त्तिते ॥
उदरं चातिमात्रं स्यान्मेढ्रं हस्तद्वयायतम् ।
विंशत्यङ्गुलमानाहे कृष्णच्छायं सदा भवेत् ॥
पञ्च चत्वारि च त्रीणि अङ्गुलानि नखाः क्रमात् ।
आपाण्डुबिसकन्दाभा भवन्त्यपरपादयोः ।
अनेनैव तु मानेन गात्रपादसमाश्रयः ॥
नखा मन्दस्य विज्ञेयाश्चरणाश्च कचाविलाः ।
अतिस्थूलः पृथुत्वेन सार्धं समधिकः करः ॥
अरत्निकं च दैर्घ्येण प्रमाणं गात्रयोरपि ।
उरोमणिस्तथा ज्ञेयोऽरत्निमात्रोऽतिमांसलः ॥

विंशत्यङ्गुलमानस्तु अन्तर्गलमणिर्भवेत् ।
अनेनैव हि मानेन वातकुम्भः प्रकीर्तितः ॥
एते प्रशस्ता मन्दस्य भूनाथ कथितास्तव ।
नोक्ता ये तेऽपि भद्रस्य विज्ञेयाः समलक्षणाः ॥ इति ।

इति मन्दगजलक्षणम् ।

अथ मृगगजलक्षणम् ।

विष्णुधर्मोत्तरे,

ह्रस्वमुष्को दीर्घहनुर्भीरुर्बह्वशनस्तथा ।
ह्रस्ववंशश्च दुर्मेधा यूथस्यानुचरस्तथा ॥
दीर्घजिह्वाविषाणश्च दीर्घकुक्ष्यासनस्तथा ।
क्लेशाक्षमश्च शीघ्राशी मृगो ज्ञेयो मतङ्गजः ॥ इति ।

पालकाप्ये,

तनुत्वक्कर्णपादो यस्तन्वास्यस्तनुमेहनः ।
तनुवंशोदरश्चैव तनुव्यक्ततनूरुहः ॥
दीर्घजिह्वाविषाणश्च दीर्घगात्रस्तथोरसः ।
प्रध्वस्तरोमकर्णत्वक् पुरस्ताच्चापि संवृतः ॥
निपाने गोचरस्थाने शय्यायां चाप्यनिर्वृतः ।
रूपाभिभवशङ्की च नित्यमेवानवस्थितः ॥
ह्रस्वश्रवणलाङ्गूलो दीर्घं विक्रमते क्रमैः ।
पुनः पुनश्च विनदन् दुर्मतिश्चापि धावति ॥ इति ।

अथाङ्गलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

बृहस्पतिरुवाच ।

मृगस्य साम्प्रतं वक्ष्ये प्रदेशान् लक्षणान्वितान् ।
यैश्च तैर्ज्ञानचपला ध्वस्यन्ते मोहजन्तवः ॥

चपलश्चौरः ।
ह्रस्वा ह्रस्वतराः केचित्केचिद्दीर्घतरा मताः ।
अतो न घटते यस्य लक्षणं भद्रमन्दयोः ॥
त्र्यङ्गुलं पुष्करं तस्य त्र्यङ्गुले स्रोतसी तथा ।
अङ्गुलानि च चत्वारि कीर्तिता तस्य चाङ्गुलिः ॥
तनुः करस्त्र्यरत्निः स्यादानाहे सार्धरत्निकः ।
वाहित्थपुष्करं यावन्मानं सद्भिरुदाहृतम् ॥
तथा तनुतरौ दन्तौ दैर्घ्ये सार्धद्व्यरत्निकौ ।
प्रतिमानं तथा ज्ञेयं निम्नं पञ्चदशाङ्गुलम् ॥
द्व्यङ्गुलं चिबुकं तत्स्यादधरस्तु षडङ्गुलः ।
अष्टाङ्गुलस्तथानाहे सृक्किणी तु षडङ्गुले ॥
सगदेऽङ्गुलिविंशत्यौ कपोलौ निम्नमध्यगौ ।
कटौ द्व्यङ्गुलमानौ तु निर्याणे चतुरङ्गुले ॥
नेत्रे चापि तथा स्यातां निष्प्रभे स्थूलतारके ।
नातिव्यक्तसमांसं स्याद्घातकुम्भं दशाङ्गुलम् ॥
गर्त्ताकारं च निम्नं च कटकुम्भान्तरं भवेत् ।
अष्टाङ्गुलान्तरौ कुम्भावायामे षोडशाङ्गुलौ ॥
विंशत्यङ्गुलकौ कर्णौ स्तब्धौ रूक्षौ च वर्तुलौ ।
षण्णवत्यङ्गुलानाहा आयामे षोडशाङ्गुला ॥
ग्रीवा मृगस्य विज्ञेया करालं चासनं भवेत् ।
सार्धद्व्यरत्निकायामः कुब्जस्तुङ्गोऽतिमात्रया ॥
वंशो मृगस्य विज्ञेयो निम्नतल्पनिभप्रभः ।
स्थूलास्थिविषमं निम्नं पुच्छादध्यर्धरत्निकम् ॥
आसनेन समं चैव मृगे स्यात्पश्चिमासनम् ।
पञ्चाङ्गुलस्तु विज्ञेयः पेचको गुदसंश्रितः ॥

वक्रो ग्रन्थिसमाकीर्णः स्थूलो ह्रस्वश्च वालधिः ।
अपरापादपार्ष्णिभ्यां हस्तमात्रसमुच्छ्रयः ॥
अपरे दीर्घे तनू रूक्षे द्विसप्तत्यङ्गुलायते ।
तत्प्रमाणे तथा गात्रे तत्पुटे चापि निष्प्रभे ॥
चरणाश्च गतच्छायैश्चतुस्त्रिव्यङ्गुलैर्नखैः ।
संयुक्ताः स्फुटिता निम्ना मानेनाष्टादशाङ्गुलाः ॥
एवमुद्देशमात्रेण कथितं मृगलक्षणम् । इति ।

विशेष एव मया उक्तः, अन्यदपेक्षितमविरुद्धं भद्रलक्षणोक्तं ग्राह्यमित्याशयः ।

इति मृगगजलक्षणम् ।

अथ मिश्रगजलक्षणम् ।

मिश्रगजस्तु भद्रमन्दमृगलक्षणैर्युक्तः सर्वसङ्कुललक्षणो भवति । तथा च—

पराशरसंहितायाम्,

मिश्रस्तु तेषां परस्परसंयोगजः सर्वसङ्कुललक्षण इति ।
मिश्र एव सङ्कीर्ण इति कथ्यते ।

विष्णुधर्मोत्तरे,

सङ्कीर्णलक्षणो नागः सङ्कीर्णश्च निगद्यते । इति ।

पालकाप्ये,

बह्वाशी बह्वलीकश्च दन्तपातेषु चाक्षमः ।
गच्छेत्प्रकृष्टवेगश्च भारं प्राप्यावसीदति ॥
कृच्छ्राच्चाप्यायते नागः क्षिप्रं च परिहीयते ।
कटूवम्ललवणैश्चैव रूक्षैश्चातुरतां व्रजेत् ॥
नित्यं च सान्त्वयेदेनं न चैनमभितापयेत् ।
सर्वेषां लक्षणैः कैश्चिद्युक्तो मिश्रो भवेद्गजः ॥ इति ।

बार्हस्पत्यसंहितायां विशेषः ।

अतः परं प्रवक्ष्यामि सङ्कीर्णस्य च लक्षणम् ।
पशुत्वाद्वारणेन्द्राणां गच्छतां च वियोनिषु ॥
धेनुकासु भवन्त्येते गजाः सङ्कीर्णलक्षणाः ।
भद्रो मन्दो मृगो वाथ शुद्धजातिः प्रजायते ॥
तस्मान्मिश्राणि रूपाणि गदतो मे निबोधत ।
आनन्त्यान्मिश्रभेदानां निश्चयो नोपपद्यते ॥
तथापि किञ्चिदुद्देशान्मिश्रलक्षणमुच्यते ।
भद्रमन्दो भद्रमृगो भद्रमन्दमृगस्तथा ॥
इह भेदत्रयं मन्दमृगयोरपि जायते ।
भद्रादीनां च सर्वेषां रूपं सङ्कीर्णसंज्ञितम् ॥
ऊर्ध्वाधःकायभेदेन तत्पुनर्भिद्यते द्विधा ।
त्रिधा च भिद्यते भूय एकैकं तु यथाक्रमम् ॥
एवमष्टादशविधं कीर्त्तितं मिश्रलक्षणम् ।
शुभाशुभविभागेन साम्प्रतं निगदाम्यहम् ॥
भद्रमन्दो भवेच्छ्रेष्ठो मृगमन्दस्तथाऽधमः ।
भद्रमन्दमृगश्चैव मध्यमः परिकीर्त्तितः ॥
भद्रजातिर्महाकायो गजो मध्ये तु दन्तिनाम् ।
मन्दावयवलेशेन स युक्तो भवति द्विपः ॥
मृगस्यापि हि रूपेण किञ्चिच्चानुगतेन वै ।
अशुभत्वं न भद्रस्य जायते शोभनो हि सः ॥
लोचनानां प्रधानत्वं यस्माच्छास्त्रेषु कीर्त्तितम् ।
तस्मान्मृगाक्षिसंसक्तो भद्रोऽपि हि न शस्यते ॥
भद्रेणोपरिकायेन मन्देनाधोगतेन च ।
उन्नतो हि गजानां तु भद्रमन्दो भवेद्गजः ॥

अनेनैव हि रूपेण विपर्यस्तेन यो गजः ।
सोऽपि शोभन एव स्यान्मन्दभद्र इति स्मृतः ॥
एवं मन्दे मृगे वापि लक्षणैर्मिश्रलक्षणम् ।
मन्दावयववाहुल्यान्मृगरूपस्य लेशतः ॥
भद्रावयवनिर्मुक्तो मध्यमोऽसौ गजो भवेत् ।
कायेन यो भवेद्भद्रो मन्दो वापि मतङ्गजः ॥
मृगगात्रापरश्चैव स भवेद्वेगवान् गजः ।
मृगरूपाधिकत्वं च दृश्यते यस्य दन्तिनः ॥
अधमस्तु स विज्ञेयः सत्त्वशक्तिविवर्जितः ।
करदन्ताक्षिकुम्भैश्च यो मृगो जायते गजः ॥
शेषावयवभद्रोऽपि हीन एव भवेदसौ ।
एवमुद्देशमात्रेण मिश्रभेदा मयोदिताः ॥
नोदिता येऽपि तेऽप्यत्र मिश्रा ज्ञेया मनीषिभिः ।
मिश्रलक्षणसंयोगे उत्कृष्टं यस्य दृश्यते ॥
रूपं तन्नामधेयोऽसौ जायते हि मतङ्गजः । इति ।

इति मिश्रगजलक्षणम् ।

अथ वनविशेषेण गजविशेषलक्षणम् ।

विष्णुधर्मोत्तरे,

अतः परं प्रवक्ष्यामि गजानां ते वनाष्टकम् ।
हिमवत्प्रयागलौहित्यगङ्गामध्ये महद्वनम् ॥
प्राच्यमैरावतस्योक्तं वनं यत्र मतङ्गजाः ।
किञ्चित्कमलवर्णाभाश्चपलाः पृथुमस्तकाः ॥
कुनखा रूपवन्तश्च तथा मन्दमदा गजाः ।
उन्मत्तगङ्गा त्रिपुरी दंशार्णं मेकलांस्तथा ॥

तेषां मध्ये करूषाख्यं वनं पद्मस्य कीर्त्तितम् ।
ह्रस्वाश्चण्डास्तथा श्यामाः शीघ्रोद्ग्रा महास्वनाः ॥
सूक्ष्मबिन्दुचितास्तत्र भवन्त्यन्वर्थवेदिनः ।
बिल्वे शैलं वेत्रवती दशार्णं च महागिरिः ॥
तेषां दशार्णकं मध्ये पुष्पदन्तस्य काननम् ।
सुवृत्तजघनश्यामाः सूक्ष्मबिन्दुविचित्रिताः ॥
स्थूलहस्ताशिरोग्रीवास्तत्र जाता मतङ्गजाः ।
पारियात्रकवैदेश्यौ नर्मदा ब्रह्मवर्धनम् ॥
वामनस्य वनं मध्ये तेषां वै मार्गरेयकम् ।
सुप्रमाणाश्च मध्वक्षाः शीघ्रगाश्च सुविग्रहाः ॥
मध्वक्षा मृदुत्वचः ।
करेणूनामधेयाश्च ततोक्ताश्चाल्पयोधिनः ।
विन्ध्यसह्योत्कलानां च दक्षिणस्यार्णवस्य च ॥
वनं च मध्ये कालेशं सुप्रतीकस्य कीर्त्तितम् ।
चाग्रवंशा वृत्तनखाः पीना ह्रस्वशिरोधराः ॥
तनुत्वगुदरा दीर्घाः पद्माभास्तत्र दन्तिनः ।
रेवादेशः समुद्रश्च प्रेमहारं च नर्मदा ॥
तेषां मध्येऽञ्जनाख्यस्य वनं खल्वपरान्तिकम् ।
पीनायतविषाणास्या महाकाया बलाधिकाः ॥
रक्ततालोष्ठजिह्वाश्च जायन्ते तत्र दन्तिनः ।
कृष्णस्थली महीपाल आवन्त्योऽर्बुदनर्मदाः ॥
तेषां मध्ये तु सौराष्ट्रं वनं नीलस्य कीर्त्तितम् ।
कृष्णस्थली द्वारका । अर्बुदावन्तिनर्मदान्तरतः सौराष्ट्रकं वनमिति पराशरोक्तेः ।
तस्य वंशे तु जायन्ते चण्डा वैकल्यदेहकाः ॥

सूक्ष्मा रूक्षत्वचश्चैव तथा शिक्षात्यजो गजाः ।
हिमवत्कालिकासिन्धुकुरुजाङ्गलमेव च ॥
तेषां पञ्चनदं मध्ये कुमुदस्य महद्वनम् ।
स्फुटिताग्रद्विजास्तत्र जायन्ते कवलद्विषः ॥
ध्यानशीलाश्च भूताश्च दुर्विधेयाश्च वारणाः ।
एतत्तवोक्तं च मतङ्गजानां कुलाष्टकं चैव वनाष्टकं च ।
अतः परं किं कथयामि तुभ्यं तन्मे वदस्वायतलोहिताक्ष॥इति।

बार्हस्पत्यसंहितायां विशेषः । तदुच्यते—

वनानां मध्ये प्राच्यं कालिङ्गकमपरान्तिकं त्रीणि वनानि शोभनानि । त्रयाणामपि प्राच्यं वनं शोभनम् । तत्र कृतयुगोत्पन्ना ऐरावतकुलप्रसूतिसम्भवाः प्रायेण मृगमिश्रभद्रलक्षणा महाकायाः करिणो भवन्ति। नातिक्रोधनाः समुद्वेजिताः सत्त्वं दर्शयन्ति । ते च वृक्षकवलैः कायोपचयातिशयेन मदाभिमुखाः कर्त्तव्याः । कालिङ्गके चापरान्तिके च त्रेतायुगोत्पन्ना मन्दमहागजावयवा गजा मन्दाभिधानाः प्रायशो मृगावयवाः सङ्कीर्णगजाः समुत्पद्यन्ते। नात्युदग्रा जलदप्रभा नातिमदा बुद्धिप्रियाश्च गजा भवन्ति । तथा च करूषदशार्णकमार्गरेयकाभिधानेषु मध्यमा गजाः समुत्पद्यन्ते मृगमन्दजातयः । ते च मध्यमबला मध्यमप्रमाणाः स्थूलरोमाविलशरीरा मन्दगतयः । तथा च सौराष्ट्रे पाञ्चनदाभिधाने द्वापरयुगोत्पन्ना मृगमन्दगजान्वया मृगप्राया गजा भवन्ति । भीरवः कुत्सितमदा नातिचण्डा दुर्दमा दुर्वृत्ताश्च एवंविधा गजाः समुत्पद्यन्ते । वनाच्च वनान्तरगजेषु दुर्वृत्तेषु धेनुकासम्पर्केण प्राच्यवनेऽपि कालिङ्गकेऽपि अपरान्तिकेऽपि ।

ह्रस्वासनश्च भीरुश्च बलवान् हीनमस्तकः ।
हीनाग्रभागो दुःशीलस्त्वंसंहतशरीरभृत् ॥

समुत्थितस्त्वनायामपरिणाहविवर्जितः ।
भारभीरुर्वालधिना तनुना श्रीविवर्जितः ॥
मृगस्वरूपो दीनश्च मृगजातिर्गजाधमः । इति ।
श्रेष्ठवनेष्वपि वनान्तरस्थदुर्वृत्तगजसम्पर्केण गजाधम उत्पद्यत इत्यर्थः ।

इति वनविशेषेण गजविशेषलक्षणम् ।

अथ गिरिनद्युभयचरगजलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

अतः परं प्रवक्ष्यामि लक्षणं गिरिचारिणाम् ।
तथा नदीचराणां च तथैवोभयचारिणाम् ॥
महाबला महाकायाः समस्तगुणसंयुताः ।
सुपार्श्वाश्चारुदिग्धाङ्गा दृढपादा गतक्लमाः ॥
उदग्रा निर्भयाश्चैव सल्लकीकवलप्रियाः ।
सदा घातविभिन्नाग्रदन्तदारितभूतलाः ॥
शार्दूलादिमहासत्त्वसंस्फोटातङ्कवर्जिताः ।
मदस्रावकृतोत्साहा दुर्दमा वारिभीरवः ॥
पांसुक्रीडारता नित्यं वृक्षोन्मूलनतत्पराः ।
विषाणचेष्टनासक्ताः शूरा गिरिधरा गजाः ॥
स्निग्धच्छाया नखैः स्निग्धैः पृथुपादा महोदराः ।
दीर्घहस्तविषाणाश्च छन्नगात्रापरास्तथा ॥
अस्थिरा भिन्नशीलाश्च खेदसन्तापनाशकाः ।
कराग्रस्फोटनिरताश्चीत्कारकरणप्रियाः ॥
अनुदग्रा घनश्यामाः सीकरोद्गिरणप्रियाः ।
तोयकर्मणि निःशङ्कास्ते गजाश्च नदीचराः ॥
उभयेषु चरन्त्येते नदीपर्वतसानुषु ।

ये गजा हृष्टमनसस्ते भवन्त्यतिशोभनाः ॥ इति ।

इति गिरिनद्युभयचरगजलक्षणम् ।

अथ गजायुर्लक्षणम् ।

बार्हस्पत्यसंहितायाम्,

साम्प्रतं तव वक्ष्येऽहमायुर्लक्षणमुत्तमम् ।
आभ्यन्तरं च बाह्यं लक्षणं द्विविधं स्मृतम् ॥
आभ्यन्तरं योगसाध्यं बाह्यं किञ्चित् प्रलक्ष्यते ।
तेनान्तरं परित्यज्य बाह्यं लक्षणमुच्यते ॥
देहावयवसंस्थानि दश क्षेत्राणि दन्तिनाम् ।
छायासत्त्वसमायोगाद्भवन्ति द्वादशैव हि ॥
एकं हस्तगतं क्षेत्रं द्वितीयं वदनाश्रितम् ।
तृतीयं च विषाणस्थं चतुर्थं शिरसि स्थितम् ॥
पञ्चमं नयनस्थं च षष्ठं कर्णाश्रितं भवेत् ।
कण्ठस्थं सप्तमं चैव अष्टमं गात्रसंस्थितम् ॥
नवमं चोरो विज्ञेयं शेषाङ्गस्थं द्विपञ्चकम् ।
एकादशं च कान्तिस्थं द्वादशं सत्त्वसंस्थितम् ॥
एवं द्वादश क्षेत्राणि मातङ्गानां भवन्ति हि ।
द्वादशैव दशा ज्ञेया दशवर्षाभिलक्षिताः ॥
विंशोत्तरं वर्षशतं भद्रस्यायुः प्रकीर्त्तितम् ।
अब्दान्यशीतिर्मन्दस्य चत्वारिंशन्मृगस्य च ॥
मिश्रस्य चायुषः सङ्ख्या जातिभावेन जायते ।
प्रदेशजातितत्त्वज्ञो जातिं समुपलक्षयेत् ॥
सर्वैः क्षेत्रैस्तु सम्पूर्णः सम्पूर्णायुर्गजो भवेत् ।
हीनैश्च हीयते चायुर्यत्प्राग्वदभिधीयते ॥

दशाब्दानां क्षयं कुर्याद्धस्तो लक्षणवर्जितः ।
विंशत्यब्दविनाशश्च हीने क्षेत्रद्वये भवेत् ॥
क्षेत्रत्रये विहीने च त्रिंशदब्दपरिक्षयः ।
चत्वारिंशत्समानाशो हीने क्षेत्रचतुष्टये ॥
समा सम्वत्सरः ।
पञ्चाशदब्दा हीयन्ते हीने तु क्षेत्रपञ्चके ।
षट्क्षेत्रहीनतायां तु षष्टिवर्षविनाशनम् ॥
सप्तत्यब्दविनाशाय सप्तक्षेत्रविहीनता ।
अशीतिरष्टभिर्हीनैर्वर्षाणां च विनश्यति ॥
नवतिर्नवभिर्हीनैः क्षेत्रैर्नाशं प्रयाति च ।
दशभिश्च तथा हीनैर्नश्यत्यब्दशतं ध्रुवम् ॥
दशोत्तरं चाब्दशतं हीना छाया विनाशयेत् ।
विंशोत्तरं चाब्दशतं हीने सत्त्वे विनश्यति ॥
एवं दशाब्दनाशं तु क्षेत्रं कुर्यादलक्षणम् ।
एवमायुःक्षयं विद्याद्गजस्य गजकोविदः ॥
सामान्यलक्षणं ह्येतत् जीवितस्य परीक्षणे ।
विशेषलक्षणं यावद्धस्तिलक्षणजातितः ॥
एवमुद्देशमात्रेण गजायुर्लक्षणं तव । इति ।
कथितमिति शेषः ।

इत्यायुर्लक्षणम् ।

अथ दोषनाशकलक्षणम् ।

बार्हस्पत्यसंहितायाम्,
नखाः स्निग्धाः सिताः शस्ता विंशतिस्तु नरेश्वर ।
अष्टादश च नागस्य शेषास्त्वशुभसंज्ञिताः ॥

पाददोषक्षयं कुर्यान्नखानां शुभलक्षणम् ।
पादानां लक्षणं चैव गात्रदोषहरं भवेत् ॥
पुष्करस्य गुणो दोषान्नाशयत्यङ्गुलिस्थितान् ।
लक्षणं त्वङ्गुलिगतं करदोषविनाशनम् ॥
हस्तस्य लक्षणं सम्यक् दन्तदोषं प्रणाशयेत् ।
दन्तयोर्लक्षणं हन्ति दोषान् वाहित्थसंश्रितान् ॥
वाहित्थलक्षणैः सम्यक् नेत्रदोषक्षयो भवेत् ।
नेत्रयोर्लक्षणं हन्ति दोषांस्तालुसमाश्रितान् ॥
सृक्किदोषविनाशश्च क्रियते तालुलक्षणैः ।
सृक्किणीलक्षणं कुर्यात्सगदो दोषनाशनम् ॥
कपोलकटदोषं च नाशयेत्सगदो गुणः ।
निर्याणवातकुम्भानां दोषघ्नः कटयोर्गुणः ॥
कुम्भदोषविनाशाय तेषामेव गुणो भवेत् ।
कर्णदोषविनाशस्तु क्रियते कुम्भलक्षणैः ॥
कण्ठदोषविनाशाय कर्णलक्षणमेव हि ।
आसनस्य हि ये दोषास्तान् हरेत्कण्ठजो गुणः ॥
वंशदोषक्षयकर आसनस्य गुणो भवेत् ।
गुणा घ्नन्ति च वंशस्य दोषान् तल्पलसंश्रितान् ॥
तल्पलः पृष्टवंशोभयपार्श्वप्रदेशः ।
पश्चिमासनदोषघ्नं लक्षणं तल्पलाश्रितम् ॥
कुक्षिपेचकदोषघ्नं पश्चिमासनलक्षणम् ।
गुणाः पेचककुक्षिस्थास्तुच्छदोषविनाशनाः ॥
मेढ्रदोषक्षयं कुर्यात्पुच्छलक्षणमेव हि ।
मेहनस्य गुणो हन्ति दोषांश्चैवापराश्रितान् ॥
अण्डकोशगतं दोषमपरालक्षणं हरेत् ।

नाभिदोषक्षयं कुर्यादण्डकोशस्य लक्षणम् ॥
नाभेर्गुणैश्च हन्यन्ते दोषाः स्तनसमाश्रिताः ।
उरोमणिगतान् दोषान्नाशयेत्स्तनलक्षणम् ॥
चिबुकस्य हरेद्दोषानुरोमणिगुणोदयः ।
यथा दोषक्षयो राजन् लक्षणैः क्रियते शुभैः ॥
एवं दोषातिरेकोऽपि प्रदेशगुणनाशनः ।
प्रदेशोऽनन्तरस्यैव प्रदेशस्य गुणान्वितः ॥
कुरुते दोषनाशं हि स दोषो गुणनाशनम् ।
करकुम्भविषाणाक्षिकर्णलक्षणसंयुतः ॥
सर्वैर्नखैः शुभैरन्यैर्लक्षणैश्च शुभो गजः । इति ।

इति दोषघ्नलक्षणम् ।

अथ गजमानलक्षणम् ।

बार्हस्पत्यसंहितायाम् ,

उत्सेधायामनाहानां साम्प्रतं कथयाम्यहम् ।
समतन्तुसमायुक्तं सूत्रं कृत्वा सुवर्त्तितम् ॥
सुप्रशस्ते दिने नित्यं मानं कुर्वीत मानवित् ।
सप्तरत्निर्गजेन्द्राणां प्रधानकुलजन्मनाम् ॥
आसनं यावदुत्सेधस्तलसन्धिस्तु कीर्त्तितः ।

तलसन्धिर्यावदासनमुत्सेध इति सम्बन्धः । तलसन्धिः तले पादतले सन्धिः सन्धानं संस्थानं यस्य सः । पादतलमारभ्यासनपर्यन्तं सप्तरत्निरुत्सेधो द्रष्टव्य इत्यर्थः ।

पेचकात्प्रतिमानं तु आयामो रत्नयो नव ॥
मध्यदेशे तथा नाहो दशरत्निः प्रकीर्त्तितः ।
मानमेतद्धि भद्रस्य मुनिभिः परिकीर्तितम् ॥
सप्तमेन तु भागेन हीनं मन्दस्य जायते ।

मन्दाद्धीनं मृगाख्यस्य षड्भागेन प्रकीर्त्तितम् ॥
एवं क्रमेण योक्तव्यं मानं मानविशारदैः ।
किञ्चिन्न्यूनेऽधिके वापि न दोषः प्रतिपद्यते ॥
दोषाणां च गुणानां च वृद्धिरेव फलप्रदा । इति ।

इति गजमानलक्षणम् ।

अथ क्षेत्रलक्षणम् ।

पालकाप्ये गजहृदये,

क्षेत्राणि हस्तौष्ठमुखं दन्तौ शीर्षं च चक्षुषी ।
कर्णौ ग्रीवा च गात्रं च वक्षः कायश्च भेदतः ॥

एतानि दश क्षेत्राणि दश दशा तत्र यदङ्गं शुभाशुभलक्षणयुतं यत्क्षेत्रान्तर्गतं तद्दशायामेव तत् शुभाशुभफलं भवति ।

तथा च—

पालकाप्य गजहृदय ,

दशायां च तदाख्यातं प्रभूतमिति सूरिभिः ।
लक्षणं दक्षिणाङ्गस्थं हस्तिनः पुण्यपापदम् ॥
तथा वामाङ्गगं तच्च हस्तिन्याः फलदं मतम् ।

दशायां लक्षणं प्रभूतं फलदमिति सम्बन्धः । लक्षणविषये विशेषोऽपि स्मर्यते—

तत्रैव,

महद्यत्तं भवेद्यच्च लक्षणं तन्महाफलम् ।
यदल्पमप्रकाशं च तदल्पफलदं मतम् ॥
मध्यमेन फलं मध्यं लक्षणेन समादिशेत् ।
शुभाशुभेन मिश्रेण बहुत्वेनादिशेत्फलम् ॥ इति ।

इदं च गजलक्षणफलं राज्ञां भवति । करेणुलक्षणफलं च

राज्ञः स्त्रीणाम् । तदप्युक्तम्—

पालकाप्ये गजहृदये,

लक्षणाच्च गजाङ्गस्थात्फलं भूमिभुजां मतम् ।
फलं भूपावरोधानां करेण्वङ्गस्थलक्षणात् ॥ इति ।

गजानामशुभलक्षणमपि राजारोहणे शुभफलदं भवति ।

तदुक्तम्—

पालकाप्ये गजहृदये,

कदाचिच्छुभदं च स्याद्गजानामप्यलक्षणम् ।
शुभकर्माणमासाद्य राजानमथ वा द्विजम् ॥
यथा हि सर्वसरितः समुद्रं समुपेत्य हि ।
स्वरसेन वियुज्यन्ते भवन्ति लवणाम्भसः ॥
एवमासाद्य भर्त्तारं बहुलक्षणलक्षितम् ।
भवन्ति बाधितानीह दुर्लक्षणफलानि च ॥
राजारूढे च यानि स्युः पापचिह्नानि हस्तिनाम् ।
विघ्नोत्तान्यफलान्येवं गीयते सोमसूनुना ॥

राजाधिरूढस्य गजस्य यानि
भवन्ति पापानि तु लक्षणानि ।
सर्वाणि तानि प्रलयं प्रयान्ति
राजा हि लोके परमं पवित्रम् ॥ इति ।

इति क्षेत्रलक्षणम् ।

अथ छायालक्षणम् ।

बार्हस्पत्यसंहितायाम्,

सर्वेषामेव नागानां छायालक्षणमुत्तमम् ।
तद्यथा जायते यस्य तत्तथैवाभिधीयते ॥

सत्त्वांशकत्वाद्भद्रस्य पाटला भवति प्रभा ।
नवपूगफलच्छाया स्निग्धा तनुतनूरुहा ॥
तथा तमोंऽशकत्वाच्च कृष्णा मन्दस्य जायते ।
तरुणाम्बुदसङ्काशा स्थूलकृष्णकचाविला ॥
रजोंऽशकत्वाच्च तथा मृगस्यापि हि धूसरा ।
मलिनाम्बुदसङ्काशा रूक्षा तनुतनूरुहा ॥
एवं छायाविशेषास्तु भद्रादीनां मयोदिताः ।
छाया सम्मिश्रभावाच्च मिश्रा भवति दन्तिनाम् ॥
सत्त्वं रजस्तमश्चेति क्रमोऽयं श्रूयते किल ।
भद्रमन्दमृगाणां च क्रमेणैव हि युज्यते ॥
तथैव यत्त्वया प्रोक्तं यतो मन्दस्तमोंऽशकः ।
रजोंऽशको मृगश्चेति ममेदं वक्तुमर्हसि ॥
तच्छ्रुत्वा वचनं तस्य प्रत्युवाच बृहस्पतिः ।
वनजातिगुणैरेव भद्रः श्रेष्ठो नरोत्तम ॥
तमोंऽशकत्वं मन्दस्य ते यदुक्तं निबोध मे ।
दुर्गतित्वं तथाऽऽलस्यं निद्रालुत्वं च मूढता ॥
गम्भीरवेदिता चैव दुष्टत्वं च तमोगुणाः ।
एते मन्दस्य जायन्ते तेन मन्दस्तमोंऽशकः ॥
तेजस्विता च चण्डत्वं चञ्चलत्वं तथैव च ।
शीघ्रत्वं क्रीडितत्वं च तथा चोत्तानवेदिता ॥
एते रजोगुणा राजन्मृगस्तेन रजोंऽशकः ।
धैर्यं स्थैर्यं पटुत्वं च विनीतत्वं सुकर्मता ॥
अन्वर्थवेदिता चैव भयस्थानेषु मूढता ।
सुभगत्वं च धीमत्त्वं सत्त्वस्यैते गुणाः स्मृताः ॥
अतः सत्त्वांशको राजन् भद्रजातिरुदाहृतः । इति ।

हस्तिहृदयप्रबन्धे,

भूखाग्न्यम्बुमरुज्जाता भवेच्छाया विसाशिनाम्[1] ।
प्रशस्ता चाप्रशस्ता च सफला निष्फलापि च ॥
छायायाः सम्भवः पूर्वं परतः परितः प्रभा ।
छायया हि वृतं देहं प्रभा तत्परतः स्थिता ॥
वर्णमात्रमतश्छाया प्रभा वर्णप्रकाशिनी ।
उत्कृष्टे लक्ष्यते छाया निकृष्टे भा प्रकाशते ॥
स्निग्धता सान्द्रता स्थैर्यं व्यक्ता च शुभवर्णता ।
दीप्तता चेति कथिताश्छायायाः षड्गुणा बुधैः ॥
लक्षणानि तु नागानां पापानि च शुभानि च ।
छायावशात्फलन्त्येव छायायामतिलक्षणम् ॥
यस्य स्याल्लक्षणं भद्रं छाया भद्रा भवेन्न तु ।
नैवासौ शुभदो हस्ती छायोपहतलक्षणः ॥
पापलक्षणयुक्तोऽपि शुभच्छायायुतो गजः ।
फलं लक्षणजं हित्वा छायाफलमवाप्नुयात् ॥
नीराजनेऽभिषेके च ध्वजोच्छ्राये रणोदये ।
तेषु तेषु च कालेषु भवेच्छायावलोकनम् ॥
वक्षसि प्रतिमाने च कुम्भकर्णकटेषु च ।
निर्याणमस्तकस्थाने वेष्टयोश्च कपोलयोः ॥
पिण्डिकाजघनाभोगे तेषु तेषु पदेषु च ।
प्रोदितेषु प्रधानेषु छायाया वीक्षणं भवेत् ॥
शस्यते पार्थिवी छाया वन्हिजा जलजापि च ।
नेष्यते व्योमजा छाया मातरिश्वभवास्य च ॥

---

१ हस्तिनाम् ।

पार्थिवी स्निग्धगम्भीरा सर्ववर्णा विभाव्यते ।
छाया ह्यासां च रक्ता च स्निग्धजम्बूनिभाग्निजा ॥
छाया नीलाम्बुदाभासा स्निग्धा सलिलसम्भवा ।
अव्यक्तपरुषा खस्य छायावगमने तथा ॥
ध्वस्ता रूक्षा च वायव्या भस्माभा निष्प्रभा तथा ।
एताश्छायाः परीक्ष्याः स्युर्मातङ्गे राजपूजिते ॥
नीलाम्बुजेन्द्रनीलाभा नीलाञ्जननिभापि च ।
काप्युक्ता पार्थिवी छाया सुभिक्षक्षेमकारिणी ॥
बालार्कपद्मकिञ्जल्कशक्रगोपकसन्निभा ।
ज्वालाभा तप्तहेमाभा वन्हिजा विजयप्रदा ॥
छाया मणिपयःशङ्खकुन्दरूप्यबिसद्युतिः ।
सोमाख्यया प्रतीता च भर्त्तुरर्थप्रदा सदा ॥
जलबुद्बुदसङ्काशा धूम्रा च द्युतिरस्थिरा ।
जिह्मा च व्योमजा छाया नित्योद्वेगकरी मता ॥
सर्ववर्णैरुपेतापि निष्प्रभा भस्मसन्निभा ।
विच्छिन्ना विकृता छाया वायव्याऽर्थक्षयावहा ॥
वैरिञ्ची वैष्णवी शाक्री तथा चैव हि शाङ्करी ।
कौमारी राक्षसी सार्पी गान्धर्वी च तथाऽऽसुरी ॥
पैशाची चेति याश्चन्याश्छाया दिव्याः क्वचिच्छुभाः ।
भूतोक्तलक्षणं तासामभेदान्नेह कीर्त्तितम् ॥
तेजोऽतिसक्ता भद्रस्य पाटला भवति प्रभा ।
छाया रक्तारुणरुचिः पक्वपूगनिभापि वा ॥
कृष्णा वा मन्दकरिणश्छाया च मृगहस्तिनः ।
मलिनाम्बरधूम्रैव गीर्वाणगणदर्शनात् ॥ इति ।

इति छायालक्षणम् ।

अथ वर्णलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

अत ऊर्ध्वं प्रवक्ष्यामि गजानां वर्णलक्षणम् ।
आहारस्य विशेषेण वातपित्तकफैस्तथा ॥
देशजातिगुणैश्चैव बीजयोनिवशेन च ।
ग्रहालोकननक्षत्रलग्नराशिवशेन च ॥
पूर्वकर्मवशाच्चापि धातूनां च विपर्ययात् ।
भवन्ति कारणैरेभिर्वर्णा नानाविधा नृप ॥
दिव्यसत्त्वाः शुभैर्भेदैस्त्रिविधास्ते भवन्ति हि ।
सिन्दूरशङ्खवैडूर्यविद्युज्जाम्बूनदप्रभाः ॥
इन्द्रनीलोत्पलादित्यहरितालनिभाश्च ये ।
अतिश्वेताश्च रक्ता ये शुकबर्हिणसप्रभाः ॥
बर्हिणो मयूरः ।
एते देवगजाः सर्वे भूतले न भवन्ति हि ।
दैवयोगाद्वने प्राच्ये तेषां कश्चिद्यदा भवेत् ॥
वन्दनीयश्च पूज्यश्च नासौ ग्राह्यो नराधिपैः ।
दिव्यवर्णास्त्विमे प्रोक्ताः प्रशस्तान् शृणु साम्प्रतम् ॥
लोहितश्चैव कृष्णश्च श्यामो वर्णत्रयं शुभम् ।
स्निग्धच्छायासमायुक्तं भवेद्भूतलदन्तिनाम् ॥
गोशृङ्गाङ्गारभस्मास्थिपङ्कमाञ्जिष्ठसन्निभाः ।
म्लानपुष्पसवर्णाश्च गजास्त्वेतेऽतिनिन्दिताः ॥
एवं वर्णविशेषास्तु कथितास्तव सुव्रत ।
गजमेकादशगुणं वक्ष्यमाणं निबोध मे ॥
मधुसन्निभदन्तश्च श्यामो मधुनिभेक्षणः ।
उदरे पाण्डुवर्णश्च वंक्रे च कमलप्रभः ॥

द्विरेफसमवालश्च कुन्देन्दुसदृशैर्नखैः ।
द्विरेफो भ्रमरः । वालाः पुच्छस्थाः केशाः ।
चूतपल्लवमेढ्रश्च शेषेष्वङ्गेषु पीतकः ॥
विचित्रं च मुखं यस्य रक्तैः श्वेतैश्च बिन्दुभिः ।
स नागो गजयूथानां मध्ये राजा तु जायते ॥
तं प्राप्य नृपतिर्भुङ्क्ते सागरान्तं महीतलम् ।
यो वै सवर्णसंस्थानः स गजो गजनाशनः ॥
मुखे मेढ्रे च हस्ते च कर्णोदरशिरःसु यः ।
केशैः शुभ्रैश्च पृथुलैर्बिन्दुभिः परिमण्डलैः ॥
सवर्णो यो भवेद्वर्णः किलासः सोऽभिधीयते । इति ।
हृदयप्रबन्धे,
तत्रापि श्वेतवर्णेन शुकबर्हमणित्विषा ।
शुद्धहेमरुचा चेतां[१]ः सुरार्हा न नरेषु वा ॥
नृणां तु हृदयाः कृष्णाः श्यामाश्च करिणः स्मृताः ।
स्वे स्वे वर्णे च सुस्निग्धा निःसन्दिग्धाश्च शंसिताः ॥
हरिर्मधुसवर्णः स्यात्कृष्णश्चाञ्जनसन्निभः ।
न कालो न हरिर्नागो मध्यमः श्याम इष्यते ॥
एतेषु च त्रिवर्णेषु हरिवर्णो वरो मतः ।
मध्यमः श्यामवर्णश्च कनिष्ठः कृष्णविद्युतिः ॥
श्वेतैस्तनूरुहैराप्तः समन्तादेककूपजैः ।
सूक्ष्मबिन्दुचितो हस्ती हरिवर्णो महावरः ॥ इति ।

इति वर्णलक्षणम् ।

अथ गन्धलक्षणम् ।

हेमाद्रौ हृदयप्रबन्धे,

---

१ इताः युक्ताः ।

आस्याक्षिकुम्भकर्णेषु मदनिःश्वासवायुषु ।
शकृद्वमथुमूत्रेषु गन्धान् समुपलक्षयेत् ॥
वमथुर्गजकरसीकरः ।
इष्टगन्धान्निषेवेत वारणानवनीश्वरः ।
अनभिप्रेतगन्धांश्च यत्नतः परिवर्जयेत् ॥
सर्पिर्मधुधरालाजादधिक्षीरानुरूपकः ।
धरा मृत्तिका ।
मालतीकेतकीजातीचन्दनादिकसौरभः ॥
वचासवफलामोदगन्धो नागस्य सम्पदे ।
असृङ्मूत्रशकृत्पूयवसाकुणपकुत्सितः ॥
कुणपः शवः ।
पक्षिनीडपलाण्ड्वादिसप्तपर्णादिसन्निभः ।
खरोष्ट्रमूकरसमः श्वानमेषादिसन्निभः ॥
मीनमत्कुणतुल्यश्च गन्धो नागस्य दुःखदः ।
आमोदवासितजला ये च गेहेषु वारणाः ॥
ते न भीतिभिरिष्यन्ते सागरान्तधराभुजाम् ।

ये आमोदवासितजलास्ते गजा भूभुजां भयाय न भवन्तीत्यर्थः । कुत्सितगन्धास्तु भयाय ज्ञेया इत्यर्थः ।

इति गन्धलक्षणम् ।

अथ निःश्वासलक्षणम् ।

बार्हस्पत्यसंहितायाम् ,

अतः परं प्रवक्ष्यामि निःश्वासस्य तु लक्षणम् ।
निःश्वासो द्विविधो ज्ञेयः शुभश्चैवाशुभस्तथा ॥
शुभः सुरभिगन्धः स्याद्दुर्गन्धस्त्वशुभो मतः ।
विशेषेण पुनश्चैव लक्षणं चास्य कीर्त्यते ॥

सूक्ष्मता दीर्घता चैव समता च सुगन्धिता ।
सौकुमार्यं मृदुत्वं च निःश्वासस्य तु षड्गुणाः ॥
स्थूलता ह्रस्वता चैव दुर्गन्धत्वं तथोष्णता ।
पारुष्यं विषमत्वं च दोषाश्चापि भवन्ति षट् ॥ इति ।

इति निःश्वासलक्षणम् ।

अथाऽऽलोकितलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

अतः परं प्रवक्ष्यामि गजालोकितलक्षणम् ।
स्निग्धं स्थिरं च सौम्यं च वारिजोत्फुल्लतारकम् ॥
सलक्षं प्रतिनागं तु प्रेक्षितं करिणां शुभम् ।
उद्विग्नं चञ्चलं दीनमविकासिततारकम् ॥
ऊर्ध्वाधःपार्श्वदृष्टिं च निर्लक्षं निन्दितं भवेत् । इति ।

इत्यालोकितलक्षणम् ।

अथ गतिलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

अतः परं प्रवक्ष्यामि मातङ्गगतिलक्षणम् ।
समा च लघुपादा च वेगेऽप्यतिशुभा मता ॥
दीर्घक्रमा मुखोत्क्षिप्ता गात्रसञ्चारहारिणी ।
शुभलक्षणसंयुक्ता पुरुषस्य गजस्य च ॥
मातङ्गवृषसिंहानां गतितुल्या शुभा गतिः ।

अत्र मातङ्गवृषसिंहानां गतितुल्या गतिः पुरुषस्य शुभा, वृषसिंहानां गतितुल्या गतिर्गजस्य शुभेति विभज्य व्याख्येयम् । अन्यथा—

अतः परं प्रवक्ष्यामि मातङ्गगतिलक्षणम् ।

इत्यादिना गजगतिलक्षणकथनप्रस्ताव एव मातङ्गगतितुल्या गजस्य शुभेति विरोधः प्रसज्यते । एवं चाविरोधः । ननु

अतः परं प्रवक्ष्यामि मातङ्गगतिलक्षणम् ।

इत्यादिना गजगतिलक्षणमुपक्रम्य मध्ये पुरुषगतिलक्षणमुक्त्वा,

कथितं तव राजेन्द्र गजानां गतिलक्षणम् ।

इत्युपसंहृतम् । एवं सति उपक्रमोपसंहारभङ्गः स्यादिति चेत्, न । गजगतिलक्षणकथनप्रसङ्गात्पुरुषगतिलक्षणमुक्तमिति न विरोधः । आर्षत्वाच्च । न हि ऋषीणां नियोगः कर्तुं शक्यत इति ।

क्लेशचालितगात्रा या विषमा सुलघुक्रमा ॥
वेगेऽपि मन्दसञ्चारा विशेषान्दोलितासना ।
मृगस्य कृकलासस्य जम्बूकस्य खरस्य च ॥
गमनेन समा या तु साऽधमा दन्तिनां गतिः ।
कथितं तव राजेन्द्र गजानां गतिलक्षणम् ॥ इति ।

हृदयप्रबन्धे,

शृगालकृकलासादिसमाना विकटा ऽसमा ।
उद्धूता स्खलिता वक्रा सङ्कीर्णा नेष्यते गतिः ॥ इति ।

इति गतिलक्षणम् ।

अथ वेगलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

साम्प्रतं च यथाशास्त्रं कथ्यते वेगलक्षणम् ।
तिसृणामपि जातीनां शृणुष्वावहितो भव ॥
न बालं च न वृद्धं च द्विपञ्चपदसंस्थितम् ।

गजोत्थानसहोत्थानं नरवेगेन धावितम् ॥

द्विपश्चपदसंस्थितं दशपदस्थितम् । गजोत्थानसहोत्थानं गजधावनसमसमयधावितम् ।

पञ्चाशत्क्रममात्रे तु यस्तु गृह्णाति वारणः ।
कोपाविष्टेन मनसा स वेगेनोत्तमो मतः ॥
यस्तु गृह्णाति वेगेन नरं सप्तपदान्तरम् ।
पदानां शतमात्रे तु स मध्यमजवो भवेत् ॥
यस्तु पञ्चदशस्थं हि नरं गृह्णाति चोदितः ।
पदानां तु शते सार्धे स हीनजव उच्यते ॥
शतद्वयं वा धनुषां गच्छेदुन्नमिताननः ।
द्वात्रिंशता च मात्राभिः स उत्तमजवो भवेत् ॥

मात्रालक्षणं च पुरुषलक्षणप्रकरणे निमेषलक्षणकथनावसरे प्रागभिहितमतो नेहोच्यते ।

पञ्चाशता च मात्राभिर्यो याति च शतद्वयम् ।
स मध्यमोऽधमो ज्ञेयो मात्राणां च शतद्वयात् ॥
एवं परीक्ष्यते राजन् वेगो वीथीषु दन्तिनाम् । इति ।

हृदयप्रबन्धे,

द्वात्रिंशत्सङ्ख्यमात्राभिर्यो याति धनुषां शतम् ।
स उत्तमगतिर्नागो गतिज्ञैः परिनिष्ठितः ॥
मात्रापञ्चाशता मध्यो हीनोऽशीत्या च गच्छति । इति ।

इति वेगलक्षणम् ।

अथ शब्दलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

स्थानान्यष्टौ नृपते भवन्ति शब्दस्य वारणेन्द्राणाम् ।
तालोष्ठशिरउरःकराजिह्वामूलं गलकपौलौ च ॥

गम्भीरसौम्यदृष्टाः स्वस्थाश्च गर्जितास्तथा स्निग्धाः ।
नादाः शुभा नराधिप षडेव कथिता गजेन्द्राणाम् ॥
चत्वारस्त्वशुभास्ते रौद्राः क्षयभयशोकसङ्गमोत्पन्नाः ।
एवं शुभाशुभमता दशप्रकाराः स्वरा ज्ञेयाः ॥
अन्येऽपि वक्रकर्णगतानिलास्फालनोद्भवा बहवः ।
शब्दा भवन्ति कारिणां शुभाशुभं तैर्न सम्भवति ॥
निःश्वसितचञ्चुकायितरूक्षितकूजितखरोष्ट्रनादनिभाः ।
वायसजम्बुककपिकाष्ठभङ्गसदृशा रवास्त्वशुभाः ॥
ज्ञेयानि शुभानि सदा मृदङ्गजीमूतदुन्दुभिनिभानि ।
पोतायितफेनायितगर्जितहसितानि नागानाम् ॥
पोतायितं च तालवोष्ठसम्भवं गर्जितं च कण्ठेन ।
जिह्वामूलसमुत्थं फेनायितमित्यभिख्यातम् ॥
हसितं कपोलजनितं पुष्करविवरोद्भवं च नागानाम् ।
भवति धनधान्यवाहनभूलाभकरं नरेन्द्रस्य ॥
हस्तेन मृदङ्गरवं कर्णाभ्यां दुन्दुभिनिःस्वनं चैव ।
दर्दुररवं गलेन च करोति यो जयकरः स गजः ॥
सर्वस्थानसमुत्थाः शब्दा नरनाथ वारणेन्द्राणाम् ।
आचार्यैः सर्वैस्ते बृंहितसंज्ञाः शुभास्तु विज्ञेयाः ॥
एते च जयपराजयकथनसमर्था भवन्ति भूपानाम् ।
गर्हितशुभप्रदेशस्था नोपरिबर्द्धिता नादाः ॥
शुष्कतृणकाष्ठकण्टकवल्मीकास्थिश्मशानदुष्टासु ।
पाषाणाङ्गारादिषु भूमिषु यदि संस्थिताः करिणः ॥
बृंहन्ति हीनलक्षणमसकृद्धर्त्तुस्तदा जयो नास्ति ।
जयदास्तु शार्दूलादिशरभोद्देशस्थिता नित्यम् ॥
स्पृशति कराग्रेण यदा नराधिपस्य विजयस्तदा राजन् ।

सेनामध्ये च यदा बृंहति शार्दूलवद्गजो हृष्टः ॥
भवति स्वसैन्यस्य तदा विजयः सङ्घये नरेन्द्रस्य ॥
सङ्घयः सङ्ग्रामः ।
कलहंसनादमधुरं किञ्चिच्चोत्क्षिप्तपुष्करस्तु यदा ।
बृंहति वारणनाथस्तदा जयं नरपतिर्लभते ॥
दशनाविवर्जितहस्तस्तुरङ्गगम्भीरशङ्खनादसमः ।
बृंहति यदा च हस्ती तदा तु विजयो भवेद्भर्तुः ॥
मुखविवरकपोलगतं बृंहत्यसकृद्गजो यदा हृष्टः ।
मधुरं गजहसितं तज्जयप्रदं भवति भूपानाम् ॥
क्रौञ्चरवं हंसरवं नागो हि बृंहितं यदा कुरुते ।
एतदपि नागहसितं जयप्रदं भवति भूपानाम् ॥
गर्जति कण्ठेन यदा यथा घनो वारणः प्रहृष्टमनाः ।
मुखरन्ध्रनिविष्टकरस्तदा जयो जायते भर्तुः ॥
जलधरगृहीतसलिलं ससीकरं बृंहितं यदा कुरुते ।
भवति तदा नरनाथस्य शत्रुविनाशः सुखेनैव ॥
कथितान्येतानि मया शुभानि गजबृंहितानि नरनाथस्य ।
अशुभानि च नागानामतः परं सम्प्रवक्ष्यामि ॥
सङ्कोचायितलपनो वराहघुषितवन्निःस्वनं कुरुते ।
यदि नागो भवति भयं तदा रणे नरपतिबलस्य ॥
भूतलविस्तृतहस्तो नदति यदा धरणिकण्ठनादसमम् ।
नरपतिराष्ट्रविनाशो भवति तदा शत्रुसैन्यकृतः ॥
जायेत विजयविघ्नः शीतं पुरराष्ट्रपीडनं च तथा ।
मदमुदितकरः खरवत् स निःस्वनं यदि करी कुरुते ॥
बालिभुङ्निःस्वनसदृशं यदि बृंहति विनमिताननो हस्ती ।
म्रियते तदास्य यन्ता मासस्यान्ते चतुर्थस्य ॥

बालिभुक् श्वा ।
भूमौ वलितनिवेशिताशिथिलकरो बृंहति च यदा करुणम् ।
मीलितलोचनयुक्तो भर्तृविनाशं तदा कुरुते ॥
सततं दुःखितहृदयो रोगाणामागमं रिपुभयं च ।
खरपारावतरुतसमबृंहितमुखरः करी कुरुते ॥
रूक्षं नादं बृंहत्यसकृत्सन्ध्याद्वये यदा हस्ती ।
हस्तिपसहितश्च तदा स एव पञ्चत्वमुपयाति ॥
आघ्राताननविवरो बृंहति च यदा सुदुःसहं दन्ती ।
सहसाभिघातजनितस्तदा भयं भवति भूपानाम् ॥
चीत्कारं यदि कुरुते परुषं सङ्ग्रामकल्पितो हस्ती ।
धरणीतलन्यस्तकरस्तदा भयं जायते भर्तुः ॥
पातारं सैन्यपतिं क्रुद्धो भीत इव यः स्वनं कुरुते ।
गजपरिवर्जितमुखः स नाशयेद्वारणः सङ्घे ॥
अशनिस्फूर्जितसदृशं द्विरदो यदि बृंहते रणारम्भे ।
धरणीतलगतवदनस्तदा जयो नास्ति भूपस्य ॥
निःश्वसति दीनवदनो जम्बुकनादानुकारिकृतशब्दः ।
यो नागो रणसमये न तस्य भर्त्ता जयं लभते ॥
यः किङ्किणीस्वनसदृशं नादं करोति कुपितोऽपि ।
त्याज्योऽसौ नरपतिना सन्तापक्रियाकरो भवति ॥
हर्षिततनूरुहो यदि बृंहति पर्यश्रुलोचनो हस्ती ।
पीलुपतियातृनाशं तदा कुरुतेऽवश्यमेवासौ ॥
पीलुर्हस्ती ।
वामान्दोलितचरणो यदा करी बृंहते सनिःश्वासम् ।
आलानगतः कुरुते तदा क्षयं यातृपीलुपतेः ॥
एवं प्रकृतिस्था यदि मतङ्गजा बृंहितानि कुर्वन्ति ।

आत्यन्तिकानि राज्ञस्तान्येव भवन्ति नान्यानि ॥ इति ।

इति शब्दलक्षणम् ।

अथावर्त्तलक्षणम् ।

हृदयप्रबन्धे,

आवर्तः षट्प्रदेशेषु त्वग्जो दशनभङ्गजः ।
केशजः पक्ष्मजातश्च बालजो रोमजोऽपि च ॥
केशरोमभवौ शस्तौ दन्तकल्पनजः शुभः ।
शोकानर्थप्रदाः प्रोक्तास्त्वग्जपक्ष्मजबालजाः ॥
भूमिदो रोमजावर्त्तो केशावर्त्तो जयप्रदः ।
दन्तभङ्गभवावर्त्तः सुतदारप्रदस्तथा ॥
कर्त्तनः पक्ष्मजावर्तस्त्वग्जातश्चामयप्रदः ।
व्रणकुद्बालजावर्त्तः शोकमारणसम्भवः ॥
प्रशस्तो दक्षिणावर्तो वामावर्त्तो विगर्हितः ।
मतः शस्तो मृदुस्निग्धः सवर्णः पीतरोमकः ॥
वामे ये दक्षिणावर्त्ता वामावर्त्ताश्च दक्षिणे ।
आवर्त्तास्तेऽपि नाभीष्टा राजपुत्रमतं यथा ॥
शुभोऽप्यक्षेत्रजातस्तु शुभं नैव प्रयच्छति ।
अशुभः क्षेत्रजातश्च नानिष्टफलदः स्मृतः ॥
अवग्रहेऽग्रहस्ते च स्तनयोरन्तरे तथा ।
ग्रीवायामक्षिकूटे च कुम्भाभ्यन्तरतस्तथा ॥
तल्पले दन्तवेष्टे च कर्णमध्ये च वक्षसि ।
आवर्त्ता वारणानां हि निश्चयाख्याः शुभप्रदाः ॥

अवग्रहः कुम्भोपरितनप्रदेशः । अग्रहस्तः कराग्रस्योभयपार्श्वगतः प्रदेशः ।

स्तनान्तरे शिरोमध्ये कुम्भान्तश्चूलिकान्तरे ।

वक्षस्यावर्त्तयोगेन कुञ्जरः पञ्चमङ्गलः ॥
चूलिका कर्णपिप्पल्युपरितनो भागः।
शीर्षावर्त्तोऽभिषेकाय स्तनावर्त्तो जयाय च।
सुखाय चूलिकावर्त्तः कुम्भो राज्ञः प्रियाय च ॥
वंशे प्रोथे च वाहित्थे मन्यायां सगदे कटे।
कर्णे ऽक्षिकूटे नाभौ च कक्षपार्श्वोसकुक्षिषु ॥
बालधौ पेचके मेढ्रे रन्ध्रसन्धिकलासु च।
आवर्त्ता न प्रशस्यन्ते कर्णभागेषु तेषु च ॥ इति।
वंशः शुण्डादण्डवंशः, नपृष्ठवंशः। सन्धिर्निर्याणसमीपप्रदेशः।

इत्यावर्त्तलक्षणम्।

अथ पुष्पलक्षणम्।

हृदयप्रबन्धे,
स्वस्तिकादिषु संस्थानं पुष्पं दशनदेहजम्।
स्निग्धं भव्यं शुभच्छायमच्छिन्नं वाञ्छितप्रदम् ॥
कबन्धादिकसंस्थानं विगतप्रभमस्फुटम्।
रूक्षवर्णं च कुसुमं ततोऽनर्थकरं मतम् ॥
दद्यात्सुतं सितं पुष्पं स्निग्धं पीतं च हेमदम्।
नीलोत्पलेन्द्रनीलाभं स्निग्धं कालं च वृत्तिदम् ॥
यच्च स्यात्पूजिते भागे कुसुमं स्निग्धपाण्डुरम्।
शुभाय च शुभाकारं तद्भवेद्भूपतेः शुभम् ॥
शक्रचापनिभं पुष्पं दन्तोपरि च दन्तिनः।
दिशेद्वृष्टिं सुभिक्षं च क्षेमं च क्षितिरक्षिणः ॥
श्वेतान्तःस्निग्धरक्ते च पुष्पे रणसहो भवेत्।
पुष्पे श्वेतान्तःकाले च दानवृद्धिं विनिर्दिशेत् ॥
श्रीवृक्षादिनिभाकारैर्वैजयन्तीध्वजोपमैः।

शैलप्रासादसदृशैश्छत्रचामररूपिभिः ॥
सोमसूर्यसमाभासैः शिबिकायानमूर्तिभिः ।
पुष्पैर्दशनरोमस्थैर्यथायोग्यं विनिर्दिशेत् ॥
बहून्यनेकवर्णानि फलानां रजतस्य च ।
पुष्पं वराङ्गसंस्थानं कृष्णाहिसदृशाकृति ॥
श्वक्रव्यादनिभाकारं रणे मरणकारणम् ।
धूमाभं पुष्पमिच्छन्ति मृत्यवेऽग्निभयाय च ॥
कृष्णपुष्पोदयेनापि द्विषद्भूतागमो द्रुतम् । इति ।

इति पुष्पलक्षणम् ।

अथ बलपरीक्षा ।

बार्हस्पत्यसंहितायाम्,

अतः परं प्रवक्ष्यामिं तेषां बलपरीक्षणम् ।
गजेन बलहीनेन सुरूपेणापि किं रणे ॥
गुणेभ्योऽपि बलं श्रेष्ठं तत्परीक्षेत पण्डितः ।
शरीरान्तर्गतः प्राणो बशलब्देन कीर्त्यते ॥
क्रियते वारणस्यास्य तस्योपायैः परीक्षणम् ।
जाम्बूनदस्य ताम्रस्य पलानां रजतस्य च ॥
अष्टादशसहस्राणि युक्त्या सङ्गृह्य वेगवान् ।
जाम्बूनदं सुवर्णम् ।
दशयोजनमध्वानं गच्छति श्रमवर्जितः ।
यो गजो गजमध्ये तु स उत्तमबलः स्मृतः ॥
यश्चतुर्दशसाहस्रं भारमादाय गच्छति ।
सप्तयोजनमध्वानं स मध्यमबलो मतः ॥
दशसाहस्रकं भारं गृहीत्वा पञ्चयोजनम् ।
अध्वानं यो हि संयाति स हीनबल उच्यते ॥

अथ वा खादिरं स्तम्भं शिंशपामयमेव च।
निर्ग्रन्थिलं च वक्रत्वहीनं द्वादशहस्तकम्॥
सत्रिभागद्विहस्तेन परिणाहेन संयुतम्।
चतुर्हस्तनिखातं तु यो भिनत्त्युत्तमो हि सः॥
अथ वोत्पाटयेद्वापि बलेन महता युतः।
सार्धत्रिहस्तनिखातं सप्तहस्तोच्छ्रितं तथा॥
पञ्चाशदङ्गुलीकेन परिणाहेन संयुतम्।
भिनत्ति यो गजः शीघ्रं क्षिपत्युद्धृत्य वा पुनः॥
स गजानां तु सर्वेषां मध्ये मध्यबलो मतः।
हस्तत्रयनिखातं तु षड्हस्तोच्छ्रयमेव च॥
युक्तं स्थूलतया चैव पूर्वसङ्ख्यार्धमात्रया।
भिनत्ति हेलया यस्तु उत्खातं वा करोति च॥
स्तम्भं कुञ्जरमध्ये तु स हीनबल उच्यते।

इति बलपरीक्षा।

अथ सत्त्वपरीक्षा।

बार्हस्पत्यसंहितायाम्,

गुरुत्वं रूपतः श्रेष्ठं गुरुत्वादधिकं बलम्।
बलादप्यधिकं सत्त्वं तस्मात्सत्त्वं निरूपयेत्॥
शुद्धस्फटिकसङ्काशं सत्त्वं हृदि शरीरिणाम्।
दुर्लक्ष्यं विद्यते सम्यगुपायैस्तद्धि लक्षयेत्॥
पाषाणैरिष्टकाभिर्वा बाह्यतः फलकैर्घनैः।
सुसङ्कल्पितमूलैस्तु कारयेच्चत्वरं दृढम्॥
उच्छ्रायेण त्रिहस्तं स्यादायामेन चतुर्दश।
हस्तषट्कं पृथुत्वेन परिखाकृतकर्णिकम्॥
बाणपातद्वयायामं पार्श्वे शोधितभूतलम्।

मातङ्गमन्त्रपूतेन प्रोक्षयेत्सलिलेन हि ॥

मन्त्रः—

ईशानमलसम्भूत विघ्ननाथ गणाधिप ।
गजानां गजसत्त्वज्ञ कुरु तत्त्वविनिर्णयम् ॥
सुप्रशस्ते दिने लग्ने गजौ गैरिकमण्डितौ ।
कर्णचामरशङ्खादिमुखाभरणभूषितौ ॥
पादान्दोलनसञ्जातघण्टाघण्टालनिःस्वनौ ।
आरोहककरास्फालकृतोत्साहोन्नताननौ ॥
अन्योन्यटौकयाच्छिद्यौ पार्श्वकोलाहलाकुलौ ।

टौका गजपृष्ठपश्चाद्भागारूढनरहस्तगतो गजपुच्छप्रदेशताडनसाधनं काष्ठमयो मुद्गरः ।

वेगोत्थानकृतास्फोटं दन्तसङ्घट्टभेदनैः ॥
कृताङ्कौ स्थूलहस्तस्य वेदनां यो न मन्यते ।
गजो दन्तकृतास्फालैश्चत्वरं भेत्तुमिच्छति ॥
नापसर्पति घातेन प्रतिघातं करोति च ।
कण्ठगार्जितनादेन परिपूरितदिङ्मुखः ॥
निवर्त्यते च दुःखेन स भवेत्सत्त्ववान् गजः ।
पदात्यश्वसमूहं वा गजमालातिभीषणम् ॥
वेगोत्थानसमुद्भूतं गम्भीरकलहाकुलम् ।
उत्थानसमवेगेन रोषरञ्जितलोचनः ॥
दन्तदारणरागेण प्रतिनागगतेक्षणः ।
प्रसारितैरतिस्तब्धैर्निःशङ्कः कर्णपल्लवैः ॥
यो भिनत्त्यतिवेगेन स भवेत्सत्त्ववान् गजः ।
शार्दूलादिकसत्त्वानां त्रासवर्जितमानसः ॥
कृतकं च तथा नागं यो भिनत्त्युत्तमो हि सः ।

दावानलशिखिश्रेणीशब्दसन्त्रासवर्जितः।
वनेषु विचरेद्यस्तु स सत्त्वसहितो गजः॥
कृतशङ्को बलाद्यस्तु न चारोहणमीषते।
सङ्कुचन् विरसो दीनो मन्दान्मन्दतरो भवेत्॥
आलोकयति पार्श्वानि चीत्कारकरणप्रियः।
आलोकयति दीनाभ्यां लोचनाभ्यां प्रतिद्विपम्॥
पदात्यश्वसमूहं वा ज्वलन्तमिव मन्यते।
अधमस्तु स विज्ञेयो गजः सङ्ग्रामवर्जितः॥
यस्तु सङ्घटते मन्दं घटितश्चापसर्पति॥
तथोपसर्पवेगेन दन्तघातं प्रयोजयेत्।
किञ्चित्तिर्यङ्मुखो भूत्वा कृतचीत्कारनिःस्वनः।
कुरुते दन्तसङ्घट्टः समसत्त्वस्तु स द्विपः॥
एवंविधैः प्रकारैस्तु ज्ञात्वा सत्त्वाधिकं गजम्।
दन्तघातेषु कुशलं कारयेद्युद्धपण्डितैः।
धनुर्वेदादिकैः शास्त्रैर्नरा युद्धविशारदाः॥
बलान्नरसहस्राणि घ्नन्ति सङ्ग्रामभूमिषु।
एवं गजास्तु राजेन्द्र कुशला युद्धकर्मणि॥
परानीके तु वृन्दानां कुर्वन्ति बलनाशनम्।
बलसत्त्वगुरुत्वादिगुणयुक्तोऽपि वारणः॥
दन्तघातान्न जानाति यो रणे निष्फलो हि सः।
सम्पातश्च तथोल्लेखः परिलेखस्तथैव च॥
कर्त्तरी तलघातश्च पार्श्वघातस्तथैव च।
आराघातश्च सूची च ताडितः सन्धितस्तथा॥
एते शुद्धेन नागानां दन्तघाता दश स्मृताः।
अन्योन्यमुखसंस्फोटः सम्पात इति कीर्त्तितः।

ऊर्द्धक्षेपस्तु दन्ताभ्यामुल्लेख इति संज्ञितः ॥
तिर्यगूर्ध्वकृतक्षेपः परिलेखो ऽभिधीयते ।
उभयोः पार्श्वयोश्चैव दन्तघातस्तु कर्त्तरी ॥
तलघातस्तु दन्ताधः क्रियते यो मुखेन वा ।
पार्श्वघातः स विज्ञेयो यः स्थूलेन प्रयुज्यते ॥
आराघातस्तु विज्ञेयः सम्मुखो यस्तु लक्ष्यते ।
मुखे विषाणघातानां प्रतिमानाङ्गदारकः ।
प्रतीक्ष्य प्रतिघातस्तु दन्तेनैकेन यो भवेत् ॥
करमध्यप्रदेशे तु सूचीघातः स उच्यते ।
अन्योन्यदन्तसङ्घट्टजनितस्ताडितो मतः ॥
सन्धितस्तु स विज्ञेय उपर्युपरि यो भवेत् ।
एतेषां च समायोगे यो भवेन्मिश्रलक्षणः ॥
दन्तघातस्तु नागानां गर्हितः सोऽभिधीयते ।
परिवृत्य गजो वेगात्पार्श्वयोः कुरुते दृढम् ।
दन्तघातं द्विपस्थाय परिवृत्तः स उच्यते ॥
आर्द्रद्रुमकृते स्तम्भे शुचौ देशे सरोपिते ।
निर्जने प्राङ्मुखं कृत्वा नागं बद्धा समाहितः ॥
दृढासनो दृढकर्मा सव्यासव्योरुपीडनात् ।
अङ्कुशोल्लेखनाच्चापि दन्तघातान् प्रयोजयेत् ॥
एवं संसक्तदन्तस्तु स्तम्भहः क्रियते गजः ।
दौकया च कृतोत्साहो परिवृत्य पुनः पुनः ॥
एवमभ्यस्तघातस्य कुञ्जरस्य महारणे ।
मदक्लिन्नकपोलस्य प्रतिरोकं करोति कः ॥ इति ।
अत्र विशेषः ।
दिव्याधमसत्त्वानां लक्षणमथ साम्प्रतं वक्ष्ये ।

निहतद्विपदचतुष्पदकुणपान्न स्पृशति यो न गृह्णाति ॥
न च जिघ्रति मूत्रादीन् स वारणो दिव्यसत्त्वस्तु ।
हत्वा च योऽत्ति मांसं सत्त्वानां सर्वगतं च लोभेन ॥
जिघ्रति मूत्रपुरीषान् पिशाचसत्त्वः स विज्ञेयः ।
एवं सत्त्वपरीक्षा क्रियते नरनाथ वारणेन्द्राणाम् ॥ इति ।

इति सत्त्वपरीक्षा ।

अथानूकलक्षणम् ।

हृदयप्रबन्धे,
यत्पूर्वसम्भवेऽभ्यस्तं सत्त्वं रूपं गतिः स्वरः ।
तस्यानुकरणादुक्तमनूकमिति कोविदैः ॥
सत्त्वरूपजवारावैः शुभैरनुकृता गजाः ।
देवर्षिनरगन्धर्वनागानूका मताः शुभाः ॥
एवमेव च सत्त्वाद्यैर्दुष्टैर्नानुकृतैर्युताः ।
दैत्यरक्षःपिशाचानामनूकैः परिवर्जिताः ॥
वृषसिंहतुरङ्गादिसमानूका मता द्विपाः ।
नेष्टाश्च खरगृध्रादिसमानानूकयोगिनः ॥ इति ।

इत्यनूकलक्षणम् ।

अथ वेदितलक्षणम् ।

बार्हस्पत्यसंहितायाम्,
सत्त्वस्य सम्भवं ज्ञात्वा नहुषस्तं महामुनिम् ।
गजानां वेदितं कोपं वेगं गुणान् स्म पृच्छति ॥
ऊचे सुराधिपगुरुः प्रहृष्टहृदयस्तदा ।
राजन् पञ्चविधं चैव गजानां वेदितं मतम् ॥
अत्यर्थं प्रथमं ज्ञेयं प्रत्यर्थं च तथाऽपरम् ।
अन्वर्थं चैव गम्भीरमुत्तानं पञ्चमं भवेत् ॥

प्रतोदाङ्कुशदण्डाद्यैर्दूरादुद्विजते तु यः ।
तीव्रसङ्कुचितः स्पृष्टः स स्यादत्यर्थवेदितः ॥
यच्च स्तोकं बहु तथा यः कृतं मन्यते गजः ।
वागङ्कुशादिभिर्नित्यं सो हि प्रत्यर्थवेदितः ॥
जानात्यङ्कुशनोदाद्यैर्यद्यथा तत्तथैव हि ।
कृतं, कोपभयैर्मुक्तो योऽन्वर्थज्ञस्त्वसौ भवेत् ॥
अङ्कुशादिकृतान् यस्तु चिरेणैवावगच्छति ।
तीव्रानपि स गम्भीरवेदी भवति वारणः ॥
रोम्णामग्रं तृणेनापि स्पृष्टं वेत्ति तथा गुरुः ।
उत्तानवेदितं तं तु गजं विद्धि महाभुज ॥
सर्वाणि वेदितव्यानि भद्रादीनां भवन्ति वै ।
प्रकृतिस्थाऽस्य सततं भद्रस्यान्वर्थवेदिता ।
गम्भीरवेदिता चापि मन्दस्यैव प्रकीर्त्तिता ॥
उत्तानवेदिता नित्यं मृगस्यैव भवेन्नृप ।
वेदित्वमेवंजातीनां तिसृणामपि जायते ॥ इति ।

हृदयप्रबन्धे,

वेदितानि च वेद्यानि वारणानां विशेषतः ।
अज्ञातवेदितेनैव नागमारोढुमर्हति ॥
पञ्चधा वेदितं चैव विज्ञेयं सामजन्मनाम् ।

सामजन्मनां गजानाम् । सामगायनऋषेर्गजा उत्पन्ना इति पालकाप्ये । विष्णुधर्मोत्तरे तु गजोत्पत्तिसमये ब्रह्मणा रथन्तरसामगानं कृतम् । एतत्सर्वं प्रागभिहितगजोत्पत्तौ द्रष्टव्यम् ।

अत्यर्थोत्तानगम्भीरप्रत्यर्थान्वर्थभेदतः ॥
यस्तु घातादुद्विजते दूरादेवाङ्कुशादिकम् ।
स्पृष्टश्च व्यथतेऽत्यर्थं स गजोऽत्यर्थवेदितः ॥

योऽपि त्वक्स्पर्शमात्रेण रोमस्पर्शवशेन च ।
विद्याद्दण्डाङ्कुशादींश्च स गजोत्तानवेदितः ॥
त्वग्भेदात् शोणितस्रावात्तीव्रं च व्यथनादपि ।
अङ्कुशादीन् विजानीयात् गजो गम्भीरवेदितः ॥
शनैर्हतो भृशं वेत्ति शनैर्वेत्ति भृशाहतः ।
विपरीतगतिर्नागो ज्ञेयः प्रत्यर्थवेदितः ॥
शनैर्हतो भृशं वेत्ति भृशं वेत्ति भृशाहतः ।
प्रत्येति प्रतिषिद्धश्च चोद्यमानश्च गच्छति ॥
यथासंज्ञं विदध्याच्च सर्वकर्माणि योऽद्भुतम् ।
अत्यर्थवेदितं प्राज्ञं जानीयात्तं शुभं गजम् ॥ इति ।

इति वेदितलक्षणम् ।

अथ क्रोधलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

क्रोधोऽपि द्विविधो ज्ञेयः शिशुश्चैवाशिशुस्तथा ।
द्वित्रिधस्यापि राजेन्द्र यथावच्छृणु लक्षणम् ॥
उद्वेजितोऽपि कालेन कोपं बध्नाति मध्यमम् ।
निवार्यमाणश्च तथा शीघ्रं कोपान्निवर्तते ॥
एवंविधस्तु यो हस्ती स शिशुक्रोध उच्यते ।
मध्यमस्तु भवेच्चायं गजः सङ्ग्रामकर्मणि ॥
क्षिप्र गृह्णाति यः क्रोधं दुर्निवारं च दुःसहम् ।
वार्यमाणोऽपि यत्नेन शमं याति च मुह्यति ॥
स ज्ञेयस्त्वशिशुक्रोधो गजो राजन् रणप्रियः । इति ।

इति क्रोधलक्षणम् ।

अथ गुणलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

अतः परं प्रवक्ष्यामि गजस्य गुणलक्षणम् ।
कल्याणजातिराख्यातः क्षीणः श्रान्तो बुभुक्षितः ॥
भर्त्रर्दितो वा तृषितस्ताडितोऽनपराधतः ।
रात्रौ वा दिवसे वापि निर्विकारस्तु यो भवेत् ॥
कल्याणशीलः स ज्ञेयो मातङ्गो गजलक्षणैः ।
विकारं कुरुते यस्तु पीड्यमानः क्षुधादिभिः ॥
तमकल्याणिनं राजन् गजं दुष्टं प्रकल्पयेत् । इति ।

इति गुणलक्षणम् ।

अथ स्थितलक्षणम् ।

बार्हस्पत्यसंहितायाम्,
स्थितानां च यथायोगं साम्प्रतं लक्षणं शृणु ।
पञ्चस्थितसप्तस्थितनवस्थितद्वादशस्थिताश्चैव ॥
पुण्यवतां जायन्ते राज्ञां गैरिकसन्निभाः करिणः ।
लक्षणसहितैः स्निग्धैः करकुम्भविषाणकर्णनयनैश्च ॥
संयुक्तो भवति गजः सुखदः पञ्चस्थितो नागः ।
परिणाहायामोच्छ्रायबलविक्रमधैर्यकान्तिसम्पन्नः ॥
भर्तुः प्रतापजननो ज्ञेयः सप्तस्थितो हस्ती ।
उत्साहवेगसाहसमदसत्त्वगुरुत्वदक्षतायुक्तः ॥
करदन्तकर्मकुशलो नवस्थितः कुञ्जरो भवति ।
बुद्धिर्मेधा सत्त्वं दन्तौ कुम्भौ तथाऽक्षिणी हृदयम् ॥
रोमाणि छविः पादास्तथाऽऽसनं पृष्ठवंशश्च ।
द्वादश चैतानि सदा स्थितानि नागस्य यस्य दृश्यन्ते ॥
स द्वादशस्थितो वै भवति गजः सर्वसौख्यकरः ।
चत्वारः स्थितभेदाः कथिता गुणसंश्रिता गजेन्द्राणाम्॥इति।

विष्णुधर्मोत्तरे,

राम उवाच ।

श्रोतुमिच्छामि धर्मज्ञ कुञ्जरं सप्तसुस्थितम् ।
यं प्राप्य किल राजानो जयन्ति वसुधां नृप ॥

पुष्कर उवाच ।

वर्णः सत्त्वं बलं रूपं कान्तिः संहननं जवः ।
सप्तैतानि सदा यस्य स गजः सप्तसुस्थितः ॥ इति ।

इति स्थितलक्षणम् ।

अथ प्रशस्तगजलक्षणम् ।

विष्णुधर्मोत्तरे,

पुष्कर उवाच ।

नागाः प्रशस्ता धर्मज्ञ प्रमाणान्नाधिकाश्च ये ।
दीर्घहस्ता महोच्छ्वासाः स्वासनाश्च विशेषतः ॥
निगूढवंशा मध्वक्षास्तथा व्यूढोच्चमस्तकाः ।
व्यूढा विपुलाः ।
विंशत्यष्टादशनखाः शीतकालमदाश्च ये ॥
येषां चैव करः पादा दीर्घा लाङ्गूलमेव च ।
दक्षिणं चोन्नतं दीप्तं बृंहितं जलदोपमम् ॥
अत्यर्थवेदना ये च शूराः शब्दसहिष्णवः ।
कर्णौ च विपुलौ येषां सूक्ष्मबिन्दुचितत्वचौ ॥
ते प्रशस्ता महानागा ये तथा सप्तसु स्थिताः ।
दन्तच्छेदेषु दृश्यन्ते येषां स्वस्तिकलक्षणम् ॥
भृङ्गारबालव्यजनवर्धमानाङ्कुशास्तथा । इति ।

वराहसंहितायाम्,

येषां भवेद्दक्षिणपार्श्वभागे
रोम्णां तु पुञ्जः पिटकोऽथवापि ।
ते नागमुख्या विजयाय युद्धे
भवन्ति राज्ञां न हि संशयोऽत्र ॥
ताम्रोष्ठतालुवदनाः कलविङ्कनेत्राः
स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंशा—
स्तन्वेकरोमचितकूर्मसमानकुम्भाः ॥
विस्तीर्णकर्णहनुनाभिललाटगुह्याः ।
कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुवाला
धन्याः सुगन्धिमदपुष्करमारुताश्च ॥ इति ।

इति प्रशस्तगजलक्षणम् ।

अथाशुभदुष्टगजलक्षणम् ।

विष्णुधर्मोत्तरे,

ते धार्या वामना ये च हस्तिनो ये च मत्कुणाः ।

ते धार्या इति पदं पूर्वोक्तप्रशस्तगजैः सम्बध्यते ।

हस्तिन्यो याश्च गर्भिण्यो ये च मूढा मतङ्गजाः ॥
अपाकलाश्च कुब्जाश्च सदन्ता ये च भार्गव ।
कुदन्ताश्च तथा वर्ज्या वामकूटाश्च यत्नतः ॥
अश्रुस्पृशश्च कूटाश्च षण्ढाश्च विकटाश्च ये ।

श्रीराम उवाच ।

वामनाद्याश्च ये नागाः प्रोक्ता निन्दितलक्षणाः ॥
तेषां तु श्रोतुमिच्छामि लक्षणं वरुणात्मज ।

पुष्कर उवाच ।

अनाहायामसम्पूर्णो योऽतिह्रस्वो भवेद्गजः ॥
वामनस्तु समाख्यातो मत्कुणो दन्तवर्जितः ।

नाहः स्थूलता । आयामो दैर्घ्यम् ।

दशां चतुर्थीं सम्प्राप्य वर्धते यश्च यद्द्विजौ ।
स्थूलावनायतौ स्यातां स मूढाख्यो गजाधमः ॥
अपाकलो विशालेन दन्तेनैकेन वारणः ।
सङ्क्षिप्तवक्षोजघनः पृष्ठमध्यसमुन्नतः ॥
प्रमाणहीननाभिश्च स कुब्जो वारणाधमः ।
अनुन्नताभ्यां सदन्तः कुदन्तः स्यान्नतो बहिः ॥
वामदन्तोन्नतो नागो वामकूटश्च कथ्यते ।
दन्तावश्रुस्पृशौ यस्य सोऽश्रुस्पृक्कीर्तितो गजः ॥
एकदन्तस्तथा नागः कूट इत्यभिधीयते ।
पादयोः सन्निकर्षः स्याद्यस्य नागस्य गच्छतः ॥
स षण्ढोऽध्वनि युद्धे च लक्षणज्ञैर्न पूजितः ।
त्र्यरत्न्यभ्यधिकं यस्य विस्तरेण स्तनान्तरम् ॥
विकटः स विनिर्दिष्टो दुर्गतिर्निन्दितो गजः । इति ।

वराहसंहितायाम्,

निर्मदाभ्यधिकहीननखाङ्गान्
कुब्जवामनकमेषविषाणान् ।
दृश्यकोशफलपुष्करहीनान्
श्यावनीलशबलासिततालून् ॥

दृश्यमाने कोशफले वृषणौ येषां ते ।

स्वल्पवक्रुरुहमत्कुणषण्ढान्
हस्तिनीं च गजलक्षणयुक्ताम् ।

गर्भिणीं च नृपतिः परदेशं
प्रापयेदतिविरूपफलास्ते ॥ इति ।

स्वल्पा वक्रुरुहो दन्ताः, मुखलोमानि वा येषां ते ।

पराशरसंहितायाम्,

आस्यस्पृशौ विशालस्य विषाणौ पार्श्व उन्नतौ ।
अपाकलो विशालेन दन्तेनैकेन वारणः ॥
अनुन्नताभ्यां सदन्तः कुदन्तः स्यान्नतावधः ।
वर्ज्यास्ते शुभकामेन सर्व एते विगर्हिताः ॥
अब्दद्वये नदीजानां पञ्चमेऽब्दे वनौकसाम् ।
उत्पद्यन्ते हि नागानां दन्ताश्चैव न संशयः ॥ इति ।

तथा च,

अनाहायामसंयुक्तोऽतिह्रस्वो यो भवेद्गजः ।
वामनः स समाख्यातो भर्तुर्नार्थयशःप्रदः ॥
सर्वलक्षणसम्पूर्णो दन्तैस्तु परिवर्जितः ।
मत्कुणः स समाख्यातः सङ्ग्रामे प्राणघातकः ॥ इति ।

बार्हस्पत्यसंहितायाम्,

नहुषं प्रति बृहस्पतिरुवाच ।
दुष्टगजानां प्रथमं दुर्लक्षणमेव ते वच्मि सकलम् ।
ह्रस्वतनुर्वलिवदनो महाशिराः स्तब्धकर्णश्च ॥
नातिस्थूलाधोमुखवान् तथा निरङ्कुशो हस्ती ।
लोचनयुगलं स्तब्धं घनपक्ष्मान्तरिततारकं यस्य ॥
विषमं च मेचकं स्यात् प्रलम्बितः पेचकोऽत्यर्थम् ।
मेढ्रं किलासिवर्णं स्तब्धानि च गात्रवदनरोमाणि ॥
व्यासः स भवति हस्ती निरङ्कुशो दुष्टशीलश्च ।
स्थूलाक्षिपाण्डुररूक्षदीर्घविषाणनाशितमुखश्रीश्च ॥

पृथुपादो वक्रनखो वक्रेण तु पुच्छदण्डेन ।
विस्तृतकुक्षिर्लम्बोदरश्च कृष्णो वाराहनयनश्च ॥
ज्ञेयो वकीलनामा व्यालोऽयं सर्वदोषकरः ।
अतिह्रस्वापरगात्रो बृहन्मुखः काककृष्णनयनश्च ॥
स्थूलतराधोमुखदन्तमुशलः स्फुटितबर्हनखपादः ।
स्थूलनखपुष्करकश्च वामनसंज्ञो गजाधमो यो हि ॥
निर्याणे चातिदृढे ह्रस्वौ परिमण्डलौ तथा कर्णौ ।
बदनं च मांसलं स्यादधोगतं स्थूलनयनश्च ॥
सममांसलत्वयुक्तो ह्रस्वो ह्रस्वाङ्गुलिः करो यस्य ।
नाम्ना च विश्वरूपसुखस्त्याज्योऽयं दुष्टमातङ्गः ॥
ग्रन्थिषु च शुक्लवर्णः कपिजम्बुकलोचनोऽतिविकृततनुः ।
पापात्मायं हस्ती राज्ञा त्याज्यः प्रयत्नेन ॥
दिवसमपि यत्र तिष्ठति तं देशं दहति पावक इव ।
नीत्वा विन्ध्यवने वा परराष्ट्रे वा स मोक्तव्यः ॥
भेन्वा सदृशमुखो यः कर्णकचा यस्य कर्कशा रूक्षाः ।
रोमभिरधोमुखगतैः काकाक्षो दीर्घवक्त्रश्च ॥
स्थिरह्रस्वकर्णयुगलः स राक्षसो हस्तिरूपेण ।
तिर्यक्प्रेक्षणनिरतो दुर्गन्धः काकतुण्डवदनश्च ॥
मूत्रपूरीषाघ्राणे समुत्सुको भवति चाण्डालः ॥
कुम्भौ यस्य विशालौ विक्षिप्तस्थूलतारके नेत्रे ।
तन्वी बलिता त्वक् स्यात् वालधिवालाश्च बहुरूपाः ॥
राजी पेचककारा मेढ्रोपरि संस्थितोदरं च महत् ।
बलपश्चक्षतहस्ती स भवति नाम्ना महादुष्टः ॥
अङ्गं प्रसार्य वदनं विधूय वाऽऽधोरणं निपातयति ।
स जले स्थले च सदृशो विवर्जनीयः प्रयत्नेन ॥

ह्रस्वकराङ्गुलिवालस्तनुदशनश्चाल्परोमगात्रश्च ।
मत्कुणजातिः स गजः सुदुष्टशीलश्च भीरुश्च ॥
स्तब्धोऽतिविडालपक्ष्मा ध्यानपरः शब्दकरणनिरतश्च ।
द्विगुणीकृत्य कराग्रं ताडयति च भूतले नित्यम् ॥
वामेन च लिखति महीं पादेन कुञ्चिताग्रेण ।
जर्जरविरूपकर्णः पापोऽसौ वर्जितो हस्ती ॥
मृदुना मेढ्रेण युतो नेष्टपदः कोशमेही च ।
मन्दालोकननिरतो महाशिराः पृथुविषाणनयनश्च ॥
हस्ती नपुंसकोऽसौ विवर्जनीयश्च सङ्गामे ।
अल्पायुषो भवन्ति हि सकालजिह्वोष्ठतालुका नागाः ॥
नरपतिभिस्ते सततं विवर्जनीयाः प्रयत्नेन ।
आयामे परिहीनं सन्नाहोच्छ्रायेण मुखेन नमितम् ॥
उच्छ्रितवक्त्रं कुब्जं निरङ्कुशं कुम्भहीनं च ।
एवंभूतं नागं राजा दूरेण वर्जयेन्मतिमान् ॥
गृह्णाति मन्दबुद्धिर्यस्तस्य कुलक्षयो भवति ॥
लाक्षामञ्जिष्ठाभोऽतिलोमशो हीनकर्णकरवालः ।
हस्ती विवर्जनीयो हीननखः पूतमो नाम ॥
ज्वलनकृतं सततं दुर्भिक्षकृतं महद्भयं कुरुते ।
यस्मिन्देशे निवसति नाशयति च तं स दुष्टात्मा ॥
यस्य न भवतो दन्तौ कुलरूपवतोऽपि गर्भदोषेण ।
स गजो मत्कुणनामा न तं रणे योजयेद्राजा ॥
कुञ्जरघटागतोऽसौ हरति गजानां बलं च सत्त्वं च ॥
अत एव समरकाले नराधिपैर्वर्जनीयश्च ।
अक्षिभ्यामश्रुजलं निपतति नागस्य यस्य नित्यं हि ॥
नयनव्याधिवियुक्तः स तस्य भर्ता रणे म्रियते ।

कर्णौ दन्तौ च समौ मानेन च भवतो यस्य नरनाथ ॥
सनराधिपबलनाशकरः स करी जायते समरे ।
चित्री रोमाचितो वा स्थूलो वातिप्रलम्बिताग्रो वा ॥
कोशः कोशविनाशं करोति नागस्य भूपानाम् ।
सितबिन्दुविचित्रं वा श्वेतं वा यस्य जायते मेढ्रम् ॥
स गजः शक्तिविनाशं करोति भूपस्य सङ्गामे ।
एकोनविंशतिनखो युवराजविनाशनं कुर्यात् ॥
सप्तदशनखस्तु गजो नरपतिपत्नीविनाशनसमर्थः ।
षोडशनखमातङ्गो नायकनाशं ध्रुवं कुरुते ॥
पञ्चदशनखश्च तथा सेनापतिनिधनकृद्गजो भवति ।
कुरुते चतुर्दशनखो व्याधिं पुरवासिनां नागः ॥
हस्ती त्रयोदशनखो राष्ट्रविनाशं करोति भूपस्य ।
द्वादशनखस्तु कुरुते पदातितुरगक्षयं च समम् ॥
एकादशनखयुक्तो गजहानिकरो भवेत्स गजः ।
पुरदाहं तु दशनखः करोति हस्ती दुरालोकम् ॥
चतुरङ्गस्यापि बलस्य नाशनं नवनखो गजः कुरुते ।
अष्टनखस्तु पुरोहितवंशोन्मूलनसमर्थो हि ॥
सप्तनखः प्रतिहारं नाशयेत् षण्णखोऽमात्यम् ।
पञ्चनखो भक्तचरं चतुर्नखो द्वारपालं च ॥
त्रिनखो विषयवैकृतं द्विनखश्चान्तःपुरानुबद्धं च ।
एकनखो नखरहितो राज्यविनाशं ध्रुवं कुरुते ॥
एवम्भूतनखा ये नरपतिना ते गजा न सङ्ग्राह्याः ।
सुप्तोत्थितस्य वदनाद्यस्य गजेन्द्रस्य गलति रुधिरजलम् ॥
ज्वलनकणं मुञ्चति वा स गजः क्षिप्रं हि भर्तृनाशकरः ।
इति कथितस्तव नरनाथ दुष्टमातङ्गलक्षणं सम्यक् ॥ इति ।

इत्यशुभदुष्टगजलक्षणम् ।

अथ समरकाले राजारोहणयोग्यगजलक्षणम् ।

पराशरसंहितायाम्,

शरशक्तिधनुश्चक्रशूलपट्टिशलक्षणाः ।
दन्ताग्रे राजयो यस्य स नृपं वोढुमर्हति ॥

बार्हस्पत्यसंहितायाम्,

नहुष उवाच ।

रिपुविजयः फलमेषां नागानां नागलक्षणोक्तानाम् ।
सञ्चरणसाहसनिरतस्य भवति नित्यं नरेन्द्रस्य ॥
ये च समरविजयकरणक्षमा गजाः सकलदोषनिर्मुक्ताः ।
त्याज्याश्च ये सदोषास्त्वत्तस्तान् श्रोतुमिच्छामि ॥
तच्छ्रुत्वा वचनं तस्य गुरुः प्रत्यब्रवीन्नृपतिम् ।
त्याज्या गजाश्चात्र क्रमानुरोधात्पूर्वमेवोक्ताः । समरयोग्या उच्यन्ते ।

बलं कण्ठे स्थितं नित्यं कुञ्जराणां नरेश्वर ।
अतः सम्पूर्णकण्ठस्तु शिखिपिङ्गललोचनः ॥
घनमांसयुतांसस्तु दिशावघ्राणतत्परः ।
वराहजघनश्चैव सुविषाणो वराननः ॥
सुप्रतिष्ठितपादस्तु यः स्यादगुरुमक्षिकः ।
प्राजापत्यो गजो ह्येष सङ्ग्रामार्हः प्रकीर्तितः ॥
मधुपिङ्गलदन्तो यः किञ्चिच्चामीकरच्छविः ।
रोमाणि चैकजातानि मुखं च कमलप्रभम् ॥
रक्तोत्पलदलच्छाये सूक्ष्मे तीक्ष्णे च लोचने ।
ऐन्द्रो गजस्तु विज्ञेयो रिपुवृन्दविनाशनः ॥
ताम्रतालुकजिह्वौष्ठः सुजानुनिविडापरः ।

पीनोन्नतशरीरस्तु कुन्दामलनखच्छविः ॥
आयतेनानुवृत्तेन करेण मुखशोभिना ।
पीयूषपिङ्गदन्तस्तु गजः कौबेर उच्यते ॥
तरुणाम्बुदसङ्काशो घृतप्रभविषाणभृत् ।
सम्पूर्णकण्ठपादस्तु सम्पूर्णासनमस्तकः ॥
मृदङ्गध्वनिगम्भीरनादपूरितदिङ्मुखः ।
आयतेन च हस्तेन सीकरोद्गिरणप्रियः ॥
वारुणोऽयं गजो राजन् सङ्ग्रामेष्वपि पूजितः ।
कटस्त्रिवलिसङ्क्रान्तः सम्पूर्णो यस्य दृश्यते ॥
लोचने ताम्रपिङ्गे च दन्तौ केतकसप्रभौ ।
पादौ च वलिनौ स्थूलौ पीनगात्रसमांसलौ ॥
पृथुलौ विन्दुचित्रौ च कर्णौ चाताम्रपल्लवौ ।
कौवेरोऽयं गजो राजन् रणकर्मणि युज्यते ॥
तालुन्युरसि वक्त्रे च पक्ष्मयोरुभयोरपि ।
आताम्रा यस्य दृश्येत छाया मृदुतनूरुहा ॥
असौ सौम्यस्तु विज्ञेयः कुञ्जरः समरोचितः ।
अर्चिःपिङ्गलरोमा यः केशैर्वालैश्च पिङ्गलः ॥
पिङ्गलाक्षिविषाणश्च रक्तपुष्करतालुकः ।
आग्नेयः स गजो ज्ञेयस्तेजसाग्निसमप्रभः ॥
राज्ञा बुद्धिमता नित्यं कार्य्यः समरकर्मणि ।
कृष्णवर्णस्य ताम्राणि मुखस्रोतांसि लोचने ॥
निर्धूमाग्निसमा छाया भूलम्भश्च करस्तथा ।
कायश्च पीनमांसः स्याद्वेगे वाजिसमः शुभः ॥
अन्ये वायव्यमिच्छन्ति तं गजं शास्त्रकोविदाः ।
वाय्वग्न्यंशोद्भवं त्वन्ये तमिच्छन्ति महागजम् ॥

नागः सङ्ग्रामयुक्तश्च नाशयेद्रिपुवाहिनीम् ।
निरङ्कुशत्वं चण्डत्वं तस्य दोषद्वयं भवेत् ॥
निरङ्कुशत्वं निर्याणैः प्रलेपैश्चोपशामयेत् ।
चण्डत्वं च तथा नित्यं सुकुमारक्रियादिभिः ॥
रोमाण्यञ्जनरूपाणि नखाः शङ्खसमप्रभाः ।
निस्त्रिंशविमला छाया स भवेद्वैष्णवो गजः ॥
तं रणे योजयेद्राजा रिपुसैन्यविमर्दनम् ।
कुम्भचक्रगदावज्रनिस्त्रिंशधनुसन्निभैः ॥
बिन्दुभिश्चित्रितं यस्य मुखं चित्रस्त्वसौ गजः ।
तेन सङ्ग्रामकर्माणि कुरुते यो नराधिपः ॥
नित्यं च विजयं तस्य स राजा फलमश्नुते ।
सुदन्तो दीर्घहस्तश्च बृहदङ्गुलिपुष्करः ॥
घनमांसशरीरस्तु कूर्माकारो हि सुक्रमः ।
साङ्ग्रामिको गजो ह्येष जीवत्यपि समाः शतम् ॥
सङ्ग्रामे विजयी नित्यं प्रतापजननक्षमः ।
महाशिरा महाकायो महामेढ्रो महाकरः ॥
महादन्तोदरश्चैव महागात्रापरामनः ।
महानेत्रो महोष्ठश्च महाकर्णो महामुखः ॥
महाकण्ठो महामेदो भवेत्साङ्ग्रामिको गजः ।
यद्भद्रलक्षणं पूर्वमुक्तं ते शुभमेव हि ॥
मन्दस्यापि हि शस्तं स्याद्द्वावेतौ च महागजौ ।
सपूर्ण्णलक्षणो राजन् न भवेच्च महीतले ॥
अनयोरेव भेदास्तु नागानां समुदाहृताः ।
साङ्ग्रामिका द्विपा राजन् सम्यक् लक्षणलक्षिताः ॥
कथितास्तव तत्त्वेन राजसौख्यकरा गजाः ।

तच्छ्रुत्वा वचनं तस्य नहुषो हृष्टमानसः ॥
अपृच्छत्कौतुकाविष्टहृदयस्तं महामतिम् ।
त्वत्तः साङ्ग्रामिका नाथ सामान्येन मया श्रुताः ॥
विशेषेण रणार्हांश्च श्रोतुमिच्छामि सुव्रत ।
ततः श्रुत्वा महातेजा बृहस्पतिरुवाच ह ॥
शृणु राजन् गजो राज्ये यादृग्भूतः शुभो भवेत् ।
पीनमांसचितांसश्च कूर्म्माकारनखस्तथा ॥
समसेव चितांसस्तु वृत्तहस्तघनापरः ।
छागकुक्षिः सुपार्श्वश्च कण्ठनाहसमन्वितः ॥
ज्वलनोज्ज्वलनेत्रश्च सुविषाणो महाकरः ।
सम्पूर्णचिबुकश्चैव कूर्म्मपादो जयान्वितः ॥
बलसत्त्वसमायुक्तः स्निग्धच्छविमनोरमः ।
साङ्ग्रामिको भवेद्राज्ञामभिषेकोचितो गजः ॥ इति ।

इति समरकाले राजारोहणयोग्यगजलक्षणम् ।

अथ समरकाले जयादिसूचकशुभाशुभलक्षणम् ।

बार्हस्पत्यसंहितायाम्,

यदि तु रिपुगजाभिमुखो निवार्यमाणोऽपि याति रभसेन।
विंशतिपदानि नागस्तत्रापि जयो भवत्येव ॥
अमदो गृह्णाति मदं दुर्गन्धमदश्च सुरभिमदगन्धम् ।
नागो यदि नरनाथ हि तदा विजयो भवेद्राज्ञाम् ॥ इति ।

हृदयप्रबन्धे,

दृष्ट्वा रिपूनाभिमुखान् वार्यमाणोऽपि चेद्गजः ।
व्रजेत्तद्विजयो नूनं यदि वा प्लवते बलात् ॥
दुस्तरं तरते नागो यदि तोयमशङ्कितः ।
तच्छुभं यदि चात्यन्तं सुखमभ्वनि गच्छति ॥

दक्षिणेनाग्रपादेन क्षितिमुत्पाटयेद्यदि ।
शोधयेद्वामपादं च तदा जयमुदीरयेत् ॥
यश्चाग्रकुटिलं कृत्वा करं जिघ्रति चेद्दिशः ।
प्रहृष्टहृदयो नागस्तदाभ्युदयमादिशेत् ॥
दक्षिणं तु यदा दन्तं दन्ती प्रमुदितेन्द्रियः ।
परिष्वजति हस्तेन तदा स्यात्प्रियसङ्गमः ॥
अग्रहस्तं यदा नागो मध्येमस्तकसंस्थितः ।
निक्षिप्यमाणो दृश्येत तदा भद्रं जयो भवेत् ॥
लभमानो मदं युद्धे विजयं प्राप्तमावदेत् ।
तलं च तलसन्धिं च पुष्करेण परामृशन् ॥
उद्योगमुपयातं तु वारणो विनिवेदयेत् ।
नूनं हि दक्षिणं पादं वामपादेन चेद्ध्रुवम् ॥
विलिखेद्वारणः खिन्नस्तद्विद्यादात्मराजकम् ।
यदा तु दुर्मना वामं दन्तं हस्तेन शोधयेत् ॥
तदात्मनो वदेन्नाशं यातुर्वाथ निषादिनः ।
करेण वामं नागश्चेत् खिन्नो गात्रं प्रमार्ष्टि यत् ॥
तदनिष्टं भवेद्धर्त्तुरन्यथा च शुभं विभोः ।
अकस्मादेव कुप्यन्ति भ्रमन्ति च पतन्ति च ॥
करिणो यदि तद्विद्याद्ग्रहं च समुपस्थितम् ।
यदा पश्यति मातङ्गो विद्रवं वा पराजयम् ॥
प्रवासं परराष्ट्रं वा तदा भवति दुर्मनाः ।

इति समरकाले जयादिसूचकशुभाशुभलक्षणम् ।

अत्र यानि गजानां शुभाशुभलक्षणानि उक्तानि तानि करिणीष्वपि योज्यानि । तदुक्तम्—

बार्हस्पत्यसंहितायाम्,

यल्लक्षणं मयोक्तं भद्रादीनां शुभं च दुष्टं च ।
तत् करिणीष्वपि योज्यं जातिविभागेन युक्तासु ॥ इति ।

इति करिणीलक्षणम् ।

पूर्वं राज्ञा गजसङ्ग्रहः कर्तव्य इत्युक्तम् । तत्र—

तेषां समर्जने यत्नं पालने च भृगूत्तम ।
यथावन्नृपतिः कुर्याद्गन्धर्वाः कुञ्जरा मताः ॥
तावन्तश्च तथा धार्या यावतां पोषणं सुखम् ।
कर्तुं शक्यं न धार्यास्ते क्षुधिता दुःखितास्तथा ॥
दुखितास्ते नृणां हन्युः कुलानि भृगुसत्तम ।
तस्मात्तेषां सुखं कार्यं यशःश्रीविजयप्रदम् ॥

इति विष्णुधर्मोत्तरवचनैः,

ये चैवान्ये च बहवो वारणानां गुणाः स्मृताः ।
तस्मात्प्रयत्नाद्रक्षेत्तु स्वपुत्रानिव नित्यशः ॥
तेषाममितसत्त्वानां कर्त्तव्यमनुपालनम् ।

इत्यादिपालकाप्यवचनैश्च गजानां सुखावस्थानसंरक्षणादिकमभिहितम् । तच्च तदभिज्ञाधिकारिपुरुषैर्विना न सम्भवतीत्यतस्तत्राभिज्ञाः पुरुषा राज्ञा नियोक्तव्याः । ते च किंलक्षणा इति तल्लक्षणानि निरूप्यन्ते । तत्र तावद्गजरक्षाधिकारिलक्षणमुक्तम्—

पालकाप्ये,

प्रोच्यन्ते यादृशा युक्ता गजरक्षाधिकारिणः ।
धार्मिकाः शुचयः सर्वे श्रुतवन्तो निरामयाः ॥
सत्त्वाभिजनसम्पन्नाः सर्वव्यसनवर्जिताः ।

गजभर्तुर्हिते युक्ताः समयज्ञाः प्रियंवदाः ॥
उत्साहबलसम्पन्नाः कृतज्ञा लोभवर्जिताः ।
मौलास्त्वहार्या दक्षाश्च ज्ञातिपक्षहिते रताः ॥
नृपादेशस्य कर्त्तारस्तत्प्रियान्वेषिणः परम् ।
मङ्गल्यनामधेयाश्च प्रगल्भा वाग्विशारदाः ॥
गजाधिकारिणः कार्या गजधर्मविशारदाः ।
हस्त्यध्यक्षवशे युक्ता भिषजां च विशेषतः ॥
भोजनस्थानगमननिर्वाणगमनेषु च ।
द्रष्टव्याः सह वैद्येन शश्वत्तैरपि वारणाः ॥
यस्य यत्करणीयं तु तन्निवेद्यं महापतेः ।
गजाध्यक्षेण च पुनस्तत्कार्यं भिषजा सह ॥ इति ।

इति गजरक्षाधिकारिलक्षणम् ।

अथ गजवैद्यलक्षणम् ।

पालकाप्ये,

भिषग्विनीतो मेधावी ग्रन्थार्थप्रतिपत्तिमान् ।
नृपतुल्यः प्रियाभाषी महाभोगपरिग्रहः ॥
वाग्मी प्रगल्भः शान्तात्मा धृतिमान् धार्मिकः शुचिः ।
मौलोऽनुरक्तो मधुरः कुलीनश्च प्रशस्यते ॥

इति गजवैद्यलक्षणम् ।

अथ गजामात्यलक्षणम् ।

पालकाप्ये,

शब्दार्थन्यायकुशलः शुचिर्मौलो निरामयः ।
गणितव्यवहारज्ञो गजामात्यः प्रशस्यते ॥ इति ।

इति गजामात्यलक्षणम् ।

अथ गजाध्यक्षलक्षणम् ।

विष्णुधर्मोत्तरे,

हस्तिशिक्षाविधानज्ञो वनजातिविशारदः ।
क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रशस्यते ॥ इति ।

पालकाप्ये,

गजाध्यक्षोऽतिमतिमान् शरण्यः संयतेन्द्रियः ।
विनीतः सत्त्वसम्पन्नो वयस्थः प्रतिपत्तिमान् ॥
नृपतुल्यः प्रियाभाषी महाभोगपरिग्रहः ।
गजजीवी गजानां तु हितकार्ये रतस्तदा ॥
स्वामिभक्तः शुचिर्दक्षो धार्मिकश्च प्रशस्यते । इति ।

इति गजाध्यक्षलक्षणम् ।

अथ गजारोहलक्षणम् ।

विष्णुधर्मोत्तरे,

एतैरेव गुणैर्युक्तः स्वाधीनश्च विशेषतः ।
गजारोहो नरेन्द्रस्य सर्वकर्मसु शस्यते ॥ इति ।

पालकाप्येऽपि,

रहस्यधृक् प्रियः शूरो धृतिमान् सुदृढेन्द्रियः ।
सुशरीरस्त्वरोगश्च यन्ताङ्कुशविभागवित् ॥
निमित्तोत्पातकुशलश्चिकित्सितविशारदः ।
दम्यस्तु कुशलोत्साही गजभर्तुर्हिते रतः ॥
ब्राह्मणः शीलसम्पन्नो यज्ञकर्मप्रतिष्ठितः ।
शक्तश्च युद्धे नागानामारोढा तु प्रशस्यते ॥ इति ।

इति गजारोहलक्षणम् ।

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरी-

नीराजितचरणकमल–
श्रीमन्महाराजाधिराजप्रतापरुद्रतनज–
श्रीमन्मधुकरसाहसूनु–
चतुरुदधिवलयवसुन्धराहृदयपुण्डरीक–
विकासदिनकर–
श्रीमहाराजाधिराज–
श्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मज–
परशुराममिश्रसूनु—
सकलविद्यापारावारपारीणधुरीणजगद्दारिद्र्यमहागजपारी-
न्द्रविद्वज्जनजीवातु—
श्रीमन्मित्रमिश्रकृते
श्रीवीरमित्रोदयाभिधनिबन्धे लक्षणप्रकाशे गजलक्षण-
प्रकरणं समाप्तम् ।

अथाश्वलक्षणप्रकरणम्।

तत्र—

तस्य राष्ट्रं यशो लक्ष्मीर्धर्मकामार्थसम्पदः।
वाजिनो यत्र तिष्ठन्ति सर्वलक्षणसंयुताः॥
कुञ्जरं तुरगं कुर्यात्तस्य राज्ञः परीक्षितम्।
सर्वलक्षणसम्पूर्णमारुहेद्वाजिनं नृप॥

इत्यादिवचनैः सुलक्षणैरेवाश्वैर्धर्मकामार्थादि शुभं फलं प्राप्यते। अतो राजा सङ्ग्रामादिकार्ये परीक्ष्य अशुभलक्षणमश्वं विहाय सुलक्षणमश्वमेवारुहेदित्युक्तम्। तत्र किंलक्षणोऽभिमतः किंलक्षणो निषिद्ध इत्यश्वलक्षणमुच्यते। अत एव जयदेवेनोक्तम्—

अशुभैर्लक्षणैर्युक्ता हया न ग्रहणोचिताः।
अतो लक्षणमेवादौ तेषां वक्ष्यामि देहजम्॥ इति।

तत्रादावश्वप्रशंसा उच्यते—

विष्णुधर्मोत्तरे,

पुष्कर उवाच।

राज्ञां तुरङ्गमायत्तं विजयं भृगुनन्दन।
तस्मात्सर्वप्रयत्नेन तुरङ्गाणां समर्जने॥
राज्ञा यत्नवता भाव्यं पालने च विशेषतः।
तावन्तस्तुरगा धार्या यावतां पोषणं सुखम्॥
कर्त्तुं शक्यं न धार्यास्ते दुःखिताः क्षुधितास्तथा।
दुःखितास्ते श्रियं लोकान् विनिघ्नन्ति जयं तथा॥
धारणीयाः सुविहिता विधिना यवसादिना।
विधृतास्ते तथा कुर्युर्लोकद्वयजयं तथा॥
मङ्गलास्ते पवित्रास्ते रजस्तेषां तथैव च।

केवलस्यैव ते भक्ता देवस्य परमेष्ठिनः ॥
अतिमेध्यतया तेन चानुज्ञाता दिवौकसाम् ।
ततोऽश्वमेधतुरगस्तस्यैवैकस्य ह्रियते ॥
सर्वरत्नाधिको जातस्तुरगोऽमृतमन्थनात् ।
उच्चैःश्रवास्तेन हयाः सर्वरत्नोत्तमाः स्मृताः ॥
सपक्षा देववाह्यास्ते मानुषाणामपक्षकाः ।
छद्मना शालिहोत्रेण वाहनार्थं पुरा कृताः ॥
नीराजयन्ति ते देशान् हेषितैर्बलशोभिनः ।
गन्धर्वास्ते विनिर्दिष्टाः श्रियः पुत्रा जितश्रमाः ॥
प्रधानमङ्गं सैन्यस्य शोभा च परमा हयाः ।
सुदूरगमने युद्धे यानश्रेष्ठास्तुरङ्गमाः ॥
वल्गन्तमुच्चैस्तुरगं चामरापीडधारिणम् ।
आरुह्य या भवेत्तुष्टिर्न सा राम त्रिविष्टपे ॥
सन्नद्धपुरुषारूढैः सुसन्नद्धैस्तुरङ्गमैः ।
दृष्टैरेवारिसैन्यस्य पतन्ति हृदयान्यलम् ॥

तुरङ्गपादोद्धतधूलिदण्डं
यस्यातपत्रानुकृतिं करोति ।
नभः, समग्रा वसुधा तु तस्य
शैलावतंसा भवतीह वश्या ॥ इति ।

विशेषस्तूक्तो गणकृते—

अश्ववायुर्वेदे,

धर्मार्थकामसिद्धिर्यथा तुरङ्गैर्भवेत्तथा पूर्वम् ।
कथितैव महामतिभिस्तथापि वक्ष्ये समुद्देशम् ॥
अश्वैर्हस्तगतां पृथ्वी श्रीरश्वैर्विपुलं यशः ।
विजयश्च भवेदश्वैरश्वो हर्म्यविभूषणम् ॥

तस्य राष्ट्रं यशो लक्ष्मीर्धर्मकामार्थसम्पदः ।
वाजिनो यत्र तिष्ठन्ति सर्वलक्षणसंयुताः ॥
तस्य सागरपर्यन्ता हस्ते तिष्ठति मेदिनी ।
एकाहमपि यस्याश्वा निवसन्ति गृहाजिरे ॥
विष्णोर्वक्षस्थलं मुक्त्वा लक्ष्मीस्तस्य गृहे स्थिरा ।
निवसत्यश्वसङ्घातैः सम्पूर्णा यस्य वाहिनी ॥
ते हयाः शत्रुलक्ष्मीणां हठादाकर्षणक्षमाः ।
ये वाजिनः सुसञ्चारा सव्यासव्येषु शिक्षिताः ॥
ते विपक्षक्षयं कृत्वा प्राप्नुयुः श्रियमुत्तमाम् ।
कोऽन्यस्तुरङ्गमं हित्वा प्रविशेद्रिपुवाहिनीम् ॥
श्येनवत्पुनरभ्येति कृत्वा परपराभवम् ।
स्वामिनो वाजिनं मुक्त्वा को निर्वाहयितुं क्षमः ॥
पवित्रं परमं स्थानं माङ्गल्यमपि चोत्तमम् ।
दूराध्वानं गमयतां तथा सङ्ग्रामकर्मणि ॥
अश्वेभ्यः परमं नास्ति राज्ञां विजयसाधनम् ।
यस्यैकोऽपि सुपुष्टोऽश्वो बद्धस्तिष्ठति वेश्मनि ॥
तस्यापि विगतोत्साहा भीतास्तिष्ठन्ति शत्रवः ।
दूरदेशान्तरस्थोऽपि रिपुस्तिष्ठति शङ्कितः ॥
तुरगा यस्य शास्त्रोक्ता विचरन्ति महीतले ।
आशु कार्याणि भूपानां यथाश्वाः पृथिवीतले ॥
कुर्वन्तीह तथा शीघ्रं न गजा न पदातयः ।
पदातिगजमुख्यैश्च शतशोऽथ सहस्रशः ॥
वेष्टितोऽपि व्रजत्यश्वो यथेष्टं पक्षिराडिव ।
रणाहतोऽपि तुरगो देशकालाद्यपेक्षया ॥
पुनः प्रतिनिवृत्त्याशु हन्ति शत्रुं च मूर्द्धनि ।

क्षणादेकत्वमायाति क्षणाद्याति सहस्रताम् ॥
क्षणान्मुख्यं रिपुं वीक्ष्य नयति स्वस्य सादिनम् ।
क्षणमन्तः क्षणं दूरं क्षणं याति रिपुं प्रति ॥
इन्द्रजालिकवत्तिष्ठेत्कोऽन्यं मुक्त्वा तुरङ्गमम् ।
खण्डीकृत्य रिपुव्यूहं विचरन्ति तुरङ्गमाः ॥
खड्गप्राशधनुर्हस्ताः सङ्ग्रामे दुर्जया नराः ।
जितशीतातपा ये च जितत्रासा जितासनाः ॥
युध्यमाना हयारोहा देवानामपि दुर्जयाः ।
तस्मादरिघटा कार्या हयसन्दोहसंवृता ॥
चन्द्रहीना यथा रात्रिः पतिहीना पतिव्रता ।
हयहीना तथा सेना विस्तीर्णापि न शोभते ॥
युध्यन्ते येऽपि मातङ्गा भिन्नाः शैलेन्द्रसन्निभाः ।
दुर्धरा दुर्निवारास्ते यानरत्नैस्तुरङ्गमैः ॥
तस्मादश्वान् प्रशंसन्ति सेनाङ्गेषु महर्षयः ।
अश्वैर्विहीनाः पात्यन्ते छिन्नमूला इव द्रुमाः ॥

तस्यानुरक्ता श्रुतदृष्टविग्रहा
महारिलक्ष्मी रणवाससङ्गिनि ।
हृष्टानना साप्यभिसारिका भवेत्
तुरङ्गमा यस्य बले महीपतेः ॥

सर्वाम्भोनिधिमेखलां सुरसरिद्रोमावलीभूषिता-
मुत्तुङ्गाद्रिपयोधरां पुरवरप्राकारगण्डोज्ज्वलाम् ।
निःशेषप्रतिपक्षदोषरहितां विद्वज्जनौघाननां
पृथ्वीं सोऽमरकामिनीमिव चिरं भुङ्क्तेऽश्वसेनापति ॥
एते चान्ये च राजन् प्रकटगुणगणाः सन्ति मर्त्ये हयानां
स्वर्गेऽप्येवंगुणा ये सुरपतिसहिताः सूर्यचन्द्रादयश्च ।

देवा जानन्ति येषां प्रवरगुणवतां रोगनाशस्य हेतुं
सिद्धैः स्वप्नैश्च योगैर्मुनिवरगदितैरप्यमीषां चिकित्साम्॥इति।

इत्यश्वप्रशंसा।

अथाश्वानां नरवाहनत्वसम्भवः।

नकुलकृते अश्वशास्त्रे,

सपक्षा वाजिनः पूर्वं सञ्जाता व्योमचारिणः।
गन्धर्वेभ्यो यथाकामं गच्छन्ति च समन्ततः॥
तान् दृष्ट्वा जवसम्पन्नान् बलौघान् वाहनोचितान्।
शक्रः प्रोवाच पार्श्वस्थं शालिहोत्रं मुनीश्वरम्॥
नासाध्यं च मुने किञ्चित्तवास्ति भुवनत्रये।
तस्मात्कुरु रथावाहे योग्यानेतान् हयोत्तमान्॥
यथा मे युध्यतः सैन्ये प्रवहन्ति रथं सदा।
अशक्या दानवेन्द्रस्य नित्यं च बलगर्विताः॥
इषीकास्त्रं समुत्सृज्य पक्षच्छेदं व्यधत्त सः।
वाजिनां शक्रवाक्येन शालिहोत्रो मुनीश्वरः॥
छिन्नपक्षाश्च ते सर्वे गत्वा तमृषिमब्रुवन्।
दीना दुःखसमोपेता रुधिरेण परिप्लुताः॥
भगवन् किन्निमित्तेन पक्षच्छेदः कृतस्त्वया।
अपराधविहीनानां न च हिंसन्ति पण्डिताः॥
तस्माद्गतिर्भव प्राज्ञ सर्वेषामिह वाजिनाम्।
यथा स्यात्सर्वदा सौख्यं तुष्टिश्च मुनिसत्तम॥
अतोऽसौ कृपयाविष्टस्तानुवाच सुदुःखितान्।
इन्द्रादेशात्कृतं सर्वं भवतां पक्षभेदनम्॥
तस्माद्वः प्रकरिष्यामि भविष्यति यथा सुखम्।

पुष्टिरग्र्या यथा देहे गौरवं च जगत्त्रये ॥
यूयं शक्रादिदेवानां वाहनत्वं करिष्यथ ।
तथा भूमिपतीनां च गौरवेण समन्वितम् ॥
यो राजा भवतां पुष्टिं खानपानादिभिः सदा ।
करिष्यति न सन्देहो भविष्यति सुदुर्ज्जयः ॥
न च त्यजति तं लक्ष्मीः कदाचिज्जयलक्षणा ।
अपि सर्वगुणैर्हीनं बहुशत्रुभिरावृतम् ॥
तथा चैवं विधास्यामि परमं च चिकित्सितम् ।
तुष्ट्यर्थं रोगनाशार्थं नराणां विहितं यथा ॥
तस्माद्गच्छत भूलोके पाताले च तथापरे ।
स्वर्गे चान्ये मदादेशाद्येन शान्तिः परा भवेत् ॥
एवं विसृज्य तान् सर्वान् शालिहोत्रस्तुरङ्गमान् ।
चक्रे द्वादशसाहस्रीं तदाख्यां संहितां तदा ॥
ततः प्रभृति लोकेऽस्मिन् वाह्या जातास्तुरङ्गमाः ।
ततश्चिकित्सितं तेषां शालिहोत्रप्रकाशितम् ॥ इति ।
इत्यश्वानां नरवाहनत्वसम्भवः ।

अथाश्वजातिविभागः ।

शालिहोत्रे,

हयस्वरूपतत्त्वज्ञं तत्परं नियतेन्द्रियम् ।
शालिहोत्रं महाप्राज्ञं मित्रजित्परिपृच्छति ॥
चातुर्वर्ण्यं महातेजा जानीयाद्वाजिनां कथम् ।
कैश्चेष्टाव्यञ्जनाकारैस्तथा त्वं वक्तुमर्हसि ॥
व्यञ्जनं चिन्हविशेषः ।
एवं पृष्टो महाचार्यः शालिहोत्रोऽभ्यभाषत ।
दुर्विज्ञेयं तु वाहानां चातुर्वर्ण्यं निबोध मे ॥

अभिज्ञातेन रूपेण शीलेनाभिजनेन च ।
स्वरसंस्थानवर्णैश्च गन्धैश्चाप्युपलक्षयेत् ॥
चातुर्वर्ण्यविभागेन ये चाश्वा अनुलोमजाः ।
अनुलोमजपदं प्रतिलोमजानामप्युपलक्षणार्थम् ।
तान् विशेषेण गदतः शृणु चैवोपधारय ॥
रूपोपपन्नाः श्रीमन्तो विनीताचारशालिनः ।
भृशं यत्नोपचार्याश्च स्मृतिमन्तः सुमेधसः ॥
गुरूणां चैव राज्ञश्च यत्रानिर्देशकारिणः ।
प्रदक्षिणाः समर्थाश्च शुचयः शुचिसेवनाः ॥
क्षुधासहा भारसहाः सुकोपाः सुप्रसादिनः ।
गन्धमाल्यप्रिया नित्यं भूषवेषा यथा तथा ॥
पूजिताः सम्प्रहृष्यन्ति भवन्ते चाग्रगाः सदा ।
नित्यं प्रमुदिताश्चैव भवन्ते चारुदर्शनाः ॥
मनस्विनस्तेजोवन्तः सर्वकर्मानुयायिनः ।
पानास्वादनभोज्यानि उच्छिष्टानि त्यजन्ति च ॥
तथा चैवाशुचिं सर्वं पुरीषं मूत्रमेव च ।
मधुलाजाघृतापूपपायसाद्यभिलाषिणः ॥
गन्धमाल्यसुमनसः स्नानमङ्गलकानि च ।
प्रहेषमाणा जिघ्रन्ति सुस्वप्नाः प्रियदर्शनाः ॥
क्षुत्पिपासासहाः शूराः सुनिनादा महास्वनाः ।
पीतश्वेतारुणा गौराः प्रायशो मधुपिङ्गलाः ॥
उदग्रगामिनो हृष्टाः स्निग्धानुध्वनिनः स्थिराः ।
स्निग्धवर्णास्तनुघ्राणा ब्राह्मणाः सर्वमन्त्रिणः ॥
क्षिप्रं सुप्ताश्च बुध्यन्ति लाजेक्षूशीरगन्धिनः ।
देवगन्धर्वसत्त्वास्ते तत्तुल्याचारशालिनः ॥

एवमाचारतस्ते वै विज्ञेया ब्राह्मणा हयाः ।
क्षत्रिया दुःखशीलास्तु कोपना ब्रह्मवर्चसः ॥
तीक्ष्णप्रकृतयः शूरा महागम्भीरनिःस्वनाः ।
वर्ष्मवन्तो महासत्त्वाः शुद्धसत्त्वा लघुक्रियाः ॥

वर्ष्म प्रमाणम् ।

सारसंहननोपेता विविक्ताङ्गास्तनुत्वचः ।

सारो बलम् । संहननं संहतिः ।

वर्षादिजलसंह्रादे ताडने प्लवने भरे ॥
कर्कशस्पर्शने चैव निर्भया द्रुमसङ्कटे ।
निरोधविषमोच्चेषु न विषीदन्ति ते हयाः ॥
कल्याणाभिजवापातैः कल्याणप्रियदर्शनाः ॥
रथनेमिनिनादेषु शङ्खतालस्वनेषु च ।
बृंहितेष्वथ नागानां घण्टास्वौदुम्बरासु च ॥

बृंहितं शब्दितम् । उदुम्बरं ताम्रम् ।

क्ष्वेलिताकृष्टनिनदैः प्रत्यश्वानां च हेषितैः ॥
शङ्खभेरीनिनादैश्च वेणुदुन्दुभिनिःस्वनैः ॥
छत्रध्वजपताकाद्यैर्महाव्यूहेषु गर्विताः ।

महाव्यूहो महान् सेनासमूहः ।

वालधिं प्रकिरन्तश्च हृष्यन्ते मुदितेक्षणाः ।
सम्प्रयुक्ताः प्रधावन्ति मेदिनीं धारयन्ति च ॥
खुराग्रैर्दारयन्तश्च तेऽपि हेषन्ति मेदिनीम् ।
स्वेदमूत्रपुरीषाणि सृजन्त्यत्यर्थमेव च ॥
आक्रीडन्ति प्रहेषन्ति तर्जयन्तः परान् हयान् ।
मुदितास्तेऽवगाहन्ति चतुरङ्गबलं रणे ॥
सानुनादं स्वरं स्निग्धं हेषन्ते पूरयन्ति च ।

अन्येषां पृष्ठतोऽश्वानां नेच्छन्ति गमनं सदा ॥
शस्त्रं दृष्ट्वा प्रहृष्यन्ति प्रहारैर्न व्यथन्ति च ।
आहवेषु पराक्रान्ताः शूरास्ते क्षिप्रकारिणः ॥
मणिमल्लिकपिङ्गाक्षा न विवर्णाऽविवर्णिनः ।
सर्वकर्मसहाश्लिष्टासुखा नात्मप्रमादिनः ॥
देवगन्धर्वसत्त्वास्ते कल्याणाभिजवस्वनाः ।
एवमाचारवन्तश्च विज्ञेयाः क्षत्रिया हयाः ॥
वैश्या यानाक्रियामन्दगुरुमेधाल्पजातयः ।
न कुप्यन्ति न हृष्यन्ति स्थिरात्मानो जितेन्द्रियाः ॥
विनीताचारवन्तश्च जितक्रोधा न मानिनः ।
मृदवः सामशीलास्ते वेदनोष्णक्षुधासहाः ॥
भाराध्वगमनयानास्थिरा मध्यजवाश्च ते ।
मध्यसारबलाश्चैव हरिपिङ्गेक्षणास्तथा ॥
क्रौञ्चनेत्राः सिताः शोणाधरपल्लवरोमकाः ।
नातिवीर्ययुताः पश्चादव्यङ्गाश्च भवन्ति ते ॥
मत्स्यविस्रावगन्धाश्च तथोष्ट्रीक्षीरगन्धिनः ।
सुप्ताः प्रसादिताः क्षान्ता मानुषं सत्त्वमास्थिताः ॥
एवंविधसमाचारा वैश्या ज्ञेयास्तुरङ्गमाः ।
उच्छिष्टं ये हि मन्यन्ते परेषां पानभोजनम् ॥
युग्याशनमपि क्लिष्टं हृष्टाः सेवन्ति ते सदा ।
युग्या बलीवर्दास्तेषामशनं भोज्यं कडङ्गरादि ।
शोणाक्षा रक्तनेत्राश्च पादैर्भूमिं लिखन्ति च ।
पुरीषमूत्रे जिघ्रन्ति भक्षयन्ति जुगुप्सितम् ॥
मत्सरिष्वप्रवर्तन्ते निघ्नन्ति परिपालकान् ।

आत्मानं खुरपुच्छैर्वा दन्तैस्ते धर्षयन्ति च ॥
प्रस्तब्धकुथकाः सन्ति भयाज्ञानविषादिनः ।
कुथः प्रावरणकम्बलः ।
शुचित्वं च जुगुप्सन्ति नाचारशुचयश्च ते ॥
चतुष्पथेषु द्वारेषु पुरीषं चोत्सृजन्ति ते ।
धूमाभ्रसमवर्णाश्च स्थूलवक्त्रासिताननाः ॥
रूक्षा भिन्नस्वराः शूरा न प्रशस्ता दुरासदः ॥
पिशाचा राक्षसाश्चैव सर्वे सुप्ताः प्रमादिनः ।
एवमाचारसंस्थाश्चेच्छूद्रानश्वान् विनिर्दिशेत् ॥
विज्ञानमनुलोमानां जात्याचारं च मे शृणु ।
ब्राह्मणो जनयेद्धर्मं क्षत्रिण्यां क्षत्रियो भवेत् ॥
क्षत्रियाद्वैश्यवाजिन्यां वैश्यो वाहः प्रजायते ।
वैश्येन चैव शूद्रायां वैश्य उत्पद्यते हयः ॥

अत्र अनुलोमा मातृसमानजातीयाः । "ब्राह्मणो जनयेत्" इत्यादिना ब्राह्मणात् क्षत्रियायामुत्पन्नः क्षत्रियः क्षत्रियाद्वैश्यायामुत्पन्नो वैश्य इत्युक्तत्वात् । वैश्याच्छूद्रायामुत्पन्नः शूद्र एवेति वक्तव्ये वैश्याच्छूद्रायामुत्पन्नो वैश्य एवेति यदुक्तम् तत्तु शूद्रापेक्षया उत्कृष्टत्वज्ञापनार्थमित्यविरोधः । अपि च ब्राह्मणात् क्षत्रियायामुत्पन्नः क्षत्रिय इत्यत्र क्षत्रियपदं क्षत्रियजात्यश्वचेष्टादिसादृश्यार्थं रणादिकार्यान्तरयोग्यतार्थं चेति ।

एते द्विजसमाचारा यथावर्णा हयाः स्मृताः ।
परिभ्रष्टास्ततश्चैभ्यः शूद्रैस्तुल्या भवन्ति ते ॥
वैश्यायां ब्राह्मणाज्जातस्तं वैश्यमिति निर्दिशेत् ।
क्षत्रियेण तु शूद्रायां क्षत्रमुत्पन्नमादिशेत् ॥
अथ वा त्रिभिरप्यन्यैर्निषादः स्याद्विजन्मभिः ।

शूद्रायामित्यनुषङ्गः।
अनुलोमास्तु व्याख्याताः प्रतिलोमानिमान् शृणु।
ब्राह्मण्यां जनयेद्गर्भं क्षत्रियः सूतमाह तम्॥
कर्काः कुरण्टगौराश्च दन्तगौरारुणप्रभाः।
कर्काः अश्वाः।
प्रायशः सुप्रसन्नाक्षाः सानुनादा महास्वनाः।
पानमाल्यसुगन्धास्ते न च निर्हारगन्धिनः॥
सुप्तप्रमादिनः शान्ता ज्ञेया हि बधिरा हयाः।
ब्राह्मण्यां तु यदा वैश्यो जनयेन्मागधस्तु सः॥
भारक्षमाः सत्त्वहीना मृजाहीना न हेषणाः।
अनवस्थितशीलाश्च न जुगुप्सन्ति कस्य चित्॥
सुप्रज्ञाहीनसदृशाश्चण्डवेगा ह्यनिर्वृताः।
निर्वर्णवर्णाः प्रायेण पैशाचं सत्त्वमास्थिताः॥
पापाभिजानिनः क्रूरा वसाकुणपगन्धिनः।
अनाचारप्रवणाश्च मागधा दीनदर्शिनः॥
ब्राह्मण्यां तु यदाश्वायां शूद्र उत्पादयेत्सुतम्।
स चाण्डाल इति ज्ञेयः पापाभिजनगोचरः॥
नाभिजानन्ति कर्माणि प्रमत्ताः खरनिःस्वनाः।
रूक्षभिन्ननखाः क्रूरा अप्रशस्ता दुरासदः॥
उपदग्धाः प्रशस्तैस्तु व्यञ्जनावर्तलक्षणैः।
पुष्पैः पुण्ड्रैश्च विविधैर्निन्दितैः परिमण्डिताः॥
पुष्पैः शरीरोपरितनबिन्दुभिः। पुण्ड्रैस्तिलकैः।
पुरीषं मूत्रमुत्कृष्टं खादन्ति न जुगुप्सिताः॥
भिन्नागारेष्वशुचिषु शून्यागारेषु मोदनाः।
शृगालवृकवर्णाश्च धूमवर्णा विवर्णिनः॥

क्रूरस्वरा यूपगन्धाः प्रियमांससुरौदनाः ।
पिशाचरक्षोभिजनाश्चाण्डालाश्च दुरासदः ॥
एभिर्व्यञ्जनलिङ्गैस्तु चातुर्वर्ण्यं विनिर्णयेत् ॥ इति ।

किल्हणकृतसारसमुच्चये,

शीलान्वितो भारसहः सुगन्धः
शुद्धैकवर्णः सुमनोहरश्च ।
गम्भीरहेषः शुचिसत्त्वयुक्तो
ग्रासातुरो ब्राह्मणजातिरश्वः ॥
शूरः सुतीक्ष्णस्त्वभिमानयुक्तः
क्रोधान्वितो वातभवः सुहेषी ।
सुदीर्घकायः सुलघुक्रमः स्यात्
स क्षत्रियोऽश्वो द्युतिसत्त्वयुक्तः ॥
मेधाप्रियो मानविवर्जितश्च
क्षुद्वेदनाभारसहः सुसत्त्वः ।
वेगान्वितः शौर्यकुलाभिमानी
पिङ्गेक्षणो वैश्यहयः प्रदिष्टः ।
छिद्रप्रहारो ह्यशुचिप्रियश्च
स्यात्क्रूरदृष्टिर्लघुकायवांश्च ।
क्रोधाभिमानातिशयेन युक्तः
शूद्रस्तुरङ्गोऽतिजडः प्रसिद्धः ॥ इति ।

नकुलकृते अश्वचिकित्सिते,

वाजिनो जलजाः केचिद्वन्हिजातास्तथा परे ।
समीरप्रभवाश्चान्ये उलूकामृगजास्तथा ॥
जलोद्भवा द्विजा ज्ञेयाः क्षत्रिया वन्हिसम्भवाः ।
प्रभञ्जनभवा वैश्या एणोलूकाश्च शूद्रकाः ॥

पुष्पगन्धः सदा विप्रः क्षत्रियोऽगुरुगन्धकः।
घृतगन्धोद्भवो वैश्यो मीनादीनां च शूद्रकः॥
विवेकी सघृणो विप्रस्तेजस्वी क्षत्रियः स्मृतः।
दुष्टभावस्तथा वैश्यः शूद्रो निःसत्त्वकातरः॥
विप्रस्य वाहनाः सर्वे त्रयो भूमिपतेः सदा।
द्वौ वैश्यस्य च शूद्रस्य एक एव सुखावहः॥
केचिदिच्छन्ति भूपानां सर्वेऽश्वा वाहनोचिताः।
तदर्थे भूतले यस्माच्छालिहोत्रेण निर्मिताः॥
ब्राह्मणाः क्षेमकृत्येषु सिद्धिं गच्छन्ति वाजिनः।
क्षत्रिया युद्धकार्येषु वैश्या भृत्यार्जने सदा॥
शूद्राश्चान्येषु कार्येषु ज्ञात्वैवं वाजिनः सदा।
आरुहेत्सर्वकृत्येषु य इच्छेच्छाश्वतीं श्रियम्॥ इति।

इत्यश्वजातिविभागः।

अथाश्वोत्पत्तिदेशाः।

नकुलकृतेऽश्वचिकित्सिते,
चतुर्धा वाजिनो भूमौ जायन्ते देशसंश्रयात्।
ताजिकाः खुरसाणाश्च तुषाणाश्चोत्तमा हयाः॥
गोजिकाणाश्च केकाणाः पोटाहाराश्च मध्यमाः।
गाहुराः साहुराणाश्च सिन्धुवाराः कनीयसः॥
अन्यदेशोद्भवा ये च नीचनीचास्तथा परे॥ इति।

जयदेवकृतेऽश्वायुर्वेदे,
अश्वानां जन्मदेशांस्तु प्रवक्ष्याम्यनुपूर्वशः।
उत्तमानां च मध्यानामधमानां च तत्त्वतः॥
उत्तमास्त्वधिकाः प्रोक्तास्तथा पारसिकाश्च ये।

केकाणाश्चैव ये वाहाः पृष्ठजा ये च कीर्तिताः ॥
ऊरुजातास्तुरुष्काश्च सपृष्ठा माण्डलाश्च ये ।
पट्टजाः सैन्धवा मध्यास्तथा सारस्वता हयाः ॥
सम्भलाश्चाकुलाश्चैव जटादेशोद्भवाश्च ये ।
अधमा दक्षिणैः सार्धं ये च प्राग्दक्षिणा हयाः ॥
वृत्तदीर्घाञ्चितग्रीवह्रस्वकर्णा महाहयाः ।
महाकाया महोरस्का निस्त्रासास्तेऽधिका मताः ॥
अत्यन्तं विनतं येषां निर्मांसं च मुखं भवेत् ।
पीनेन कटिदेशेन मुखराश्च भवन्ति ये ॥
अध्वन्याश्च महास्वानाः सङ्ग्रामे चाभिपूजिताः ।
अपि शस्त्रहताङ्गाश्च नैव मुञ्चन्ति सादिनम् ॥
पारसीकाधिकाः प्रोक्ताः केकाणाः किञ्चिदूनकाः ।
स्थूलाः स्थूलशरीराश्च पृष्ठजा दीर्घपृष्ठकाः ॥
केकाणदेशजातानामधमानां च वाजिनाम् ।
नाविकैः सदृशं वक्त्रं बाहुल्येन विनिर्दिशेत् ॥
सुवृत्तदेहस्तीक्ष्णश्च स्वप्रमाणेन मध्यमः ।
ऊरुजातः समुद्दिष्टः किञ्चित्स्थूलो मनाग्जवः ॥
अतिस्थूलोऽतितीक्ष्णश्च ह्रस्वग्रीवतनुस्तथा ।
तुरुष्कः कीर्त्तितो वाजी स्थूलवक्त्रमुखश्च यः ॥
केकाणाकारदेहस्तु भवेन्माण्डलिको हयः ।
शान्त्या चैव प्रमाणेन केवलं नैव तत्समः ॥
सिन्धुदेशोद्भवो वाजी सपृष्ठाश्वानुकारकः ।
आननं चापि दीर्घं च तत्सपृष्ठं च कीर्तितम् ॥
सत्त्वेनैव जवेनापि रणशूरत्वघातनः ।
सादिभक्तोद्यतश्चापि ताजिकादधिकस्तथा ॥

परिमण्डलदेहास्तु तीक्ष्णकर्णमुखा हयाः ।
पट्टदेशोद्भवा हृष्टास्तथा सारस्वताश्च ये ॥
लम्बकर्णजटश्चैवमव्यालः परिकीर्त्तितः ।
सम्भले श्लिष्टजानुश्च पदा पश्चाद्भलोपमः ॥
वर्त्तुलश्चापि ह्रस्वश्च टङ्को नाम स कीर्तितः ।
दाक्षिणात्यो भवेद्घोटो यो धन्यः सर्ववाजिनाम् ॥
जवहीना महादुष्टाः पूर्वदेशसमुद्भवाः ।
वाजिवद्वेसराणां च देशं विद्याद्विचक्षणः ॥ इति ।

इत्यश्वोत्पत्तिदेशाः ।

अथाश्वकुलविभागः ।

शालिहोत्रे,

आसीनं च हयागारे वेदवेदाङ्गपारगम् ।
मित्रजित्प्रमुखाः पुत्राः शिष्याश्च गुरुसम्मताः ॥
पप्रच्छुर्हयवेदज्ञं हयशिक्षाविशारदम् ।
भगवन् सागरान्तेयं वसुधा शैलमालिनी ॥
पत्तनागारदेशैश्च वनैश्चाप्युपशोभिता ।
तस्यां विभागात्तुरगा भवन्ते कामचारिणः ॥
चरन्ति विविधाकारा उत्तमाधममध्यमाः ।
व्यामिश्रेषु चरन्त्यश्वा भृशं विस्मयते मनः ॥
तेषां च जनने यानि कुलान्युपकुलानि च ।
देशलिङ्गाभिजननैर्वर्णाचारबलौजसा ॥
पृथक् पृथक् कुलानां तु विज्ञानानि ब्रवीहि मे ।
ज्ञानं सङ्कीर्णदेशानां घोटकाजननानि च ॥
अन्त्यजाश्च गुणोपेता गुणैर्हीनाश्च देशजाः ।
भवन्ति कस्मात्तत्सर्वं भगवन् वक्तुमर्हसि ॥

ततः प्रोवाच भगवान् पुत्राणां मुनिसत्तमः ।
कुलाभिजनवर्णैश्च रूपाचारजवौजसा ॥
छविसंस्थानगन्धैश्च गत्याऽनूकस्वरैस्तथा ।
सर्वमेतद्यथोद्दिष्टं शालिहोत्रकुलोद्भवाः ॥
आदिसर्गेषु सृष्टाः स्म दिव्या गन्धर्वमातरः ।
कर्का शोणा च काला च धूम्रा सिता तु पाटला ॥
क्रव्या सारा च सहिणी ता देशेषु विभाजिताः ।
एत एव च तावन्तस्तासां सृष्टा हयोत्तमाः ॥
इन्द्रसोमयमार्कैश्च वायुना वरुणेन च ।
हयानां पत्तयः सृष्टा वह्निना धनदेन च ॥
भूमौ दिक्षु विभक्तास्ते दिव्या हयकुलाकराः ।
प्रसुकास्त्वेवमेवैते सृष्टास्तैरमरोत्तमैः ॥
पृथिव्यां प्रविभक्तास्ते दिक्षु जानपदेषु च ।
माहेन्द्रपृष्ठ्यः कङ्काश्च अपराश्च यथाक्रमम् ॥
तासां पुत्रैश्च पौत्रैश्च व्याप्ता सर्वा वसुन्धरा ।
समुद्रमाश्रिताः केचित्तथाऽन्ये सिन्धुमाश्रिताः ॥
श्रिता यवनकाम्बोजान् बानायुं चापरे पुनः ।
शतद्रुं च विपाशां च चन्द्रभागां सकाभिधाम् ॥
सरस्वतीं कौशिकीं च गङ्गां प्रेषवतीं तथा ।
महानदीनामेतासामन्तर्द्वीपाश्रिताः परे ॥
कच्छकं हिमवन्तं च मलयं गोरथिं गिरिम् ।
गन्धमादनकूणीरौ कैलासमभि चाश्रिताः ॥
सुराष्ट्रान् शूरसेनांश्च काश्मीरान् मद्रभूमिकान् ।
पञ्चालान् कुक्कुसान् वङ्गान् गान्धारवनवर्वरान् ॥
दशार्णान् मध्यदेशांश्च सौवीरान् विविधानपि ।

पूर्वावन्त्यकालिङ्गांश्च विदर्भक्रथकौशिकान् ॥
दिशो जनपदांश्चैव पृथिव्यामाश्रिता हयाः ।
तेषां विभक्तिः कुलतो नामतश्चापि वक्ष्यते ॥
देशवैशेष्यतस्तेषां विभक्तिं त्रिविधामपि ।
जानीयादिति शेषः ।
सरस्वत्युत्तरे कूले तत्राभिजनितास्तु ये ।
नानाजननसम्भूताः विद्यात्तान् जननोत्तमान् ॥
अथ ये दक्षिणे कूले पूर्वस्रोतोनदीवने ।
ते सारबलतेजोभिर्मध्याऽमध्याश्च वर्ष्मतः ॥
भूपृष्ठपट्टभूमीषु मन्द्राः सौराष्ट्रकेकयाः ।
कौशिकाः कोशवङ्गेषु मगधेष्वपि ये हयाः ॥
तेजःकायबलैर्हीना हीनसत्त्वा जवौजसा ।
एतानि जननान्याहुः समुद्रान्तानि वाजिनाम् ॥
चतुष्पञ्चाशदेतानि कुलान्युपकुलानि च ।
शृणु सङ्कीर्त्यमानानि देशतद्विधनामभिः ॥

तत्र चत्वारि कुलानि चत्वार्युपकुलानि चत्वार्यन्तस्थानि चत्वारि तदनुस्थानि पञ्च पञ्चस्थानि पञ्च विषमेयस्थानि चत्वार्यनूपजानि चत्वारि आपरान्तकानि चत्वारि शूद्रकाणि चत्वारि दाक्षिणात्यानि चत्वारि वैशिमानि चत्वारि वेसराणि द्वावन्यौ कुक्कुसौ एकमुत्तरं हैमवतमेकं मागधम्। नव घोटककुलानि।

चतुष्पञ्चाशदेतानि कुलान्युपकुलानि च ।
नामतस्तानि वक्ष्यामि घोटकाजननैर्विना ॥

तत्र काम्बोजकुलं वानायुजकुलम् आरट्टजकुलं सैन्धवकुलम्। काम्बोजानां वाल्हिकेया उपकुलं, वानायुजानां गान्धारा उपकुलम्, आरट्टजानां चाम्पेया उपकुलं, सैन्धवानां तैतिला उप-

कुलम्। मेवका अन्तस्था, उपमेवका अन्तस्थाः, कुलजा अन्तस्था, उपकुलजा अन्तस्थाः। त्रैगर्तास्तदनुस्थाः, आर्जुनेयास्तदनुस्थाः, सावित्रेयास्तदनुस्थाः, योधेयास्तदनुस्थाः, यावनाख्याः पञ्चस्थाः, तुषाराः पञ्चस्थाः, विषमेयाः पञ्चस्थाः, कान्दरेयाः पञ्चस्थाः वार्ष्मतेयाः पञ्चस्थाः। आवन्त्या विषमेयाः, अतसा विषमेयाः, काश्मीरा विषमेयाः, साकानका विषमेयाः, पार्वतीया विषमेयाः। उत्तरान्तमाद्रेया अनूपजाः, दक्षिणान्तमाद्रेया अनूपजाः, अन्तर्द्वीपका अनूपजाः, कैकया अनूपजाः। अम्बष्ठका अपरान्तकाः, वासन्तका अपरान्तकाः, सौवीरका अपरान्तकाः, दरदा अपरान्तकाः। सैन्धवाः शूद्रकाः, क्षुद्रकाः शूद्रकाः, मालवाः शूद्रकाः, ऐरावताः शूद्रकाः। आवन्त्यका दाक्षिणात्याः, कालिङ्गका दाक्षिणात्याः, मोकुला दाक्षिणात्याः, वानवासिका दाक्षिणात्याः। तैलङ्गा वैशिमाः, क्रथना वैशिमाः, अपवृत्तका वैशिमाः, सौराष्ट्रा वैशिमाः। साल्वेया वेसराः, कुरुक्षेत्रजा वेसराः, पञ्चालजा वेसराः, वोत्थजा वेसराः। अभिसारजा कुक्कुसाः, स्वाकजा कुक्कुसाः। हिमवत्युत्तरेया मागधाः। मन्तावका घोटकाः, अश्मकेया घोटकाः, मौलिका घोटकाः, चकोरका घोटकाः, श्वेमशैलजा घोटकाः, वैदर्भिका घोटकाः, पूर्वहैमेया घोटकाः, दक्षिणहैमेया घोटकाः, सामेयका घोटकाः।

इति देशविदेशांश्च उक्तान्यायतनानि च।
व्याहारो नामतश्चैषामुक्तो देशकुलान्वये॥
अतः परं व्यञ्जनेभ्यः प्रत्येकैकस्य वक्ष्यते।
विस्तरेण तुरङ्गाणां यथावदनुपूर्वशः॥
यथोद्दिष्टान् कुलगणान् शृणुष्व च पृथक् पृथक्।
काम्बोजानां तु विज्ञानमङ्गलिङ्गैः प्रवर्तते॥

काम्बोजास्तुरगाः श्रेष्ठाः सकलेषु कुलेषु च ।
महासृक्का महाग्रीवा महोत्साहाश्च ते हयाः ॥
महाहनुललाटाश्च शङ्कुकर्णा महामुखाः ।
महासमुद्रनादाश्च उच्चपादान्तपार्ष्णयः ॥
समकायोदरा वृत्ता महाजघनशालिनः ।
मण्डूकाक्षाः स्पष्टमुखा दीर्घग्रीवाः समुत्थिताः ॥
भृङ्गारतनुकेशाश्च महास्कन्धा महोरसः ।
दीर्घैः सुजातैश्च भुजैः सम्पूर्णसमवक्षसः ॥
पीनवृत्तोरुजङ्घाश्च हयास्ते स्थिरकुष्किकाः ।
कुष्किकाद्यङ्गविशेषाः, अनन्तरं वक्ष्यमाणाश्चाङ्गप्रदेशनिर्देशे द्रष्टव्याः ।
तनुस्निग्धसुरोमाणो मृदुरोमतनुत्वचः ।
ह्रस्वमेढ्फलाश्चैव न दीना नित्यनिर्वृताः ॥
रूपतेजोजवैः श्रेष्ठा वर्ष्मवन्तः सुसंहताः ।
विनीताचारवन्तश्च श्रीमन्तः प्रियदर्शनाः ॥
श्वेताः शोणाश्च कृष्णाश्च न विवर्णा भवन्ति ते ।
दृष्ट्वा ते नाभिहेषन्ते वडवामश्वमेव च ॥
स्वरूपजवनाः श्रेष्ठाः स्वरतेजोबलान्विताः ।
शीलवन्तः सदाचाराः सत्त्ववन्तो न कर्कशाः ॥
स्वामिनो हितकर्त्तारो मनोज्ञाः प्रियदर्शनाः ।
शुभानूकाः समरसाः काम्बोजाः सम्प्रकीर्तिताः ॥
तेषामुपकुले जाता वाल्हिकेयास्तुरङ्गमाः ।
अल्पान्तरा दर्शनतो दुर्ज्ञेयास्ते विजानता ।
काम्बोजा वाल्हिकेयाश्च तुल्यसंस्थानसंस्थिताः ॥
समानकर्णरूपाश्च तुल्यतेजोजवाश्च ये ।

समानि तेषां लिङ्गानि विशेषो यस्तु तं शृणु ॥
दीर्घाङ्गा मृदवस्ते च दीर्घपृष्ठखुराश्च ते ।
आयामपरिणाहाभ्यां किञ्चिदश्वतराश्च ते ॥
सुपृष्ठह्रस्वजघना बिन्दुमन्तोऽसुकुष्टिकाः ।
पृष्ठोन्नतोद्यतग्रीवाः पूर्वकायसमुन्नताः ॥
द्विजैः क्रुद्धास्त्वभिघ्नन्ति न दीना भर्तृवत्सलाः ।
महासनाः स्थिराः शूरा भूयिष्ठं पिङ्गलाश्च ते ॥
न च त्यजन्ति पतितं सङ्कटेष्वथ सादिनम् ।
एतावदेव विज्ञानं वाल्हिजानां प्रकीर्तितम् ॥
वानायुजा नातिह्रस्वा न महान्तः सुसंस्थिताः ।
मध्यप्रमाणाः कोलाक्षाः पूर्वकायसमुन्नताः ॥
शङ्ककर्णा ह्रस्वमुखा वृत्ताङ्गास्तुङ्गनासिकाः ।
वृत्तायताः कायसमा ह्रस्वपृष्ठत्रिकाश्च ते ॥
ह्रस्वमेढ्राण्डकोशास्ते सुनेत्राश्चाहगामिनः ।
चारुगात्राः समाश्चैव न दीना दृढकुष्किकाः ॥
खुरैर्गर्दभसंस्थानैर्गम्भीरपरिमण्डलैः ।
स्थिराः कर्मसु सर्वेषु भारेऽध्वनि च पारगाः ॥
दृढास्तरस्विनः शीघ्रा धुरकर्मदुरासदाः ।
ये वातिजानते कर्म ते भवन्त्युत्तमा हयाः ॥
कृष्णानुवर्णा भूयिष्ठं मध्यकाश्च भवन्ति ते ।
सत्त्वतेजोबलोपेता हया वानायुजाः स्मृताः ॥
तेषामुपकुले जाता गान्धारास्तान् शृणुष्व मे ।
कृष्णा कुक्कुटका धूम्रा कृष्णसारा विवार्णिनः ॥
शोणाश्च बहुवर्णाश्च कायवन्तः सुसंस्थिताः ।
दृढपश्चार्धकायाश्च दृप्तोदग्राः पुरस्ततः ॥

पश्चार्धविषमाश्चण्डा बलिनः स्थूलकेसराः।
तन्वायतमुखाश्चैव गान्धारकुलजा हयाः॥
आरट्टजानां विज्ञानं कीर्त्यमानं शृणुष्व मे।
ह्रस्वपृष्ठाः सुष्ठुमुखास्तनुवालाः शुभेक्षणाः॥
उदग्रायतपूर्वार्धा मृदुश्लक्ष्णतनूरुहाः।
तनुत्वचो ह्रस्ववर्णा मृदुग्रीवाः सुसंस्थिताः॥
सुसंहिताः शङ्कुकर्णा दृढमध्याः सुकुष्किकाः।
शोणा भूपृष्ठतः शीघ्रा उच्चरोमान्तपार्ष्णयः॥
हरिवर्णानुवर्णाश्च हरिसाराश्च प्रायशः।
उच्चपाणिविहाराश्च न च विक्षिप्तवारिणः॥
महाजवाः सुविक्रान्ताः पादान्तरविहारिणः।
आरट्टजकुला ह्येवं विज्ञेया बलिनो हयाः॥
तेषामुपकुले जाताश्चाम्पेयास्तान् शृणुष्व मे।
परिमण्डला ह्रस्वपृष्ठा सुगन्धाः सुप्रतिष्ठिताः॥
एणजङ्घास्तनूपादा गात्रवन्तः सुविक्रमाः।
बलवन्तः सुरोमाणस्तेजसा रजसान्विताः॥
स्थूलाक्षिकूटघातास्ते स्थिरपादाः सुकुक्षिकाः।
समांसपूर्णकायाश्च चाम्पेयास्तुरगाः स्मृताः॥
सैन्धवाः स्थिरपादाश्च विशीर्णजघनाः स्थिराः।
दीर्घग्रीवाः सुखास्यास्ते स्थूलाक्षास्तनुकेसराः॥
शङ्कुकर्णा महाकाया महोच्छ्वासास्तनुत्वचः।
तनुसृक्का महाप्रोथा हयास्ते वडवोदराः॥
लघुमेहनमुष्कास्ते पुच्छवक्रा महौजसः।
मुखे पृष्ठे च कल्याणा हयास्तेजस्विनस्तु ते॥
शीलवन्तो बलोपेताः सर्वकर्म्माभियायिनः।

सत्त्ववन्तश्च तुरगाः सैन्धवाः समुदाहृताः ॥
तेषामुपकुले चाश्वास्तैतिला मन्दमेधसः ।
स्थूलग्रीवांसहनवः स्थूलवालधिकेसराः ॥
स्थूलमेढ्रफलाः क्षान्ता बलवन्तो जवान्विताः ।
सारवन्तः सुगात्राश्च समुच्छ्रिताशिरोधराः ॥
संस्थानवन्तो लघवो दृढपादाः सुकुष्किकाः ।
पृथुवक्षोललाटास्ते विशालजघनेक्षणाः ॥
भाराध्वनि क्लेशसहाः क्षुत्पिपासासहाश्च ते ।
सत्त्ववन्तश्च तुरगास्तैतिलाः सम्प्रकीर्तिताः ॥
सुसंस्थानाश्चतुर्वृत्ता मेवकाः स्थूलवक्षसः ।
शङ्कुकर्णाः सुष्ठुमुखास्तनुसूक्ता मदेक्षणाः ॥
दीर्घायतविदुग्रीवा गूढजत्रुमहोरसः ।
महासनाः पृथुग्रीवास्तनुवृत्तोरुजङ्घकाः ॥
ह्रस्वकुक्षिककूर्चास्ते तनुमध्या मितोदराः ।
रोमशाः पूर्वसर्वाङ्गाः समशीला न कर्कशाः ॥
बहुवर्णधराश्चित्रा हयाः पाटलपुष्पकाः ।
मध्यमा ध्वानचपला मध्यसारबलास्तथा ॥
सत्त्वतेजोजवैर्मध्या मेवकास्तुरगाः स्मृताः ।
तत्रोपमेवका ह्रस्वाः स्थूलवालधिकेसराः ॥
मृद्वङ्गा दुर्बलशफास्तनुगात्राः सुकुष्किकाः ।
उच्चैर्बद्धशिरोग्रीवा दुर्मुखा बहलैः कटैः ॥
ह्रस्वोरस्का विरूपाक्षा हयाः स्युरुपमेवकाः ।
कुलजा दीर्घपृष्ठांसा ह्रस्वमेढ्रफलालसाः ॥
वृत्तग्रीवायतमुखास्तनुमध्याः सुकुष्किकाः ।
दीर्घवालधिकेशाः स्युः सूक्ष्मरोमशकेसराः ॥

तनूरस्कास्तु तुरगाः कुलजाः समुदाहृताः ।
अश्वोपकुलजा ह्रस्वास्तनुग्रीथोरुकुष्किकाः ॥
दीर्घवालधिकेशाः स्युः कुलजैः समलिङ्गकाः ।
मन्दप्राणाल्पतेजस्काः कर्कशा ह्रस्वविक्रमाः ॥
अल्पसत्त्वाल्पमेधाश्च तुरगास्तूपकूलजाः ।
तदनुस्थास्तु त्रैगर्त्ता बलवन्तो न कर्कशाः ॥
ह्रस्वग्रीवा महोरस्का रूक्षवालधिकेसराः ।
प्रायशः शरवर्णास्ते दृढपादशफास्तथा ॥
शशक्रोडाः शशमुखाः शशवालधिकेसराः ।
क्रोधना नातिशूराश्च त्रैगर्त्ता दुःखवाहिनः ॥
आर्जुनेया महोरस्काः स्थूलाक्षाः स्थूलकेसराः ।
सुमुखाः सुकुष्किकाश्च लम्बमेढ्रफलास्तथा ॥
उपस्कन्धविदुग्रीवाः कृष्णवर्णानुवर्णिनः ।
आजानेया जवाक्रूरास्त्वार्जुनेयास्तुरङ्गमाः ॥
आर्जुनेया एव आजानेया इत्युच्यन्ते ।
सावित्रेया ह्रस्वपृष्ठा विस्तीर्णजघना दृढाः ।
पुष्टास्या वक्रजननाः स्थूलवालधिकेसराः ॥
दीर्घपृष्ठोरुशफास्ते स्थिरमांससुगन्धिनः ।
मृदङ्गाश्च सुनेत्राश्च पृथुपादा महौजसः ॥
दीर्घकट्यंसपृष्ठास्ते स्थिरमांसा महोरसः ।
वर्ष्मवन्तश्च शूराश्च सावित्रेयास्तुरङ्गमाः ॥
योधेया ह्रस्वकर्णोष्ठाः सारतेजोबलान्विताः ।
वृत्तायतोन्नतग्रीवा वृत्तमध्योरुकुष्किकाः ॥
दीर्घवालधिकेशाश्च सुखुरा नातिपिङ्गलाः ।
श्रेष्ठायतमुखाश्चण्डाः सुविभक्ताः सुवक्षसः ॥

तनुत्वक्सूक्ष्मरोमाणो विभक्ताऽभग्नसन्धयः ।
योधेयाश्च भवन्त्यश्वा भारेऽध्वनि च पारगाः ॥
विज्ञानं यवनाश्वानां हन्त वक्ष्याम्यतः परम् ।
सुललाटाः सुनेत्राङ्गास्तनुपृष्ठायतैर्मुखैः ॥
तनुत्वक्सूक्ष्मरोमाणः शङ्ककर्णा लघुक्रमाः ।
सुपृष्ठजघनोरस्का वर्ष्मबन्तः सुमेधसः ॥
बहुवर्णाः सुवर्णाश्च मनोज्ञाः प्रियदर्शनाः ।
सारवन्तः सुगम्भीराः सत्त्वतेजोबलान्विताः ॥
सुश्लिष्टकखुराः शीघ्राः सुस्थिराः सर्वकर्मसु ।
यवनाश्वास्तु बोद्धव्या वृत्ताङ्गा दीर्घबाहवः ॥
चिन्हैरन्येऽपि वक्ष्यन्ते यावनाख्यास्तु वाजिनः ।
स्वभावतो ह्रस्वकायाः सत्त्ववन्तो बलान्विताः ॥
पूर्णाङ्गास्तु विभक्ताङ्गास्तन्वङ्गास्तु सुसंहताः ।
मनोज्ञशफाः शुभाङ्गाः सुवर्णाः प्रियदर्शनाः ॥
सुरोमकेशबालान्ताः सुभगाः शुभमेधसः ।
कर्कशाः क्रीडनपरा ज्ञेया यवनवाहनाः ॥
तुषाराः कायवन्तश्च तथा चैव जवान्विताः ।
पारगा बलवन्तश्च तेजःसत्त्ववहा वराः ॥
रूक्षरोमलवोदग्राश्चोक्षापराः सुमेधसः ।
भारेऽध्वनि क्लेशसहाः शुभानूका मनस्विनः ॥
सुविक्रान्ता दृढशफास्तुषारा वाजिनः स्मृताः ।
तुषाराश्चैव विज्ञेयाः केशैः सूक्ष्मतरैस्तथा ॥
जवोपेता विषमेया वृत्ताङ्गा ह्रस्वकुष्किकाः ।
प्रगृहीतशिरोग्रीवासुबन्धा गात्रवर्द्धिनः ॥
निरुदरावर्तमध्याः पृथूरस्का लघुक्रमाः ।

श्वेतसाराः सुरोमाणो विषमेया हयाः स्मृताः ॥
कान्देरयास्तु ये वाहास्तेषां शृणुत लक्षणम् ।
कायवन्तः सुसंबद्धा दृढपादाः सुकुष्किकाः ॥
स्थूलत्वक्सूक्ष्मरोमाणः स्थूलवालधिकेसराः ।
अकोपनाः सुशीलाश्च कान्देरयास्तुरङ्गमाः ॥
वार्ष्मतेयास्तनुग्रीवा ह्रस्वाङ्गा ह्रस्वकुष्किकाः ।
पश्चार्धकायेषु समाः पूर्वकायेषु च स्थिराः ॥
तनूदरा ह्रस्वपृष्ठाः स्पर्शवन्तः सुसंहताः ।
शीलवन्तश्च विज्ञेया वार्ष्मतेयास्तुरङ्गमाः ॥
विषमेयास्तथाऽऽवन्त्याः स्थूलाङ्गा दृढकुष्किकाः ।
गात्रबन्तो निरुदराः सुबन्धाः सुशिरोधराः ॥
शोणानुवर्णाश्च तथा वृत्तमध्याः पृथूरसः ।
आवन्त्याः सूक्ष्मरोमाणो महाजघनवक्षसः ॥
अतसा बलवन्तोऽश्वा वीर्यवन्तो मनस्विनः ।
महोरस्काशिरोग्रीवाः पृथुजङ्घोरुकुष्किकाः ॥
मृदुभृङ्गारकेशास्ते दृढपादा मनोहराः ।
विज्ञेया अतसा ह्येवं श्वेतवर्णानुवर्णिनः ॥
काश्मीरका वर्ष्मवन्तस्तेजोवन्तः शुभेन्द्रियाः ।
पृथ्वायतललाटास्ते शुद्धात्मलघुविक्रमाः ॥
तद्वच्च शङ्कुकर्णास्ते सुरोमाणस्तनुत्वचः ।
सुष्ठ्वायतमुखाः शूराः सुविभक्ताः सुसंहताः ॥
दृढाङ्गतलसम्पन्ना दृढपादा मनस्विनः ।
शोणवर्णानुवर्णाश्च हयाः काश्मीरकास्तु ते ॥
सकानकानामश्वनां लक्षणं तु निबोध मे ।
महानदी सकानामं प्रभूतयवसोदका ॥

शूराश्च रूपवन्तश्च तत्रोत्पन्नाः सकानकाः ।
पूर्वकायव्युदग्रास्ते पश्चार्धेषु समुद्यताः ॥
तन्वायतविदुग्रीवा दीर्घवालधिकेसराः ।
क्रुद्धा दन्तैः प्रार्थयन्ति धूम्रशुद्धेक्षणा हयम् ॥
वीक्षमाणाश्च हेषन्ते प्रत्यश्वं वडवामपि ।
शङ्कुकर्णाः सुष्ठुमुखास्तनुवृत्ताग्रतश्च ते ॥
दीर्घकेशाः सुदीर्घान्ता लम्बपार्श्वोदरास्फिचः ।
शफैस्तलैश्च सुदृढैः कूर्चरोमान्तपार्ष्णयः ॥
उष्ट्रगात्रोरुजघना हयाः साकानकाः स्मृताः ।
पार्वतीयास्तनुग्रीवा महाजघनवक्षसः ॥
प्रध्वस्तपृष्ठगात्रास्ते दीर्घवालधिकेसराः ।
महाजवा बलोपेताः पारगाः सर्वकर्मसु ॥
धृष्टाश्च दृढपादाश्च पार्वतीयास्तुरङ्गमाः ।
अनूपोत्तरमाद्रेया दीर्घवालधिकेसराः ॥
पृथुग्रीवा महाकर्णा हयास्ते दीर्घगामिनः ।
न च कर्मणि योग्यास्ते न च शीलान्विता हयाः ॥
दुरासदा दुःखशीलाः प्रेयांसो मधुपिङ्गलाः ।
हरिवर्णानुवर्णाश्च दृढपादखुराश्च ते ॥
एवं दक्षिणमाद्रेया विज्ञेया लघुचारिणः ।
हया दाक्षिणमाद्रेयास्तामसाश्चालसाः स्मृताः ॥
अन्तर्द्वीपेषु ये जाता वक्ष्यन्ते तान्निबोध मे ।
ऐरावतीविपाशयोः शतद्रुचन्द्रभागयोः ॥
अन्तर्द्वीपेषु ये जातास्ते तद्द्वीपकसंज्ञिताः ।
अन्तःस्था ये सरस्वत्या नादेयास्तु तुरङ्गमाः ॥
कल्याणव्यञ्जनोपेता दीर्घग्रीवा सुखोच्छ्रिताः ।

सुजघनाः सुपृष्ठास्ते अन्तर्द्वीपोद्भवा हयाः ॥
कैकेयका वर्ष्मवन्तो महाप्रोथमुखा हयाः ।
दीर्घग्रीवा महोच्छ्वासा दीर्घवालाधिकेसराः ॥
समर्था लङ्घनेऽध्वनि पारगा मुखरा भृशम् ।
सुबाहुदृढपादास्ते कैकेया यवनैः समाः ॥
अम्बष्ठकाश्च तुरगा महास्कन्धा महाबलाः ।
वृत्तग्रीवा मुखैर्भग्नैरुपान्तविकटैश्च ये ॥
महोरस्का महावक्षोलम्बश्रवणमेहनाः ।
महास्कन्धफलाश्चैव वृत्तकूर्चोरुकुक्षिकाः ॥
वाजिनोऽम्बष्ठका ज्ञेयास्तानेवमभिनिर्दिशेत् ।
वासन्तकाः सुविक्रान्ता दीर्घग्रीवमुखा हयाः ॥
मृगोदरा ह्रस्वपृष्ठा ह्रस्वश्रवणमेहनाः ।
स्पर्शवन्तश्च क्षान्ताश्च दृढपादाः सुकुक्षिकाः ॥
महोरस्कास्तु चपला महाजघनवक्षसः ।
एवं वासन्तका ज्ञेयास्तुरगाः शीलकर्कशाः ॥
सौवीरका ह्रस्वपृष्ठा दृढगात्राः क्षमान्विताः ।
उदग्रगामिनो दृप्ताः पादान्तरविहारिणः ॥
सुदम्यमानाः शीघ्रास्ते स्थिराचारे तथाऽध्वनि ।
समसम्पूर्णसर्वाङ्गा हयाः सौवीरकाः स्मृताः ॥
दरदा ह्रस्वजघना ह्रस्वकूर्चाल्पमेधसः ।
महोदरशिरःस्कन्धा महाकालपराक्रमाः ॥
सारवन्तो दृढपादा वर्णवन्तो जवान्विताः ।
ह्रस्वाक्षिपृष्ठलाङ्गूला दरदा वाजिनः स्मृताः ॥
सैन्धवाः स्थूलवालाश्च स्थूलरोमत्वचस्तथा ।
विकटा वर्ष्मवन्तश्च बलवन्तो जवान्विताः ॥

महोदरस्कन्धजघना महोच्छ्वासा महाबलाः ।
स्थूलकुक्षिकजङ्घाश्च सैन्धवास्तुरगाः स्मृताः ॥
क्षुद्रका वर्ष्मवन्तश्च बलवन्तो जवान्विताः ।
चतुरस्राः सुजघनाः स्वायताः सुप्रतिष्ठिताः ॥
दीर्घश्रवणमेढ्राश्च सुखुराः क्षुद्रकाः स्मृताः ।
मालवा वर्ष्मवन्तोऽश्वा विस्तीर्णजघनास्तथा ॥
पूर्वकायोद्यता दृप्ता लोहिताश्वा मनोरमाः ।
लम्बोष्ठा लम्बकर्णास्ते ह्रस्वग्रीवा मनोहराः ॥
तेजोवन्तोऽतिजवना मालवा वाजिनश्च ते ।
ऐरावता रूक्षकर्णा मन्दमेधा जवापराः ॥
स्थूलसर्वास्थिमांसास्ते तथा ऐरावताः स्मृताः ।
आवन्त्यका दाक्षिणात्या दीर्घकर्णमहाशिराः ॥
महाकायविदुग्रीवा महाजघनवक्षसः ।
भग्नास्यास्तनुपार्श्वाश्च विदुह्स्वाः सुशीलिनः ॥
दीर्घकेशा मृदुतला मध्यसारजवाः स्थिराः ।
सुखिनो बहुवर्णाश्च मृद्वङ्गाः प्रायशश्च ते ॥
एवमावन्त्यका ज्ञेयाः सत्त्वहीना न कर्कशाः ।
कालिङ्गकाः स्थूलपादा महाकर्णा दृढैः खुरैः ॥
आयता विगताः स्तब्धाः पश्चार्धा विषमास्तु ते
कुब्जा दण्डायतग्रीवा भग्नास्या लम्बमेहनाः ॥
अल्पतेजोजवबला हयाः कालिङ्गकाः स्मृताः ।
मौकुलाः स्थूलरोमाणो दुर्मेधःक्रोधनालसाः ॥
ह्रस्वपृष्ठाङ्गजघनाः स्थूलकुष्ठिकजानवः ।
भारे चाल्पबला मन्दा हीनतेजोजवाश्च ते ॥
बहासना निरुत्साहा मौकुलास्तुरगाः स्मृताः ।

दाक्षिणात्यं चतुर्थं तु वक्ष्यते वानवासिकम् ॥
ह्रस्वपृष्ठोरुजघनाः पूर्वकायेषु संहताः ।
पश्चार्धविकृता मन्दा दृढपादाः क्षमान्विताः ॥
मध्यप्राणाश्चाल्पजीवाः सत्त्वतेजोजवापराः ।
वानवासिकजातानामेतद्भवति लक्षणम् ॥
वैशिमास्त्वथ तैलङ्गाः क्रोधनास्तु कलस्वराः ।
क्रूरकर्माभिजनिता विकृताङ्गशिरोधराः ॥
महोरस्का महास्कन्धाः पश्चार्धेषु तु संहताः ।
दृढकुक्षिकपादाश्च हयास्तैलङ्गकाः स्मृताः ॥
क्रथना दीर्घकर्णाश्च दीर्घोरुजघना बलाः ।
उदग्राः पूर्वकायेषु पश्चार्धविकृताश्च ये ॥
हीनवर्णाल्पतेजस्काः स्तब्धगात्रा महोदराः ।
स्थूलकुक्षिकलाङ्गूलाः क्रथनास्ते हयाः स्मृताः ॥
अथोपावृत्तका मन्दाः स्थूललाङ्गूलकुक्षिकाः ।
लम्बकर्णविदुस्कन्धा लम्बसृक्काण्डमेहनाः ॥
महापृष्ठाश्च कुब्जाश्च लम्बसक्थिविषाणिनः ।
पिङ्गलाक्षाश्च भूयिष्ठमुपावृत्ता हयाः स्मृताः ॥
सौराष्ट्राः स्थूलपादाश्च दृढरोमान्तपार्ष्णयः ।
दीर्घविस्तीर्णसक्थ्यङ्गा दर्शनीयाः पुरस्ततः ॥
पश्चार्धविकृताश्चैव स्थूलजानूरुकुक्षिकाः ।
एवं सौराष्ट्रिका ज्ञेयाः सुपादा न च संहताः ॥
साल्वेया वेसरा ज्ञेयाः स्थिराङ्गा ह्रस्वकुक्षिकाः ।
तन्वायतविदुग्रीवा दीर्घकर्णा महोरसः ॥
पश्चार्धविकृता रूक्षास्तनुवालधिकेसराः ।
वेसराः साल्वजास्ते च विज्ञेयाश्च दुरासदः ॥

कुरुक्षेत्रजविज्ञानं वेसराणां निबोध मे ।
अवाग्राः पूर्वकायेषु पश्चादल्पाल्पतेजसः ॥
युक्ताः पृष्ठे तथा स्कन्धे न वहन्ति गुरुक्रमाः ।
कुरुक्षेत्रे ऽपि जातास्तु पश्चार्धेषु गुरुक्रमाः ॥
पाञ्चालानां तु विज्ञानं वेसराणां निबोध मे ।
पञ्चालजा दीर्घमुखाः स्थूलाङ्गाः स्थूलकुक्षिकाः ॥
विनतायतपृष्ठास्ते मृदुगात्राल्पतेजसः ।
सुप्रतिष्ठितपादास्ते विषमा दृढपाणयः ॥
आरोहणे दुरारोहाः पञ्चालेषु हयाः स्मृताः ।
वोत्थजाः स्थूलसर्वाङ्गा दीर्घपृष्ठतनूदराः ॥
सूक्काकर्णोदरैर्लम्बैर्महामुखशिरोधराः ।
कायोपचितमांसास्ते सुविभक्ता दृढा भृशम् ॥
मांसैर्भृताः कुरूपाश्च जाङ्गलं देशमाश्रिताः ।
मन्दतेजोजवाश्चैव वोत्थजा वेसराः स्मृताः ॥
अभिसारजानां विज्ञानं कुक्कुसानां तु वक्ष्यते ।
परिमण्डलह्रस्वकाया भुजैः स्थूलैरसंस्थिताः ॥
ऊर्ध्वकर्णाश्च सुमुखा जवना नित्यनिर्वृताः ।
दुरासदा दुराकारा हयाः स्युराभिसारजाः ॥
स्वाचकास्तनुरोमाणो मुखरा ह्रस्वमेहनाः ।
ह्रस्वपृष्ठतनुग्रीवा ह्रस्वमेढ्रफलाश्च ते ॥
स्थिरपादाल्पतेजस्का मन्दसत्त्वजवास्तथा ।
तुल्यरूपाकृतिनखाः स्वाचकादेशजा हयाः ॥
ह्रस्वगात्रान्तराः किञ्चित्पीतकाश्च सुवाहनाः ।
ह्रस्वायामपरीणाहाः स्वाचका ह्रस्वकौशलाः ॥
एतावत्स्वलु विज्ञानं द्वितीये ह्रस्वकुक्कुसे ।

हिमवत्युत्तरेयास्तु दीर्घाङ्गास्तनुकुक्षिकाः ॥
महाकायशिरःपादाः पूर्वकाये च संस्थिताः ।
पश्चार्द्धकाये विकृता जवना विषमाग्रतः ॥
दृढपादखुराश्चैव तुरगास्ते प्रकीर्त्तिताः ।
हिमवत्युत्तरेयास्तु विज्ञेयाः सर्वतः समाः ॥
यदुक्तं मागधं ह्येकं कुलं तदपि श्रूयताम् ।
मागधास्तनुरोमाणो दीर्घाङ्गा नतकुक्षिकाः ॥
निर्मांसाल्पास्थिरबला निरुत्साहाल्पतेजसः ।
अल्पाहारा न कर्मार्हाः कृच्छ्रं जीवन्ति ते भुवि ॥
लम्बोष्ठकर्णमेढ्राश्च तुरगा मागधाः स्मृताः ।
दक्षिणे हिमवत्पार्श्वे मागधात्पूर्वपश्चिमे ॥
जायन्ते तत्र ये वाहा विज्ञेयास्तेऽर्धमागधाः ।
हीनाः पूर्वापरार्द्धेषु प्रमाणेनावराश्च ते ॥
ह्रस्वैर्मुखैः पिङ्गलास्ते नाभिजानन्ति कर्मसु ।
भारवाहाबलाः क्लीबाः क्षुधिनोऽथ पिपासिनः ॥
एते ऽर्धमागधा ज्ञेया न योग्या हयकर्मसु ।
प्रमाणहीना न च सत्त्ववन्त-
स्तेजोऽवराः कर्मसु चाप्ययोग्याः ।
भवन्ति मन्दा न च मालिनस्ते
हयास्तु ये घोटकदेशजाताः ॥
कुलानि घोटकानां तु तव वक्ष्यामि तत्त्वतः ।
मन्तावका ह्यल्पकाया विभक्ताङ्गाः सुसंहताः ॥
सुनेत्रा ह्रस्वमुष्काश्च सुपादाः सुमुखाश्च ते ।
तुल्या मन्तावकैरेव अश्मार्केषु भवन्ति ये ॥
स्थूलाक्षिकूटघाटाश्च मौलिकाः स्थूलसन्धयः ।

मन्तावकगुणैर्युक्ताः किञ्चिद्ध्रस्वतराः खराः ॥
एवं चकोरको ज्ञेयः शुभश्रवणवालधिः ।
चकोरकगुणैस्तुल्याः शुभगात्रान्तराः स्थिराः ॥
कृष्णानुवर्णिनस्तीक्ष्णा विज्ञेयाः श्वेतशैलजाः ।
वैदर्भिकाः कायवन्तः सोत्साहा वाग्मिनः स्थिराः ॥
अमर्षिणो वेगवन्तः सत्त्वोपेतशरीरिणः ।
पूर्वदक्षिणभागे ये हिमवन्तं समाश्रिताः ॥
भग्नह्रस्वायतस्थूराः स्थूलजङ्घोरुकुक्षिकाः ।
ह्रस्वाल्पतेजसः सारबलहीना न संस्थिराः ॥
पूर्वदक्षिणहैमेयाः समाः सामेयकाः स्मृताः ।

पूर्वदक्षिणहैमेया इत्यत्र पूर्वहैमेया दक्षिणहैमेया इति व्याख्येयम् । एवं च सति नव घोटककुलानीति सङ्ख्याऽनुगता भवति । अन्यथा बाध्येत ।

तेभ्यो विशेषणं चात्र किञ्चिदीर्घतराः स्थिराः ॥
शुभकूर्चखुराक्षास्ते बहुवर्णाः सुकुक्षिकाः ।
एवं सामेयका ज्ञेया घोटका नवमं कुलम् ॥
चतुष्पञ्चाशदेतानि कुलान्युपकुलानि च ।
तथार्धमागधाश्चैव व्याख्याता घोटकास्तथा ॥ इति ।
एतेषामुक्तानामश्वकुलानामुत्तमादिभेदो ऽप्युक्तस्तत्रैव ।
श्रेष्ठमध्यजघन्यानि कुलानि शृणु सुश्रुत ।
काम्बोजादीनि श्रेष्ठानि कुलान्युपकुलानि च ॥
तथा परकुलानीह अन्तस्थानि च यानि तु ।
तुल्यान्येतानि राजेन्द्र मध्यमानि विनिर्दिशेत् ॥
अवशिष्टानि कनिष्ठानि ।

इत्यश्वकुलविभागः ।

अथाङ्गप्रदेशनिर्देशः।

जयदत्तकृते अश्वायुर्वेदे,

प्रदेशान् वाजिदेहस्थान् यो न वेत्ति विभागतः।
न स जानाति मूढात्मा लक्षणं च चिकित्सितम् ॥
अतः परं प्रदेशानां ज्ञानमादौ प्रकीर्त्तितम्।
एतद्यत्नेन बोद्धव्यं वाजिनां हितकाम्यया ॥
अतिप्रसिद्धा जिह्वा तु तस्याः सूना भवेदधः।
ऊर्ध्वं तालु भवेत्तस्यास्ततोऽग्रे दन्तपीठिका ॥
ततो दन्ताः समुद्दिष्टा ऊर्ध्वं दन्ता भवन्त्यधः।
चिबुकं चाधरे भागे तेषां प्रोक्तं विचक्षणैः ॥
चिबुकस्योपरिष्टात्तु अधरोष्ठः प्रकीर्तितः।
चिबुकात्पार्श्वभागे तु हनुभागो विधीयते ॥
सृक्किद्वयं विजानीयाद्वक्त्रपार्श्वगतं बुधः।
उत्तरोष्ठं प्रयाणाख्यं तदूर्ध्वं प्रोथमुच्यते ॥
नासाच्छिद्रे तथा पार्श्वे प्रोथस्यैव व्यवस्थिते।
नासाच्छिद्राक्षिमध्ये तु घोणाख्यं समुदाहृतम् ॥
घोणापार्श्वगतौ गण्डौ क्षीरिके च ततः परम्।
नेत्रयोरधरे भागे अश्रुपात उदाहृतः ॥
कर्णान्तं चैव नेत्रान्तमपाङ्गं ब्रुवते बुधाः।
कनीनिकाख्यो विज्ञेयो यश्च नासासमीपगः ॥
सितासितं च यन्मध्ये नेत्रयोर्मण्डलं हि तत्।
प्रच्छादनं भवेद्वर्त्म चाक्षिकूटमतः परम् ॥
तस्माद्ऊर्ध्वं भ्रुवोर्लेखा ललाटं च तदुत्तरम्।
ऊर्ध्वं ललाटदेशात्तु केशान्तं च ततः स्रुवम् ॥
ततः शिरो विजानीयात्स्रुवाद्ऊर्ध्वगतं बुधः।

शिरःपार्श्वगतौ कर्णौ तयोर्मूलं शकुन्तलम् ॥
अपाङ्गव्यङ्गुलं चैव शङ्खं विद्याद्विचक्षणः ।
शङ्खकर्णान्तरे चैव कटाक्षः समुदाहृतः ॥
विद् मर्मविदश्चैव कर्णस्याधःषडङ्गुले ।
शालिहोत्रे तु—
कर्णयोः पृष्ठतः पार्श्वे विद् । समुपलक्षयेदिति शेषः ।
घण्टाबन्धसमीपस्थो निगालः परिकीर्तितः ॥
अधस्तले निगालस्य गलमाहुर्मनीषिणः ।
ततः कण्ठं विजानीयादधोभागेन तं बुधः ॥
ग्रीवा लोकप्रसिद्धा तु तस्याश्चोपरि केसरः ।
ग्रीवास्कन्धान्तरे चैव वहं प्राहुर्मनीषिणः ॥
वहस्योपरि जत्रु स्यात्काकसं ककुदं च तत् ।
ततः पृष्ठं विजानीयादासनं पृष्ठमध्यगम् ॥
अंसकौ ककुदश्चैव निबद्धौ परिकीर्तितौ ।
स्यातामंसादधो बाहू तयोर्बाह्ये षडङ्गुले ॥
बाह्वोरभ्यन्तरे विद्यात्किणं चापि प्रकीर्तितम् ।
अधरे च ततो जानु निर्दिष्टं शास्त्रकोविदैः ॥
मन्दिरः पश्चिमो भागः कलापी जानुनोऽग्रिमः ।
जानुनश्चाधरे भागे जङ्घां विद्याद्विचक्षणः ॥
जङ्घापार्श्वे कलां विद्यात्सन्धिं वैषिकसंज्ञिकाम् ।
अग्रतः पतिहस्तः स्यात्पश्चात् कूर्च उदाहृतः ॥
किणं तत्रैव मध्ये स्यादधोभागे च कुष्किका ।
खुरसन्धिं ततो विद्यादधोभागे ततः खुरम् ॥
खुरस्य पार्श्वे पार्ष्णिः स्यादग्रभागे नखो भवेत् ।
खुरस्याधस्तलं चैव मण्डूकी तलमध्यतः ॥

खुरमांसं विजानीयात् क्षीरिकाख्यं विचक्षणः ।
हृदयाभ्यन्तरे कुक्षी पार्श्वतश्च विभागतः ॥
जठरं पार्श्वमध्यस्थं तस्य नाभिश्च मध्यतः ।
रोमराजिं ततो विद्यान्मूत्रकोशमतः परम् ॥
आकट्यां पश्चिमे भागे पुटौ स्फिचौ च कीर्तितौ ।
रन्ध्रे चाप्युपरन्ध्रे च कुक्षेरभ्यन्तरे स्मृते ॥
पुच्छमूलं च वाहानां मांसले पुच्छमूलतः ।
तस्याधः कीर्तितः पायुः सीवनी च ततः परम् ॥
मुष्कौ च कटिसन्धिं च ततो विद्यात्परं बुधः ।
अधस्तात्कटिसन्धेस्तु ऊरुसन्धिरुदाहृतः ॥
सक्थिनी तलसन्धिस्तु ऊरू पादाभिधायकः ।
ततः स्थूरं विजानीयात्तस्याधो मन्दिरं भवेत् ॥
किणं चैव ततो विद्यान्मन्दिरेण सुसंस्थितम् ।
ततः परं विजानीयात्कलां कूर्चं च कुष्टिकाम् ॥
खुरान्तसंज्ञां मण्डूकीं ततो विद्याद्विचक्षणः ।
अग्रजङ्घाद्वयं चैव वक्षोग्रीवाशिरोमुखम् ॥
पूर्वकायः समुद्दिष्टः पृष्ठदेशस्तु मध्यमः ।
आकटेः पश्चिमे भागे खुरान्तश्चापरः स्मृतः ॥
इति प्रदेशा व्याख्याताः पूर्वशास्त्रानुसारतः । इति ।

इत्यङ्गप्रदेशनिर्देशः ।

अथायुःपरिमाणम् ।

शालिहोत्रे,

यथा नरे वर्षशतं विंशतिर्वर्षशतं गजे ।
चतुर्विंशद्वयं चैव खरोष्ट्रौ पञ्चविंशतिः ॥

शुनि षोडशवर्षाणि द्वादशाथाज एडके ।
विंशतिवर्षाण्यायुर्यथा चाश्वतरे स्मृतम् ॥
मृगाणां षोडशसमा रोहितानां तथैव च ।
रोहितो मृगजातिभेदः ।
द्वाविंशन्महिषस्यापि शृगालः पञ्चविंशतिः ॥
कृमयः सप्त चाहानि माक्षिका च चतुर्दश ।
तथा हयेषु द्वात्रिंशत्परमायुर्विधीये ॥ इति ।

इत्यायुःपरिमाणम् ।

अथायुःपरीक्षा ।

जयदत्तकृते अश्वायुर्वेदे,
आयुर्लक्षणमश्वानामत ऊर्ध्वं प्रचक्ष्यते ।
शालिहोत्रादिनिर्दिष्टं यथा पूर्वं तपोधनैः ॥
उक्तमिति शेषः ।
सुसंहताश्च ये वाहा ह्रस्वकर्णास्तथैव च ।
स्वरनेत्रास्यभावेषु न दीनाश्चिरजीविनः ॥
महाघोणा महाकाया ये चाश्वाः पृथुवक्षसः ।
तेषां दीर्घं भवेच्चायुः स्निग्धाङ्गाश्चैव ये सदा ॥
कर्णाग्रे पीडिते येषां सिन्दूराभस्य दर्शनम् ।
शोणितस्य भवेच्चैव ते मताश्चिरजीविनः ॥
विनिष्किरन्ति ये घासं स्वग्रासाय तुरङ्गमाः ।
न वा जिघ्रन्ति ये चापि तेऽपि दीर्घायुषो मताः ॥
प्रतिस्रोतः पिबन्त्यम्भो ये च ते चिरजीविनः ।
पद्मपत्रसमाकारं जिह्वाग्रं यदि वाजिनः ॥
दन्ताश्च मौक्तिकाकारा लिङ्गं येषां च निर्मलम् ।
सित्कारश्च भवेद्येषां लाङ्गूले चालिते पुनः ॥

मस्वेदः शुभगन्धस्तु नखा वै दर्पणोपमाः।
येषां च दृढरोमाणि ते सर्वे चिरजीविनः॥
स्निग्धा गम्भीरदीर्घाश्च प्रोथजा यस्य वाजिनः।
भवन्ति विपुला रेखास्तं विद्याद्दीर्घजीविनम्॥
छत्रचामरभृङ्गारखड्गशङ्खाङ्कुशप्रभाः।
शुक्तिवज्रगदाकारा ध्वजचक्रसमोपमाः॥
ऊर्ध्वं चोष्ठस्थिता रेखा यस्य वामेन चानताः।
श्रीवत्सस्वस्तिकाभासाः प्रोथरेखाश्चिरायुषः॥
ह्रस्वा वा यस्य वाहस्य न चिरं तस्य जीवितम्।
ऊर्ध्वं प्रोथसमा रेखा दृश्यन्ते यस्य वाजिनः॥
तस्य मृत्युः समुद्दिष्टो दशमं प्राप्य वत्सरम्।
अङ्गुलास्तु दश द्वे च वर्षाणां तस्य जीवितम्॥
त्रयोदश स जीवेत्तु यस्य स्युश्चतुरङ्गुलाः।
प्रोथरेखा इत्यनुषङ्गः।
तिर्यगेवोर्ध्वगे चैव द्वे रेखे यस्य वाजिनः।
प्रोथगे यस्य वाहस्य तं विद्याच्च चतुर्दश॥
अत्र वर्षाणि त्रयोदश चतुर्दश, जीवतीति प्रत्येकं सम्बन्धः।
दक्षिणेन च पार्श्वेन यः शेते सर्वदा हयः।
बहुमूत्रालपमूत्रश्च चिरं जीवत्यसौ हयः॥
विनतः पूर्वकायेन स्थूलजानुश्च यो हयः।
स्थूलक्षिकूटः स्तब्धाक्षः स्वल्पायुः स प्रकीर्तितः॥ इति।

इत्यायुःपरीक्षा।

अथ वर्णलक्षणम्।

नकुलकृताश्वशास्त्रे,
सप्त वर्णा भवन्तीह सर्वेषां वाजिनां ध्रुवम्।

तानहं सम्प्रवक्ष्यामि भेदैर्जातानेकधा ॥
श्वेतो रक्तस्तथा पीतः सारङ्गः पिङ्ग एव च ।
नीलः कृष्णोऽथ सर्वेषां श्वेतः श्रेष्ठतमो मतः ॥
पदार्हो भूपतेर्वाजी सर्वश्वेतः प्रजायते ।
तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण ते ॥
श्वेतः प्रालेयसङ्काशो रक्तः कुङ्कुमसन्निभः ।
प्रालेयं हिमम् ।
हरिद्रासदृशः पीतः सारङ्गः कर्बुरः स्मृतः ॥
पिङ्गस्तु पिङ्गलाकारो नीलो दूर्वाग्रसन्निभः ।
कृष्णो जम्बूफलाकारः शास्त्रज्ञैः समुदाहृतः ॥
पीताभः श्वेतपादो यस्तथा स्यात्सितलोचनः ।
चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥
मुखचन्द्रकसंयुक्ता जम्बूफलसमाऽऽकृतिः ।
श्वेतपादः स विज्ञेयो मल्लिकाक्षः सुपूजितः ॥
सर्वश्वेतो हयो यस्तु भवेत् श्यामैककर्णकः ।
स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तितः ॥
चत्वारोऽथ सिताः पादाः सर्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतस्तु दूरतः ॥
यस्य पादाः सिताः सर्वे पुच्छं वक्षो मुखं तथा ।
मूर्द्धजाश्च सिता यस्य तं विद्यादष्टमङ्गलम् ॥
भस्माभं वाजिनं ज्ञात्वा सुदूरेण नराधिपः ।
यदि वाञ्छति कर्माणि यदि च श्रीसमुद्गमम् ॥
यस्य रोमविभेदेषु जायन्ते मधुबिन्दवः ।
पुष्पाक्षः स परित्याज्यः सर्ववाजिक्षयावहः ॥
यस्य पादाः सिताः सर्वे तथा चक्रं च मध्यतः ।

कल्याणपञ्चकः प्रोक्तः सदा कल्याणकृद्धि सः ॥
विमिश्रवर्णकाः सर्वे प्रशस्ता वाजिनः सदा ।
कृष्णनीलस्य मिश्रत्वमेकं मुक्त्वा सुदूरतः ॥
यस्योत्कृष्टतरा वर्णा वृद्धिं यान्ति शनैः शनैः ।
स नाशयति नीचांश्च करोत्यश्वतमान् बहून् ॥
यश्चाधमेन वर्णेन भवेद्युक्तस्तुरङ्गमः ।
विवृद्धिं चैव गच्छन्सः करोति हयसङ्क्षयम् ॥ इति ।
जयदत्तकृताश्वशास्त्रे,
यस्य गौराणि पीतानि गात्ररोमाणि वाजिनः ।
स भर्तुः श्रियमाधत्ते यस्य शुक्लानि त्रीणि च ॥
पुच्छकेशमुखानि त्रीणि शुक्लानीत्यर्थः ।
प्रभूतासिततारांश्च प्रशस्ता मुनिभिः स्मृताः ।
यस्तु पीतसितैस्तारैः स धन्यः कीर्त्तितो हयः ॥
श्वेतया वेष्टितं कृष्णं रेखया तारकं च यत् ।
मल्लिकाक्षः स विज्ञेयः स्वामिनः सुखवर्द्धनः ॥
सिततारोऽप्रशस्तश्च स्वामिनः क्लेशवर्द्धनः ।
सर्वश्वेतश्च कृष्णश्च रक्तः पीतस्तथैव च ॥
एते साङ्ग्रामिकाः प्रोक्तास्तुरगा मुनिसत्तमैः ।
हरिताः किल जायन्ते वाजिनः पुण्यदार्शिनाम् ॥
अतो हिता नरेन्द्राणामायुरारोग्यश्रीप्रदाः ।
रक्तास्यमेहनः शस्तः श्यामकर्णश्च यः सितः ॥
कपोतेन च वर्णेन यो हयः शुक्लकेसरः ।
पाण्डुरा यस्य रेखा स्यात्पृष्ठवंशानुयायिनी ॥
श्वेतकृष्णं शिरो यस्य नैव धन्यः प्रकीर्तितः ।
अन्यवर्णं शिरो यस्य पुच्छं वा यस्य वाजिनः ॥

पुच्छेन शिरसा वापि नानावर्णेन निन्दितः ।
अव्यक्तवर्णो यो वाहस्तथा तित्तिरिसन्निभः ॥
कुत्सितो वानरास्यश्च तथा व्याघ्रावलीढकः । इति ।
गणकृतेऽश्वचिकित्सिते,
सर्वे वर्णाः शस्तास्तुरगाणां सुप्रभास्थिराः स्निग्धाः ।
तेषां श्वेतः श्रेष्ठो यतो ध्रुवश्चाव्ययश्चासौ ॥
सर्वेषां वर्णानां संयोगः श्वेतसंयुतः शस्तः ।
सर्वश्वेताः शशिनो हरयः कनकप्रभाः सुरेन्द्रस्य ॥
कृष्णा यमस्य वाहाः कर्काः शुभलक्षणा विष्णोः ।
शुकगात्रनिभा भानोः किंशुकवर्णा हया हुताशस्य ॥
असिताभ्रनिभा वरुणस्य कुमुदवर्णाः कुबेरस्य ।
एभिर्वर्णैरश्वाः शुभस्वरावर्तकायसर्वाश्च ॥
एतेषां देवानां पृथक्पृथक् वाहनाः कथिताः । इति ।

इति वर्णलक्षणम् ।

अथ गतिलक्षणम् ।

जदत्तकृतेऽश्वायुर्वेदे,
दूरमुत्क्षिप्य यः पादांस्तप्ताङ्गारान् स्पृशन्निव ।
द्रुतं याति सुसंहृष्टो वाजी भद्रगतिस्तु सः ॥
पूजिता वृषभातङ्गसिंहशार्दूलगामिनः ।
अतोऽन्यगतयो नेष्टाः सर्वशुद्धास्तुरङ्गमाः ॥
सङ्कीर्णवक्रगा भ्रष्टा वक्रा सौष्ठवर्जिता ।
अत्यूर्ध्वं चैव विक्रान्ता वाजिनां निन्दिता गतिः ॥
षोडशच्छोटिका देयाः करतालेन जानुनि ।
शतं द्विगुणितं गत्वा हस्तानां पुनरेति यः ॥
स शीघ्रगतिरित्युक्तो वाजी धन्यस्तपोधनैः ।

दशहीना भवन्त्येते मध्यगाधमगा हयाः ॥ इति ।

अमयर्थः । जानुप्रादक्षिण्येन करतालेन षोडशच्छोटिकादाने यावान् कालस्तन्मध्ये योऽश्वः शतद्वयहस्तपरिमितां भूमिं गत्वा पुनरायाति स उत्तमः । यस्तु दशहस्तोनशतद्वयहस्तप्रमाणां भूमिमतीत्य पुनरायाति स मध्यमः । यस्तु विंशतिहस्तोनशतद्वयहस्तप्रमाणां भूमिं गत्वा पुनरायाति सोऽधम इति ।

किल्हणकृतेऽश्वसारसमुच्चये,

उच्चैःपदन्यासयुता गतिः स्यात्सुसौष्ठवा या मसृणा हयस्य ।
विभक्तपादा च मनोहरा या हिता सदा सादिषु सा प्रशस्ता ॥

सादी अश्ववारः ।

मत्तद्विपव्याघ्रमयूरहंसशाखामृगोष्ट्रर्क्षगतैः समाना ।
या स्याद्गतिर्यस्य तुरङ्गमस्य भर्त्तुः शिवं सा तनुते यशश्च ॥

शाखामृगो वानरः ।

सङ्कीर्णवक्त्रा विषमाङ्घ्रिपादा निस्सौष्ठवा बाह्यशफा स्खलन्ती
या स्याद्गतिः सादिषु न प्रशस्ता दुःखानि भर्त्तुः कुरुते सदैव ॥
यः शीघ्रगामी सविलासमुच्चैः पद्भ्यां व्रजेच्चाग्रशिरोऽप्यधुन्वन् ।
संस्थानतोऽश्वो नकुलो यथैव सा नाकुली तस्य गतिः प्रदिष्टा ॥
हृत्संस्पृशन् यो विकटैः खुराग्रैः पर्युल्लसद्भिश्चरणैः प्रयाति ।
साङ्गारभूमाविव तस्य यातं स्याच्चैत्तिरं तित्तिरवद्धयस्य ॥
उद्यम्य वक्त्रं तुरगः प्रयाति श्वासोऽमितः संस्थिरपादवालः ।
मयूरवद्यः सविलासगामी मायूरकी तस्य गतिः प्रदिष्टा ॥
शुभा गतिर्यस्य तुरङ्गमस्य तं प्राप्य राजा जयतेऽरिसङ्घान् ।
प्राप्नोति लक्ष्मीमतुलं यशश्च क्रीडेच्च नित्यं सह भृत्यमित्रैः ॥

सुगतिसहितमश्वं लक्षणैर्नैव हीनं
शुभतरमपि चोक्तं शालिहोत्रेण सम्यक् ।

यदि शुभतरलक्ष्यं धावितं नैव यस्य
वृषभ इव स निन्द्यः सङ्गराखेटकादौ ॥ इति ।

इति गतिलक्षणम् ।

अथ प्रसङ्गाद्वाहनविधिर्निरूप्यते । जयदत्तकृते—

अश्ववायुर्वेदे,

ब्रह्मणैव यथोद्दिष्टो वाहानां वाहने विधिः ।
सारं तस्य समुद्धृत्य सर्वं तत्कथयाम्यहम् ॥
त्रासी लुब्धी क्षुधालुश्च विप्रः स परिकीर्त्तितः ।
शूरश्च दृढमन्युश्च क्षत्रियस्तुरगः स्मृतः ॥
पापिनः पापरूपाश्च दुष्टा वैश्याः प्रकीर्तिताः ।
विरूपा विषमाश्चैव शूद्राश्चण्डा उदाहृताः ॥
ब्राह्मणान् भक्तदानेन साम्ना चैव तु क्षत्रियम् ।
वैश्यं दण्डेन शब्देन शूद्रं दण्डेन वाहयेत् ॥
प्रत्यूषे वाहयेद्विप्रं क्षत्रियं प्रहरे गते ।
वैश्यं सन्ध्यागते काले शूद्रं रात्रौ च वाहयेत् ॥
सत्त्वं च त्रिविधं प्रोक्तमुत्तमाधममध्यमम् ।
उत्तमं चोपशामेन साम्ना दण्डेन मध्यमम् ॥
शब्दाङ्गेन च दण्डेन वाहयेदधमं बुधः ।
सहजे निर्मले वाहे तैलदुग्धस्य रूपवत् ॥
शान्तिश्च द्विविधा प्रोक्ता बलदौर्बल्यसम्भवा ।
बलिष्ठो दुर्बलत्वेन दुर्बलोऽपि बलेन वा ॥
छलेनोपधिना वापि सत्त्वं ज्ञात्वा च वाहयेत् ।
सार्द्रां सुकठिनां चैव पाषाणोदकसंयुताम् ॥
तृणकाष्ठसमायुक्तां रङ्गभूमिं तु वर्जयेत् ।
समां च विपुलां चैव किञ्चित्पांसुसमन्विताम् ॥

एकान्ते विजने रम्ये रङ्गभूमिं तु कारयेत् ।
स्थूलः क्रोधी च मूर्खश्च चिन्तोत्सुकचलासनः ॥
अस्थाने दण्डपाती यस्तस्य वाजी न सिध्यति ।
प्रचलेद्यस्य तु कटिरूर्ध्वबाहुर्बिभेति यः ॥
प्रचलेद्यस्य तु कटिरूर्ध्वं वा दण्डपातकः—इति पाठान्तरम् ।
न तस्य वाहनं वाजी दुर्लभं वाजिवाहितम् ।
दृढासनोऽथ तत्त्वज्ञो दृढपृष्ठो निरालसः ॥
*अविरागी स्थिरश्चापि षडेते वाजिवाहकाः ।
चित्तं यो नैव जानाति तुरगस्य समासतः ॥
न वहन्ति हयास्तं च दण्डपातेन ताडिताः ।
ह्रेषिते वलिते भीते तथा चोन्मार्गगामिनि ॥
कुपिते भ्रान्तचित्ते वा षट्सु दण्डं निपायेत् ।
ह्रेषिते ताडयेन्मूर्ध्नि जानुभ्यां वलिते तथा ॥
कुपितोरसि हन्तव्यो भ्रान्तचित्ते तथोदरे ।
भीतं च ताडयेत्पश्चात् मुखे चोन्मार्गगामिनम् ॥
ज्ञात्वा दोषं च रूपं च स्थानेष्वतेषु ताडयेत् ।
अस्थाने ताडितो वाजी यावज्जीवं न सिध्यति ॥
न जहाति च तद्दोषं यावज्जीवमसौ हयः ।
धाराः पञ्च प्रवक्ष्यामि ऋषिभिर्याः प्रकीर्त्तिताः ॥
धाराशब्देन धावने अतित्वरितो गतिविशेष उच्यते ।
प्रथमा विक्रमा धारा द्वितीया पुलका स्मृता ।
तृतीया पूर्णकण्ठी तु चतुर्थी त्वरिता स्मृता ॥
पञ्चमी चैव या धारा निरालम्बा प्रकीर्तिता ।
षष्ठी चैव तु या धारा श्रूयते न तु दृश्यते ॥
विक्रमा गतिधारा च चतुष्का पुलका मता ।

मुखपादसमायुक्ता पूर्णकण्ठी तु सा भवेत् ॥
स्वेच्छया त्वरिता धारा ताडिता चैव पञ्चमी ।
षष्ठी चैव तु या धारा स्वर्गलोकेषु गीयते ॥
न वक्रो न तथोत्तानो न कुब्जो नाप्यधोमुखः ।
न भवेत्स्तब्धगात्रस्तु स भवेदश्ववाहकः ॥
स्थिरोरुः स्थिरपादश्च त्रिकोन्नतः स्थिरासनः ।
त्रिकं पृष्ठवंशाधोभागः ।
अश्ववाराः समाख्याताः शेषास्तु भरदायकाः ।
ग्रीष्मादिषु न कर्तव्यमृतुषु त्रिषु वाहनम् ॥
हेमन्तादिषु कर्तव्यं सादिभिः शास्त्रवेदिभिः ।
प्रतिपत्सु त्रयोदश्यां पञ्चम्यां वा सिते दले ॥
धृतिसिद्ध्यादियोगेषु वासरे चन्द्रसूर्ययोः ।
मूलरोहिणिहस्तेषु पुष्ये चैवोत्तरासु च ॥
एवंविधे दिने सादी वाहनं वाहयेच्छुभे ।
रङ्गभूमौ च रेवन्तं स्थापयेत् पूजयेत्ततः ॥
पुष्पैर्धूपैः प्रदीपैश्च चन्दनैः पायसैस्तथा ।
पक्वान्नाद्यैर्भक्ष्यभोज्यैः प्रातः शुचिमुवस्त्रकः ॥
रक्ताम्बरधरो भूत्वा रक्तपुष्पधरस्तथा ।
ॐ नमो रेवन्ताय अश्वहृदयाय ह्रीं क्लीं ॐ नमोऽश्वेताय सौम्यरूपाय इममश्वं वर्धय वर्धय वश्यं कुरु महावीर्याय रेवन्ताय नमः ।
एतन्मन्त्रं जपेत्प्राज्ञो हयस्य दक्षिणे श्रुतौ ।
एकविंशतिवारांश्च ततः पर्याणयेद्धम् ॥
क्रोशमेकं तमाहरुह्य ईशानीं तु शनैर्नयेत् ।
दिशामिति शेषः ।

नातिस्थूलं कृशं नाति न स्तब्धं नातिकर्कशम् ।
सप्ताङ्गुलप्रमाणं तु खलीनं कारयेद्बुधः ॥
खलीनं वल्गा ।
शतहस्तादिकां भूमिं सप्तहस्तावसानिकाम् ॥
भ्रामयेद्वाजिनं सादी सव्यं चैवापसव्यकम् ।
दद्याद्धयमभीतस्य भीतस्यापि हरेद्धयम् ॥
रहस्यं सादिनामेतद्वाहनेऽस्मिन्निवेदितम् ।
दम्यमानस्य अश्वस्य यो दोषः सादिदोषतः ॥
जायतेऽसौ निराकर्तुं सादिना नैव शक्यते ।
एवं शास्त्रविधानेन यः सादी वाहयेद्धयान् ॥
हरयस्तस्य सिध्यन्ति भवन्ति फलदायकाः ॥
अस्थिभिर्दशनैश्चैव वृकाणां च तथा बुधः ।
विषमं करदंष्ट्राभिर्धूपयेच्चैव सर्पिषा ॥
एलामृगमदोशीरनागकेसरचन्दनैः ।
सर्जिकातैलसंयुक्तैर्धूपयेद्दुष्टवाजिनम् ॥
सर्जिका मध्यदेशे साजीति प्रसिद्धा ।
विलिप्ता गोमयैः प्रातर्निशीथे पर्वसन्धिषु ॥
अष्टम्यां च विशेषेण दुष्टाः सिध्यन्ति धूपिताः ।
कासीसं चन्दनं कौन्तीसिद्धार्थमरिचानि च ॥
सैन्धवं वडवामूत्रं गोमूत्रं कर्णजं मलम् ।
कासीसं लोके कौसीस इति प्रसिद्धम् । कौन्ती रेणुकेति प्रसिद्धा । सिद्धार्थाः सर्षपाः ।
सुनिर्गुण्डानि पिष्टानि कणायासवचानि च ॥
अञ्जनं सर्वदुष्टानां देयं पर्वणि पर्वणि ।
कणा पिप्पली । यासो जवासा इति भाषया प्रसिद्धः ।

अनेनाभ्यञ्जितो वाजी निर्वाणमभिगच्छति ।
कोपं मोहं भयं त्यक्त्वा वश्यः स्यात्सादिनो भृशम् ॥
प्रातः सादी शुचिः स्नातः शुक्लाम्बरधरस्तथा ।
उपोषितो यतिर्भूत्वा जपेत्कर्णे च दक्षिणे ॥
हय गन्धर्वराजस्त्वं शृणुष्व वचनं मम ।
गन्धर्वकुलजातस्त्वं मा भूयाः कुलदूषणम् ॥
द्विजानां सत्यवाक्यानां सोमस्य गरुडस्य च ।
रुद्रस्य वरुणस्यैव पवनस्य च लेखिनः ॥
लेखिनः इन्द्रस्य ।
हुताशनस्य दीप्तस्य स्मर जातिं तुरङ्गम ॥
स्मर राजेन्द्रपुत्रस्त्वं सत्यवाक्यमनुस्मर ।
स्मर त्वं वारुणीं कन्यां स्मर त्वं कौस्तुभं मणिम् ।
क्षीरोदसागरे चैव मथ्यमाने सुरासुरैः ॥
तत्र देवकुले जातः स्ववाक्यं परिपालय ।
कुले जातस्त्वमश्वानां मित्रं मे भव शाश्वतम् ॥
शृणु मित्र त्वमेतद्वै सिद्धो मे भव वाहन ।
विजयं मे धरां चैव सङ्गामे सिद्धिमावह ॥
तव पृष्ठं समारुह्य हता दैत्याः सुरैः पुरा ।
अधुना त्वां समारुह्य जेष्यामि रिपुवाहिनीम् ॥
मन्त्रजापं ततः कृत्वा मन्त्रेणानेन बुद्धिमान् ।
विसृज्य सर्वदेवांश्च ततः पर्याणयेद्धयम् ॥ इति ।

इत्यश्ववाहनाविधिः ।

अथ स्वरलक्षणम् ।

शालिहोत्रे,
शालिहोत्रः सुतं प्राह हयानां स्वरलक्षणम् ।

हंसेभकुररक्रौञ्चमेघदुन्दुभिनिःस्वनैः ॥
जलौघसदृशैर्यै च ते स्युर्नित्यं विवृद्धिदाः ।

इभो गजः ।

श्वकाकवानरोलूककाष्ठपाषाणसन्निभैः ।
स्वनैरशनितुल्यैश्च पापाः स्युर्वाजिनो मताः ॥

अशनिर्वज्रम् ।

क्षामस्वरं हयं प्राप्य क्षिप्रमाप्यं न चाप्नुयात् ।

आप्यं वाञ्छितम् ।

हेषत्यधोमुखो वाजी यस्तु भर्तुरनर्थदः ॥
वामं निरीक्ष्य पार्श्वं च कुलनाशकरो भवेत् ।
दृष्ट्वा द्रव्यममङ्गल्यं प्रायशो यश्च हेषते ॥
अलक्ष्मीं तनुते सोऽश्वो भर्तुर्दुःखकरः स्मृतः ।
खरवद्धेषते यस्तु सोऽलक्ष्मीकस्तुरङ्गमः ॥
भर्तुर्वृद्धिकरः सेव्यो धनधान्यविवर्द्धनः ।
विलोक्य दक्षिणं पार्श्वं स्पृष्ट्वा वा यस्तु हेषते ॥
तमश्वमभिरुह्याथ राजा जयति मेदिनीम् ।
बहूनां हेषमाणानां श्रूयते यस्य हेषितम् ॥
सानुनादो हयो नाम भर्तुः सर्वार्थसाधकः ।
एकस्य हेषमाणस्य बहूनामिव हेषितम् ॥
गम्भीरहेषी सोऽश्वः स्याद्राज्ञां विजयवर्द्धनः ।
श्रुत्वा तु हेषितं तस्य अन्ये हेषन्ति वाजिनः ॥
अश्वानां वर्धते सोऽश्वो राज्ञां शतसहस्रशः ।
अन्यस्य हेषितं श्रुत्वा यः पश्चादनुहेषते ॥
तमश्वमभिरुह्याथ मित्रवृद्धिमवाप्नुयात् । इति ।

जयदत्तकृतेऽश्वायुर्वेदे,
हेषितं मधुरं चैव तुरगस्य प्रशस्यते ।
अविच्छिन्नमदीनं च गम्भीरं सानुनादि यत् ॥
दृष्ट्वा हि पूर्णपात्रं च ब्राह्मणं कुसुमानि च ।
दधि वापि समालोक्य वाहानां हेषितं शुभम् ॥
वादित्रध्वनिमाकर्ण्य हेषन्ते यदि वाजिनः ।
ग्रासपूर्णमुखाश्चैव तदा भर्तुर्जयो भवेत् ॥
ध्वजाग्रं चैव सूर्यं च पश्यन्तो वाजिनो यदा ।
हेषन्ते बहवो हृष्टास्तदा विद्याज्जयं प्रभोः ॥
अतो यद्विपरीतं तु हेषितं कुत्सितं तु तत् ।
मिन्मिनं गद्गदं मूकं विरूक्षं काशजर्जरम् ॥
बाले च निर्गते वृद्धे क्षुधिते वा पिपासिते ।
श्रान्ते भीते तथा वाहे न ग्राह्यं स्वरलक्षणम् ॥ इति ।

इति स्वरलक्षणम् ।

अथ छायालक्षणम् ।

शालिहोत्रे,
पञ्चभूतात्मिकां छायां पञ्चधा लक्षयेदिमाम् ।
वायोरग्नेरपां भूमेर्नभसश्चापि पञ्चमी ॥
सर्वरोमसु दन्तेषु वालकेशनखेषु च ।
वर्णः स्यादधिको भूतां छायामश्वस्य लक्षयेत् ॥
भूतां पञ्चमहाभूतात्मिकाम् ।
वायव्या परुषा दीना भस्मवर्णा हयप्रभा ।
सुरक्ता चाथ सुस्निग्धाऽऽग्नेयी जाम्बूनदप्रभा ॥
असिताम्बुदसङ्काशा जलजा स्निग्धसुप्रभा ।

रूक्षा तन्वी न नियता दुर्निर्देश्याऽन्तरिक्षजा ॥
गम्भीरस्निग्धवर्णा च सर्ववर्णा च पार्थिवी ।
जलजा पार्थिव्याग्नेयी प्रशस्ता निन्दितेतरे ॥
निन्दिता वा प्रशस्ता वा काये तिष्ठति या चिरम् ।
छाया च लक्षणं तस्य विपुलं फलमश्नुते ॥
राज्यलाभं यशश्चैव स्त्रियं शान्तिं सुखं तथा ।
रणे च विजयं नित्यं प्रशस्तास्वभिनिर्दिशेत् ॥
क्षिप्रमैश्वर्यमाग्नेयी छाया भर्तुः प्रयच्छति ।
अब्जा बहुतरां कीर्त्तिं सम्पदं हि प्रयच्छति ॥
पार्थिवी सर्वकामार्थयुक्तमैश्वर्यमक्षयम् ।
निःसपत्नं महाराज्यं छाया भर्तुः प्रयच्छति ॥
वायव्या चान्तरिक्षा च स्पृशते तुरगं यदा ।
तदा पराजयं भर्तुर्वधबन्धौ च निर्दिशेत् ॥
व्यसनं खलु बन्धं वा रोगं मरणमेव च ।
अप्रशस्तासु जानीयाद्भर्तुश्च तुरगस्य च ॥ इति ।

इति छायालक्षणम् ।

अथ गन्धलक्षणम् ।

शालिहोत्रे,
परापरज्ञं तत्त्वज्ञं शालिहोत्रं जितेन्द्रियम् ।
ज्येष्ठः पुत्रोपसङ्गम्य मित्राजित्परिपृच्छति ॥
गन्धा अश्वोद्भवाः पुण्याश्च ये च गन्धास्तथाऽशुभाः ।
तेषां मे ब्रूहि विज्ञानं फलमेषां शुभाशुभम् ॥
एवं पृष्टस्तु पुत्रेण शालिहोत्रः प्रभाषते ।
मुखे गन्धं विजानीयान्निःश्वासे प्राणसंस्थितम् ॥

प्राणसंस्थितमाभ्यन्तरस्थितम् ।
अक्षिकर्णगुदेष्वेव तथा मूत्रायिते पुनः ।
स्वेदमूत्रपुरीषेषु शुक्रे नाभौ तथा पुनः ॥
सर्वमेतत्प्रवक्ष्यामि श्रुत्वा गुह्योपधारय ।
चन्दनागरुगन्धाश्च तथा सर्पैःसुगन्धिनः ॥
दधिक्षीरसमा गन्धास्तथा सर्जकभूस्तृणैः ।
ह्रीवेरस्य मृणालस्य केसरोशीरयोस्तथा ॥
ह्रीवेरमुशीरम् । अग्रिमोशीरपदेन कृष्णमुशीरं ग्राह्यम् ।
जम्बूबिल्वकपित्थानां पक्वस्याम्रफलस्य च ।
कदम्बार्जुननीपानां पाटलाशोकगन्धिनः ॥
कल्हारस्य शिरीषस्य मल्लिकामालतीत्वचः ।
कुटजस्यन्दनानां च पुन्नागाशोकगन्धिनः ॥
सुगन्धाः करवीराणां ये च कर्पूरगन्धिनः ।
चम्पकस्य तमालस्य पत्रस्य तगरस्य च ॥
वसन्तवनराजीनां वारणानां मदस्य च ।
ये च गन्धा मनोज्ञाः स्युः सर्वे पुष्पफलान्विताः ॥
तेषां समानगन्धा ये मङ्गल्यास्ते ह्युत्तमाः ।
नित्यं प्रमुदिताश्चैव सर्वस्य च मनोहराः ॥
सर्वार्थसिद्धिप्रकराः सौभाग्यकुलवर्द्धनाः ।
पृथिवीमचिरं तैस्तु लभन्ते पार्थिवा ह्यैः ॥
यथा मनोज्ञगन्धास्ते मनोज्ञार्थकरास्तथा ।
पूजनीयाश्च ते वाहाः शाश्वताः सुखपुत्रदाः ॥
आहवे जयिनो नित्यं यशोदाः पुत्रपौत्रदाः ।
एवं पुण्यतमा गन्धा व्याख्याताः शृणु चापरान् ॥
भृशं कुणपगन्धाश्च वसादुर्व्वाङ्गगन्धिनः ।

दुर्ध्वाङ्क्षः अधमः काकः ।
मत्स्यपुच्छाण्डगन्धाश्च मलपूयसुगन्धिनः ॥
मार्जारोष्ट्रवराहाणां सगन्धा मूषकस्य च ।
श्वशृगालैश्च ते तुल्या न पुण्यं गन्धमाश्रिताः ॥
ते हयाः प्रतिकूलाः स्युरेतैर्दोषैः समन्विताः ।
असिद्धार्थकरा राज्ञाममङ्गल्यास्तथैव च ॥
न च दीर्घायुषस्ते स्युर्निन्दिताश्चैव कर्मसु ।
इत्यप्रशस्तगन्धाः स्युः प्रशस्ताश्च प्रकीर्तिताः ॥
फलमिष्टमनिष्टं च यथावदनुपूर्वशः ।
इति ह स्माह भगवान् शालिहोत्रोऽनुशासनम् ॥ इति ।

इति गन्धलक्षणम् ।

अथ सत्त्वलक्षणम् ।

शालिहोत्रे,

वक्ष्यते त्रिविधं सत्त्वं शुद्धराजसतामसम् ।
शुद्धं सात्त्विकम् ।
ह्रीमन्तः सुखभाजश्च सात्त्विका दीर्घदर्शिनः ॥
आयुष्मन्तश्च विज्ञेयाः क्षमावन्तश्च ते हयाः ।
दुःखभाजो मत्सरिणः सुतीक्ष्णाः साहसप्रियाः ॥
ह्रस्वायुषो रोषणाश्च विज्ञेया राजसा हयाः ।
तन्द्रिणः स्वप्नशीलाश्च मृजाहीनास्तथैव च ॥
दुर्मेधसोऽलसाश्चैव विज्ञेयास्तामसा हयाः । इति ।
जयदत्तकृतेऽश्वायुर्वेदे,
अमेध्ये कर्दमे चैव नास्ते मूत्रे विशेषतः ।
घृणा यस्यास्ति वाहस्य देवसत्त्वः प्रकीर्तितः ॥

पिशाचसत्त्वो मन्तव्यो व्यत्ययेन तुरङ्गमः ।
देवसत्त्वः शुभो भर्त्तुः पैशाचश्चाशुभः स्मृतः ॥ इति ।
सत्त्वप्रशंसा च किङ्करणकृतसारसमुच्चये उक्ता—
वर्णाद्गतिर्गतेर्हेषो हेषितात् स्फुरिता प्रभा ।
प्रभायाश्च ततो जातिर्जातेः सत्त्वं विशिष्यते ॥ इति ।

इति सत्त्वलक्षणम् ।

अथानूकलक्षणम् ।

गणकृतेऽश्ववायुर्वेदे,

अत ऊर्ध्वं प्रवक्ष्यामि अनूकं तु चतुर्विधम् ।
गत्या स्वरेण रूपेण सत्त्वेन च शुभाशुभम् ॥
तत्र सत्त्वगतं ज्ञेयमनूकं सत्त्वलक्षणम् ।
त्रिविधस्य तु सत्त्वस्य भेदाः कात्स्न्र्येन कीर्तिताः ॥
ते अनूकानि ज्ञेयानि प्रशस्तानीतराणि च ।
परदेहाकृतिनिभं रूपं काये विभावयेत् ॥
शुभाशुभस्वरानूकं यदुक्तं स्वरलक्षणम् ।
गत्यनूकमिति ज्ञेयं स्वरानूकं यथा तथा ॥
एवं चतुर्विधं त्वेतदनूकं शुभनिर्मितम् ।
सिंहादिराविणो येऽश्वाः स्वरानूकाः शुभावहाः ॥
ते वर्द्धयन्ति नृपतेः कोष्ठागारं वसूनि च ।
श्वाङ्गादिराविणो ये च ये चाप्यशुभलक्षणाः ॥
सिंहादिगतयो ये तु गत्यनूकेन ते शुभाः ।
विपरीता न शस्यन्ते एतच्चानूकलक्षणम् ॥ इति ।

इत्यनूकलक्षणम् ।

अथ सारलक्षणम् ।

शालिहोत्रे,

यस्य त्वक् स्नेहसम्पन्ना स्निग्धा रोमावली तथा ।
शोभनैर्गुह्यदेशैश्च शुभावर्तश्च यो भवेत् ॥
मेधावी जवनो दक्षः शुक्लः प्राजनवेदिता ।
त्वक्सारः स तु विज्ञेयः सुश्लिष्टत्वक् हयो भवेत् ॥

प्राजनं केशः ।

मानोन्मानविभक्ताङ्गः सर्वगात्रसमाहितः ।
शोणः शोणानुवर्णो वा रक्ताक्षश्चारुदर्शनः ॥
तेजस्वी च मनस्वी च मेधास्मृतिगुणान्वितः ।
रक्तसारो भवेत्सोऽश्वस्ताम्रमेढ्राण्डतालुकः ॥
स्निग्धदन्ताश्रुनयनः स्निग्धवालतनूरुहः ।
मृदुस्निग्धायतैः कैशैरल्पदीर्घशफस्तथा ॥
जिह्वा मृद्वी घना चैव पद्मपत्रनिभा पुनः ।
सुसंहतैर्घनैर्मांसैः रक्तसूनाक्षितालुकः ॥
मांससारः शुचिर्ज्ञेयो बलवान् रूपवांस्तथा ।
लोध्रपुष्पप्रतीकाशो वृत्तमेढ्रघनस्तथा ॥
दृढाङ्गसंयुतो वाहो मांसैर्वृत्तैः सुमेदुरैः ।
सुसंहतैर्विभक्तैश्च स्निग्धवर्णाक्षितालुकः ॥
मेदःसारं तु तुरगं विद्यात्तं स्निग्धवर्णिनम् ।
शुक्ला वा क्षौद्रवर्णा वा सम्पूर्णाश्च घनाः समाः ॥
दन्ताः स्युर्यस्य दंष्ट्रास्तु सुशफाश्च विशेषतः ।
सुघनानि विभक्तानि दृढान्यस्थीनि यस्य तु ॥
न च ताम्यति भारेण सोऽस्थिसारस्तुरङ्गमः ।
घृतमण्डनिभा मज्जा स्थिरा गुर्वी शुभप्रदा ॥

सुस्निग्धानि च मांसानि सवाह्याभ्यन्तराणि च ।
सुप्रभे च सिते नेत्रे स्निग्धरोमत्वमेव च ॥
मज्जासारः स विज्ञेयो बलतेजोगुणान्वितः ।
स्निग्धं घनमदुर्गन्धि वटक्षीरोपमं च यत् ॥
स्याच्छुक्रं यस्य तत्सारं शृणु कीर्त्तयतो मम ।
सारवान् बलवान् दक्षो हृष्टोदग्रो जवान्वितः ॥
सुखुरश्चारुसर्वाङ्गो मेघगम्भीरहेषितः ।
सुबद्धः सर्वगात्रेषु सुसन्धिः सर्वकर्मकृत् ॥
स्नायुसारो भवत्येष सत्त्वसारमिमं शृणु ।
शूरोऽविषादी समरे मेधास्मृतिगुणान्वितः ॥
स्निग्धवर्णो यवाक्षो यः श्लक्ष्णः प्राजनवेदिता ।
आयामोत्सेधनाहेन युक्तः सर्वगुणान्वितः ॥
सत्त्वसारः स तुरगो जवसारघनोपमः ।
सर्वभूमिषु शक्तश्च सर्वकर्मसु पूजितः ॥
कोपितो दर्पितो वापि न कुप्यति न हृष्यति ।
एवं साराः समाख्याताः शृणु तेषां गुणानिमान् ॥
श्लक्ष्णः प्राजनसंज्ञश्च स्यात्त्वक्सारो जवान्वितः ।
रक्तसारस्तु तेजस्वी मनस्वी बलवांस्तथा ॥
मांससारस्तु बलवान् रूपवांश्च तुरङ्गमः ।
स्यान्मेदसारस्तुरगो भारेऽध्वनि च पारगः ॥
अस्थिसारस्तु बलवान् हर्षवान् सर्वकृत्तथा ।
मज्जासारस्तु विज्ञेयो बलतेजोजवान्वितः ॥
शुक्रसारस्तु भगवान् स्यात् स्थिरात्मा बहुप्रजाः ।
भवति स्नायुसारोऽश्वो जितनिद्रो जितश्रमः ॥
स्थिरात्मा च जितात्मा च सत्त्वसारस्तु सर्वकृत् । इति ।

इति सारलक्षणम् ।

अथ प्रकृतिलक्षणम् ।

गणकृते अश्वायुर्वेदे,
श्रीमान् भद्रः सुखभागायुष्मान् सात्त्विको वाजी ।
ह्रस्वायुषः सुतीक्ष्णा मत्सरिणो राजसा हया ज्ञेयाः ॥
दुर्मेधसोऽलसा ये हयास्ते तामसाः प्रोक्ताः ।
अलसा मन्दाः ।
स्निग्धत्वग्रोमतनुः सुखसञ्चारः सुविग्रहः शूरः ।
नै त्रासी न विषादी सुबुद्धिमानेष भद्रोऽश्वः ॥
तनुकुष्टिकान्तरोमत्वक् शीघ्रस्वापी च शीघ्रवेगी च ।
त्रस्तो निरीक्षते यः परितस्तीक्ष्णो भवेत्सोऽश्वः ॥
अत्रासिनं विमूढं स्थूलत्वक्वालकुष्टिकं चैव ।
दीनं मृदुप्रयाणं मन्दं तुरगं विजानीयात् ॥ इति ।

इति प्रकृतिलक्षणम् ।

अथाङ्गमानलक्षणम् ।

किल्हणकृतसारसमुच्चये,
षष्ट्यधिकं शतमाह मुनीन्द्रस्त्वायतिमानमथाङ्गुलमानैः ।
उच्छ्रयमेकशतं परिणाहं सत्तमवाजिषु तत्परिमेयम् ॥
एकं शतं विंशतियुक्तमेवमाया ममश्वेषु कनीयसेषु ।
उच्छ्रायनाहौ पुनरङ्गुलानामशीतिरेवं कथितं मुनीन्द्रैः॥ इति।
नकुलकृते अश्वशास्त्रे,
सप्तविंशत्प्रमाणेन मुखमश्वस्य शस्यते ।
अङ्गुलानामिति शेषः ।
कर्णौ षडङ्गुलौ प्रोक्तौ तालुकं चतुरङ्गुलम् ॥
चत्वारिंशच्च सप्ताथो स्कन्धश्च परिकीर्तितः ।

पृष्ठवंशश्चतुर्विंशत्सप्तविंशत्तथा कटिः ॥
अतिसूक्ष्मं तथा स्निग्धं पुच्छं हस्तद्वयायतम् ।
लिङ्गं हस्तप्रमाणं तु तथा ऽण्डौ चतुरङ्गुलौ ॥
मार्गस्थानं चतुर्विंशत् हृदयं षोडशाङ्गुलम् ।
कटिकक्षान्तरं प्रोक्तं चत्वारिंशत्प्रमाणतः ॥
मणिबन्धद्वयं चैव खुराश्च चतुरङ्गुलाः ।
अशीत्यङ्गुल उत्सेधो दैर्घ्यं च ह्यधिकं शतम् ॥ इति ।

इत्यङ्गमानलक्षणम् ।

अथ प्रत्यवयवलक्षणम् ।

शालिहोत्रे,

तत्त्वलक्षणमाख्यामि ह्यश्वाङ्गानां पृथक्पृथक् ।
आस्यं तु संवृतं श्रेष्ठं सुमहच्च सुगन्धि च ॥
तदास्यं शस्यते यच्च लालाढ्यं चैव पाटितम् ।
दशनास्तु समा वृत्ताः परिपूर्णा घनाः स्थिराः ॥
अविकारा न विरलाः सुस्निग्धाभ्यन्तरोन्नताः ।
श्वेता वा मधुवर्णा वा तुरगस्याभिपूजिताः ॥
दंष्ट्रा दन्तसवर्णाश्च तीक्ष्णाग्राश्चाभिपूजिताः ।
चतुरस्रा दृढाः स्निग्धाः सूक्ष्माश्चापि समाहिताः ॥
जिह्वा तन्वी न चोद्धृद्धा ऋजुर्दीर्घा समाहिता ।
मृदुश्लक्ष्णा च रक्ता च श्वजिह्वेव प्रशस्यते ॥
सूना च युक्तोपचिता श्लक्ष्णा रक्ता समाहिता ।
स्थिरा निरुपदग्धा चास्निग्धवर्णा च पूजिता ॥
गम्भीरं त्वायतं रक्तं तनुलेखं समं महत् ।
श्लक्ष्णं निरुपदग्धं च पूजितं तालु वाजिनाम् ॥

ओष्ठौ श्लक्ष्णौ न वलिनौ मृदुकौ पीनसंस्थितौ।
तनुलम्बौ न चोद्धद्धौ दूरादाच्छादनौ शुभौ॥
चतुरस्रं समं वृत्तं प्रपानं शुभमिष्यते।
ऊर्ध्वोच्छ्वासौ महान्तौ च संवृतौ मृदुकौ समौ॥
वृत्तौ श्लक्ष्णौ च विज्ञेयौ प्रशस्तौ नासिकापुटौ।
ऋजुः समाहितः श्लिष्टो नासावंशो घनश्च यः॥
प्रोथः समो मृदुर्वृत्त ऋजुः श्लक्ष्णः समाहितः।
तनुमध्योन्नतश्चैव सुश्लिष्टश्च प्रशस्यते॥
आयतश्च विशालश्च तथा प्रोथश्च पूजितः।
समे समाहिते चैव निर्मांसे ऋजुके घने॥
सृक्के तु महती शुद्धे तनूरुहविवर्जिते।
अनुपूर्वायतौ गण्डौ निश्छिद्रौ नोत्लवणौ शुभौ॥
मध्ये हि खलु निर्मांसा घोणा भवति पूजिता।
घोणातटे प्रशस्येते अनुपूर्वायते घने॥
मग्नमांसशिरास्नायुस्त्वक्षुपातः शुभो मतः।
नेत्रे तु महती शुद्धे विशाले मधुसन्निभे॥
स्निग्धे मणिसवर्णाभे हिरण्यसदृशे स्थिरे।
मल्लिकाभे मयूरोष्ट्रकलविङ्काक्षिसन्निभे॥
क्रौञ्चतित्तिरकृष्णाभे वारणाक्षिनिभे तथा।
कुरङ्गहंसनेत्राभे टिट्टिभाक्षिनिभे तथा॥
दीर्घानुबद्धपक्ष्मे च प्रशस्ते ह च लोचने।
अस्थूलान्यक्षिकूटानि शुभान्यविषमाणि च॥
परिमण्डलश्लिष्टमांसौ मग्नस्नायू कटौ शुभौ।
मग्नमांसशिरास्नायुः शङ्खः शस्तो हि वाजिनाम्॥
ललाटं त्वायतोचानं निर्मांसं पृथुलं समम्।

अनुपूर्वायतं चैव निर्वलीकं च भूषणम् ॥
आयते तु हनू वक्रे वृत्ते चैव घने स्थिरे ।
युक्तानुपूर्वोपचिते श्लिष्टमांसास्थिसन्धिनी ॥
स्थिरं निरुपदग्धं च सर्वतश्च समाहितम् ।
अरोमशं च विज्ञेयं चिबुकं तुरगस्य तु ॥
ऋज्वास्यसदृशं चैव चिबुकं तत्प्रशस्यते ।
ह्रस्वौ च तनुवृत्तौ च कर्णौ शिशुनिभौ समौ ॥
अरोमशौ च वलिनौ तीक्ष्णाग्रौ चाभिपूजितौ ।
समं च पृथुलं चैव समाहितमपिण्डितम् ॥
मस्तकं चोन्नतं किञ्चित् दृश्यते सर्ववाजिनाम् ।
सुश्वेतपाण्डुभिः केशैर्विशदैर्मृदुभिस्तथा ॥
वृत्तदीर्घैस्तनुस्निग्धैरुपेतस्त्वभिपूजितः ।
मृदुकाश्चैकवर्णाश्च स्निग्धा वालाः सुपूजिताः ॥
श्लक्ष्णास्निग्धा न जटिला ह्येकजातास्तथैव च ।
केशपङ्क्तिः शुभा चास्य न ह्रस्वा नापि चोत्थिता ॥
तनु मृदु घनं श्लक्ष्णं दृढमूलं तथैकजम् ।
अविवर्णं च स्निग्धं च रोम चाश्वस्य पूजितम् ॥
शिरोग्रीवान्तरे श्लिष्टौ श्लक्ष्णौ वृत्तौ समाहितौ ।
नोल्बणौ हि तथा चैव विद् वाहस्य पूजितौ ॥
सुबद्धो नोपदग्धश्च तथा च विमलः शुभः ।
ऋजुवृत्तसमश्चैव गलः समशिरस्तथा ॥
कण्ठो वृत्तः समः श्लिष्टः पूजितश्चतुरो हयः ।
ग्रीवा चैव हि सुश्लिष्टा वृत्तसन्धिः समाहिता ॥
उच्चैर्बद्धा च दुर्वृत्ता तथा शिरसि चोद्यता ।
निगाले चापि निर्मांसा मृद्वी सङ्कुचती भृशम् ॥

श्लिष्टमांसा सुबद्धा च तुरगस्य प्रशस्यते ।
स्कन्धस्तु प्रतिसम्पूर्णः श्लिष्टमांसः पृथुस्तथा ॥
बहुमांससमाश्लिष्टः स्थिरमांसश्च पूजितः ।
अंसौ तु पृथुलौ पीनौ श्लिष्टसन्धी समौ स्थिरौ ॥
सुबद्धपीनफलकौ उच्चौ बद्धौ सुपूजितौ ।
उरश्च बहुलोत्तानं प्रतिपूर्णं महत् स्थिरम् ॥
वृत्तं च घनपीनं च श्लिष्टमांसं च पूजितम् ।
वृत्तं समाहितं श्लिष्टं क्रोडमश्वस्य पूजितम् ॥
बाहू दीर्घौ च पीनौ च घनौ वृत्तौ तथा समौ ।
विमुक्तौ चानुपूर्वौ च श्लिष्टसन्धी च पूजितौ ॥
जानुनी च समे वृत्ते निर्मांसे सुस्थिते घने ।
समाहिते प्रतिच्छन्ने समे श्लिष्टे च पूजिते ॥
जङ्घे वृत्ते च दीर्घे च निर्मांसे ऋजुके घने ।
मग्नस्नायुशिराःश्लिष्टे विमुक्ते चाभिपूजिते ॥
कूर्चौ मृदुप्रतिस्तब्धौ वृत्तौ ह्रस्वौ सुसंस्थितौ ।
अस्थूला गूढसन्धिश्च प्रशस्ता तुरगस्य तु ॥
दीर्घा तीक्ष्णप्रतिच्छन्ना कला श्लिष्टा च पूजिता ।
कुष्किका तु समा वृत्ता ह्रस्वा श्लिष्टा समाहिता ॥
ईषन्मध्योन्नता चैव प्रतिच्छन्नशिरास्तथा ।
खुरास्तु बहुलास्तुङ्गा वृत्तह्रस्वा दृढायताः ॥
समुद्गमच्छिष्टपुटाः खरस्येव यथा तथा ।
अवलीकाः समाः श्लिष्टा न खण्डाः स्फुटिताः स्थिराः ॥
एकवर्णाः सिता रक्ताः कृष्णाश्चाप्यभिपूजिताः ।
तलमध्ये तु गम्भीराः शिलातलनिभैः खुरैः ॥
क्षीरिकाभिः सुजाताभिः समाभिस्तु समन्विताः ।

निमग्नह्रस्वमण्डूका विज्ञेयाः खुरसन्धिषु ॥
कठिनाश्चैकवर्णाश्च व्यक्तायःसन्निभा घनाः ।
समाः श्लक्ष्णाः सुजाताश्च पादरोगैर्विवर्जिताः ॥
स्थिरा निरुपदग्धाश्च स्निग्धवर्णास्तु पूजिताः ।
परिपूर्णं समं पीनं ककुदं समामिष्यते ॥
आयतं पृथुलं श्लिष्टं युक्तमांसं च पूजितम् ।
पृष्ठमश्वस्य विनतमीषद्वंशसमुन्नतम् ॥
निचितं च प्रशस्तं स्यात्प्रतिपूर्णं दृढं पृथु ।
दीर्घे च पार्श्वे निश्छिद्रे प्रतिपूर्णे स्थिरे समे ॥
वृत्ते मृदङ्गवच्चैव श्लिष्टमांसे तु पूजिते ।
उदरं वृत्तमुत्स्तब्धं मृगस्योपचितं यथा ॥
अच्छिद्रवृत्तश्लिष्टाल्पसमकुक्षि च पूजितम् ।
जघनं च महावृत्तं चतुरस्रं पृथूरुकम् ॥
संवृतं च समच्छिद्रमुच्चैर्बद्धं च पूजितम् ।
अच्छिद्रे कुक्षिणी चापि समे ह्यश्वस्य पूजिते ॥
रन्ध्रौ न लम्बौ न च्छिद्रौ समावप्यभिपूजितौ ।
पुच्छं न ह्रस्वं वृत्तं च बद्धमुच्चैः समाहितम् ॥
ऋज्वनुवर्तिकं चैव दीर्घवालं च पूजितम् ।
समाहितं सुप्ररोहं मृदु वालं च पूजितम् ॥
मूले निमग्ना दीर्घा च तन्वी वृत्ता च वर्तिका ।
ऋजुस्तु पायुर्गम्भीरो महांश्च संवृतः शुभः ॥
सुश्लिष्टो निर्वलीकश्च तुरगस्याभिपूजितः ।
स्फिक्पिण्डौ हि घनौ चैव समौ वृत्तौ समाहितौ ॥
अपिण्डितौ न विक्षिप्तौ संहतौ चाभिपूजितौ ।
ऋजुः समाहिता श्लक्ष्णा समा दीर्घा च सीवनी ॥

न पिण्डितं न विक्षिप्तं मृदु चोर्वन्तरं शुभम्।
शुभाण्डकोशसंश्लिष्टं तत्र मग्नं च पूजितम्॥
वृषणौ तु समौ ह्रस्वौ वृत्तौ स्निग्धौ समाहितौ।
अरोमशौ न वलिनौ सहितौ चाभिपूजितौ॥
सहितौ परस्परसंलग्नौ।
समाहितः सुजातश्च न लम्बो न च विप्लुतः।
मूत्रकोशः शुभोऽश्वस्य वृत्तः सुश्लिष्टमेहनः॥
मेढ्रं ह्रस्वं मृदु स्थूलं वृत्तं श्लक्ष्णं समं स्थिरम्।
महामुखं चैकवर्णं संवृतं चाभिपूजितम्॥
नाभिर्वृत्ता शुभा स्निग्धा उन्निम्ना चैव पूजिता।
वडवायामवैशेष्यं शृण्वङ्गेष्वधिकं तु यत्॥
ऋज्वी पृथ्वी च ताम्रोष्ठी स्वञ्चिता संवृता घना।
तथा शुभानना ज्ञेया योनिदोषैर्विवर्जिता॥
श्लिष्टमांसाशिरास्नायुपाण्डुपिण्डौ समुन्नतौ।
घनौ वृत्तौ सुजातौ च वहावस्याश्च पूजितौ॥
घनः सुजातो विपुलो न लम्बोऽधः प्रशस्यते।
अधः अधोभागः, वहयोरेव।
घनाः स्थिराः समा वृत्ताः सुतीक्ष्णास्तु शुभाः स्तनाः।
ऋजुनी तु समे वृत्ते प्रतिपूर्णेऽथ साक्थिनी॥
अनुपूर्वे च पूज्येते स्थूले वाप्यायते शुभे।
जङ्घाद्यवयवाश्चैव पूर्वमुक्ता विशेषतः॥
तथैवापरकायस्य बोद्धव्यास्ते गुणान्विताः।
न निम्ना नोल्वणाः श्लिष्टाः सन्धयोऽस्याश्च पूजिताः॥
सुबद्धानि विभक्तानि नोल्वणानि समानि च।
प्रशस्यन्ते समाङ्गानि सुश्लिष्टानि घनानि च॥

यत्किञ्चित्तु भवेदङ्गं गुणैरेतैर्विवर्जितम् ।
दुर्जातं विकृतं हीनमधिकं वा न तच्छुभम् ॥
यथोक्तगुणयुक्ताङ्गा विभक्ताङ्गाः सुसंहताः ।
देशोपचितमांसाङ्गमानोन्मानसमाहिताः ॥
कान्ताः सुरूपाः सुभगा मनोनयननन्दनाः ।
शुभवर्णाद्यविक्षिप्ताः सुबद्धाश्वारुदर्शनाः ॥
समुद्यतशिरःस्कन्धा मृदुश्चितशिरोधराः ।
महावक्षोललाटाश्च महाजघनलोचनाः ॥
ह्रस्वश्रवणमुष्काश्च तन्वायतमुखास्तथा ।
तनुत्वग्रोमवालाश्च सुकेशस्कन्धवाहनाः ॥
मृदुश्चितसमाः स्थूलाः श्लिष्टवंशाः सुकुक्षयः ।
सुसंस्थाना भवन्त्येते सर्वदोषविवर्जिताः ॥
एतैर्गुणैर्विपर्यस्तैर्दुःसंस्थानान् विनिर्दिशेत् ।
दीर्घाणि तु प्रशस्यन्ते पार्श्वं ग्रीवा मुखं विदुः ॥
बाहू जिह्वा च तालुश्च जङ्घा चाष्टौ हयस्य तु ।
प्रोथकर्णौ च पृष्ठं च वृषणौ कुष्किकाः खुराः ॥
गुदं मेढ्रं च ह्रस्वानि पूज्यन्तेऽङ्गानि हि स्थितिः ।
पायुजङ्घादिभागा ये जानुनी खुरकुष्किकाः ॥
वर्तिकोरू च दंष्ट्रा च वंशाङ्गं वृत्तमिष्यते ।
ललाटमासनं नेत्रे स्कन्धौ वक्षस्तथा कटिः ॥
उदरं चेति चाङ्गानि प्रशस्यन्ते पृथूनि तु ।
जिह्वा प्रोथोष्ठसृक्के च बालरोमाणि केसरम् ॥
सूना चेत्यष्ट पूज्यन्ते तनूनि च मृदूनि च ।
दन्ता नेत्रे च वर्णश्च खुराश्चाथ स्वरस्तथा ॥
स्निग्धान्येतानि पूज्यन्ते सदा पञ्चैव वाजिनाम् ।

नासापुटौ पायुमुष्कौ शस्यन्ते परिमण्डलाः ॥
त्रीणि श्रेष्ठानि तीक्ष्णानि कर्णा दन्ताः कलास्तथा ।
खुरास्यं जघनं वक्षो नेत्रे नासापुटे तथा ॥
षडेतानि तुरङ्गाणां शुभानि सुमहान्ति च ।
सक्थिनी च हनू कण्ठस्त्रितयं शुभमायतम् ॥
संवृतं त्रयमिष्टं तु शिश्नमास्यं च पायु च ।
खुराश्च तालुः पायुश्च गम्भीरं पूजितं त्रयम् ॥
श्रोणाघाटे लालाटं च जानुकूर्चौ च पूजितौ ।
निर्मांसाश्च प्रशस्यन्ते द्विजाः खुरास्तथोन्नताः ॥
यदर्थं तु प्रशस्यन्ते तत्फलं सम्प्रवक्ष्यते ।
अष्टदीर्घो भवेच्छ्रेष्ठः सदा भवति तूर्णगः ॥
अरोगप्रकृतिश्चाष्टह्रस्वो भवति निश्चलः ।
आयुष्मानष्टवृत्तस्तु तेजस्व्यष्टतनुर्भवेत् ॥
एवमष्टमृदुश्चापि तथा सप्तपृथुर्बली ।
पञ्चस्निग्धस्तथाश्वस्तु त्रितीक्ष्णश्चापि वीर्यवान् ॥
सुविनीतश्च मेधावी धृतिमांस्तु त्रिमण्डलः ।
भवेच्च पञ्चनिर्मांसो भारेऽध्वनि च पारगः ॥
षण्महान् सत्त्वसम्पन्नः शीलवांस्तु तुरङ्गमः ।
शरीरं पूजितं यस्य रूपलक्षणचेष्टितैः ॥
तस्य सत्त्वमपि श्रेष्ठं विपरीतैर्विपर्ययः ।
शरीरं सत्त्वमित्येतदन्योन्यमतिसंश्रितम् ॥
अतः सम्यक् बहुविधा वक्ष्यन्ते सत्त्वजा गुणाः ।
महाबुद्धिरसम्मोहः शौचशौर्यविचेष्टितैः ॥
औदार्यं च बुधत्वं च कर्मस्वभिरतिः सदा ।
सौमनस्यमसन्तापः शीलवृद्धिः स्मृतिर्धृतिः ॥

शुश्रूषा भावमानं च ग्रहणं चारणं तथा ।
आत्मनोऽध्यवसायश्च सर्वकर्मसु नित्यदा ॥
प्रतिपत्तिरिति ज्ञेया ह्यानां सत्त्वजा गुणाः ।
तीक्ष्णता शौर्यता शौचदक्षताध्यवसायता ॥
अविषाद इति ज्ञेया ह्यानां सत्त्वजा गुणाः ।
सत्त्वस्य ज्ञापना चैवंविधा स्यात्तु शुभाशुभा ॥
दृष्ट्वैकरूपं जानीयात्संस्थानेन बलेन च ।
एवंविधशरीरा ये मानोन्मानसमाहिताः ॥
यशोऽर्थकुलरत्नानां स्वामिनस्ते विवर्द्धनाः ।
विपरीतगुणास्त्वन्ये भर्तुः सर्वार्थहारकाः ॥ इति ।

इति प्रत्यवयवलक्षणम् ।

अथ पुष्पलक्षणम् ।

शालिहोत्रे,

सुश्रुतः श्रुतसम्पन्नं शालिहोत्रमपृच्छत ।
बहुवर्णानि पुष्पाणि पश्याम्याचार्य वाजिषु ॥
तेषां धन्यमधन्यं च पुष्पमिच्छामि वेदितुम् ।
किञ्चाचार्य शरीरस्थं पुष्पमित्यभिधीयते ॥
एवं पृष्टो महाचार्यः शालिहोत्रोऽभ्यभाषत ।
विवर्णा बिन्दवो नूनं ये भवन्ति शरीरजाः ॥
अव्यक्तरूपाः सूक्ष्माश्च तेऽश्वानां पुष्पसंज्ञिताः ।
वर्णे सवर्णं पुष्पं तु पुष्पत्वादुपलक्षयेत् ॥
स्नेहाद्रौक्षात्प्रसादाच्च रोमसंहननेषु च ।
स्निग्धेष्वेतानि पुष्पाणि खुरेष्वपि तथैव च ॥
प्रसादः अतिस्वच्छता । रोमसंहननेषु रोमसङ्घातेषु ।

धन्या धन्यतमं कुर्युः पुत्रोत्पत्तिं च स्वामिनः ।

धन्याः वक्ष्यमाणप्रदेशविशेषविद्यमानपुष्पा अश्वाः, ते भर्तुर्धनाद्यागमं कुर्युः । तानेवाह—

प्रपाने त्वन्नपानाय प्रोथे शत्रुवधाय च ।
ललाटे धनलाभाय भ्रुवो राज्यविवृद्धये ॥
सृक्किण्योश्चिबुके चैव विज्ञेयस्त्वन्नपानदः ।
भर्तुः शुभाभिकाङ्क्षी च धनधान्यसुखावहः ॥
देहं विवर्द्धयेत्तस्य निधिलाभश्च दृश्यते ।
प्रशस्तानि यथोक्तानि निन्दितानि यथा शृणु ॥
घोणाश्रये शस्त्रमृत्युर्गण्डे पुत्रवधः स्मृतः ।
गलमध्ये भयान्यस्य आधत्ते शङ्खयोः क्षयम् ॥
उपसर्गोऽश्रुपातस्थे कटघाटागते वधः ।
भोजनाच्छादनं वित्तं स्यान्निगाले तु पुष्पिते ॥
सव्ये कर्णे सुतोत्पत्तिर्मित्रवृद्धिस्तु दक्षिणे ।
वामक्रोडोरुस्कन्धेषु पुष्पितेषु धनागमः ॥
दारान् पुत्रांश्च लभते कर्णे पुष्पं तु यस्य तु ।
अंसयोः पुत्रलाभाय तथा स्यात्पक्षवृद्धये ॥
जान्वोस्तु कुलघाताय बाह्वोः शत्रुवधाय च ।
कुक्षिकक्षापथे मृत्युर्मध्यग्रीवोष्ठयोर्वधः ॥
स्कन्धे धनागमं विद्यात्केशान्ते मित्रवर्धनम् ।
रन्ध्रयोः पुष्पिते वाहे वित्तं भर्तुः प्रवर्तते ॥
हृच्छोको वधबन्धौ च हृदये पुष्पिते हये ।
वामे तु पुष्पिते पार्श्वे स्त्रीलाभं स्वामिनो विदुः ॥
किणे वित्तक्षयं विद्यात्सौभाग्यमपि चोरसि ।
पृष्ठे स्थानं समृद्धिं च उदरे क्षुद्भयं तथा ॥

मुष्कयोः पुष्पिते वाहे पुत्रोत्पत्तिं विनिर्दिशेत् ।
नाभ्याश्रये व्याधिपीडां जघने दारदूषणम् ॥
अपाने वालमूले च सर्वद्रव्यविनाशनम् ।
जङ्घयोः पुष्पिते बन्धस्तथा च गलकूर्चयोः ॥
स्त्रीषु दोषं विजानीयान्मूत्रकोशे तु पुष्पिते ।
स्फिग्देशे पुष्पिते वाहे तीव्रं भर्तृभयं भवेत् ॥
तथैव कुलनाशश्च भवेदेतेन वाजिना ।
सर्वाङ्गपुष्पितो वाजी भर्तुः सर्वार्थसाधकः ॥
मित्रवृद्धिकरो धन्यो यशोदः कुलवर्धनः ।
कर्के श्वेतानि धन्यानि सवर्णानि तथा पुनः ॥
पीतकेषु च सङ्ग्रामो बालार्कसदृशेषु च ।
कृष्णेषु युद्धं विद्यात्तु यातुश्चापभयं युधि ॥
तीव्रं भर्तुर्भयं विद्याद्रूक्षेषु विषमेषु च ।
पुष्पेषु पुष्पमश्वस्य धूम्रवर्णानुवर्णजम् ॥
राजा प्रभ्रश्यते स्थानाद्राष्ट्रकोपश्च जायते ।
श्वेते श्वेतानि चात्यर्थं स्निग्धानि च समानि च ॥
पुष्पाणि शस्तरूपाणि राज्यलाभाय निर्दिशेत् ।
स राजा राज्यमाप्नोति पुत्रपौत्रैश्च वर्द्धते ॥
सत्त्वानां च प्रशस्तानामायुधानां रणेषु च ।
तथा ध्वजपताकानां वेदियूपाकृतीनि च ॥
नन्द्यावर्त्तचतुष्काणां तथा शङ्खाकृतीनि च ।
पुष्पाणि शस्तरूपाणि वर्णाद्वर्णोत्तमानि च ॥
स्निग्धानि समरूपाणि प्राङ्मुखानि च वाजिनाम् ।
तान्याहुर्धनलाभाय भूपैश्चापि मतायते ॥
राज्यमाप्यायते राज्ञः पुत्रपौत्रैश्च वर्द्धते ।

शृगालश्वानकाकानामाकृतीनि च यानि च ॥
विविधानां च सत्त्वानामप्रशस्ताकृतीनि च ।
विवर्णानि विकीर्णानि रूक्षाणि विषमाणि च ॥
दुःसंस्थितानि यानि स्युस्तथा पश्चान्मुखानि च ।
तानि राष्ट्रविनाशाय राज्यभ्रंशकराणि च ॥
विनाशयन्ति नृपतेस्तानि कोषं बलं सुतान् ।
यथा क्षेत्रेषु दशधा विभक्तं लक्षणं पृथक् ॥
एवं पुष्पेषु न फलं तच्च विद्यान्निमित्तजम् ।
तस्मान्निमित्तवद्ग्राह्यमादेशश्च निमित्तवत् ॥
एवमुक्तानि पुष्पाणि यथाप्रश्नमशेषतः ।
इति ह स्माह भगवान् शालिहोत्रोऽनुशासनम् ॥ इति ।
तथा,
कृष्णभोगे यथा कृष्णं श्वेते श्वेतं च लक्षयेत् ।
भाति पुष्पं तथा मूर्त्ते तुल्यवर्णेऽपि वाजिनि ॥
श्वेतमेव यदा पुष्पं श्वेतस्याश्वस्य दृश्यते ।
सुतोत्पत्तिर्जयश्चैव यात्रासिद्धिकरश्च यः ॥
भवतीति शेषः ।
सुखी भवेत्तस्य भर्त्ता पुत्रपौत्रैश्च वर्धते ।
रक्तमेव यदा पुष्पं रक्तस्याश्वस्य दृश्यते ॥
महीश्वरो महीं भुङ्क्ते भर्त्ता चारोग्यमाप्नुयात् ।
कृष्णमेव यदा पुष्पं कृष्णस्याश्वस्य दृश्यते ॥
तस्य भर्त्ता वधं तीव्रमाप्य शीघ्रं विनश्यति ।
श्वेतस्य तु यदा रक्तं पुष्पमश्वस्य दृश्यते ॥
तस्य भर्त्ताहवे पृष्ठे क्षिप्रं वध्येत शत्रुभिः ।
श्वेतस्य तु यदा कृष्णं पुष्पमश्वस्य दृश्यते ॥

अचिराद्वधमाप्नोति भर्त्ता तु समरे गतः ।
शोणस्य तु यदा श्वेतं पुष्पमश्वस्य दृश्यते ॥
कीर्त्तिं भर्त्ताऽस्य लभते समरे शस्त्रविक्षतः ।
कृष्णस्य च यदा रक्तं पुष्पमश्वस्य दृश्यते ॥
तस्यापि समरे भर्त्ता लभते कीर्तिमुत्तमाम् ।
यानि सन्धिषु दृश्यन्ते तथा मर्मसु वाजिनाम् ॥
अल्पस्नेहानि पुष्पाणि निन्दितान्येव तानि तु । इति ।
जयदत्तकृते तु विशेषः ।
रक्तं पीतं तथा कृष्णं पुष्पं सर्वत्र नेष्यते ।
सर्वाङ्गपुष्पितोऽवश्यं परित्याज्यो न संशयः ॥ इति ।
अश्व इत्यनुषङ्गः ।

इति पुष्पलक्षणम् ।

अथ पुण्ड्रलक्षणम् ।

पुण्ड्रस्तिलकः ।
शालिहोत्रे,
प्रपानोर्ध्वं स्रुवाधस्तात् श्वेतं श्वेततरं तु यत् ।
तत्पुण्ड्रमिति विज्ञेयं तस्य संस्थानतः फलम् ॥ इति ।
जयदत्तकृते अश्वायुर्वेदे,
अत ऊर्ध्वं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम् ।
आनुपूर्व्या यथोद्दिष्टं मुनिभिश्चार्थवेदिभिः ॥
शुक्तिशङ्खगदापद्मखड्गचक्राङ्कुशोपमः ।
शिरोललाटवदनं यः पुण्ड्रो व्याप्य तिष्ठति ॥
स धन्यः पूजितो नित्यमल्पश्चापि हि यो भवेत् ।
पर्वतेन्दुपताकाभा ये च स्निग्धाः समाश्रिताः ॥

ते सर्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः ।
इति पुण्ड्राः समाख्याताः पूर्वशास्त्रानुसारतः ॥
अशुभांश्चैव वक्ष्यामि यथायोगं समासतः ।
काककङ्कबन्धाहिगृध्रगोमायुसन्निभाः ॥
असिताः पीतका रक्ताः पुण्ड्रका न च पूजिताः ।
तिर्यग्गता विचित्राश्च शृङ्खलापाशशोभिताः ॥
शूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभाः स्मृताः ।
स्निग्धकृष्णातिरूक्षाणि भस्मवर्णनिभानि च ॥
पुण्ड्रकाणि विनाशाय भिन्नवर्णानि वाजिनः । इति ।

शालिहोत्रे,

चतुरस्रं पुण्ड्रं नृपतेर्भूमिलाभाय निर्दिशेत् ।
खड्गः शङ्खो धनुर्वज्रं लाङ्गलं मुशलं गदा ॥
ध्वजः पताका शक्तिर्वा यस्य पुण्ड्रेऽङ्कितं भवेत् ।
सोऽश्वो राजेन्द्रवाह्यः स्याद्विज्ञेयो विजयावहः ॥
तमारुह्य नृपः श्रेष्ठः सर्वानरिगणान् जयेत् ।
यशः पुत्रांश्च पौत्रांश्च वित्तं चाप्यस्य वर्धते ॥ इति ।

इति पुण्ड्रलक्षणम् ।

अथ ललामलक्षणम् ।

शालिहोत्रे,

ललाटमध्ये यच्छ्वेतं तारारूपमिवोत्थितम् ।
ललाममिति विज्ञेयं तद्भर्तुर्भाविसूचकम् ॥
धन्यधन्यानि वक्ष्यामि ललामानि हयेष्विह ।
अश्वेतस्य ललाटस्थं श्वेतं यस्य ललामकम् ।
पुण्ड्रवच्चापि विज्ञेयं ललामेष्वथ लक्षणम् ॥
भूयश्च स्थानसंस्थानाद्विशेषैस्तु शुभाशुभम् ।

प्रवक्ष्यामि ललामेषु तच्छृणुष्व यथाक्रमम् ॥
चन्द्रार्धचन्द्रवज्राभं सूर्यभद्रासनं क्वचित् ।
वर्म्मभाराकृति चापि ललामं यस्य वाजिनः ।
तस्य भर्ता लभेद्राज्यं पुत्रपौत्रैश्च वर्द्धते ॥
नन्द्यावर्त्ताकृतिनिभं कूर्मपृष्ठनिभं तथा ।
ललामं तत्प्रभावस्तु यातुः सौभाग्यवर्द्धनम् ॥
हयस्य तस्य भर्त्ता तु प्रभूतं धनमाप्नुयात् ।
यश्च मध्यललामोऽश्वो भर्तुर्मिष्टाशनो भवेत् ॥
गजाश्ववालवृषभपशूनां सदृशाकृति ।
ललामं यस्य वाहस्य सोऽश्वः स्थाप्यो रणेऽग्रतः ॥
चतुरङ्गसहः श्रीमान् पुत्रपौत्रविवर्द्धनः ।
ललाटमध्योपरि यच्च दक्षिणभागिकम् ॥
ललामं तत्प्रशस्तं तु यातुः सौभाग्यवर्द्धनम् ।
इत्युक्तानि प्रशस्तानि शृण्वधन्यानि यानि तु ॥
ललामं च काकपदं तथा गोमेदकाकृति ।
तस्य भर्त्ता दुःखी भूत्वा सहाश्वेन विपद्यते ॥
विच्छिन्नानि विवर्णानि अर्द्धानि च तनूनि च ।
विमिश्राण्युपदग्धानि यानि दुःसंस्थितान्यपि ॥
अव्यक्तानि विवर्णानि परुषाण्याविलानि च ।
तानि वित्तविनाशाय ललामानि विनिर्दिशेत् ॥
इति ह स्माह भगवान् शालिहोत्रोऽनुशासनम् ॥ इति ।

इति ललामलक्षणम् ।

अथावर्त्तलक्षणम् ।

जयदत्तकृते अश्वायुर्वेदे,
अतः परं प्रवक्ष्यामि आवर्त्तानां विनिश्चयम् ।

शुभाशुभविवेकाय यथा शास्त्रे व्यवस्थितम् ॥
विंशतिस्तु शुभा प्रोक्ता षण्णवत्योऽशुभाः स्मृताः ।
उत्तरोष्ठे प्रपानं स्यात्तत्रावर्त्तः शुभावहः ॥
सृक्किण्योश्च तथा प्रोक्ताः सर्वकामफलप्रदाः ।
त्रयश्चैवाथ चत्वारो वाजिनो यस्य रोमजाः ॥
द्वौ वा ललाटजौ यस्य स तु धन्यतमः स्मृतः ।
आनुपूर्व्याऽवस्थितास्ते वोर्ध्वं ललाटजास्त्रयः ॥
निःश्रेणी नाम सा ख्याता भर्तुः सर्वार्थसाधिनी ।
शिरःकेशान्तयोर्मध्ये स्रुवो नाम्ना विधीयते ॥
तत्रावर्त्तः स्थितोऽश्वस्य भर्तुर्जयविवर्द्धनः ।
घण्टाबन्धसमीपस्थो निगालः कीर्तितो बुधैः ॥
तस्मिन् देवमणिर्नाम रोमजः शुभकृत् स्मृतः ।
कर्णमूले तथा बाह्वोः केशान्ते मस्तके तथा ॥
आवर्ताः पूजिता नित्यं विशेषेण तु मस्तके ।
आवर्त्ता यस्य चत्वारो वाजिनो वक्षसि स्थिताः ॥
एकः कण्ठे भवेत्स्पष्टः स धन्यः सर्वकामदः ।
रन्ध्रे चैव सदा भर्तुः शंसितार्थप्रदो मतः ॥
उपरन्ध्रोद्भवश्चैव रोमजश्चातिपूजितः ।
शङ्खचक्रगदापद्मशक्तिवज्रोपमाश्च ये ॥
विशेषेण शुभाः प्रोक्ता रोमजाः शुभदेशजाः ।
अत ऊर्ध्वं प्रवक्ष्यामि रोमजानशुभोदितान् ॥
भर्तुः क्लेशावहान् सर्वान् धनप्राणापहारकान् ।
नासिकापुटयोर्मध्ये प्रदेशः प्रोथ उच्यते ॥
तत्र भर्तुर्विनाशाय रोमजोऽश्वस्य कीर्तितः ।
ऊर्ध्वं च नासिकाच्छिद्रात्स्वामिनः क्लेशकारकः ॥

गण्डजश्चैव भर्तारं हन्त्यावर्तो दुरासदः ।
अश्रुपातः समुद्दिष्टः प्रदेशश्चक्षुषोरधः ॥
तत्रावर्त्तो भवेद्दीनः स्वामिनः कुलनाशनः ।
अपाङ्गाद् व्यङ्गुले चैव प्रदेशः शङ्ख उच्यते ॥
तस्मिन् भर्त्तुर्विनाशाय भवेद्वाहस्य रोमजः ।
भ्रुवोर्देशे समुद्भूत आवर्त्तो नैव पूजितः ॥
सुहृद्वियोगकृत्स स्याद्भर्त्तुरर्थावसादकः ।
सव्यग्रीवां शिरां विद्यात्तत्रावर्तस्तु कुत्सितः ॥
कक्षयोश्चापि सङ्ग्रामे स्वामिनं वाशु घातयेत् ।
चिबुकस्य समीपस्थो वामदक्षिणभागतः ॥
प्रदेशस्तु हनुर्नाम तत्रावर्त्तो हि दारुणः ।
अधरोष्ठे निगालस्य मध्ये वा गल उच्यते ॥
तत्रावर्त्तः स्मृतो भर्त्तुः सङ्ग्रामे जीवितान्तकृत् ।
कूर्चादष्टाङ्गुलं चोर्ध्वं पार्श्वतश्च कला स्मृता ॥
तत्र भर्त्तुः शराघातैर्जीवितान्तश्च रोमजैः ।
ककुदं वृषभस्येव सुव्यक्तमुपलक्ष्यते ॥
वाजिनो यत्र तत्रस्थ आवर्तस्तु विनाशकृत् ।
ककुदस्य पुरोभागसमीपे वह उच्यते ॥
भर्त्तुः सुतसमेतस्य तस्मिन्नाशाय रोमजः ।
काकसे स तु यस्य स्यादावर्त्तोऽश्वस्य दारुणः ॥
रणे हतः समं भर्त्रा क्रव्यादैः स विलुप्यते ।
क्रोडे चैवासने वापि हृदये यस्य वाजिनः ॥
आवर्त्तः स्वामिघाताय भवत्येव न संशयः ।
पार्श्वयो रोमजौ यस्य स चाश्वो नृपतिक्षयम् ॥
कुर्यादिति शेषः ।

सपक्षं वाशु भर्त्तारं नीहाराम्बु यथाम्बुजम्।
नाशयेदिति शेषः।
कूर्चस्याधःप्रदेशस्तु कुष्टिश्च परिकीर्त्तितः॥
अधन्यस्तत्र वाहस्य जङ्घयोर्जानुनोश्च यः।
नाभिजो मुष्कजश्चैव त्रिकजश्च विशेषतः॥
पुच्छमूलगतश्चापि नैव धन्यः प्रकीर्तितः।
कुक्षौ व्याधिक्षयं याति रोमजाः कुक्षिसम्भवाः॥
पायुत्रिवलिमध्यस्था नैव धन्याः प्रकीर्तिताः।
स्फिचिजः खुरजश्चैव यस्यावर्त्तो हि दारुणः॥
तलावर्त्तश्च तुरगो भर्त्तुः सर्वार्थनाशनः।
शतपादीति विख्यातस्तथा च मुकुलोऽपरः॥
आवर्त्तश्चैव सङ्घातः पादुका चार्धपादुका।
शुक्तिश्चैवावलीढश्च आवर्त्तः कीर्त्तितोऽष्टधा॥
वाजिदेहगतः सम्यक् शुभाशुभनिवेदकः।
शतपादसमाकारः शतपादी प्रकीर्तितः॥
जातीमुकुलसङ्काशो मुकुलः समुदाहृतः।
आवर्त्तो भ्रमितो वालैः सङ्घातो रोमपुञ्जकः॥
पादुका पादुकाकारस्तथा चैवार्धपादुकः।
शुक्तिश्च शुक्तिसंस्थानो रोमभिर्व्यक्तलक्षणैः॥
एतेषामवलीढस्तु अवलीढः प्रकीर्त्तितः।
वालैर्विशेषसंस्थानैर्निर्दिशेन्मतिमान् भिषक्॥
शास्त्रमार्गानुसारेण यथा प्रोक्तं तपोधनैः।
एतेषामेव सर्वेषामावर्त्तानां विचक्षणैः॥
रोमजेति कृता संज्ञा वाजिलक्षणवेदिभिः।
शुभाशुभौ तु यत्र द्वौ तत्रैको न फलप्रदः॥

एकं हेम्ना दहेत्पापं तेन दोषो न दुष्यति । (१)
अथ वा वाजिनो मुख्या जवादिगुणासिन्धवः ॥
दक्ष्वा ग्राह्याः क्रयेणैव दुरावर्त्तस्तु काकुदी ।
श्रीवृक्षो रोमजश्चैव रोचमानस्तथैव च ॥
अङ्गदी मेखली नाम राज्यरत्नप्रदः सदा ।
श्रीवृक्षादिलक्षणमग्रे वक्ष्यते ।
प्रपाने मारुतं विद्याल्ललाटे च हुताशनम् ॥
उरसि चाश्विनौ देवौ चन्द्रसूर्यौ च मूर्द्धनि ।
रन्ध्रे स्कन्दविशाखौ च उपरन्ध्रे हरिहरौ ॥
इत्येवं पूजितास्त्वेते दशावर्तास्तु वाजिनाम् ।
अथैकेन विहीना ये भवेयुरशुभावहाः ॥ इति ।
गणकृते अश्वायुर्वेदे,
आवर्तशुक्तिसङ्घातमुकुलान्यवलीढकम् ।
शतपादी पादुकाऽर्धपादुका चाष्टमी स्मृता ॥
आवर्ताकृतयश्चैता अष्टौ सम्परिकीर्तिताः ।
रूपमासां विशेषेण पुनश्च कथयाम्यहम् ॥
तत्र प्रधानो ह्यावर्त्तः शुक्तिश्चापि शुभा मता ।
शतपादी पादुका च शुक्तिश्चापि षडङ्गुला ॥
पादुकार्धाङ्गुला चैव मुकुलं तद्वदुच्यते ।
विभागोऽङ्गुलमावर्तमानमेषामिति स्मृतम् ॥
तत्र प्रधानो ह्यावर्तः शुक्तिश्चापि शुभा मता ।
श्रीवृक्षो वक्षसि प्रोक्तो ह्यावर्त्तैः पञ्चभिर्भवेत् ॥ इति ।
आवर्त्तौ सक्थिस्थौ शुक्ती वा यस्य वाजिनः स्याताम् ।
प्राप्नोति मिष्टमन्नं भर्त्ता पुत्रांश्च पौत्रांश्च ॥
यस्याश्वस्य भवेतां ललाटजौ द्वौ प्रदक्षिणावर्त्तौ ।

तस्य स्वामी विजयी बहुप्रजो जयति रिपुसैन्यम् ॥
यस्य त्रेताग्निनिभाः प्रदक्षिणा वै त्रयो ललाटस्थाः ।
तस्य स्वामी विजयी सन्तिष्ठति मूर्ध्नि शत्रूणाम् ॥
निःश्रेणी यस्य भवेत्त्रिभिरावर्त्तैर्ललाटमध्ये तु ।
राजा तेनाश्वेन च लभते विजयञ्च धनधान्यम् ॥
सव्यावर्तैर्वाजी चतुर्दिक्षु संस्थितैर्ललाटे तु ।
कुरुते स्वामिनमचिरान्महीपतिं पुत्रवन्तञ्च ॥
आवर्तो मुकुलो वा स्रुवप्रदेशे प्रदक्षिणो यस्य ।
तस्य तुरगस्य भर्ता सङ्ग्रामे जयति रिपुसैन्यम् ॥
आवर्त्तौ वृषभाख्यौ ज्ञेयौ तुरगस्य कर्णमूलस्थौ ।
ताभ्यां स्वामी विजयी लभतेऽलङ्कारनिकरांश्च ॥
आवर्तस्तु निगाले देवमणिः सर्वकामदश्चासौ ।
राष्ट्रसुतकोशसम्पत्सौख्यानि ददाति विजयञ्च ॥
आवर्त्तो हन्त्यशुभानाग्रिमकाये ककुद्भवं मुक्त्वा ।
तत्रारूढो नृपतिर्जयति रणे शत्रुसैन्यानि ॥
यस्योपरन्ध्रभागे क्षेमावर्तः प्रजायते श्रीमान् ।
तस्य स्वामी विजयी रणमूर्ध्नि भवति शत्रूणाम् ॥
आवर्तः कण्ठस्थः शुक्तिर्वा रोचमान इत्युक्तः ।
राज्ञस्तेनाश्वेन तु कोशो मित्राणि वर्द्धन्ते ॥
रोचमानस्तु पूर्वार्द्धे निःश्रेणी शिरसि स्थिता ।
पश्चार्द्धे मेखली सर्वानशुभान् हन्ति रोमजः ॥
वेल्लान्तयोश्च शुक्ती द्वे तुरगस्य दृश्येते ।
तस्य स्वामी विजयी वर्द्धते पुत्रपौत्रैश्च ॥
आवर्ता वर्ष्मस्थाश्चतसृष्वपि दिक्षु यस्य चत्वारः ।
कण्ठे च रोचमानः सोऽश्वः श्रीवत्सकी नाम ॥

तेनाजौ रिपुसैन्यं विजित्य विनिवर्त्तते राजा ।
प्राप्नोत्यर्थान् स्वबलाद्राष्ट्रं सौख्यं यशश्चैव ॥
वक्षसि यस्यावर्त्ताश्चत्वारस्तस्य वाजिनः स्वामी ।
प्राप्नोति रणे विजयं वित्तं निष्कण्टकं राज्यम् ॥
शुक्तयो वक्षसि तिस्रो यस्य स्युः सर्वकामदः सोऽश्वः ।
तेनासौ विजितारिः स्वस्थो विनिवर्त्तते राजा ॥
बाहोर्यस्यावर्तौ शुक्ती वा सोऽङ्गदी हयः प्रोक्तः ।
प्राप्नोति तस्य भर्त्ता रत्नान्याभरणनिकरांश्च ॥
आवर्त्तौ रन्ध्रोपरि यस्य स्तो मूर्ध्नि मेखली नाम ।
तेनैश्वर्यं भवति हि पुत्राः पौत्राश्च वर्द्धन्ते ॥
एते शुभाः प्रशस्ताः सप्तत्रिंशद्रोमजाः कथिताः । इति ।
शालिहोत्रेऽपि,
आवर्त्तस्त्वधरोष्ठस्थः स्वामिनो मातृघातकः ।
स्वामिनः पितरं हन्यात्प्रपानोपरि दक्षिणः ॥
वामे भ्रातृवधं विद्याद्धर्त्तारमुपसंस्थिते ।
प्रोथाऽऽवर्त्ती प्रोथयति भर्तारं सकुलं दहन् ॥
नासापुटस्थावावर्तौ भर्तुर्वित्तविनाशकौ ।
यस्यावर्त्तौ च दृश्येते गण्डयोरुभयोः स्थितौ ॥
स्वामिनं ज्येष्ठपुत्रं वा स खादति तुरङ्गमः ।
आवर्त्तौ चाश्रुपातस्थौ दृश्येते यस्य वाजिनः ॥
नित्याश्रुपतनं विद्यात्कुले यस्येदृशो हयः ।
कूटयोर्यस्य चावर्तौ दृश्येते व्यक्तरूपिणौ ॥
भर्तुः कुलं पातयति यावद्धोत्रपरिग्रहम् ।
दृश्येते यस्य चावर्त्तौ भ्रुवोर्मध्यगतावुभौ ॥
स हयो भ्रुकुटिर्नाम ज्ञातिमित्रविरोधकृत् ।

शङ्खयोरुभयोर्यस्य दृश्येते रोमजावुभौ ॥
कुलं स भक्षयेत्सर्वं भर्तुर्व्यसनदो हयः ।
मन्यायां हनुचक्रे च पादयोः स्कधसन्धिषु ॥
आवर्त्ता यस्य दृश्यन्ते कक्षावर्त्तितरोमजाः ।
प्राणघाती भवेद्भर्तुः स्कन्धभागकलादिषु ॥
अग्रकर्णाश्रितौ यस्य दृश्येते रोमजावुभौ ।
मन्त्राविश्रावणकृतैर्दोषैर्भर्ता विपद्यते ॥
आवर्त्तौ विदुमर्मस्थौ दृश्येते यस्य वाजिनः ।
नार्थसिद्धिकरो भर्तुर्मर्मावर्त्ती तुरङ्गमः ॥
यस्यावर्त्तः प्रदृश्येत गलमध्ये प्रतिष्ठितः ।
स्वामी तस्याप्यनेत्रश्च नान्नपानस्य भाजनम् ॥
यस्यावर्त्तौ वहस्थौ तु स हयो घातयेद्युधि ।
स्वामिनं चैव नेतारं न च कर्मसु सिध्यति ॥
यस्यावर्त्तस्तु ककुदे ककुदी स प्रकीर्त्तितः ।
भर्त्तारं सान्वयं हन्यात्तथा भर्तुः कुलोद्वहम् ॥
वाहनानां विनाशाय राज्ञो राष्ट्रवधाय च ।
सर्वार्थनाशनं रौद्रं जातमात्रं विवासयेत् ॥
न तं शालासु बध्नीयाद्धयं वैद्यविगर्हितम् ।
अवतीर्य च सङ्ग्रामं स जीवन्नाभिवर्त्तते ॥
हस्तस्पर्शनचक्षुर्भ्यां हरतः परिवर्जयेत् ।
द्विजेभ्यो वा प्रदातव्यः परराष्ट्रेषु वोत्सृजेत् ॥
दृष्ट्वा सूर्यं निरीक्षेत स्पृष्ट्वा स्नायात्सवाससा ।
एषो ह्यावर्तरूपेण धूम्रकेतुरिवोत्थितः ॥
काकसावर्त्तिनोऽश्वस्य वायसैर्भक्ष्यते पतिः ।
नानासत्त्वैरनिष्टैश्च हतसैन्यो रणे हतः ॥

पार्श्वयोर्यस्य चावर्तौ भर्ता तस्य सबान्धवः ।
क्षयमायात्यकाले तु ग्रीष्मकाले यथा जलम् ॥
आसनावर्त्तिनो भर्त्ता शूलेन वधमर्हति ।
पृष्ठजावर्त्तिनो भर्त्ता रणमध्ये ऽस्य वाजिनः ॥
अथ दूषणदूषार्थं क्षिप्रं शस्त्रेण वध्यते ।
यस्यावर्त्तस्तु दृश्येत क्रोडमध्ये प्रतिष्ठितः ॥
भर्त्तारं सपरीवारं रणे सोऽश्वस्तु घातयेत् ।
नासावर्ती स्खलन् सङ्ख्ये द्विषत्सैन्ये समाकुलः ॥
राजचौराग्निदंष्ट्रैश्च कुलं भर्त्तुर्विनाशयेत् ।
सङ्ख्ये सङ्ग्रामे । दंष्ट्रैर्व्याघ्रादिभिर्दंष्ट्रिभिः ।
तत्र विद्धि महादोषं जान्वावर्त्तस्तुरङ्गमः ॥
स पातयति भोगाच्च स्थानाच्च वसुधाधिपम् ।
जङ्घयोरुभयोर्यस्य दृश्येते रोमजावुभौ ॥
निगडैर्बध्यते तस्य भर्ता तु सह बान्धवैः ।
कुष्किकावर्तिनोऽश्वस्य भर्त्ता वध्येत संयुगे ॥
सततं बहुभिः क्लिष्टो व्यसनैरतिदारुणैः ।
हृदयावर्त्तिनोऽश्वस्य हृच्छोकपरिपीडितः ॥
वधबन्धपरिक्लिष्टः सान्वयस्तु विनश्यति ।
भर्तेति शेषः ।
हयस्तु कक्षसंसिद्धः सङ्घाते वध्यते परैः ॥
स हयो यस्य भर्तास्य स्वस्तिमान्न निवर्त्तते ।
कक्षसंसिद्धः कक्षावर्तः । सङ्घाते सङ्ग्रामे ।
एककक्षोऽल्पदोषस्तु गर्हितश्चोभयोः स्मृतः ॥
उभयोः कक्षयोरावर्ते उक्तः सम्पूर्णो दोषः, एकत्रालप
नाभ्यामावर्तरूपं तु दृश्यते यस्य वाजिनः ।

भर्त्ता तस्य ससन्तानो व्याधिभिः पीड्यते भृशम् ॥
आवर्त्तौ मूत्रकोशस्थौ भर्तुर्दारिद्र्यदूषणौ ।
बहुप्रजा न चायुष्यं यस्यावर्त्तौ तु मुष्कजौ ॥
त्रिकावर्तिनमास्थाय सङ्ग्रामे यो व्रजेन्नरः ।
सशल्यस्त्यजति प्राणान् सादी स च सहायवान् ॥
आवर्तौ पुच्छमूलस्थौ दृश्येते यस्य वाजिनः ।
कुलघाती भवत्येव नात्र कार्या विचारणा ॥
वायुप्रदेशे कुक्षौ च सीवनीभागमाश्रितः ।
कुक्षिव्याधिकरो भर्तुः क्वचिन्न च सुखावहः ॥
स्फिक्पिण्डयोरुपरिजौ यस्यावर्त्तौ तु वाजिनः ।
स पिण्डपाती विज्ञेयो भर्तृघ्नः कुलनाशनः ॥
स्थूलावर्ती च यो वाजी नित्यमध्वनि पूज्यते ।
शस्त्रवध्यो भवति च सह भर्त्रा तुरङ्गमः ॥
जङ्घादिभिः पूर्वमुक्तं व्याख्यातं पृष्ठतः फलम् ।
इत्यप्रशस्ता व्याख्याताः प्रशस्तानपरान् शृणु ॥
ललाटे यस्य चावर्त्तौ समौ स्यातां प्रदक्षिणौ ।
सङ्ग्रामे तेन जयति पुत्रपौत्रैश्च वर्धते ॥
प्रदक्षिणाः प्रमाणस्थास्त्रयो यस्य ललाटजाः ।
नैकाकृतिविशेषास्तु अग्निहोत्रनिभास्तथा ॥
नैकाकृतिविशेषाः सदृशाकृतयः ।
क्षत्रियस्तादृशं लब्ध्वा शत्रूणां मूर्ध्नि तिष्ठति ॥
यज्ञांश्चैव समाधत्ते विपुलान् भूरिदक्षिणान् ।
ललाटे यस्य दृश्येत पङ्क्तिरूर्ध्वायिता समा ॥
त्रिभिः प्रदक्षिणावर्तैर्निःश्रेणीत्याभिसंज्ञिता ।
तया तु निःश्रेणिकया जयेद्राजा रिपून् रणे ॥

नित्यं हि विजयश्चैव स्वचक्रं चास्य वर्तते ।
धनधान्यसमृद्धिं च तेनाश्वेन समाप्नुयात् ॥
ललाटे यस्य चावर्ताश्चत्वारः स्युश्चतुर्दिशम् ।
नापसव्याः समा व्यक्ताश्चतुरङ्गेति तं विदुः ॥
तेन राजा विजयते निःसपत्नां वसुन्धराम् ।
रणे च विजयी नित्यं वसुमान् पुत्रपौत्रवान् ॥
आवर्त्तो मुकुलो वापि स्रुवे यस्य प्रदक्षिणः ।
यस्तेन याति सङ्ग्रामं जित्वा शत्रून्निवर्त्तते ॥
आवर्तौ कर्णमूलस्थौ दृश्येते यस्य वाजिनः ।
वृषभाविति तौ ज्ञेयौ भर्त्तुरीप्सितकामदौ ॥
अलङ्कारैश्च भर्त्तास्य वर्धते पुत्रपौत्रवान् ।
आवर्त्तस्तु निगालस्थो सुव्यूहः सुप्रदक्षिणः ॥
स वै देवमणिर्नाम सर्वकामार्थसाधकः ।
निहन्ति चाशुभान् सर्वानावर्त्तान् पूर्वकायजान् ।
तमारुह्य नृपः सङ्ख्ये लभते शाश्वतं पदम् ॥
कण्ठे ह्यथाऽऽयता शुक्तिरावर्त्तो वापि यो भवेत् ।
स रोचमानो विज्ञेयो भर्त्तुर्मित्राविवर्द्धनः ॥
केशान्ते यस्य शुक्ती द्वे ऊर्ध्वे प्राचीनमायते ।
क्षत्रियस्तेन जयति पुत्रपौत्रैश्च वर्धते ॥
यस्यावर्त्तास्तु दृश्यन्ते वक्षःस्थाः सुस्थितास्त्रयः ।
प्रदक्षिणा व्यक्तरूपाः शुक्तयो वाङ्गरोमजाः ॥
भर्ता तस्य रणे शत्रून् जित्वा स्वस्थो निवर्तते ।
बाहुजौ यस्य चावर्त्तौ शुक्ती स्यातां हयस्य तु ॥
सोऽङ्गदी नाम तुरगो भर्त्तुराभरणप्रदः ।
रन्ध्रयोरुपरिष्टात्तु यस्यावर्तौ प्रदक्षिणौ ॥

स मेखली वर्धयते कोष्ठागारं बसूनि च।
वित्तं चाप्यायते तस्य पुत्रपौत्रैश्च वर्धते॥
श्रीवृक्षः स्वस्तिकं पद्मं वर्द्धमानगदाध्वजाः।
नन्द्यावर्तो हलं चक्रं शङ्खो वज्रमसिर्धनुः॥
मत्स्यश्चन्द्रोऽर्धचन्द्रो वा पताका मुशलं तथा।
एवमाद्याः शुभावर्त्ता दृश्यन्ते यस्य वाजिनः॥
वक्षसि स्युर्ललाटे वा राज्ञो राज्यमवापयेत्।
इत्यावर्ताः प्रशस्ताः स्युर्व्याख्याता निन्दिताश्च ये॥ इति।

इत्यावर्तलक्षणम्।

अथ महादोषलक्षणम्।

विष्णुधर्मोत्तरे,
पुष्कर उवाच।
अश्वानामृषिभिः प्रोक्ता महादोषा भृगूत्तम।
यैरन्विताः परित्याज्यास्तान्मे निगदतः शृणु॥
हीनदन्तोऽधिदन्तश्च कराली कृष्णतालुकः।
कृष्णजिह्वश्च यमजो जातमुष्कश्च यस्तथा॥
द्विशफश्च तथा शृङ्गी त्रिकर्णी व्याघ्रवर्णकः।
खरवर्णो भस्मवर्णो जातवर्णश्च काकुदी॥
श्वित्री च काक्षसादी च खरसारस्तथैव च।
वानराक्षः कृष्णसटः कृष्णमुष्कस्तथैव च॥
कृष्णप्रोथश्च मूकश्च यश्च तित्तिरसन्निभः।
विषमश्वेतपादस्तु ध्रुवावर्तविवर्जितः॥
अशुभावर्त्तसंयुक्तो वर्जनीयस्तुरङ्गमः।
ध्रुवावर्त्तलक्षणमुक्तम्—

तत्रैव,

रन्ध्रोपरन्ध्रयोर्द्वौ द्वौ द्वौ मस्तकवक्षसोः ।
प्रपाने च ललाटे च ध्रुवावर्त्ता दश स्मृताः ॥
एकोऽपि न भवेद्यस्य ध्रुवावर्तस्तु वाजिनः ।
न तं शंसन्ति धर्मज्ञास्तस्मात्तं परिवर्जयेत् ॥ इति ।

विशेषस्तु जयदत्तकृते अश्वायुर्वेदे उक्तः—

आवर्तो यस्य ककुदे काकुदी स उदाहृतः ।
करालाश्चाधरा दन्ता जायन्ते यस्य चोत्तरे ॥
स करालो इति प्रोक्तो भर्तुः पुत्रादिभक्षकः ।
चतुर्भिः पञ्चभिश्चैव हीनदन्तः प्रकीर्तितः ॥
सप्तभिश्चाष्टभिर्दन्तैर्जातश्चाधिकदन्तकः ।
अङ्गुष्ठपर्वसङ्काशं छागशृङ्गोपमं तथा ॥
जम्बूबदररूपं च तथा चामलकोपमम् ॥
आम्रास्थिसदृशं चापि हरीतक्याः फलोपमम् ।
दग्धचर्मनिभं चापि वालसंस्थानमेव च ॥
कीलं कर्णान्तरे यस्य केशान्ते चापि दृश्यते ।
धौरेयः सर्वपापानां वाहः शृङ्गी स कीर्तितः ॥
एवंविधेन शृङ्गेण शृङ्गी राष्ट्रे न वासयेत् ।

तमिति शेषः ।

एकतो लम्बमानेन मुष्केणैकाण्डसंज्ञकः ।
अत्यन्तोनासमाभ्यां तु ताभ्यां जाताण्ड उच्यते ॥
स्कन्धे वक्षसि बाह्वोश्च अंसदेशे तथैव च ।
अन्यवर्णो भवेद्राजी कञ्चुकी स प्रकीर्तितः ॥
यस्यान्यवर्णा रेखा च पादे कूर्चे च वाजिनः ।
मार्जारपादः प्रोक्तोऽसावधन्यः कुलनाशनः ॥

द्विखुरी गोखुराकारैः खुरैर्ज्ञेयो विचक्षणैः ।
अथ वा त्रिवलीयुक्तैर्निम्नमध्यैश्च निर्दिशेत् ॥
खुरैरित्यनुषङ्गः ।

वृषणाभ्यां सस्तनाभ्यां जातस्तन्यभिधीयते ।
त्रिभिः कर्णैस्त्रिकर्णी च व्याघ्राभो व्याघ्रवर्णकः ॥
एकेनाङ्गेन हीनेन निम्नेन च विशेषतः ।
यमजं वाजिनं विद्याद्वामनं वामनाकृतिम् ॥
वर्णादेकेन पादेन अन्यवर्णेन यो हयः ।
मुशलीति स विख्यातो भर्तुः कुलविनाशनः ॥
अथ चेद्वडवायां तु विरोधमधिगच्छति ।
निगूढवृषणाख्यस्तु सर्वव्याधिकरः सदा ॥
विरोधं यो न वै याति दृष्ट्वाश्वान्मुष्कवर्जितः ।
इन्द्रवृद्धिः स विख्यातो भर्तुः कुलविनाशनः ॥
द्विवर्षं तु समारभ्य यावत्स्यात्पञ्चवार्षिकः ।
दन्तानां मुष्कयोश्चैव सम्भवो वाजिनः स्मृतः ॥
अतः परं न जायन्ते मुष्कौ दन्ताश्च वाजिनाम् ।
अशुभं तु फलं वाच्यमभावेन ततस्तयोः ॥
एतैर्दोषान्विता वाहास्त्याज्या वै भूतिमिच्छता ।
धनप्राणहरा ह्येते बन्धुविग्रहकारकाः ॥
सुरथस्य गतं राज्यं ककुदस्यैव दूषणात् ।
हनुः कञ्चुकिभिः कर्णोऽधिकदन्तैश्च पाण्डवाः ॥
सशृङ्गस्तनदोषेण सुस्तनी सङ्गरे क्षयम् । (?)
जान्वावर्तीयदोषेण पञ्चत्वं रावणो गतः ॥ इति ।

इति महादोषलक्षणम् ।

अथ राजयोग्याश्वलक्षणम् ।

शालिहोत्रे,

शालिहोत्रमृषिं श्रेष्ठं कौरव्यः परिपृच्छति ।
अश्वं कीदृशमारुह्य राजा विजयते महीम् ॥
वृद्धिक्षयौ वा कौ ज्ञेयौ राज्ञो राज्यस्य वा कथम् ।
बलं कोशस्तथा राष्ट्रं वर्द्धते ह्रसते ऽपि वा ॥
कीदृग्लक्षणयुक्तेन मित्रप्रकृतिरञ्जनम् ।
एवं पृष्टस्तु पुत्रेण कौरव्यं प्रत्यभाषत ॥
श्वेतपाटलगौरा ये ये च श्वेतानुवर्णिनः ।
एते यदि भवन्त्यश्वाः कालाक्षफलतालवः ॥
कालैः खुरैः कालवाला यस्य तिष्ठन्ति वेश्मनि ।
एतैश्च राष्ट्रं कोशश्च कोष्ठागारं च क्षीयते ॥
मित्राणि चापरज्यन्ति वित्तं चास्य विनश्यति ।
यो ह्येतैर्याति सङ्ग्रामं स्वस्तिमान्न निवर्तते ॥
कालः कपिलकेशान्तो हयः कापिलवालधिः ।
जह्यादनर्थसम्पन्नं कुलमुत्सादयत्कथम् ॥
शिरोवालाश्च केशाश्च प्रायोऽन्तर्दग्धचर्मवत् ।
गृहमग्निप्रियं तस्य यस्य तिष्ठति वेश्मनि ॥
कपालदग्धवर्णाभो निष्प्रभश्च तुरङ्गमः ।
उलूकपिङ्गलो रौद्रो यस्य तिष्ठति वेश्मनि ॥
वर्तिकात्यर्थदीर्घा च सोत्सादयति तत्कुलम् ।
इत्यप्रशस्ता व्याख्याताः प्रशस्तानपरान् शृणु ॥
अर्कपत्रसवर्णस्य दन्ता ह्याविरलाः समाः ।
लक्षारससमा जिह्वा स्तनौ चोत्तरतालु च ॥
मणिवैडूर्यवर्णे च नेत्रे यस्य नखास्तथा ।

सुयुक्तवाहनो वाहो विषये यस्य तिष्ठति ॥
विषयो देशः ।
कौरव्य पृथिवी तस्य चतुरन्ता ससागरा ।
आज्ञाविनिर्जिता तिष्ठेत् यस्याश्वस्तादृशो भवेत् ॥
न शस्त्रमग्निर्दुर्भिक्षं रोगबन्धमरीभयम् ।
भवेत्तस्मिञ्जनपदे स हयो यत्र गच्छति ॥
सङ्ग्रामे विजयी चैव सर्वकामार्थदः सदा ।
शुक्लपक्षसवर्णस्य यस्य रक्तं भवेच्छिरः ॥
स्निग्धं सर्वसमं चाक्षि नान्यवर्णेन चावृतम् ।
तेन राष्ट्रं च कोशश्च कोष्ठागारं च वर्धते ॥
मित्राणि चानुरज्यन्ते शत्रूंश्चैवाधितिष्ठति ।
गौरो मणिनिभश्चैव श्वेतास्यस्ताम्रतालुकः ॥
बलं कोशोऽर्थमित्राणि प्रजा चैतेन वर्धते ।
यश्चाहवं व्रजेत्तेन सर्वांस्तान्नाशयेदरीन् ॥
श्वेतोऽश्वस्तालुरक्तश्च मध्वक्षो लोहितैः सटैः ।
आवर्तशुद्धं तं वाहं राजा वेश्मनि वासयेत् ॥
तेन राष्ट्रं च कोशश्च कोष्ठागारं च वर्धते ।
यजते चाश्वमेधेन पृथिवीं चानुशासति ॥
कृष्णमेघप्रभो वाजी मेघदुन्दुभिनिःस्वनः ।
कृष्णसर्प इवोदग्रः शुभसत्त्वगतिश्च सः ॥
एतेनानुप्रयातस्य चक्रं तु प्रतिहन्यते ।
शङ्खश्वेतो भवेद्वाजी शङ्खघोषसमस्वनः ॥
सशीलं हंसवद्गच्छेन्नात्यर्थं विनतोन्नतः ।
तेन राष्ट्रं च कोशश्च कोष्ठागारं च वर्धते ॥
मित्राश्चैवानुरज्यन्ति शत्रूंश्चाप्यवतिष्ठति ।

यजते चाश्वमेधेन पृथिवीं चानुशासति ॥
अरिष्टवर्णो विनतस्ताम्रोष्ठस्ताम्रतालुकः ।
पराभूताश्च तिष्ठन्ति शत्रवः कामदो हि सः ॥
पुष्करं पृथिवी माला चन्द्रो वै लाङ्गलं ध्वजः ।
शङ्खः पुङ्खः पताका वा ललाटे यस्य दृश्यते ।
पुष्करं कमलम् ।
सर्वशुक्लानि कौरव्य तस्य पार्थिवलक्षणम् ।
श्वेतपादश्च तुरगः श्वेतजङ्घश्च यो हयः ॥
आनन्दं तं विजानीयात्परराष्ट्रप्रमर्दनम् ।
चक्रं वा यदि वा वज्रमायतं वा धनुर्भवेत् ॥
वर्णान्यत्वेन कौरव्य तस्य पार्थिवलक्षणम् ।
तेन मित्राणि रज्यन्ते कोशो राष्ट्रं च वाजिना ॥
सङ्ग्रामे विजयी चैव कामदस्तुरगोत्तमः ।
एताद्धि लक्षणं राजा एषु वर्णेषु लक्षयेत् ॥
तेषामास्तरणं लेपशिरःस्नानानुलेपनम् ।
अग्रमालाग्रगन्धाश्च भोजनाग्रं तथैव च ॥
देयं नित्यं मुदाश्वेभ्यः कर्त्तव्याश्च प्रदक्षिणाः ।
तुरगाः पूजिताः सम्यग्यस्य तिष्ठन्ति वेश्मनि ॥
वर्धते पुत्रपौत्रैश्च मित्रैः शत्रून् जयत्यथ ।
अङ्गदण्डमनिष्टानि क्षमन्ते पूजिते सदा ॥
पूजयेत्तुरगं तस्माद्राजा नित्यं सुसंहतः ।
देवसत्त्वाश्च बहवो यक्षसत्त्वाश्च वाजिनः ॥
गन्धर्वोरगसत्त्वाश्च तस्मात्तान् पूजयेत्सदा ।
धर्मार्थकामैर्नृपतिं पूजिताः पूजयन्ति ते ॥ इति ।

इति राजयोग्याश्वलक्षणम् ।

अथ रंणसमये शुभाशुभसूचकलक्षणम् ।
नकुलकृते अश्वचिकित्सिते,
सदा सुप्ता भवन्त्येते वाजिनो ये च भूतले ।
जाग्रति सङ्गरे प्राप्ते कर्करस्य च भक्षणैः ॥
प्रबुद्धाः कथयन्त्याशु शुभं वा यदि वाऽशुभम् ।
स्वामिनो ह्यङ्गजैश्चिन्हैस्तद्विज्ञेयं विचक्षणैः ॥
यः सन्नद्धो हयो रावमूर्ध्ववक्त्रं करोति च ।
क्षुराग्रेण लिखेद्भूमिं स शंसति रणे जयम् ॥
यः करोत्यसकृन्मूत्रं पुरीषं चाश्रुमोचनम् ।
स शंसति परां भूतिं न भवेत्तु रणे जयः ॥
निरामिषं निशीथे यो हेषारावं करोति च ।
परचक्रागमाशंसी विज्ञेयो हयपण्डितैः ॥
निरामिषं निर्निमित्तम् ।
पुलकाङ्कितपुच्छो यो जायते भूपतेर्हयः ।
स शंसति ध्रुवं तत्र स्थिरस्यापि प्रयाणकम् ॥
स्फुलिङ्गा यस्य दृश्यन्ते पुच्छतोऽश्वस्य वह्निजाः ।
निर्गच्छतः प्रभोर्नाशं ते वदन्ति निशागमे ॥
स्फुलिङ्गा अग्निकणाः । विशेषान्तरमुक्तम्—
जयदेवकृते अश्वायुर्वेदे,
अतः परं प्रवक्ष्यामि तुरगाणां विभागजम् ।
ज्वलितेन यथाङ्गेन फलं वाच्यं शुभाशुभम् ॥
यदा ज्वलति वाहस्य सर्वगात्रं हुताशवत् ।
तदा विद्यादनादृष्टिमब्दमेकं न संशयः ॥
अन्तःपुरविनाशस्तु मेहने ज्वलिते भवेत् ।
उदरे वित्तनाशस्तु पायौ पुच्छे पराजयः ॥

उत्तमाङ्गे च वक्त्रे च स्कन्धे चैवासने तथा ।
भर्तुर्जयाय वाहानां ज्वलनं यत्र नेत्रके ॥
नूनं ललाटे बाह्वोश्च तथा वक्षसि निन्दितम् ।
तत्रैव ज्वलनं शस्तं यदा नासासमुद्भवम् ॥
यदा व्याधिं विना वाजी ग्रासं त्यजति दुर्मनाः ।
अश्रुपातं च कुरुते तदा भर्तुरशोभनम् ॥
स्वामिनाऽऽरूढमात्रेण दक्षिणं भागमात्मनः ।
तुरङ्गमो यदा नम्येत्तदा भर्तुर्जयो भवेत् ॥
पुच्छं वहन् यदा वाहो वामतो विकिरेद्यदि ।
तदा भर्तुः प्रवासः स्याद्दक्षिणे विजयं तथा ॥ इति ।

इति रणसमये शुभाशुभसूचकलक्षणम् ।

अथ दशालक्षणम् ।

गणकृते अश्वायुर्वेदे,
त्रीणि वर्षाणि मासौ द्वौ दिनानि द्वादशैव हि ।
द्वात्रिंशदायुषोऽश्वस्य तस्यैषा कथिता दशा ॥
आयुषो दशभागेन दशा प्रोक्ता मनीषिभिः । इति ।
जयदेवकृताश्वायुर्वेदे तु विशेषः ।
दशादशकमश्वानां जीवितं परिकीर्तितम् ।
प्रवरं वाजिनामेतद्रक्षणात् सृजतां प्रजाः ॥
वासराः सप्ततिश्चैव वर्षाणाञ्च तथा त्रयम् ।
दशाप्रमाणं वाहानां शालिहोत्रेण कीर्तितम् ॥

अत्र पूर्वं गणकृते द्वादशदिनाधिकमासद्वयसहितवर्षत्रयेणैका दशोक्ता । एवं दशादशकम् । तत्र सर्वमेलने द्वात्रिंशत् वर्षमायुर्भवति । अत्र तु सप्ततिदिनाधिकवर्षत्रयेणैका दशा उक्ता ।

एवं दशादशकमेलने विंशतिदिनन्यूनद्वात्रिंशत् वर्षाणि भवन्ति ।
एवं च दोष इति चेत्, न । अल्पान्तरत्वान्न दोषः ।

प्रथमे प्रथमा चैव द्वितीया च द्वितीयके ।
दशा एवं क्रमेणैव भवेत् क्षेत्रे फलप्रदा ॥

प्रथमे क्षेत्रे प्रथमा दशा फलदा भवेदित्यन्वयः ।

प्रपानादाललाटं तु प्रथमं क्षेत्रमुच्यते ।
ललाटान्मस्तकं यावत् द्वितीयं समुदाहृतम् ॥
ग्रीवास्कन्धावधि क्षेत्रं तृतीयं परिकीर्तितम् ।
उरो जानु तथाऽऽस्यं च ककुदं काकसं तथा ॥
चतुर्थं विहितं क्षेत्रं पञ्चमं चासनं भवेत् ।
कटिं विन्देत षष्ठं च सप्तमं स्फिगुदाहृतम् ॥
स्थूलकौ चाष्टमं क्षेत्रं जङ्घा च नवमं स्मृतम् ।
कूर्चसन्धिः खुरं चैव दशमं परिकीर्तितम् ॥
एवं बुद्धा भिषक् प्राज्ञः सदृशं फलमादिशेत् ।
ककुदावर्त्तिनोऽश्वस्य तथा शृङ्गान्वितस्य च ॥
सर्वकालं समुद्दिष्टं दशा तत्र निरर्थिका । इति ।

इति दशालक्षणम् ।

अथ दन्तैर्वयोज्ञानम् ।

किलक्षणकृतसारसमुच्चये,

द्विधा वयोज्ञानमुशन्ति वैद्या बाह्यं तथाऽभ्यन्तरतो हयानाम् ।
बाह्यं शरीरे बहिरः प्रदिष्टमाभ्यन्तरं दन्तसमुत्थमेतत् ॥
अधस्तथोर्ध्वं तुरगस्य वक्त्रे सन्दंशमग्र्यं विदुरेतयोश्च ।
पार्श्वे स्मृतौ मध्यमकौ क्रमेण दन्तौ तयोरेव च पारिभक्षौ ॥
ऊर्ध्वादधो दन्तयुगं सुजातं मासद्वयेनैव किशोरकस्य ।

आद्यं चतुर्भिश्च तथैव मध्यं मासैस्तथैव क्रमशोऽथ षड्भिः ॥
मासैः शिशोरष्टाभिराद्यदन्तौ श्वेतौ च मध्यौ दशभिश्च मासैः ।
अन्त्यौ रदौ द्वादशभिः क्रमेण प्रोक्तं मुनीन्द्रेण हि तथ्यमेतत् ॥
श्वेता द्विजाः स्युः प्रथमे तु वर्षे तथा द्वितीयेऽपि कषायकास्ते ।
वर्षे तृतीये तु तथोत्थितौ तु सन्दंशकौ तु भवतो हयस्य ॥
वर्षे चतुर्थे पतितोत्थितौ तु स्यातां तु मध्यौ दशनौ तथैव ।
अन्त्यौ तु दन्तौ पतितोत्थितौ तु वर्षे तथा पञ्चमके हयस्य ॥
सन्दंशकेषु त्वथ षष्ठमेऽब्दे स्यात्सप्तमेऽब्दे खलु मध्यमेतत् ।
अन्त्येषु दन्तेषु तथाष्टमेऽब्दे कृष्णान्तरेखा कथिता हयानाम् ॥
आद्ये तु लक्ष्या नवमे तु वर्षे मध्ये रदे वै दशमे तथाब्दे ।
अन्त्ये तथैकादशके तु वर्षे पीता तु रेखा हरिणी प्रदिष्टा ॥
आद्ये तु वै द्वादशके तु वर्षे त्रयोदशे मध्यमकद्विजेषु ।
ज्ञेया तथान्त्येषु चतुर्दशेऽब्दे शुभ्रा तु रेखा दशनाग्रसंस्था ॥
आद्ये तु वै पञ्चदशे तु वर्षे स्यात्षोडशे मध्यमदन्तसंस्थे ।
काचास्तथा सप्तदशे तु चान्त्ये काचानुमानेन विभावनीयाः ।
आद्येषु चाष्टादशके रदेषु एकोनविंशेऽपि च मध्यमेषु ।
अन्त्येषु वै विंशतिमे तथाब्दे स्यान्माक्षिका माक्षिकया समाना ।
आद्येषु दन्तेषु तथैकविंशे द्वाविंशतौ मध्यमकद्विजेषु ।
वर्षे त्रयोविंशतिमे च शङ्खः स्यात्पारिभक्षेषु च शङ्खतुल्यः ॥
वर्षे चतुर्विंशतिमे हयानामाद्येषु मध्यैषु च पञ्चविंशे ।
षड्त्रिंशके भक्षरदेषु छिद्रमुलूखलाख्यं प्रवदन्ति तज्ज्ञाः ॥
सन्दंशयुग्मेषु तु सप्तविंशे मध्येषु लक्ष्यं हि तथाष्टविंशे ।
एकोनत्रिंशे दशनान्तिकेषु मध्येषु चालं चलनात्प्रदिष्टम् ॥
आद्याः सुदन्ताः प्रपतन्ति त्रिंशे मध्यास्ततोऽश्वस्य तथैकत्रिंशे
द्वात्रिंशके ह्यन्तरदाः क्रमेण द्वात्रिंशदायुः कथितं मुनीन्द्रैः ॥

अष्टाङ्गमेतत्कथितं हयानां यो लक्षणं वेत्ति शुभाशुभं वै ।
स वैद्यनाथोऽर्थकरो हि राज्ञां दानेन मानने च सम्प्रपूज्यः॥इति।

वराहोऽपि,

षड्भिर्दन्तैः सितैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः सन्दंशैर्मध्यमान्तैः पतितसमुदितैस्त्रिश्चतुः पञ्चकः स्यात् ।

सन्दंशानुक्रमेण त्रिकपरिगणिताः कालिकापीतशुक्लाः काषामाक्षीकशङ्खावटचलनमतो दन्तपातं च विद्धि॥ इति

इति दन्तैर्वयोज्ञानम् ।

अथ दन्तसङ्ख्या ।

शालिहोत्रे,

उत्तराश्चाधराश्चैव दन्ता द्वादश चाग्रतः ।
दंष्ट्राश्चतस्रो विज्ञेयास्तुरगस्याधरोत्तराः ॥
तथा चैव चतुर्विंशद्भक्षार्थे दशनाः स्मृताः ।
दन्तसङ्ग्रह इत्येष चत्वारिंशक इष्यते ॥ इति ।

नकुलकृते अश्वचिकित्सिते,

अश्वानामेव सर्वेषां दन्ता द्वादश कीर्तिताः । इति ।

इति दन्तसङ्ख्या ।

अथाश्वशालालक्षणम् ।

नकुलकृतेऽश्वचिकित्सिते,

मन्दुरान्ते सदा धार्यो रक्तवर्णो महाकपिः ।
सर्वामयविनाशाय वाजिनां च विवृद्धये ।

मन्दुरा वाजिशाला ।

विष्णुधर्मोत्तरेऽपि,

तुरगार्थे तथा धार्याः प्रदीपाः सार्वरात्रिकाः ।

कुक्कुटान् वानरांश्चैव मर्कटांश्च नराधिपः ॥
धारयेदश्वशालासु सवत्सां धेनुमेव च ।
अजाश्च धार्या यत्नेन तुरगाणां हितैषिणा ॥ इति ।
अत्र श्याममुखरक्तमुखभेदेन वानरमर्कटभेदोऽवगन्तव्यः ।
अजो मेषः । विशेषान्तरमप्यत्रोक्तम् —

गोगजाश्वाविशालासु तत्पुरीषस्य निष्क्रमम् ।
अस्तङ्गते न कर्तव्यं देवदेवे दिवाकरे ॥ इति ।

गणकृते तु विशेषः ।

तित्तिरिमयूरलावकचकोरसितमेषवानरशुकाद्याः ।
उन्मत्तकुक्कुटमथो खलु बिभृयादेवाश्वशालासु ॥
दीपो हयशालायां प्रयत्नतः सार्वरात्रिकः कार्यः ।
प्रभया प्रतिहन्यन्ते रक्षोगणतस्कराद्याश्च ॥ इति ।

इत्यश्वशालालक्षणम् ।

अथाश्वाध्यक्षलक्षणम् ।

विष्णुधर्मोत्तरे,

हयशिक्षाविधानज्ञस्तच्चिकित्सितपारगः ।
अश्वाध्यक्षो महीभर्तुः स्वासनश्च प्रशस्यते ॥ इति ।

इत्यश्वाध्यक्षलक्षणम् ।

इति श्रीमत्सकलसामन्तक्रचूडामणिमरीचिमञ्जरीनीरा-
जितचरणकमल—
श्रीमन्महाराजाधिराजप्रतापरुद्रतनूज—
श्रीमद्[illegible]करसाहसूनु—
चतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासादिनकर—

श्रीमन्महाराजाधिराजश्रीवीरसिंहदेवोद्योजित-
श्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनु-
सकलविद्यापारावारपारीण-
जगद्दारिद्र्यमहागजपारीन्द्र-
विद्वज्जनजीवातु-
श्रीमन्मित्रमिश्रकृते-
वीरमित्रोदयाभिधनिबन्धे लक्षणप्रकाशे
अश्वलक्षणप्रकरणं समाप्तम् ।

अथ शालग्रामशिलामूर्तिलक्षणप्रकरणम् ।

तत्र तावत्

शालग्रामशिलाचक्रं पूजनीयं सदा द्विजैः ।
शालग्रामशिलापूजां विना योऽश्नाति किञ्चन ॥
स चाण्डालादिविष्ठायामाकल्पं जायते कृमिः ।

इत्यादिवचनैः शालग्रामशिलापूजाया नित्यत्वाभिधानात्,

लाञ्छनैर्विविधाकारैर्लाञ्छितं यच्च दृश्यते ।
चक्राङ्कितं हरेश्चापि शालग्रामस्य लक्षणम् ॥
यथायोग्यं विचार्यैव ग्रहीतव्यं प्रयत्नतः ।

इत्यादिवचनैः सुलक्षणानामेव शालग्रामशिलामूर्त्तीनां पूज्यत्वविधानात्,

बद्धचक्राथ वा या स्याद्वग्रचक्रा त्वधोमुखी ।
पूजयेद्यः प्रमादेन दुःखमेव लभेत सः ॥

शेषा तु गर्हिता प्रोक्ता तां गृही तु न पूजयेत् ।

इत्यादिवचनैस्तु दुर्लक्षणमूर्तीनां दुःखदातृत्वेन हेयत्वात्सुलक्षणा एव शालग्रामशिलामूर्तयः पूज्याः। तत्र कानि सुलक्षणानि कानि दुर्लक्षणानीति शालग्रामलक्षणान्युच्यन्ते । तत्रादौ शालग्रामपदं विचार्यते। केचित् शालग्राम इत्यत्र तालव्यं शकारं पठन्ति, केचिच्च दन्त्यसकारम्, तत्र किं युक्तमिति ।

वाराहपुराणे,

मया देवप्रसादेन श्रुतं मन्दारवर्णनम् ।
मन्दारात्परमं स्थानं विष्णोस्तद्वक्तुमर्हसि ॥

इति धरण्या पृष्टे वराह उवाच ।

शृणु तत्त्वेन मे देवि यन्मां त्वं परिपृच्छसि ।
कथयिष्यामि ते गुह्यं शालग्राममिति स्मृतम् ॥

इत्युपक्रम्य शालग्रामतीर्थस्य तत्र विद्यमानानां गण्डक्यादिनदीनां सोमेशादिलिङ्गानां च उत्पत्तिप्रशंसामुक्त्वा—

सालङ्कायनकोऽप्याशु क्षेत्रे तस्मिन् परे मम ।
शालग्रामे महत्तीव्रमास्थितः परमं तपः ॥

इत्यादिना कश्चित्सालङ्कायननामा मुनिः शालग्रामतीर्थे ममाराधनं कुर्वन् महत्तपश्चकार इति वराहरूपी विष्णुर्धरां प्रत्युक्तवानिति पूर्वकथासम्बन्धः । ततः—

भगवन्देवदेवेश सालङ्कायनको मुनिः ।
किं चकार तपः कुर्वन् तव क्षेत्रे विमुक्तिदे ॥
इति पुनर्धरण्या पृष्टे वराह उवाच ।
अथ दीर्घेण कालेन स ऋषिः शंसितव्रतः ।
तप्यमानो यथान्यायमपश्यच्छालमुत्तमम् ॥
अभिन्नमतुलच्छायं विशालं पुष्पितं तथा ।
मनोज्ञं च सुगन्धं च देवानामपि दुर्लभम् ॥
ऋषिर्ज्ञानपरिभ्रान्तः सालङ्कायनकोऽद्भुतम् ।
पश्यते च पुनः शालं शुभानां शुभदर्शनम् ॥
ततो दृष्ट्वा महाशालं परिश्रान्तो महामुनिः ।
विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ॥
शालस्य तस्य पूर्वेण स्थितः पश्चान्मुखो मुनिः ।
मायया मम मूढात्मा शक्तो द्रष्टुं न मामभूत् ॥
ततः पूर्वेण पार्श्वेण तस्य शालस्य सुन्दरि ।
वैशाखमासद्वादश्यां मद्दर्शनमुपागतः ॥
दृष्ट्वा मां तत्र स मुनिस्तपस्वी शंसितव्रतः ।
तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः ॥
ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ।

प्राप्तश्च परमां प्रीतिं तमवोचमृषिं तदा ॥
साधु ब्रह्मन्महाभाग सालङ्कायन सत्तम ।
तपसानेन सन्तुष्टः स्तुत्या चैवानया तव ॥
वरं वरय भद्रं ते संसिद्धस्तपसा भवान् ।
एवमुक्तः स तु मया सालङ्कायनको मुनिः ॥
शालवृक्षं समाश्रित्य निभृतेनान्तरात्मना ।
ततो मां भाषते देवि स ऋषिः शंसितव्रतः ॥
तवैवाराधनार्थाय तपस्तप्तं मया हरे ।

इति तद्वचः समाकर्ण्य तस्मै अभिलषितं वरं दत्त्वा तं प्रत्यहमित्यवोचम्—

अन्यच्च गुह्यं वक्ष्यामि सालङ्कायन तच्छृणु ।
तव प्रीत्या प्रवक्ष्यामि येनैतत्क्षेत्रमुत्तमम् ॥
शालग्राममितिख्यातं तन्निबोध मुने शुभम् ।
योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः ॥
एतत्कोऽपि न जानाति विना देवं महेश्वरम् ।
मायया हं निगूढोऽस्मि त्वत्प्रसादात्प्रकाशितम् ॥
एवं तस्मै वरं दत्त्वा सालङ्कायनकाय वै ।
पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवम् ॥
वृक्षं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ।
मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ॥
शालग्राममितिख्यातं भक्तसंसारमोक्षणम् ।

इत्युपसंहृतम् । एतैश्च वचनैः शालेन वृक्षेण गम्यते ज्ञायते यः पर्वतविशेषः स शालग्रामगिरिस्तीर्थविशेष इत्युच्यते । गम्लृ गताविति्यस्माद्धातोः "अकर्त्तरि च कारके संज्ञायाम्" इति कर्मणि घञ्, पृषोदरादित्वाद्रेफे वृद्धौ च कृतायां ग्राम इति

सम्पद्यते । ततश्च धातूनामनेकार्थत्वात् गमेरपि ज्ञानार्थत्वं युक्तमेव । धातूनामनेकार्थत्वं चोक्तम्—

महाभाष्ये,

वपिः प्रकिरणे दृष्टश्छेदने वापि वर्त्तते । इति ।

अत्र शालशब्दो दन्त्यादिस्तालव्यादिश्च । तत्राद्यः सल गतौ इत्यस्माद्दन्त्यादेर्धातोः सल्यते गम्यते इति कर्मणि घञि वृद्धौ च । सारशब्दाद्वा—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥

इति वार्तिककारवचनात् अतिशायने अर्श आद्यचि कृते रलयोरेकत्वस्मरणात् साल इति । तथा च—

रायमुकुटे,

पुंसि भूरुहमात्रेऽपि सालो वरणसर्जयोः ।

इति दन्त्यादौ रभसादेः ।

सालकाननशोभिनि । इति दण्डी च ।

सालः पादपमात्रे स्यात्प्राकारे सर्जकद्रुमे ।

इति विश्वः ।

सालो वृक्षान्तरे दुर्गे—इत्यनेकार्थः ।

द्वितीयस्तु शल गतावित्यस्माद्धातोः शलति वायुना चलतीति कर्त्तरि "ज्वलितिकसन्तेभ्यो ण" इति णे कृते सिध्यति ।

शालो हाले नृपे मत्स्यप्रभेदे सर्जपादपे ।

इति विश्वः ।

अत्र रायमुकुटे—"अनोकहः कुटः शाल" इत्येतदमरश्लोकव्याख्यानावसरे सल गतौ सालो दन्त्यादिः सलति वायुना चलति "ज्वलितिकसंन्तेभ्यो ण" इति णो वा ।

पुंसि भूरुहमात्रेऽपि सालो वरणसर्जयोः ॥

इति दन्त्यादौ रभसादेरिति यदुक्तम्, तच्चिन्त्यम्। दन्त्यादेः शलधातोश्च ज्वलादावपि पाठादिति। एवं च दन्त्यादिस्तालव्यादिश्च शालशब्दः सिद्धः। ततश्च शालवृक्षोपलक्षितः पर्वतविशेषः शालग्रामतीर्थमिति सिद्धम्। शालग्रामतीर्थपरिमाणं चोक्तम्—

वाराहे,

एतत्ते सर्वमाख्यातं क्षेत्रं गुह्यं वसुन्धरे।
आरभ्य मुक्तिक्षेत्रं तत्क्षेत्रं द्वादशयोजनम् ॥
शालग्रामस्वरूपेण मया यत्र स्वयं स्थितम्। इति।

तत्रोत्पन्नाः शिलाः शालग्रामाभिधानाः। तत्र दन्त्यादिस्तालव्यादिरित्युभयविधोऽपि शालग्रामशब्दप्रयोगः साधीयानिति सिद्धान्तः। ताश्च सर्वा अपि शिलाः पूजने प्रशस्ताः।

तथा चोक्तम्—

वाराहे महादेवेन,

शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः इति।

तत्रैव विष्णुनाप्युक्तम्—

तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः।
शालग्रामे गिरौ तस्मिन् शिलारूपेण तिष्ठति ॥
अहं तिष्ठामि तत्रैव गिरिरूपेण नित्यदा।
तस्मिन् शिलाः समग्रास्तु मत्स्वरूपा न संशयः ॥
पूजनीयाः प्रयत्नेन किं पुनश्चक्रलाञ्छिताः। इति।

चक्रलाञ्छितानां तु प्रशस्ततरत्वं तदन्तर्गततीर्थविशेषोत्पन्नत्वात्। तदप्युक्तं सालग्रामार्थमुक्त्वा—

वाराहे,

गुह्यानि तत्र वसुधे तीर्थानि दश पञ्च च।

नाद्यापि केचिज्जानन्ति मुच्यन्ते यैरिह स्थिताः ॥
तत्र विल्वप्रभं नाम गुह्यं क्षेत्रं मम प्रियम् ।
इत्युपक्रम्य,
चक्रस्वामीति विख्यातं तस्मिन् क्षेत्रे परं मम ।
चक्राङ्कितशिलास्तत्र दृश्यन्ते च इतस्ततः ॥
चक्राङ्कितशिला यत्र दृश्यन्ते वरवर्णिनि ।
तदेतद्विद्धि वसुधे समन्ताद्योजनत्रयम् ॥ इति ।

अत्र गण्डकीनदीजलमध्योत्पन्नाः शालग्रामशिलाः प्रशस्ततमाः । तत्र गण्डक्यां शालग्रामशिलारूपी विष्णुस्तिष्ठतीति हेतुः ।

एतदुपाख्यानञ्च वाराहपुराणे श्रूयते । पूर्वं गण्डक्या महत्तपस्तप्तं तत्तपसा सन्तुष्टो विष्णुर्वरं ब्रूहीति तामाह । ततः सा विष्णुमित्याहेत्यूचे सोमं प्रति देवः । सोमश्चन्द्रः । देवः शङ्करः ।

ततो हिमांशो सा देवी गण्डकी लोकतारिणी ।
प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ॥
यदि देव प्रसन्नोऽसि देयो मां वाञ्छितो वरः ।
मम गर्भगतो भूत्वा विष्णो मत्पुत्रतां व्रज ॥
ततः प्रसन्नो भगवान् चिन्तयामास गोपते ।
किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ॥
दास्यामि याचितं येन लोकानां भवमोक्षणम् ।
इत्येवं कृपया देवो निश्चित्य मनसा स्वयम् ॥
गण्डकीमवदत्प्रीतः शृणु देवि वचो मम ।
शालग्रामशिलारूपी तव गर्भगतः सदा ॥
स्थास्यामि तव पुत्रत्वे भक्तानुग्रहकारणात् ।
मत्सान्निध्यान्नदीनां त्वमतिश्रेष्ठा भविष्यसि ॥
दर्शनात्स्पर्शनात्स्नानात्पानाच्चैवावगाहनात् ।

हरिष्यसि महापापं वाङ्मनःकायसम्भवम् ॥
एवं दत्त्वा वरान्देव्यै तत्रैवान्तरधीयत ।
ततः प्रभृति तिष्ठामः क्षेत्रेऽस्मिन् शशलाञ्छन ॥
अहं च भगवान् विष्णुर्भक्तेच्छोपात्तविग्रहः । इति ।
पाद्मे कार्तिकमाहात्म्ये त्वन्यथैवोपाख्यानं श्रूयते ।

तद्यथा—कश्चिद्वेदशिरा नाम महामुनिर्गङ्गातीरे तीव्रं तपश्चकार ततस्तत्तपसा भीतः शक्रो मञ्जुवागित्यभिधानां कां चिद्देवकन्यां तत्तपोविघ्नार्थं प्रेषितवान । ततः सा महेन्द्रप्रेषिता वेदशिरस-स्तपोविघ्नं कुर्वती क्रुद्धेन तेन मुनिना त्वं नदी भवेति शप्ता । ततस्तया महता प्रयत्नेन विज्ञापितो मुनिस्तामित्यवोचत् ।

तदोवाच मुनिः शान्तो नदीभूत्वा जनार्दनम् ।
स्वोदरे त्वं धारयन्ती कृतकृत्यं जनं कुरु ॥
शालग्रामशिलारूपी त्वयि जातो जनार्दनः ।
त्वद्यशः प्रसरेल्लोके मुक्तिदाता नृणामिह ॥
सैषा वै मञ्जुवाक् देवी गण्डकी सरितां वरा ।
तस्यां विष्णुः शिलारूपी वृन्दाशापाद्भुव ह ॥

इति धूम्रकेशं प्रति यमो व्याजहार । वृन्दाशापोपाख्यानं तु तत्रैव द्रष्टव्यमित्यास्तां तावत्प्रपञ्चेन ।

इति दन्त्यादितालव्यादिशालग्रामपदविचारः ।

अथ शालग्राममाहात्म्यम् ।

पाद्मे माघमाहात्म्ये,
यः पूजयेद्धरिं चक्रे शालग्रामशिलोद्भवे ।
राजसूयसहस्रेण तेनेष्टं प्रतिवासरम् ॥
यदामनन्ति वेदान्ता ब्रह्म निर्गुणमच्युतम् ।

तत्प्रसादो भवेन्नृणां शालग्रामशिलार्चनात् ॥
महाकाष्ठस्थितो वह्निर्मथ्यमानः प्रकाशते ।
अपि पापसमाचाराः कर्मण्यनधिकारिणः ॥
शालग्रामार्चका वैश्य नैव यान्ति यमालयम् ।
न तथा रमते लक्ष्म्यां न तथा स्वपुरे हरिः ॥
सालग्रामशिलाचक्रे यथा स रमते सदा ।
अग्निहोत्रं हुतं तेन दत्ता पृथ्वी ससागरा ॥
येनार्चितो हरिश्चक्रे शालग्रामसमुद्भवे ।
कामैः क्रोधैर्मदैर्लोभैर्व्याप्तो योऽत्र नराधमः ॥
सोऽपि याति हरेर्लोकं सालग्रामशिलार्चनात् ।
यः पूजयति गोविन्दं शालग्रामे सदा नरः ॥
आभूतसंप्लवं यावन्न स प्रच्यवते दिवः ।
विना तीर्थैर्विना यज्ञैर्विना दानैर्विना मखैः ॥
मुक्तिं याति नरोऽवश्यं शालग्रामशिलार्चनात् ।
नरकं गर्भवासं च तिर्यक्त्वं कृमियोनिकम् ॥
न याति वैश्य पापोऽपि सालग्रामेऽच्युतार्चकः ।
दीक्षाविधानमन्त्रज्ञश्चक्रे यो बलिमाहरेत् ॥
स याति वैष्णवं धाम सत्यं सत्यं मयोदितम् ।
नैवेद्यैर्विविधैः पुष्पैर्धूपैर्दीपैर्विलेपनैः ॥
गीतवादित्रस्तोत्राद्यैः शालग्रामशिलार्चनम् ।
कुरुते मानवो यस्तु कलौ भक्तिपरायणः ॥
कल्पकोटिसहस्राणि रमते सन्निधौ हरेः ।
लिङ्गैस्तु कोटिभेदैर्दृष्टैर्यत्फलं पूजितैस्तु तैः ॥
सालग्रामशिलायास्तु एकेनापीह तत्फलम् ।
सकृदप्यर्चितैर्लिङ्गैः शालग्रामशिलोद्भवैः ॥

मुक्तिं लभन्ते मनुजा नित्यं साङ्क्लेयन वर्जिताः ।
सालग्रामशिलारूपी यत्र तिष्ठति केशवः ॥
तत्र देवासुरा यक्षा भुवनानि चतुर्दश ।
सालग्रामशिलायां च यः श्राद्धं कुरुते नरः ॥
शालग्रामशिलाग्रे तु यः श्राद्धं कुरुते नरः । इति पाठान्तरम्।
पितरस्तस्य तिष्ठन्ति तृप्ताः कल्पशतं दिवि ।
शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ॥
तत्र दानं च होमश्च सप्तकोटिगुणं भवेत् ।
सालग्रामसमीपे तु क्रोशमात्रं समन्ततः ॥
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः ।
सालग्रामशिलाचक्रं यो दद्यादानमुत्तमम् ॥
भूचक्रं तेन दत्तं स्यात्सशैलवनकाननम् । इति ।
स्कान्दे कार्तिकमाहात्म्ये श्रीशिवस्कन्दसंवादे,
सालग्रामशिलायां तु त्रैलोक्यं सचराचरम् ।
मया सह महासेन लीनं तिष्ठति सर्वदा ॥
दृष्ट्वा प्रणमिता येन स्नापिता पूजिता तथा ।
यज्ञकोटिसमं पुण्यं गवां कोटिफलं भवेत् ॥
कामासक्तोऽपि यो नित्यं भक्तिभावविवर्जितः ।
सालग्रामशिलां पुत्र सम्पूज्यैवाच्युतो भवेत् ॥
सालग्रामशिलाबिम्बं हत्याकोटिविनाशनम् ।
स्मृतं सङ्कीर्तितं ध्यातं पूजितं च नमस्कृतम् ॥
सालग्रामशिलां दृष्ट्वा यान्ति पापान्यनेकशः ।
सिंहं दृष्ट्वा यथा यान्ति वने मृगगणा भयात् ॥
मनः करोति मनुजः सालग्रामशिलार्चने ।
पापानि विलयं यान्ति तमः सूर्योदये यथा ॥

कामासक्तोऽथ वा क्रुद्धः सालग्रामशिलार्चनम् ।
भक्त्या वा यदि वाऽभक्त्या कृत्वा मुक्तिमवाप्नुयात् ॥
वैवस्वतभयं नास्ति तथा मरणजन्मनोः ।
यः कथां कुरुते विष्णोः सालग्रामशिलाग्रतः ॥
गन्धमाल्यादिनैवेद्यैर्दीपैर्धूपैश्च लेपनैः ।
गीतैर्वाद्यैस्तथा स्तोत्रैः सालग्रामशिलार्चनम् ॥
कुरुते मानवो यस्तु कलौ भक्तिपरायणः ।
कल्पकोटिसहस्राणि रमते विष्णुसद्मनि ॥
सालग्रामे नमस्कारे भावेनापि नरैः कृते ।
भयं नैव करिष्यन्ति मद्भक्तास्ते नरा भुवि ॥
'सालग्रामनमस्कारः शाठ्येनापि यतः कृतः ।
मानवाः किं करिष्यन्ति मद्भक्तास्ते नरा भुवि' ॥ इत्यपि क्वचित्पाठः ।
मद्भक्तिबलदर्पिष्ठा मत्प्रभुं न नमन्ति ये ।
वासुदेवं न ते ज्ञेया मद्भक्ताः पापिनो हि ते ॥
सालग्रामशिलायां तु सदा पुत्र वसाम्यहम् ।
दत्तं देवेन तुष्टेन स्वस्थानं मम भक्तितः ॥
कल्पकोटिसहस्रैस्तु पूजिते मयि यत्फलम् ।
तत्फलं कोटिगुणितं सालग्रामशिलार्चने ॥
पूजितोऽहं न तैर्मर्त्यैर्नमितोऽहं न तैर्नरैः ।
न कृतं मर्त्यलोके यैः सालग्रामशिलार्चनम् ॥
सालग्रामशिलाबिम्बं नार्चितं यदि पुत्रक ।
यो हि माहेश्वरो भूत्वा वैष्णवं लिङ्गमुत्तमम् ॥
द्वेष्टि वै याति नरकं यावदिन्द्राश्चतुर्दश ।
संसारदुःखकान्तारे निमज्जन्ति नराधमाः ॥

वर्षकोटिसहस्राणि कृष्णाराधनवर्जिताः ।
सकृदप्यर्चिते बिम्बे सालग्रामसमुद्भवे ॥
मुक्तिं प्रयान्ति मनुजा नूनं साङ्ख्येन[1] वर्जिताः ।
मल्लिङ्गैः कोटिभिर्दृष्टैर्यत्फलं पूजितैः स्तुतैः ॥
सालग्रामशिलायां तु एकेनापीह तद्भवेत् ।
तस्माद्भक्त्या च मद्भक्तैः प्रीत्यर्थं मम पुत्रक ॥
कर्तव्यं सततं भक्त्या सालग्रामशिलार्चनम् ।
सालग्रामशिलारूपी यत्र तिष्ठति केशवः ॥
तत्र देवासुरा यक्षा भुवनानि चतुर्दश ।
सालग्रामशिलाग्रे तु सकृत् पिण्डेन तर्पिताः ॥
वसन्ति पितरस्तस्य न सङ्ख्या तत्र विद्यते ।
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ॥
चान्द्रायणैश्च तीर्थैश्च पीत्वा पादोदकं शुचिः ।
प्रमाणमस्ति सर्वस्य सुकृतस्य हि पुत्रक ॥
फलं प्रमाणहीनं तु सालग्रामशिलार्चने ।
यो ददाति शिलां विष्णोः सालग्रामसमुद्भवाम् ॥
विप्राय विप्रमुख्याय तेनेष्टं बहुभिर्मखैः ।
मानुष्ये दुर्लभा लोके सालग्रामशिलोद्भवा ॥
प्राप्यते न विना पुण्यैः कलिकाले विशेषतः ।
स धन्यः पुरुषो लोके सफलं तस्य जीवितम् ॥
सालग्रामशिला शुद्धा गृहे यस्य च पूजिता ।
सन्निधम्येन्द्रियग्रामं सालग्रामशिलार्चनम् ॥
यः कुर्यान्मानवो भक्त्या स याति परमं पदम् ।
भक्त्या वा यदि वाऽभक्त्या यः करोति स पुण्यभाक् ॥

---

१ ज्ञानेन ।

द्वेषेणापि च लोभेन दम्भेन कपटेन वा ।
सालग्रामोद्भवं देवं दृष्ट्वा पापात्प्रमुच्यते ॥
अशुचिर्वा दुराचारः सत्यशौचविवर्जितः ।
सालग्रामशिलां स्पृष्ट्वा सद्य एव शुचिर्भवेत् ॥
तिलप्रस्थशतं भक्त्या यो ददाति दिने दिने ।
तत्फलं समवाप्नोति सालग्रामशिलार्चनात् ॥
पत्रं पुष्पं फलं मूलं तोयं दूर्वाक्षताः सुत ।
जायते मेरुणा तुल्यं सालग्रामशिलार्पितम् ॥
विधिहीनोऽपि यः कुर्यात् क्रियामन्त्रविवर्जितः ।
चक्रपूजामवाप्नोति सम्यक्शास्त्रोदितं फलम् ॥
स्कन्धे कृत्वा तु योऽध्वानं वहते शैलनायकम् ।
तेनेष्टं तु भवेत्सर्वं त्रैलोक्यं सचराचरम् ॥
ब्रह्महत्यादिकं पापं यत्किञ्चित्कुरुते नरः ।
तत्सर्वं निर्दहत्याशु सालग्रामशिलार्चनम् ॥
पाद्मे कार्तिकमाहात्म्ये,
सालग्रामशिलायां तु यैर्नरैः पूजितो हरिः ।
संशोध्य तेषां पापानि मुक्तये सिद्धिदो भवेत् ॥
कार्तिके मथुरायां तु सारूप्यं दिशते हरिः ।
दृश्यते हरेरिति पाठान्तरम् ।
सालग्रामशिलायां वै पितॄनुद्दिश्य पूजितः ।
कृष्णः समुद्धरेत्तस्य पितॄन्नेतान् सलोकताम् ॥ इति ।
गरुडपुराणे,
सालग्रामशिला यत्र देवो द्वारावतीभवः ।
उभयोः सङ्गमो यत्र तत्र मुक्तिर्न संशयः ॥
सालग्रामो द्वारका च नैमिषं पुष्करं गया ।

वाराणसी प्रयागं च कुरुक्षेत्रं च पुष्करम् ॥
गङ्गा च नर्मदा गोदा चन्द्रभागा सरस्वती ।
पुरुषोत्तमो महाकालस्तीर्थान्येतानि शङ्कर ॥
सर्वपापहराण्येव भुक्तिमुक्तिप्रदानि वै । इति ।
बृहन्नारदीये यज्ञध्वजोपाख्यानान्ते,
सालग्रामशिलारूपी यत्र तिष्ठति केशवः ।
न बाधन्तेऽसुरास्तत्र भूतवेतालकादयः ॥
सालग्रामशिला यत्र तत्तीर्थं तत्तपोवनम् ।
शतं वा पूजिता भक्त्या तदा स्यादधिकं फलम् ॥ इति ।
तथा च हेमाद्रौ कश्चिद्विशेषः स्मर्यते ।
सूर्यचन्द्रग्रहे प्राप्ते यत्किञ्चित्क्रियते गृहे ।
तीर्थे कोटिगुणं पुण्यं सालग्रामशिलाग्रतः ॥
नित्यं च पुष्करं तत्र प्रयागं च पृथूदकम् ।
प्रभासं च कुरुक्षेत्रं तथा पिण्डारकं पुनः ॥
कोटितीर्थमिति प्रोक्तं शुक्रतीर्थं तथैव च ।
वाराणसी गया चैव मथुरा नैमिषं तथा ॥
गङ्गाद्वारं सौकरं च गङ्गासागरमेव च ।
ॐकारं नर्मदायां च केदारं चाविमुक्तकम् ॥
अवन्ती द्वारका काञ्ची यमुना च सरस्वती ।
गोदावरी तुङ्गभद्रा गङ्गा च नर्मदा तथा ॥
नदी रूपवती पुण्या नदी वेत्रवती तथा ।
अट्टहासं महाकालं देवं विश्वेश्वरं तथा ॥
महादेवं महानादं देवं रामेश्वरं तथा ।
रुद्रं महालयं चैव तथैव शशिशेखरम् ॥
भैरवं भृगुतुङ्गं च भीमनादं तथैव च ।

भूतेश्वरं भस्मगात्रं यानि लिङ्गानि भूतले ॥
स्वर्गे च यानि पाताले चान्तरिक्षे युधिष्ठिर ।
सालग्रामशिलायां तु प्रत्यहं निवसन्ति च ॥
ब्रह्मतीर्थानि सर्वाणि सूर्यतीर्थानि यानि च ।
सुरसिद्धमुनीन्द्राणां त्रिषु लोकेषु यानि च ॥
वसन्ति तत्र राजेन्द्र प्रत्यहं पाण्डुनन्दन ।
सालग्रामशिलायां तु समीपे केशवस्य हि ॥
वेदास्त्रयो मखाः सर्वे अश्वमेधादयश्च ये ।
व्रतानि यान्यनेकानि पुराणानि तथाऽऽगमाः ॥
तपांसि नियमाः सर्वे त्रिदशाः पाण्डुनन्दन ।
सालग्रामशिला यत्र तत्र तिष्ठन्ति प्रत्यहम् ॥
तीर्थापेक्षा न तत्रास्ति यत्र द्वारवती शिला ।
सालग्रामशिलामुद्रा यत्र चक्राङ्किता भवेत् ॥
कुरुक्षेत्रेण किं तस्य सम्प्राप्ते ग्रहणे रवौ ।
सालग्रामशिला यत्र दृश्यते चक्रलाञ्छिता ॥
प्रभासे यत्फलं प्रोक्तं ग्रस्ते रात्रौ निशाकरे ।
कृते दाने भवेत्पुण्यं सालग्रामशिलाग्रतः ॥
सालग्रामशिलां हित्वा योऽन्यं धर्ममपेक्षते ।
कलिकाले विशेषेण मुष्टोऽसौ पापतस्करैः ॥
सुलभं किं न सेवेत सालग्रामशिलाजलम् ।
यस्य स्पर्शनमात्रेण पूतो भवति मानवः ॥
यो ददाति शिलां विष्णोः सालग्रामशिलोद्भवाम् ।
वैष्णवो विष्णुभक्ताय तेनेष्टं क्रतुभिः शतैः ॥
सालग्रामशिलादानं यः करोति हि पार्थिव ।
अग्निष्टोमादिभिर्यज्ञैस्तेनेष्टं तु दिने दिने ॥

सालग्रामशिलादानं कृतं येन च पार्थिव ।
स्वर्गे मर्त्ये च पाताले पूज्यते वै स पार्थिव ॥
सालग्रामशिलाग्रावा नास्ति नास्ति पुनः पुनः ।
नराणां दुर्लभा लोके सालग्रामोद्भवा शिला ॥
प्राप्यते न विना पुण्यैः कलिकाले विशेषतः ।
स धन्यः पुरुषो लोके सफलं तस्य जीवितम् ॥
सालग्राममयी मुद्रा गृहे यस्य सुपूजिता ।
जलमन्नं हविष्यं च पत्रं पुष्पं फलादिकम् ॥
यत्किञ्चिद्विद्यते गेहे वस्त्राभरणमानुषम् ।
गोमहिष्यादिकं यच्च कृमिकीटादिकं तथा ॥
सालग्रामस्य सान्निध्यात्सर्वं याति सुरालयम् ।
सौरिवाहनशृङ्गाग्रैर्भिद्यते तस्य नो तनुः ॥
सौरिर्यमः ।
मतिश्च जायते यस्य सालग्रामशिलार्चने ।
आयान्ति च न पापानि कृतानि सुबहून्यपि ॥
व्रजन्ति न पथं सौरेः सालग्रामशिलार्चनात् ।
सालग्रामोद्भवं शैलं गृहे यस्य न विद्यते ॥
स सीदति न सन्देहः पङ्के मग्नो यथा गजः ।
सालग्रामशिलायां तु सर्वदा वसते हरिः ॥
प्रत्यक्षमर्चितस्तेन देवदेवो जनार्दनः ।
सालग्रामोद्भवं लिङ्गं पूजितं येन भूपते ॥
दध्ना घृतेन पयसा मधुना तीर्थवारिभिः ।
यः स्नापयति देवेशं सालग्रामसमुद्भवम् ॥
तस्य पुण्यं प्रवक्ष्यामि इन्द्रद्युम्न निबोध मे ।
वैष्णवोऽसि महाभाग सदा भागवतप्रिय ॥

मन्वन्तरं तु वसतां वाराणस्यां तु यत्फलम् ।
वामरैकेन तत्पुण्यं स्नानं दत्त्वा तु केशवे ॥
द्वादश्यां शतसाहस्रं पर्वकाले ततोऽधिकम् ।
पञ्चामृतेन कर्तव्यं तस्मात्स्नानं प्रयत्नतः ॥
मधुदुग्धामभावेन घृतस्य च नराधिप ।
क्षीरस्नानेन चैकेन सर्वं सम्पूर्णतां व्रजेत् ॥
सालग्रामशिलास्पर्शं ये कुर्वन्ति दिने दिने ।
वाञ्छन्ति करसंस्पर्शं तेषां देवाः सवासवाः ॥
यः पश्यति नरो भक्त्या सालग्रामशिलार्चनम् ।
जन्मायुतमहस्राणां कृतस्तेनाथ सङ्क्षयः ॥
प्रायश्चित्तसहस्राणि कृत्वा व्रतशतानि च ।
कलौ गच्छन्ति पापानि न विष्णोः स्मरणं विना ॥
काले वा यदि वाऽकाले सालग्रामशिलार्चनम् ।
भक्त्या वा यदि वाऽभक्त्या यः करोति स पुण्यभाक् ॥
द्वेषेण वाथ लोभेन दम्भेन कपटेन वा ।
सालग्रामोद्भवं देवं दृष्ट्वा पापैः प्रमुच्यते ॥
अशुचिश्चाप्यनाचारः सत्यशौचविवर्जितः ।
सालग्रामोद्भवं देवं दृष्ट्वा पापैः प्रमुच्यते ॥
अशुचिश्चाप्यनाचारः सत्यशौचविवर्जितः ।
सालग्रामोद्भवं शैलं स्मृत्वा सोऽपि शुचिर्भवेत् ॥
पत्रं पुष्पं फलं तोयं भक्त्या दूर्वाङ्कुरं नृप ।
जायते मेरुणा तुल्यं सालग्रामशिलार्पितम् ॥
विधिहीनोऽपि यां कां चित्क्रियां मन्त्रविवर्जिताम् ।
कुर्यादिति शेषः ।
चक्राङ्कपूजनात्सम्यक् लभेच्छास्त्रोदितं फलम् ॥

चक्राङ्कितशिलाग्रे तु कुर्याज्जागरणं हि यः ।
एकादश्यां नरश्रेष्ठ देवास्तस्य वरप्रदाः ॥
यत्र तिष्ठति चक्राङ्को देवो द्वारावतीभवः ।
तीर्थकोटिसहस्राणि तत्र सन्निहितानि वै ॥
यत्र यत्र नृपश्रेष्ठ देवश्चक्राङ्कचिह्नितः ।
तत्र गच्छ महाभाग संसाराब्धिं तरिष्यसि ॥
कलिकालकृतान्तस्य को बिभेति नराधिप ।
चक्राङ्कितशिला यस्य हृदयान्नापसर्पति ॥
सालग्रामोद्भवं दृष्ट्वा न्यस्तं हृदि जनाधिप ।
नावेक्षितुं शक्नुवन्ति सर्वे ते यमकिङ्कराः ॥
सालग्रामोद्भवं शैलं द्वारकायां समुद्भवम् ।
कलिकालेऽपि राजेन्द्र न जहाति जनार्दनः ॥
यदीच्छसि हि दुष्पारं तर्त्तुं संसारसागरम् ।
सालग्राममयं शैलं भक्त्यार्चय महीपते ॥
अर्चितः पूजितो ध्यातः संस्तुतः शैलनायकः ।
पापिनामुपकाराय किं पुनर्धर्मशालिनाम् ॥
जन्मप्रभृति यस्यापि दुष्कृतानि त्वनेकशः ।
इमां मुद्रां समभ्यर्च्य मुच्यते सोऽपि तत्क्षणात् ॥
स्वमन्त्रेण बुधैः पूज्यः स्वकैर्ध्यानैः स्वमुद्रया ।
हरिस्तत्र समाविष्टः सर्वदा नात्र संशयः ॥
लक्ष्मीर्मेधा स्वधा कान्तिः पुष्टिः श्रद्धा सरस्वती ।
सिद्धिर्ऋद्धिस्तथा सर्वा मुद्रायां नित्यसंस्थिताः ॥
सततं चैव यत्कृत्यं हरेर्देशं समाश्रितः ।
ध्यानं पूजां तथा दानमग्निकार्यं जपादिकम् ॥
तस्याग्रतस्तु यः कुर्यात्तत्सर्वमक्षयं भवेत् । इति ।

तथा,

दवदाहो विषं चैव वन्हिचौरभयं तथा ।
सर्वाणि प्रशमं यान्ति यत्र चक्राङ्कितो भवेत् ॥
द्वारवत्याः शिला देवि मुद्रया मम मुद्रिता ।
यत्रापि नीयते तत्स्यात्तीर्थं द्वादशयोजनम् ॥
शालग्रामशिला यत्र तत्र सन्निहितो हरिः ।
तत्सन्निधौ त्यजेत्प्राणान् विष्णुलोके महीयते ॥ इति ।

पुराणसङ्ग्रहेऽपि,

सालग्रामसमीपे तु क्रोशमात्रं समन्ततः ।
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः ॥ इति ।

इति सालग्रामशिलामाहात्म्यम् ।

अथ शालग्रामचक्रमाहात्म्यम् ।

वैखानससंहितायाम्,

हरिरुवाच ।

इदानीं कथयिष्यामि देवं देवनमस्कृतम् ।
पूर्वं श्रुतं मया सम्यक् सकाशाच्चक्रपाणिनः ॥
आयासात्कृतकानां च दृश्यते देवताङ्कनम् ।
मानोन्मानविहीनस्तु मानोन्मानविवर्द्धितः ॥
स्वयं जातः शुभो देवः परब्रह्मस्वरूपकः ।
एकस्मिन् पूजिते चैव त्रैलोक्यं पूजितं भवेत् ॥
संवत्सरं तु यः कश्चित्कुर्यात्स्पर्शनदर्शने ।
विना साङ्ख्येन योगेन मुच्यते नात्र संशयः ॥
मम चक्रविशेषोऽयं कथ्यते तव नारद ।
लोकपालाङ्कितं चक्रं शङ्खलाञ्छनलाञ्छितम् ॥

अनेकस्वस्तिकैर्दिव्यैः पद्मलाञ्छनलाञ्छितम् ।
सालग्रामोद्भवं चक्रं गृहे यस्मिन् प्रपूज्यते ॥
योजनानि द्वादश वै चक्रतीर्थमुदाहृतम् ।
सर्वपापहरं चैव सर्वदुःखविनाशनम् ॥
ब्रह्मराक्षसवेतालाः शाकिन्यः स्मार एव च ।
ज्वररोगा विनश्यन्ति चक्रस्य पूजनात्तु वै ॥
स्मारोऽपस्मारः ।
एवं भेदः समाख्यातो हरिणा परिकीर्तितः ।
अथाप्युदाहरन्तीमं शालग्रामसमुद्भवम् ॥
चक्रं हिरण्यसंयुक्तं गृहे येषां प्रपूजितम् ।
तेषां वरप्रदो नित्यं हरिः स्यात्परमेश्वरः ॥
आयुरारोग्यमैश्वर्यं राज्यं पुष्टिं यशो धनम् ।
लभते नात्र सन्देहश्चक्रराजस्य सेवनात् ॥

नारद उवाच ।

के चक्रा दुर्लभा देव के चक्राः शुभदा भुवि ।
एवं मे संशयो देव प्रसादात्कथ्यतां हरे ॥

हरिरुवाच ।

पुरुषोत्तमो वैकुण्ठः श्रीधरो हरिरेव च ।
दुर्लभा मूर्त्तयः प्रोक्ताः सुलभा न भवन्ति च ॥
एते चक्राः समाख्याता देवाः सम्पूजयन्ति वै ।
सुलभाः सुप्रसिद्धाश्च ऋषयः पूजयन्ति यान् ॥
केचिच्चक्राः प्रपूज्यन्ते मानुषैः किल नारद ।
हरितीर्थभवं चक्रं नाभिचक्रसमन्वितम् ॥
सकृत्पूजाजपाद्धोमाद्विष्णोः पदमनामयम् । इति ।

इति शालग्रामचक्रमाहात्म्यम् ।

अथ शालग्रामशिलामूर्तिसामान्यलक्षणम् ।

स्कन्दपुराणे,

स्निग्धा कृष्णा पाण्डुरा च पीता नीला तथैव च ।
रक्ता रूक्षा च वक्रा च महास्थूला त्वलाञ्छिता ॥
कपिला दर्दुरा भग्ना बहुचक्रैकचक्रिका ।
बृहन्मुखी बृहच्चक्रा लग्नचक्राथ वा पुनः ॥
बद्धचक्राथ वा या स्याद्भग्नचक्रा त्वधोमुखी ।
स्निग्धा सिद्धिकरी मन्त्रे कृष्णा कीर्तिं ददाति च ॥
पाण्डुरा पापदहनी पीता पुत्रफलप्रदा ।
नीला सन्दिशते लक्ष्मीं रक्ता ऽऽरोग्यप्रदायिनी ॥
रूक्षा चोद्वेगदा नित्यं वक्रा दारिद्र्यदायिका ।
स्थूला निहन्ति चैवायुर्निष्फला तु अलाञ्छिता ॥
कपिला दर्दुरा भग्ना बहुचक्रैकचक्रिका ।
बृहन्मुखी बृहच्चक्रा लग्नचक्राथ वा पुनः ॥
बद्धचक्राथवा या स्याद्भग्नचक्रा त्वधोमुखी ।
पूजयेद्यः प्रमादेन दुःखमेव लभेत सः ॥ इति ।

पद्मपुराणे,

सर्वकर्मप्रदा सौम्या कराला भयदुःखदा ।
स्निग्धा च श्रीकरी नित्यं रूक्षा दारिद्र्यदायिनी ॥
शुक्ला मोक्षैकफलदा रक्ता मोक्षफलाप्तये ।
रक्ता ईषद्रक्ता।तस्याः प्रशस्तत्वात् । अतिरक्ता तु निषिद्धा।
पीता धनकरी ज्ञेया रक्ता राज्यप्रदा शिला ।
अतिरक्ता रोगदा च कृष्णा कीर्तिप्रदा शुभा ॥

इति पुराणसङ्ग्रहवचनात् । अत्रोभयत्रापि मोक्षैकफलत्वे वर्णभेदान्न दोषः ।

पीता दारिद्र्यनाशाय मिश्रा मिश्रफलाप्तये ।
सुमुखी श्रीकरी नित्यं तथा नीलाऽन्नदायिनी ॥
कपिला हरते पापं ब्रह्मचर्येण पूजिता ।
दर्शनात्स्पर्शनाच्चैव ध्यानयोगेन पूजिता ॥
शालग्रामशिलाचक्रे संस्थितो भगवान् हरिः ।
निर्दहिष्यति तत्पापं ज्वलितोऽग्निरिवेन्धनम् । इति ।
विशेषस्तु प्रयोगपारिजाते स्मर्यते ।

श्रीभगवानुवाच ।

शृणु ब्रह्मन् प्रवक्ष्यामि सालग्रामे स्थितं हरिम् ।
हरिस्तत्र स्थितो नित्यं प्रादुर्भावैरनेकधा ॥
लाञ्छनैर्विविधाकारैर्लाञ्छितं यच्च दृश्यते ।
चक्राङ्कितं हरेश्चापि सालग्रामस्य लक्षणम् ॥
यथायोग्यं विचार्यैव ग्रहीतव्यं प्रयत्नतः ।
आदौ शिलां परीक्षेत ग्राह्याग्राह्यविभागतः ॥
स्थिरासना सुवृत्ता च फलाकारा यवानना ।
कृष्णा च पाण्डुरा पीता नीला श्यामाथ शुक्लका ॥
कपिलाभा च काचाभा दूर्वाभा रक्तपिङ्गला ।
एताः शुक्लशिला ग्राह्या मिश्राश्चैव विशेषतः ॥
स्थिरासना परिज्ञेया स्वस्थासनसुखप्रदा ।
वृत्ता सुवृत्तदा प्रोक्ता फलाकारा फलप्रदा ॥
यवानना च विज्ञेया वाक्यसौन्दर्यदायिका ।
कीर्तिभोगप्रदा कृष्णा पाण्डुरा पापहारिणी ॥
पीता पुत्रप्रदा नित्यं लक्ष्मीशान्तिप्रदा तथा ।
नीला बह्वन्नदा ज्ञेया तथा वै कान्तिदायिनी ।
पुष्टिवृद्धिप्रदा श्यामा श्वेता सत्त्वप्रदायिनी ॥

नेत्रे उन्मीलिते यस्या अक्षसूत्रकमण्डलू ।
कपिलाख्या भवेन्मुद्रा ज्ञानैश्वर्यप्रदायिका ॥
कामप्रदायिका वामा दूर्वाभा पशुदायिका ।
रक्ता ऽऽरोग्यप्रदा नित्यं मिश्रा मिश्रफलप्रदा ॥ इति ।
त्याज्या अपि शिलास्तत्रैवोक्ताः ।
त्याज्यां शिलामतो वक्ष्मि शृणु ब्रह्मन् समाहितः ।
तिर्यक्चक्रा परित्याज्या बद्धचक्रा तथैव च ॥
क्रूरापि सम्परित्याज्या स्फोटा रूक्षा तथैव च ।
कुरूपा निष्ठुराऽनास्या करालाविकारालिका ॥
कपिला विषमावर्त्ता व्यात्तास्या कोटरा तथा ।
आसने चलना भग्ना महास्थूला विगर्हिता ॥
आसने सुषिरं यस्याश्चक्रेणैकेन संयुता ।
दर्दुरा बहुचक्रा च लग्नचक्राप्यधोमुखी ॥
छिद्रा दग्धा सुरक्ता च बृहच्चक्रा विभीषणा ।
चक्रेणावृतचक्रा च बृहच्चक्रा प्रकीर्तिता ॥
बहुरेखासमायुक्ता भग्नचक्रा तथैव च ।
दीर्घचक्रा परित्याज्या पङ्क्तिचक्रा विशेषतः ॥
मस्तकास्या ह्यचिह्ना च वर्ज्या ह्येताः सदा बुधैः ।
क्रूरा दंष्ट्रासमायुक्ता स्फोटा बुद्बुदसंयुता ॥
अचिराच्छुष्कतां याति यस्यां लिप्तं तु चन्दनम् ।
सा रूक्षा ज्ञेयेति शेषः ।
कुरूपा कुत्सिताकारा निष्ठुरा निर्द्रवा स्मृता ॥
स्ववेष्टनतुरीयांशमास्यं यस्याः शुभा हि सा ।
तस्मादधिकवक्त्रा च करालेति प्रकीर्तिता ॥
तुरीयांशश्चतुर्थांशः ।

तृतीयांशास्यसंयुक्ता दंष्ट्रया विकरालिका ।
संवृत्तास्या परिज्ञेया वेष्टनद्यष्टभागतः ॥
व्यात्तास्या चाधिके ज्ञेया वृत्ताधिक्ये तु कोटरा ।
स्थूला त्वष्टाङ्गुलायामा पूजकस्याङ्गुलेन तु ॥
आधिक्ये तु महास्थूला तां गृही न तु पूजयेत् ।
अधोमुखी त्वधःस्थास्या ऊर्ध्वास्या चापि निन्दिता ॥
तिर्यक्चक्रान्विता दद्याद्भ्रमणं क्लेशसंयुतम् ।
क्रूरा रोगप्रदा नित्यं स्फोटा चायुर्विनाशिनी ॥
रूक्षा चोद्वेगदा नित्यं दुःखदारिद्र्यदायिका ।
कुरूपा दैन्यदा चैव निष्ठुरा पुण्यनाशिनी ॥
अनास्या मौर्ख्यदा चैव कराला भयदायिका ।
ऐहिकामुष्मिकं हन्ति विकराला स्वभावतः ॥
कपिला पत्निहा नित्यं व्यात्तास्या जयनाशिनी ।
कोटरा पूजकं हन्ति तथा बन्धुविनाशिनी ॥
आसने चलना नित्यं प्रवासस्य प्रदायिनी ।
भग्ना धनहरी नित्यं महास्थूला व्ययप्रदा ॥
गर्हिता पापदा प्रोक्ता कीर्तिहा सुषिरासना ।
एकचक्रा कुलघ्नी च मस्तकास्या च पुत्रहा ॥
दर्दुरा कुष्ठदा ज्ञेया बहुचक्रा भयप्रदा ।
बहुचिन्ताप्रदा छिद्रा लग्ना चान्ध्यप्रदा हि सा ॥
अधोगतिप्रदा ज्ञेया तथैवाधोमुखी तु सा ।
बहुचक्राऽन्वयं हन्ति यशोघ्नी बहुरेखिका ॥
पङ्क्तिचक्रा पतिं हन्ति बृहच्चक्रा गृहक्षयी ।
अचिह्ना निष्फला ज्ञेया निराशत्वप्रदायिनी ॥
शेषा तु गर्हिता प्रोक्ता तां गृही तु न पूजयेत् । इति ।

अत्र—

बद्धचक्राथ वा या स्याद्भग्नचक्रा त्वधोमुखी ।
पूजयेद्यः प्रमादेन दुःखमेव लभेत सः ॥

इत्याद्युक्तशालग्रामशिलादोषप्रतिपादकानि वचनानि सकामार्चनविषयाणि ।

करालं च तिर्यक्चक्रं विदिङ्मुखम् ।

इत्युपक्रम्य,

पूजायां वर्जनीयं स्यान्निष्कामस्य न दुष्यति ॥

इत्यन्तेन ब्रह्माण्डपुराणे उपसंहृतत्वात्। तत्रोत्तममूर्त्तिपूजनेनैव फलप्राप्तेश्च ।

स्निग्धा श्यामा तथा शुक्ला तथा च समचक्रिका ।
घोणी मूर्त्तिरनन्ताख्या गम्भीरा सम्पुटा तथा ॥
तथा च सूक्ष्मा मूर्त्तिश्च सम्मुखी सिद्धिदायिका ।
धात्रीफलप्रमाणा याऽऽकारेणोभयसम्पुटा॥
पूजनीया प्रयत्नेन सर्वसिद्धिप्रदायिका ।
पूजिते फलमाप्नोति इह लोके परत्र वै ॥

इति शिवार्चनचन्द्रिकायामग्निपुराणवचनात् । अथवा गृहिविषयत्वेन योज्यानि ।

भग्नं विषममानं च लग्नचक्रैकचक्रकम् ।
कपिलं नरसिंहं च वर्जयेच्च सदा गृही ॥

इति ब्रह्मपुराणवचनात् ।

"अधिके तु महास्थूला तां गृही तु न पूजयेत्" ।
"शेषा तु गर्हिता प्रोक्ता तां गृही तु न पूजयेत्" ॥

इत्युदाहृतवचनाच्च । अथ वा मुख्यशालग्राममूर्तिसम्भवविषयत्वेन योज्यानि । तदसम्भवे तु शालग्रामपूजाया नित्यत्वात्

रूक्षाद्या निन्दिता अपि शालग्राममूर्त्तयः पूज्याः ।

मुख्याः स्निग्धादयस्तत्रामुख्या रक्तादयो मताः ।
मुख्याभावे त्वमुख्या हि पूज्या इत्युच्यते परैः ॥

इतिवचनात् ।

खण्डितं स्फुटितं भग्नं पार्श्वे भिन्नं विभेदितम् ।
सालग्रामसमुद्भूतं शैलं दोषावहं नहि ॥

इत्यादिवचनात् खण्डितस्फुटितादीनां शालग्रामशिलानामुत्तमशालग्रामशिलामूर्त्यभावे दोषाभावस्य चोक्तत्वादित्यास्तां तावत् ॥

इति शालग्राममूर्त्तिसामान्यलक्षणम् ।

अथ शालग्रामचक्रलक्षणम् ।

वैखानससंहितायाम् ,

नारद उवाच ।

समाचक्ष्व परं रूपं चक्राणां लक्षणं मुने ।
सर्वेसिद्धिकरं चैव सर्वकामार्थसाधकम् ॥

वैखानस उवाच ।

दिव्यवर्षसहस्रं तु हरिराराधितो मया ।
ततस्तूवाच भगवान् विष्णुस्त्रिभुवनेश्वरः ॥
वरं वृणीष्व प्रीतोऽस्मि तपसा तव सुव्रत ।
इत्याकर्ण्य मया देवो विज्ञप्तो भुवनेश्वरः ॥
शालग्रामसमुद्भूतचक्राणां लक्षणं प्रभो ।
कथयस्व प्रसादेन यदि तुष्टोऽसि माधव ॥
तच्छ्रुत्वा तु वचो मह्यं स्मयमानो ऽब्रवीदिदम् ।

विष्णुरुवाच ।

लक्षणं यत्तु चक्राणां तच्छृणुष्व महामुने ।

धर्मार्थकाममोक्षाणां पुरुषार्थैकहेतुकम् ॥
के चिल्लाञ्छनसंयुक्ताः शङ्खाकारेण संस्थिताः ।
के चिल्लिङ्गसमोपेताः के चिच्चक्रेण संयुताः ॥
दशयोजनविस्तीर्णं मम क्षेत्रं द्विजोत्तम ।
उत्तरे चैव दिग्भागे प्रमाणं योजनं तथा ॥
नीलपर्वतनाम्ना तु चक्रनामाङ्किता नदी ।
विष्णुनामांशकोत्थानि मम रूपाणि सर्वतः ॥
त्रिकालशिखरारूढो ह्यप्सरोगणसेवितः ।
त्रयस्त्रिंशच्च कोटीभिर्देवतानां निषेवितः ॥
शैलमूर्त्तिरहं तत्र अव्यक्ताख्यं च यं विदुः ।
मन्दारपुष्पसहितैर्विष्णोरर्च्चां विधाय वै ॥
उपचारैरिति शेषः ।
गान्धर्वैर्विविधैश्चैव संस्तुत्य मधुसूदनम् ।
गान्धर्वैर्गीतनृत्यादिभिः ।
भोजनं च बलिं दत्त्वा चक्रा ग्राह्या हरेरिति ॥
मत्स्याङ्किताश्च ये चक्रा आयुर्हा पुष्टिदा नृणाम् ।
सदा पूज्या गृहस्थेन सन्निधत्तेऽत्र केशवः ॥
कूर्माङ्किताश्च ये चक्रा महासन्ततिकारकाः ।
महार्थकारका दिव्या हरिस्तत्र व्यवस्थितः ॥
वराहमूर्त्तिसंयुक्तं यदि चक्रं तु दृश्यते ।
पूजनाल्लभते राज्यं पृथिव्यामेकराजकम् ॥
नरसिंहाङ्कितं चक्रं दुर्लभं भुवि मानवैः ।
शत्रूणां नाशनं युद्धे क्षेशघ्नं परिकीर्तितम् ॥
स्तम्भनं परसैन्यस्य महामृत्युहरं परम् ।
अङ्कितं वामनेन स्याच्चक्रं परमशोभनम् ॥

नानावृद्धिकरं चैव तदनाद्यं त्रयं भवेत् ।
चक्रमध्ये तु दृश्येत परशुरामस्य रूपकम् ॥
तत्तन्नामाङ्कितं चक्रं जामदग्न्यं प्रकीर्त्तितम् । इति ।

इति शालग्रामचक्रलक्षणम् ।

अथ शालग्राममुद्रालक्षणम् ।

वैखानससंहितायाम्,

ब्रह्मोवाच ।

भगवन्देवदेवेश शङ्खचक्रगदाधर ।
संशयं मे समुद्भूतं छेत्तुमर्हसि वै विभो ॥
शालग्रामस्य यत्पुण्यं क्षेत्रं त्रैलोक्यविश्रुतम् ।
तत्र तिष्ठेद्धरिः साक्षात्सर्वदेवैः समन्वितः ॥
तत्रोत्पन्नाः शिला विष्णोः सूक्ष्माः सूक्ष्मतरास्तथा ।
प्रादुर्भावैश्च विविधैराकारैश्च समन्विताः ॥
आयुर्दाः कामदाः प्रोक्ता भोगमोक्षप्रदास्तथा ।
शस्ता अशस्ताश्च तथा एतदाख्यातुमर्हसि ॥

श्रीभगवानुवाच ।

शृणु ब्रह्मन् प्रवक्ष्यामि शालग्रामगिरिर्हरिः ।
यस्माद्धरिः स्थितस्तत्र प्रादुर्भावैरनेकशः ॥
लक्षणैर्विविधाकारैर्लाञ्छितं चैव दृश्यते ।
शैलं सूक्ष्ममसूक्ष्मं वा मुद्रैका परिकीर्त्तिता ॥
एकपद्माङ्किता या तु दक्षिणावर्त्तसंस्थिता ।
चतुर्लाञ्छनसंयुक्ता भोगमोक्षप्रदा शुभा ॥
पद्मे यस्यां संस्थिते द्वे नाभ्यां च संवृते स्थिते ।
केनापि लाञ्छनेनैव चतुर्वर्गफलप्रदा ॥

लाञ्छनेन, युक्तेति अध्याहार्यं संबन्धः ।
चक्रेण कम्बुना या च पद्मेन गदयाङ्किता ।
तत्र श्रीः प्रत्यहं तिष्ठेत्सदा सम्पदमादिशेत् ॥

कम्बुः शङ्खः ।

लाञ्छनेन विना या स्यादप्रशस्ता तु सा स्मृता ।
चक्रं वा केवलं यत्र पद्मं वा अथ वा गदा ॥
लाञ्छनं वनमाला च हरिर्लक्ष्म्या सह स्थितः ।
तस्मिन् गेहे न दारिद्र्यं न शोको नोरगाद्भयम् ॥
न चौराग्निभयं तत्र ग्रहैर्दुष्टैर्न बाध्यते ।
अन्ते मोक्षो भवेत्तस्य पूजनादेव नित्यशः ॥
केवलं पद्मसंयुक्ता या सा वैकुण्ठ उच्यते ।
घोणाकृतिर्वराहाख्या चतुर्लाञ्छनसंयुता ॥
चक्रेण दृश्यते लिङ्गं तदा तत्र सुशोभनम् ।
वाराहमूर्त्तिसंयुक्ता सर्वकामफलप्रदा ॥
दद्यात्सा मोक्षसंसिद्धिं ब्रह्मचर्येण पूजिता ।
वनमाला तु वै यस्यामक्षसूत्रं कमण्डलुः ॥
कपिलाख्या भवेन्मुद्रा धनैश्वर्यप्रदायिका ।
कोटरास्या सुविकृता नृसिंहमुखलाञ्छना ॥
पाशाङ्कुशगदाचक्राण्येषामेकेन लाञ्छिता ।
नारसिंही भवेन्मुद्रा भोगमोक्षप्रदायिका ॥
दर्शनान्नश्यते पापं ब्रह्महत्यां व्यपोहति ।
सान्निध्यान्मन्त्रपूर्वेण पूजनेन फलाधिका ॥
शूलचिन्हाङ्किता या च कलशेन समन्विता ।

स्थूलचिन्हं मुखं यस्याः कलशेन समन्विता । इति पाठान्तरम् ।

वैनतेया सदा तत्र केन चिल्लक्षणान्विता ॥
सा जयाख्या परा मुद्रा चतुर्वर्गफलप्रदा ।
मीनादिकूर्मसंयुक्ता सर्वकामार्थसंयुता ॥
पद्मासनस्था या मुद्रा सर्वकामशुभप्रदा ।
एकैकेनैव चिन्हेन लाञ्छिता तेन शस्यते ॥
अश्वाकृतिस्तथा मुद्रा साक्षमाला सपुस्तका ।
पद्माङ्किता भवेन्मुद्रा हयग्रीवेतिविश्रुता ॥
भयदुःखाशुभैस्त्यक्तो नरः पापात्प्रमुच्यते ।
अक्षया च भवेत्तस्य लक्ष्मीरैश्वर्यमुत्तमम् ॥
प्रागुक्तलाञ्छनाः सर्वे यस्यामेकत्र संस्थिताः ।
सर्वत्र सर्वदा पूज्या मुच्यते सर्वबन्धनैः ॥ इति ।

पुराणसङ्ग्रहे,

मत्स्याख्या कूर्मसंयुक्ता कूर्माख्या मत्स्यसंयुता ।
पद्मासनस्था सा मुद्रा अर्थकामफलप्रदा ॥
ततोऽन्या मूर्त्तिरन्योन्यलाञ्छिता नैव शस्यते ।
घोणारूपा वराहाख्या चतुर्लाञ्छनसंयुता ॥
दद्यात्सा मोक्षसंसिद्धिं ब्रह्मचर्येण पूजिता ।
नेत्रे सम्मीलिते यस्यामक्षसूत्रं कमण्डलुः ॥
कपिलाख्या भवेन्मुद्रा ध्यानैश्वर्यप्रदायिका ।
स्थूलचिन्हं मुखं यस्याः कलशेन समायुतम् ॥
वैनतेया भवेन्मुद्रा लाञ्छनैश्च सुलक्षिता ।
पूजिता सा भवेन्नूनं भुक्तिमुक्तिफलप्रदा ॥ इति ।

प्रयोगपारिजातेऽपि किञ्चित्स्मर्यते ।

पाञ्चजन्याङ्किता या तु पद्मेन गदया युता ।
तत्र श्रीः प्रत्यहं तिष्ठेत्सदा सम्पदमादिशेत् ॥

पाञ्चजन्यः शङ्खः ।
जयाख्या परमा मुद्रा चतुर्वर्गफलप्रदा ।
येषां चैकेन चिन्हेन लाञ्छिता चैव दृश्यते ॥ इति ।

इति शालग्राममुद्रालक्षणम् ।

अथ क्षेत्रलक्षणम् ।

ब्रह्माण्डपुराणे,
कपिलं नारसिंहं तु वामनं त्वसितप्रभम् ।
दामोदरं तु नीलाभमनिरुद्धं तथैव च ॥
श्यामं नारायणं क्षेत्रं कृष्णवर्णं तु वैष्णवम् ।
बहुवर्णमनन्तं च श्रीधरं पीतमुच्यते ॥
नृसिंहपुराणेऽपि,
वासुदेवं सितं ज्ञेयं रक्तं सङ्कर्षणं तथा ।
दामोदरं तु नीलाभमनिरुद्धं तथैव च ॥
श्यामं नारायणं क्षेत्रमेवं च मुनिपुङ्गव ।
इति नारदं प्रति ब्रह्मणो वचनात् ।
पुराणसङ्ग्रहेऽपि,
वासुदेवं सितं विद्याद्रक्तं सङ्कर्षणं तथा ।
दामोदरं च नीलाभमनिरुद्धं तथैव च ॥
श्यामं नारायणं तद्वत्तथा कृष्णञ्च वैष्णवम् ।
ईषद्रक्तमनन्तं च श्रीधरं पीतमुच्यते ॥ इति ।

इति क्षेत्रलक्षणम् ।

अथ शालग्रामचक्रलक्षणम् ।

हेमाद्रौ पुराणान्तरे,
वृत्तसूत्राष्टमो भाग उत्तमं चक्रलक्षणम् ।

मध्यमं तु चतुर्भागः कनीयस्तु त्रिभागिकम् ॥ इति ।

इति चक्रलक्षणम् ।

अथ शालग्राममूर्त्तिविशेषलक्षणप्रकरणम् ।

तत्र तावत्—

स्थूलचक्रो भवेद्विष्णुर्मोक्षैकफलदोऽर्चितः ।
लक्ष्मीनारायणः श्रीमान् भुक्तिमुक्तिफलप्रदः ॥
दधिवामनसंज्ञः स्याद्भोभूधान्यधनप्रदः ।
स स्यात्सन्तानगोपालः पुत्रपौत्रादिवृद्धिदः ॥

इत्यादिवचनैर्विष्णुलक्ष्मीनारायणदधिवामनसन्तानगोपालादिविशेषमूर्त्तीनां नानाविधफलविशेषदातृत्वेन तत्तत्कामनया पूज्यत्वात् । तासां च "स्थूलचक्रो भवेद्विष्णुः" इत्यादिवचनोक्तमूर्तिविशेषसूचकलक्षणैर्विना दुर्ज्ञेयत्वात् मूर्तिविशेषज्ञानमन्तरेण च पूजनासम्भवाच्च तज्ज्ञानार्थं विशेषलक्षणान्युच्यन्ते। तत्रादौ मत्स्यादिदशावतारमूर्तिलक्षणान्युच्यन्ते । तत्र मत्स्यमूर्तिलक्षणमुक्तम्—

ब्राह्मे,

दीर्घा च काचवर्णा या बिन्दुत्रयविभूषिता ।
मत्स्याख्या सा शिला ज्ञेया भुक्तिमुक्तिफलप्रदा ॥ इति ।

हेमाद्रौ पद्मपुराणे,

त्रयो मत्स्यादयः श्यामा द्विचक्राः स्वाङ्कसंयुताः ।
तेषां सन्दर्शनादेव सर्वकामानवाप्नुयात् ॥

तथा,

मत्स्यरूपं तु देवस्य दीर्घाकारं सुपूजितम् ।
बिन्दुत्रयसमायुक्तं काचवर्णं सुशोभनम् ॥ इति ।

ब्रह्माण्डपुराणे,

दीर्घा द्वारयुता स्निग्धा द्वारमध्ये द्विचक्रयुक् ।
चक्रमेकं पुच्छभागे दक्षिणे सफलाकृतिः ॥
वामे प्रदृश्यते रेखा मत्स्यमूर्तिः शुभप्रदा । इति ।

पुराणसङ्ग्रहे,

बिन्दुत्रयसमायुक्तं चक्रं वा शङ्खलाञ्छनम् ।
दीर्घं दक्षिणमास्यं तु मात्स्यं चक्रसमीपगम् ॥ इति ।

इति मत्स्यमूर्तिलक्षणम् ।

अथ कूर्ममूर्तिलक्षणम् ।

पद्मपुराणे,

कूर्माकारा च चक्राङ्का शिला कूर्मः प्रकीर्तितः । इति ।

ब्राह्मे,

कूर्मस्तथोन्नतः पृष्ठे वर्त्तुलः परिपूरितः ।
हरितं वर्णमाधत्ते कौस्तुभेन च चिह्नितः ॥ इति ।

पुराणसङ्ग्रहे,

तत्तल्लक्षणसंयुक्तं भानोर्वलयपञ्चकम् ।
कूर्मरूपमचक्रं च दुर्लभं सर्वकामदम् ॥ इति ।

ब्रह्माण्डपुराणे तु विशेषः ।

चतुर्द्धा कूर्ममूर्त्तिः स्यात्पार्श्वभागे खुरान्विता ।
विख्याता दुर्लभा सर्वमनोरथफलप्रदा ॥
बिन्दुत्रयान्विता शङ्खचक्रध्वजयुतापि वा ।

बिन्दुत्रयान्विता सौवर्णबिन्दुत्रययुक्ता । यत्र क्वापि बिन्दवः सौवर्णा ज्ञेयाः । क्वचिद्वचनेन राजता ग्राह्याः ।

दीर्घदक्षिणवामास्या भानोर्वलयपञ्चकैः ॥

भूषिता कूर्ममूर्तिः स्यात् दुर्लभा सर्वकामदा ।
वृत्तायता कूर्ममूर्तिः कनकच्छविसंयुता ॥
स्नुहीपुष्पाकृतिर्वापि चक्रस्योभयपार्श्वतः ।
कूर्ममूर्तिः खगेशान सर्वकामफलप्रदा ॥
वर्तुला मुशलाकारा दीर्घद्वारा तु वै खग ।
नाभिचक्रयुता रम्या कूर्माकारा तु पार्श्वतः ॥
तथा स्थिरासना च स्यादुन्नता नीललोहिता ।
कूर्ममूर्तिरिति ख्याता पुत्रपौत्रादिवृद्धिदा ॥ इति ।

नाभिचक्रयुतेत्यत्र चक्रद्वयमेव अनुसन्धेयम् ।
"द्विचक्राः स्वाङ्कसंयुताः" इति पूर्वोदाहृतपद्मपुराणवचनात् ।

इतिकूर्ममूर्तिलक्षणम् ।

अथ वराहमूर्तिलक्षणम् ।

पद्मपुराणे,

वाराहः सोऽपि विज्ञेयश्चक्रे यस्य सदम्बुजे ।
तस्य सम्पूजनादेही प्राप्नोति मनसेप्सितम् ॥

तथा,

वराहाकृतिराशुग्रश्चक्रादिभिरलङ्कृतः ।
वराह इति स प्रोक्तः-इति ।

ब्राह्मपुराणसङ्ग्रहविष्णुप्रोक्तेषु,

वाराहं शक्तिलिङ्गं च चक्रे तु विषमे स्मृते ।
इन्द्रनीलनिभं स्थूलं त्रिलेखालाञ्छितं शुभम् ॥ इति ।

विषमे असममूत्रगते । ब्रह्माण्डपुराणे तु वाराहमूर्तेर्द्विविधत्वमुक्तम्-

वराहमूर्तिर्द्विविधा भिन्नलक्षणयोगतः ।

वराहशक्तिलिङ्गस्तु चक्रे तु विषमे स्मृते ।
इन्द्रनीलनिभः स्थूलस्त्रिलेखालाञ्छितः शुभः ॥
दक्षपार्श्वगते चक्रे समचक्रप्रदेशतः ।
वनमालायुतो लक्ष्मीवराहः परिकीर्तितः ॥ इति ।

इति वराहमूर्त्तिलक्षणम् ।

अथ नृसिंहमूर्तिलक्षणम् ।

तत्रादौ लक्ष्मीनृसिंहमूर्तिलक्षणमुक्तम्—
पुराणसङ्ग्रहे,
वामपार्श्वस्थिते चक्रे कृष्णवर्णो सविन्दुकः ।
लक्ष्मीनृसिंहो विख्यातो भुक्तिमुक्तिफलप्रदः ॥ इति ।
ब्रह्मपुराणे,
नरसिंहस्त्रिविन्दुः स्यात्कपिलः पञ्चविन्दुकः ।
वामाश्रितेषु चक्रेषु लक्ष्मीनरहरिः स्मृतः ॥ इति ।
तथाच नरसिंहपुराणे,
वामपार्श्वे समे चक्रे कृष्णवर्णे सविन्दुके ।
लक्ष्मीनृसिंह आख्यातो भुक्तिमुक्तिफलप्रदः ॥
अन्नपानसमृद्धिश्च सौख्यसौभाग्यवर्द्धनः । इति ।

इति लक्ष्मीनृसिंहमूर्तिलक्षणम् ।

अथ कपिलनृसिंहमूर्तिलक्षणम् ।

पद्मपुराणे,
नृसिंहः कपिलो ज्ञेयः स्थूलचक्रोऽथ दंष्ट्रया ।
त्रिविन्दुः पञ्चविन्दुर्वा ब्रह्मचर्येण पूजितः ॥
ददाति वाञ्छितं नृणामघौघं चाशु नश्यति ।
अन्यथा जायते क्लेशो नात्र कार्या विचारणा ॥ इति ।

अग्निपुराणे,
नृसिंहः कपिलः स्थूलचक्रः स्यात्पञ्चबिन्दुकः । इति ।
वैखानससंहितायाम्,
कपिलो नरसिंहस्तु पृथुचक्रः सुशोभनः ।
ब्रह्मचर्याधिकारोऽस्ति नान्यथा पूजनं भवेत् ॥ इति ।
ब्रह्माण्डपुराणे,
विवृत्तास्यं वामचक्रं वर्त्तुलं कपिलप्रभम् ।
नारसिंहं गृहस्थानां भीतिदं बिन्दुभिर्वृतम् ॥ इति ।
पाद्मे कार्तिकमाहात्म्ये च,
यस्य दीर्घं मुखं पूर्वकथितैर्लक्षणैर्युतम् ।
रेखाश्च केसराकारा नारसिंहो मतो हि सः ॥ इति ।
तथा चैतत्पूजने फलमपि—
स्फुटितं विषमं चक्रं नारसिंहं तु कापिलम् ।
सम्पूज्य मुक्तिमाप्नोति सङ्ग्रामे विजयी भवेत् ॥ इति ।

इति कपिलनृसिंहमूर्तिलक्षणम् ।

अथ योगनृसिंहलक्षणम् ।

ब्रह्मपुराणे,
स्थूलं चक्रद्वयं मध्ये गुडलाक्षासवर्णकम् ।
द्वारोपरि तथा रेखा नृसिंहो योगसंज्ञकः ॥ इति ।

इति योगनृसिंहलक्षणम् ।

अथ विदारणनृसिंहलक्षणम् ।

ब्रह्माण्डपुराणे,
विदारणाभिधानः स्यान्नृसिंहो दीर्घकेसरः ।
अन्तश्चक्रं बृहद्द्वारं दक्षिणोन्नतमस्तकम् ॥

विदारणमिति ख्यातं दंष्ट्राभ्यामुपशोभितम् ।
ब्रह्मचर्याविपाकेन नरसिंहोऽर्चितो यदि ॥
व्याधिशेत्तु भयं तस्य वह्निना दह्यते गृहम् । इति ।

अत्रापि चक्रद्वयमेव । यत्र कुत्राप्यनुक्तस्थले चक्रद्वयमेव ज्ञेयमिति सामान्येनोक्तत्वात् ।

इति विदारणनृसिंहलक्षणम् ।

अथ सर्वतोमुखनृसिंहलक्षणम् ।

तत्रैव,

सप्तचक्रं बहुमुखं समन्तात्स्वर्णभूषितम् ।
सर्वतो मुखबाहुल्याद्भुवर्णं तु मोक्षदम् ॥ इति ।

अन्यत्रापि,

सप्तचक्रः समाख्यातो नृसिंहः सर्वतोमुखः । इति ।

इति सर्वतोमुखनृसिंहलक्षणम् ।

अथ पातालनृसिंहलक्षणम् ।

ब्रह्माण्डपुराणे,

बहुचक्रं बहुद्वारं बहुवर्णं महोदरम् ।
पातालनारसिंहाख्यं भिक्षूणाममृतप्रदम् ॥

तथा,

तृतीयचक्रादारभ्य पार्श्वतो दशचक्रकः ।
पूर्वोक्तचिन्हहीनश्च बहुरूपधरो भवेत् ॥
पातालनरसिंहो वा बहुरूपधरो भवेत् । इति ।

इति पातालनृसिंहलक्षणम् ।

अथाकाशनृसिंहलक्षणम् ।

तदप्युक्तं तत्रैव,

अस्पष्टचक्रं मध्यस्थं मलभारं महोदरम् ।

आकाशनारसिंहाख्यं वनवासिभिरर्चितम् ॥ इति ।

इत्याकाशनृसिंहलक्षणम् ।

अथ राक्षसनृसिंहलक्षणम् ।

तत्रैव,

बहुच्छिद्रं भिन्नचक्रं सुवर्णं कनकाञ्चितम् ।
छिद्रं तु राक्षसं ज्ञेयं नृसिंहं गृहदाहकम् ॥ इति ।

सुवर्णं शोभनो वर्णो यस्य ।

इति राक्षसनृसिंहलक्षणम् ।

अथ जिह्वानृसिंहलक्षणम् ।

तत्रैव,

द्विचक्रं द्विमुखं स्थूलं दूर्वाभं चोन्नतं शिरः ।
दारिद्र्यफलदं पुंसां विद्याज्जिह्वानृसिंहकम् ॥ इति ।

इति जिह्वानृसिंहलक्षणम् ।

अथाधोमुखनृसिंहलक्षणम् ।

तत्रैव,

पुरः पार्श्वे च पृष्ठे च चक्रैरप्युपशोभितम् ।
अधोमुखमितिख्यातमर्चकानां विमुक्तिदम् ॥ इति ।

अत्र चक्रत्रयम् । एकं पुरः, एकं पार्श्वे, एकं पृष्ठे । चक्रैरित्यत्र बहुवचननिर्देशात् । बहुवचनं तु कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवसन्नम् ।

अधोमुखनृसिंहश्च शिशुमारस्तथैव च ।
त्रिविक्रमो मत्स्यमूर्तिस्त्रिचक्राः परिकीर्तिताः ॥

इति सम्प्रदायवित्स्मरणाच्च ।

इत्यधोमुखनृसिंहलक्षणम् ।

अथ ज्वालानृसिंहलक्षणम् ।

तत्रैव,

सूक्ष्मरन्ध्रं द्विचक्राढ्यं वनमालाविभूषितम् ।
तज्ज्वालानरसिंहाख्यं नृणां संसारमोचनम् ॥ इति ।

इति ज्वालानृसिंहलक्षणम् ।

इति नृसिंहभेदाः ।

अथ वामनमूर्त्तिलक्षणम् ।

पद्मपुराणे,

वामनाख्यो भवेद्देवो ह्रस्वो यः स्यान्महाद्युतिः ।
ऊर्ध्ववक्त्रस्त्ववक्त्रो वा सोऽपि स्वार्थप्रदो नृणाम् ॥ इति ।

पाद्मपुराणसङ्ग्रहाविष्णुप्रोक्तेषु,

वर्त्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः ।
अतसीपुष्पसङ्काशो बिन्दुना परिभूषितः ॥

अन्यत्र च,

वामनाख्यो भवेद्देवो ह्रस्वो यः स्यान्महाद्युतिः ।
ऊर्ध्वचक्रोप्यधश्चक्रः सोऽभीष्टार्थप्रदोऽर्चितः ॥ इति ।

तथास्य पञ्चविधत्वमपि स्मर्यते—

ब्रह्माण्डपुराणे,

अतसीपुष्पसङ्काशो बिन्दुनोपरिशोभितः ।
यो वामनाभिधो देवः श्वेतबिन्दुयुतो भवेत् ॥
दधिवामनसंज्ञः स्याद्भोभूधान्यसुखप्रदः ।
वर्त्तुलं स्निग्धमत्यन्तस्पष्टचक्रसमन्वितम् ॥
ह्रस्वमुन्नतमुच्चैश्च दीर्घास्यमतिगह्वरम् ।
स्फुरद्रेखावलयितं नाभिस्तस्योन्नतो भवेत् ॥
तस्य चोभयपार्श्वे तु स्नुहीपुष्पाकृतिर्भवेत् ।

केसराभं तु वै तार्क्ष्यं दृश्यते चक्रपार्श्वतः ॥
वामनं गृहिणां श्रेष्ठं सुखसौभाग्यसम्पदः ।
गृहपुत्रान्नवृद्धिं च भूलाभं दिशति ध्रुवम् ॥
मध्यचक्रं चातिह्रस्वमतिस्निग्धं च कामदम् ।
स्पष्टचक्रं वामनं च नृणामीप्सितदायकम् ॥
अतसीकुसुमप्रख्यं किञ्चिदुन्नतमस्तकम् ।
तद्वामनं कामदं स्यात्किञ्चिदस्पष्टचक्रकम् ॥
वर्तुलं नीलमेघाभं वनमालासमन्वितम् ।
सूक्ष्मरन्ध्रं बृहत्कुक्षि वामनं भुवि दुर्लभम् ॥ इति ।

इति वामनमूर्तिलक्षणम् ।

अथ परशुराममूर्तिलक्षणम् ।

पुराणसङ्ग्रहे,

पीतश्च चापपरशुलाङ्गलेन सुलक्षितः ।
रामो रामश्च रामश्च ज्ञेयो मृत्युहरः क्रमात् ॥ इति ।

तथाच ब्रह्माण्डपुराणे,

जामदग्न्यस्तु भगवान् द्विविधः परिकीर्तितः ।
सितकृष्णारुणोपेतं दीर्घाकारं बृहद्विलम् ॥
भित्तिभागगतं चक्रं वामे वा दक्षिणेऽपि वा ।
चक्रभागे भवेद्विन्दुः परश्वाकृतिकेन वा ॥
पृष्ठे वा पार्श्वभागे वा रेखा दंष्ट्राकृतिर्भवेत् ।
जामदग्न्यस्तु भगवान् शान्ताख्यः शान्तिदोऽर्चितः ॥ इति ।

इति परशुराममूर्तिलक्षणम् ।

अथ राममूर्तिलक्षणम् ।

पद्मपुराणे,

रामचन्द्रस्तथा स्निग्धो दूर्वाभश्चक्रशोभनः ।

पृष्ठे दंण्डं तथा पार्श्वे रेखाद्वयेन संयुतः ॥ इति ।
तत्राष्टौ रामभेदाः । तत्र सीतारामो द्विविधः । स चोक्तः—
ब्रह्माण्डपुराणे,
एकस्मिन्नेव वदने चतुश्चक्रोऽम्बुदप्रभः ।
चापबाणाङ्कुशच्छत्रध्वजचामरसंयुतः ॥
वनमालाधरो देवः सीतारामः प्रकीर्तितः ।
सर्वसौभाग्यदश्चोक्तः सर्वत्र विजयप्रदः ॥
द्वारद्वये चतुश्चक्रो वामनश्चैकचक्रवान् ।
बाणतूणीरचापाढ्यः सीतारामः सृगन्वितः ॥
सर्वसौभाग्यदश्चोक्तः सर्वत्र विजयप्रदः । इति ।

इति सीतारामलक्षणम् ।

अथ दशकण्ठकुलान्तकरामलक्षणम् ।

ब्रह्माण्डपुराणे,
कोदण्डी कुक्कुटाण्डाभं श्यामलं पृष्ठमुन्नतम् ।
रेखाद्वयसमोपेतं द्वारपार्श्वे खगेश्वरः ॥
धनुराकृतिका रेखा दृश्यते पार्श्वतोऽपि वा ।
पृष्ठतो वा भवेद्रामो दशकण्ठकुलान्तकः ॥ इति ।

इति दशकण्ठकुलान्तकरामलक्षणम् ।

अथ वीररामलक्षणम् ।

ब्रह्माण्डपुराणे,
बाणतूणीरचाप्राढ्यः कुण्डली सक्सुसमाहितः ।
सूक्ष्मकेसरचक्राढ्यो वीररामः श्रियावहः ॥ इति ।

इति वीररामलक्षणम् ।

अथ बलरामलक्षणम् ।

तत्रैव,

पृष्ठभागे पञ्चरेखाश्चापबाणौ च पार्श्वयोः ।
बलरामः स विज्ञेयः पुत्रदायी न संशयः ॥ इति ।

इति बलरामलक्षणम् ।

अथ विजयरामलक्षणम् ।

तत्रैव,

दिव्यबाणेन संयुक्तश्चापतूणीरसंयुतः ।
करालवदनो यस्तु बिन्दुयुक् चक्रशोभितः ॥
स स्याद्विजयरामाख्यः केसरोपेतचक्रकः । इति ।

इति विजयरामलक्षणम् ।

अथ हृष्टरामलक्षणम् ।

तत्रैवोक्तम्,

मूर्द्ध्नि जालधनुर्बाणः पार्श्वे खुरयुतस्तथा ।
हृष्टराम इति ख्यातो भुक्तिमुक्तिफलप्रदः ॥ इति ।

इति हृष्टरामलक्षणम् ।

अथ कोदण्डरामलक्षणम् ।

तत्रैव,

धनुषैकेन संयुक्तो वर्त्तुलः किञ्चिदायतः ।
कोदण्डरामनामा स्यात्स तु नीलाम्बुदप्रभः ॥ इति ।

इति कोदण्डरामलक्षणम् ।

अथ कवित्वप्रदरामलक्षणम् ।

तत्रैव,

एकचक्रस्तु वदने कृष्णवर्णः सुशोभनः ।

स राममूर्तिर्विज्ञेयः पूजकस्य कवित्वदः ॥ इति ।

इति कवित्वप्रदरामलक्षणम् ।

इति रामभेदाः ।

अथ कृष्णमूर्तिलक्षणम् ।

पाद्मब्राह्मपुराणसङ्ग्रहनृसिंहपुराणेषु,

प्रदक्षिणावर्त्तकृतवनमालाविभूषिता ।
या शिला कृष्णसंज्ञा सा धनधान्यसुखप्रदा ॥ इति ।

ब्रह्माण्डपुराणे,

समचक्रा द्वारदेशे कृष्णवर्णा सुशोभना ।
सा कृष्णमूर्तिर्विज्ञेया पूजिता सौख्यदायिनी ॥

तथा,

कृष्णः पीतः कृशतनुर्भित्तिपार्श्वे तु चक्रयुक् ।
द्वारतुल्यो भवेन्नाभिः कूर्माकारस्तु पृष्ठतः ॥
कृष्णो वृत्ताकृतिस्तार्क्ष्य सर्वेषां पापनाशनः । इति ।

पीतः पीतचिन्हयुक्तः। चिन्हं चात्र पीताम्बरबिन्दुरेखादि ज्ञेयम्।

इति कृष्णमूर्तिलक्षणम् ।

अथ कृष्णभेदाः ।

तत्र गोपाललक्षणमुक्तम्—

ब्रह्माण्डपुराणे,

कृष्णोऽतिकृष्णो न स्थूलश्चक्राभ्यामुपशोभितः ।
वनमालायुतः कण्ठे पृष्ठे श्रीवत्सलाञ्छनः ॥
दण्डशृङ्गयुतः पार्श्वे वेणुना शोभितो मुखे ।
स गोपाल इति प्रोक्तो गोभूधान्यधनप्रदः ॥ इति ।

इति गोपाललक्षणम् ।

अथ मदनगोपाललक्षणम् ।

तत्रैवोक्तम्,

यो गोपालः पार्श्वभागे तरुर्युक्तश्च कार्ष्णिभाक् ।
स स्यान्मदनगोपालो मालाकुण्डलभूषितः ॥
पुत्रपौत्रधनैश्वर्यसर्वलोकैकवश्यदः । इति ।

अत्र यत्र मूर्तिभेदे चक्रादि नोक्तं तत्र तत्प्रकृतिभूतमूर्तिलक्षणोक्तं सामान्यं ग्राह्यम् ।

इति मदनगोपाललक्षणम् ।

अथ सन्तानगोपाललक्षणम् ।

तत्रैव,

दीर्घाकारः कृष्णवर्णः सार्द्धचन्द्रनिभाननः ।
स स्यात्सन्तानगोपालः पुत्रपौत्रादिवृद्धिदः ॥ इति ।

इति सन्तानगोपाललक्षणम् ।

अथ बालकृष्णलक्षणम् ।

तत्रैव,

काममूर्तिस्तु कृष्णाभो निम्नोऽधस्तात्त्रिबिन्दुकः ।
स बालकृष्णो विज्ञेयो दीर्घास्यः पुत्रभाग्यदः ॥ इति ।

इति बालकृष्णलक्षणम् ।

अथ गोवर्द्धनगोपाललक्षणम् ।

तत्रैव,

वर्तुलो मस्तके निम्नः पार्श्वे रजतबिन्दवः ।
गोवर्द्धनाख्यो गोपालो दीर्घरेखा तु दक्षिणे ॥
सर्वकष्टविनाशः स्याद्गोधान्यादिधनप्रदः । इति ।

इति गोवर्द्धनगोपाललक्षणम् ।

---

१ अत्र शालग्रामपरीक्षायाम् –कल्पाख्यतरुयुग्भवेत् । इति पाठः

अथ कालीयमर्दनलक्षणम् ।

तत्रैव,

रेखा स्यात् कृष्णवर्णा हि विन्दुत्रयविभूषितः ।
कालीयमर्दनः साक्षात्सर्वशत्रुनिकृन्तनः ॥
सव्यापसव्यरेखाभ्यां भूषितः सूक्ष्मचक्रकः ।
पार्श्वे खुरयुतो देवो धनञ्जययुतः शुभः ॥ इति ।

इति कालीयमर्दनलक्षणम् ।

अथ स्यमन्तहारिलक्षणम् ।

तत्रैव ,

असिवर्णश्चातिस्थूलश्चक्रभागेऽतिशोभनः ।
वनमालापरिवृतः पृष्ठे श्रीवत्सलाञ्छनः ॥
स्यमन्तहारी विज्ञेयः पुत्रश्रीकीर्तिवर्द्धनः । इति ।

इति स्यमन्तहारिलक्षणम् ।

अथ चाणूरमर्दनलक्षणम् ।

तदप्युक्तं तत्रैव,

रक्तविन्दुद्वययुतः श्यामो दन्तिभुजोपमा ।
रेखा दक्षिणतो वामे मुष्टिवत् दृढविन्दुकः ॥
चाणूरमर्दनाख्यः स्यात्सर्वशत्रुनिकृन्तनः । इति ।

इति चाणूरमर्दनलक्षणम् ।

अथ कंसमर्दनलक्षणम् ।

तत्रैव ,

पूर्वभागैकवदनः पार्श्वैकवदनो भवेत् ।
कंसमर्दी भवेत्कृष्णो नीलाम्बुदनिभः शुभः ॥ इति ।

इति कंसमर्दनलक्षणम् ।

इति कृष्णमूर्तिभेदाः ।

अथ बौद्धमूर्तिलक्षणम् ।

ब्रह्माण्डपुराणे,

अन्तर्गृहरसंयुक्तं चक्रहीनं तथा भवेत् ।
निर्वाणबुद्धसंज्ञः स्याद्ददाति परमं पदम् ॥ इति ।

इति बौद्धमूर्तिलक्षणम् ।

अथ कल्किमूर्तिलक्षणम् ।

ब्रह्माण्डपुराणे,

अतिरक्तः सूक्ष्मबिलः स्पष्टचक्रः स्थिरासनः ।
कृपाणाऽऽकृतिका रेखा द्वारस्योपरि पृष्ठके ॥
म्लेच्छनाशी भवेत्कल्किः कलौ कल्मषनाशनः । इति ।

कृपाणः खड्गः ।

इति कल्किलक्षणम् ।

इति दशावतारमूर्तिलक्षणानि समाप्तानि ।

अथ चतुर्विंशतिमूर्तिलक्षणान्युच्यन्ते ।

तत्रादौ केशवमूर्तिलक्षणमुक्तम्—

पाद्मब्राह्मब्रह्माण्डपुराणेषु,

सौभाग्यं केशवो दद्याच्चतुष्कोणो भवेत्तु सः । इति ।

वैखानससंहितायाम्,

नाभ्यधस्तु भवेच्छङ्खश्चक्रं च तदनन्तरम् ।

---

१ अत्र त्रिपुरानाथविद्वत्सङ्गृहीतशालग्रामपरीक्षा ब्रह्माण्डीयवचनम्—

नीलवर्णस्तथा स्थूलः पृथुचक्रः सुशोभनः ।
रेखात्रयं द्वारदेशे पृष्ठे पद्मेन लाञ्छितः ॥
सौभाग्यं केशवो दद्याच्चतुष्कोणो भवेत्ततः ।
इति वर्तते ।

केशवः स तु विज्ञेयः सर्वकामफलप्रदः ॥ इति ।

इति केशवलक्षणम् ।

अथ नारायणलक्षणम् ।

आग्नेयपुराणसङ्ग्रहवैखानससंहितासु,

श्यामं नारायणं विद्यान्नाभिचक्रं तथोन्नतम् ।
दीर्घरेखात्रयोपेतं दक्षिणे सुषिरं पृथु ॥ इति ।

ब्रह्माण्डपुराणे,

श्यामो नारायणो देवो नाभिचक्रस्तथोन्नतः ।
दीर्घरेखात्रयोपेतो दक्षिणे सुषिरं पृथु ॥
विरजे सुमुखे चक्रे मध्यचक्रः सुशोभनः ।
ताटङ्कनानाभरणहारकेयूरलाञ्छनः ॥
नारायणः समाख्यातः सर्वसिद्धिप्रदायकः । इति ।

इति नारायणलक्षणम् ।

अथ नारायणभेदाः ।

तत्र लक्ष्मीनारायणलक्षणम्—

ब्रह्मपुराणे,

द्वारमेकं चतुश्चक्रं ब्रह्मादीनां च दुर्लभम् ।
शोभितो वनमालया इति क्वचित्पाठः ।
लक्ष्मीनारायणो नाम भुक्तिमुक्तिफलप्रदः ॥ इति ।

पुराणसङ्ग्रहे,

ध्वजवज्राङ्कुशोपेतं वामे चक्रे तु वर्तुलम् ।
लक्ष्मीनारायणं देवमभीष्टफलदं विदुः ॥

वामे अधःखण्डे । चक्रे चक्रद्वयम् । उपर्यपि च चक्रद्वयमित्यर्थः ।

तथा,

ध्वजवज्राङ्कुशोपेतो वामचक्रः सुवर्तुलः ।
लक्ष्मीनारायणो देवश्चतुश्चक्रसमन्वितः ॥
पूजनीयः सदा सद्भिर्वैष्णवैर्मोक्षमीप्सुभिः । इति ।

ब्रह्माण्डपुराणे,

एकवक्त्रश्चतुश्चक्रो वर्त्तुलः श्यामवर्णकः ।
ध्वजवज्राङ्कुशोपेतो मालायुक्तः सबिन्दुकः ॥
नातिह्रस्वो न च स्थूलो लक्ष्मीनारायणः स्मृतः ।
तस्य दर्शनमात्रेण ह्यभीष्टफलमाप्नुयात् ॥ इति ।

पाद्मे,

सूक्ष्मद्वारश्चतुश्चक्रो वनमालाङ्कितोदरः ।
लक्ष्मीनारायणः श्रीमान् भुक्तिमुक्तिफलप्रदः ॥ इति ।

वैखानससंहितायां विशेषः ।

लक्ष्मीनारायणो देवस्त्रिभिश्चक्रैर्व्यवस्थितः ।
पूजनीयः प्रयत्नेन भुक्तिमुक्तिफलप्रदः ॥ इति ।

पाद्मे कार्तिकमाहात्म्ये,

चत्वारि सूक्ष्मचक्राणि द्वारभागे भवन्ति च ।
उदरे वनमाला च लक्ष्मीनारायणो भवेत् ॥
पूजनीयः सदा भक्तैर्भुक्तिमुक्तिफलप्रदः । इति ।

इति लक्ष्मीनारायणलक्षणम् ।

अथ नरनारायणलक्षणम् ।

ब्रह्माण्डपुराणे,

नरनारायणो देवः श्वेतचक्रः सुशोभनः ।
तमालदलसङ्काशः स्वर्णपङ्कविलेपनः ॥ इति ।

इति नरनारायणलक्षणम् ।

अथ रूपनारायणलक्षणम् ।

तत्रैव,

मुशलायुधमालाभिः शङ्खचक्रगदान्वितः ।
रूपनारायणो देवो मुखे चाभिमुखं धनुः ॥ इति ।

इति रूपनारायणलक्षणम् ।

इति नारायणभेदाः ।

अथ माधवलक्षणम् ।

वैखानससंहितायाम्,

माधवो मधुवर्णाभो गदाकम्बुविलक्षितः ।

ब्रह्माण्डपुराणे,

मधुवर्णो मध्यचक्रः स्निग्धः सूक्ष्मतनुस्तथा ।
माधवः स तु विज्ञेयो यतीनां मोक्षदायकः ॥ इति ।

इति माधवलक्षणम् ।

अथ गोविन्दलक्षणम् ।

पुराणसङ्ग्रहे,

गोविन्दः पुण्डरीकाक्षः कृष्णवर्णो महाद्युतिः ।
दक्षिणे तु गदाचक्रे वामे पर्वतलाञ्छनः ॥ इति ।

ब्रह्माण्डपुराणे,

नातिस्थूलः कृष्णवर्णो गोविन्दः पञ्चवक्त्रकः ।
वामवक्त्रो बृहद्द्वार उन्नतो मध्यनिम्नकः ॥ इति ।

इति गोविन्दलक्षणम् ।

अथ विष्णुलक्षणम् ।

पद्मपुराणे,

स्थूलचक्रो भवेद्विष्णुर्मोक्षैकफलदोऽर्चितः । इति ।

---

१ सुन्दरमुख इत्यर्थः ।

ब्रह्मपुराणे,
कृष्णवर्णस्तथा विष्णुः स्थूलचक्रे सुशोभने ।
गदाकारा तथा रेखा लाञ्छनं मध्यदेशतः ॥
लाञ्छनं चात्र पीतादिवर्णम् ।
आग्नेये,
स्थूलचक्रोऽसितो विष्णुर्मध्ये रेखा गदाकृतिः । इति ।
पुराणसङ्ग्रहे,
कृष्णवर्णस्तथा विष्णुः स्थूलचक्रे सुशोभने ।
यस्य मध्ये गदाकारा दृश्यन्ते पञ्च रेखिकाः ॥ इति ।
वैखानससंहितायाम्,
कृष्णवर्णस्तथा विष्णुः स्थूलचक्रे सुशोभने ।
गदाकृतिस्तथा रेखा दृश्यते पृष्ठमध्यतः ॥ इति ।
ब्रह्माण्डपुराणे,
स कापिलः स्निग्धवर्णो विष्णुर्विषयभोगदः । इति ।

इति विष्णुलक्षणम् ।

अथ मधुसूदनलक्षणम् ।

वैखानससंहितायाम्,
नाभिपार्श्वे शङ्खपद्ममुद्रा यस्मिन् प्रदृश्यते ।
मधुसूदन आख्यातः शत्रुहा परिकीर्तितः ॥ इति ।
ब्रह्माण्डपुराणे,
मधुसूदो महादेव एकचक्रो महाद्युतिः ।
स्वर्णबिन्दुसमायुक्तो महातेजःप्रदः शुभः ॥ इति ।

इति मधुसूदनलक्षणम् ।

अस्मिन् प्रकरणे सर्वत्र विष्णुप्रोक्तपदेन विष्णुरहस्यं ज्ञेयम् ।

अथ त्रिविक्रमलक्षणम्।

पुराणसङ्ग्रहे,

कपिलाभश्चैकवक्त्रश्चक्रत्रितयभूषितः।
त्रिविक्रमस्त्रिकोणः स्यात् बलमेव प्रयच्छति॥ इति।

ब्राह्मवैखानससंहिताविष्णुप्रोक्तेषु,

त्रिविक्रमस्तथा देवः श्यामवर्णो महाद्युतिः।
वामपार्श्वे स्थिते चक्रे रेखा चैव तु दक्षिणे॥ इति।

अग्निपुराणे,

श्यामस्त्रिविक्रमो दक्षरेखो वामे च रक्तकः।

ब्रह्माण्डपुराणे तु विशेषः।

त्रिविक्रमस्त्रिकोणाढ्यश्चक्रत्रयसमन्वितः।
प्रयत्नेन द्विजेन्द्राणां सदा पूज्यश्च नेतरैः॥ इति।

इति त्रिविक्रमलक्षणम्।

वामनो नारसिंहश्च कृष्णश्चेति त्रयः पुरा।
उक्तत्वादत्र नोच्यन्ते प्रभेदार्थं पुनर्भयात्॥

अथ श्रीधरलक्षणम्।

ब्राह्मवैखानससंहिताविष्णुप्रोक्ताग्निपुराणब्रह्माण्डपुराणेषु,

श्रीधरस्तु तथा देवश्चिह्नितो वनमालया।
कदम्बकुसुमाकारो रेखापञ्चकसंयुतः॥

कदम्बकुसुमाकारः वर्त्तुल इत्यर्थः। अत्र सर्वत्र रेखायुक्तत्वं द्वारोपरि ज्ञेयम्। "द्वारोपरि तथा रेखा" "रेखात्रयं तथा द्वारे" इति तत्र विशेषाभिधानादिति नृसिंहपरिचर्यायाम्।

---

१ अत्र सर्वत्र विष्णुप्रोक्तपदेन विष्णुरहस्यं ज्ञेयम्।

पुराणसङ्ग्रहे,
श्रीधरोऽसौ तथा देवश्चिन्हितो वनमालया ।
कदम्बकुसुमाकार ऊर्ध्वरेखश्च पादयोः ॥ इति ।

इति श्रीधरलक्षणम् ।

अथ श्रीधरभेदौ ।

द्वौ चोक्तौ ब्रह्माण्डपुराणे,
चक्रे च मध्यदेशे तु पङ्कजेन समन्वितः ।
सूक्ष्माननः श्यामलाभः स पुनः श्रीधरः स्मृतः ॥
निम्नोन्नते शिरःपार्श्वे निम्नमास्यं सुवर्त्तुलम् ।
निम्नचक्रमतिह्रस्वं श्रीधरं सर्वसिद्धिदम् ॥ इति ।

इति श्रीधरभेदौ ।

अथ हृषीकेशलक्षणम् ।

पाद्मब्राह्मब्रह्माण्डपुराणेषु,
अर्धचन्द्राकृतिर्देवो हृषीकेश उदाहृतः ।
तमर्च्य लभते स्वर्गं विषयांश्च समीहितान् ॥ इति ।
वैखानससंहितायाम्,
सूकरस्य निभाकारास्तस्य केशाः सुवर्चसः ।
वर्मैकं यस्य दृश्येत हृषीकेशः स उच्यते ॥ इति ।

इति हृषीकेशलक्षणम् ।

अथ पद्मनाभलक्षणम् ।

ब्रह्मपुराणे,
आरक्तं पद्मनाभाख्यं पङ्कजच्छत्रसंयुतम् ।
तुलस्यां पूजयेन्नित्यं दरिद्रस्त्वीश्वरो भवेत् ॥ इति ।

---

१ पञ्जर इत्यर्थः ।

ब्रह्माण्डपुराणे,

निष्केशरोर्ध्वचक्रस्तु अर्धश्चक्रः सकेसरः।
पद्मनाभ इति प्रोक्तो विपरीतो हलायुधः॥ इति।

एतस्यैव बहुचक्रवर्णसद्भावे एतत्पूजने दुष्टं फलं श्रूयते—

पद्मपुराणे,

बहुभिस्तु यदा चक्रैः शुक्लवर्णादिशोभितः।
दैत्यारिः कमलाक्षश्च गदापाणिरधोक्षजः॥
पद्मनाभश्च देवः स्यात्प्रत्यहं दुःखदायकः।
तस्मान्न मानवैः पूज्यो बहुचक्रः प्रजापते॥ इति।

वर्णक्रमश्चेत्थं ग्राह्यः—

शुक्लो रक्तस्तथा कृष्णो द्विवर्णो बहुवर्णवान्।
इति पद्मपुराणे तत्प्रकरणस्थवचनात्।

इति पद्मनाभलक्षणम्।

अथ दामोदरलक्षणम्।

पाद्मब्रह्मपुराणयोः,

स्थूलो दामोदरो ज्ञेयः सूक्ष्मवक्त्रो भवेत्तु सः।
चक्रे तु मध्यदेशस्थे पूजितः सुखदः सदा॥ इति।

ब्रह्माण्डपुराणवैखानससंहिताविष्णुप्रोक्तेषु,

दामोदरं तथा स्थूलं मध्यचक्रं प्रतिष्ठितम्।

मध्यचक्रं प्रकीर्तितमिति क्वचित्पाठः।

दूर्वाभं द्वारसङ्कीर्णं पीतरेखायुतं शुभम्॥ इति।

इति दामोदरलक्षणम्।

अथ वासुदेवलक्षणम्।

ब्राह्मवैखानससंहिताविष्णुप्रोक्तपुराणसङ्ग्रहनृसिंहपुराणब्रह्माण्डपुराणेषु,

द्वारदेशे समे चक्रे दृश्येते नान्तरीयके ।
वासुदेवः स विज्ञेयः शुक्लाभश्च स्वतेजसा ॥ इति ।
शुक्लाभश्चातिशोभनः । इति क्वचित्पाठः । नान्तरीयके संलग्ने ।

अग्निपुराणेऽपि,

वासुदेवः सितो द्वारि शिलालग्नद्विचक्रकः । इति ।

इति वासुदेवलक्षणम् ।

अथ सङ्कर्षणलक्षणम् ।

ब्राह्मवैखानससंहिताविष्णुप्रोक्तपुराणसङ्ग्रहब्रह्माण्डपुराणेषु,

द्वौ चक्रावग्रलग्नौ तु पूर्वभागश्च पुष्कलः ।
सङ्कर्षणाख्यो विज्ञेयो रक्ताभश्चातिशोभनः ॥
रक्ताभश्च स्वतेजसा । इति क्वचित्पाठः ।
अग्रलग्नौ अग्रे किञ्चिल्लग्नौ । क्वचिच—
द्विचक्रे एकसंलग्ने भागैकं पुष्कलं भवेत् । इति पाठः ।

इति सङ्कर्षणलक्षणम् ।

अथ प्रद्युम्नलक्षणम् ।

ब्राह्मविष्णुप्रोक्तवैखानससंहितासु,

प्रद्युम्नः सूक्ष्मचक्रस्तु पीतदीप्तिस्तथैव च ।
सुषिरं[1] छिद्रबहुलं दीर्घाकारं च यद्भवेत् ॥ इति ।

ब्रह्माण्डपुराणे,

प्रद्युम्नः सूक्ष्मचक्रस्तु पीतवर्णस्तथैव च ।
मकराभाश्च वै रेखाः पार्श्वतः पृष्ठतोऽपि च ॥ इति ।

अग्निपुराणे विशेषः ।

---

१ सुषिरं महत्तरम्, तद्विशेषणं छिद्रबहुलमिति ।

सूक्ष्मचक्रो बहुच्छिद्रो प्रद्युम्नो नीलवर्णकः । इति ।

पद्मपुराणेऽपि,

प्रद्युम्नः सूक्ष्मचक्रः स्यान्नीलाम्बुजनिभस्तथा ।
नीलाम्बुजयुतोऽथवा । इति पाठान्तरम् ।
स ददाति श्रियं नृणामभक्त्यापि प्रपूजितः ॥ इति ।

इति प्रद्युम्नलक्षणम् ।

अथानिरुद्धलक्षणम् ।

ब्रह्मपुराणविष्णुप्रोक्तवैखानससंहितापुराणसङ्ग्रह-ब्रह्माण्डपुराणेषु,

अनिरुद्धस्तु नीलाभो वर्त्तुलश्चातिशोभनः ।
रेखात्रयं तु तद्द्वारि पृष्ठे पद्मेन लाञ्छितः ॥ इति ।

अग्निपुराणे,

पीतोऽनिरुद्धः पद्माङ्को वर्त्तुलोऽसौ त्रिरेखवान् ।

तथा,

अनिरुद्धस्तु पीताभो वर्तुलश्चातिशोभनः ।
रेखात्रयपरिवृतो देवः पद्मेन लाञ्छितः ॥ इति ।

ब्रह्माण्डपुराणे विशेषः ।

कृष्णवर्णः समद्वारश्चक्रं भित्तिसमीपगम् ।
सूक्ष्मचक्रं भवेदूर्ध्वं पार्श्वे चक्रेण[1] पुष्पकृत् ॥
अनिरुद्ध इति प्रोक्तः सर्वलोकैककारणम् । इति ।

इत्यनिरुद्धलक्षणम् ।

अथ पुरुषोत्तमलक्षणम् ।

ब्रह्मपुराणे;

विदिक्षु दिक्षु सर्वासु यस्योर्द्धं दृश्यते मुखम् ।

---

१ चणकपुष्पधृक् इति शालग्रामपरीक्षायां पाठः ।

पुरुषोत्तमः स विज्ञेयो भुक्तिमुक्तिफलप्रदः ॥
'स देवदेवो विज्ञेयः पुराणः पुरुषोत्तमः'। इत्यपि क्वचित्पाठः।
ब्रह्माण्डपुराणे
मध्यचक्रः सुवर्णश्च मस्तके पृथुचक्रकः ।
पुरुषोत्तमो भवेद्देवः पूजकस्य शुभप्रदः ॥ इति ।
पुराणसङ्ग्रहे,
अतसीपुष्पसङ्काशो बिन्दुना परिभूषितः ।
पुरुषोत्तम उक्तोऽसौ सर्वसौभाग्यवर्द्धनः ॥ इति ।

इति पुरुषोत्तमलक्षणम् ।

अथाधोक्षजलक्षणम् ।

ब्रह्माण्डपुराणे,
अतिकृष्णो रक्तरेखो वृत्तदेहः सुचक्रकः ।
किञ्चित्कपिलसंयुक्तः सूक्ष्मो वा स्थूल एव वा ॥
अधोक्षज इति ख्यातः पूजकस्य शुभप्रदः । इति ।

इत्यधोक्षजलक्षणम् ।

अथाच्युतलक्षणम् ।

ब्रह्माण्डपुराणे,
चतुर्भिश्चैव चक्रैस्तु[1] वामदक्षिणपार्श्वयोः ।
अधिष्ठितो मुखे रक्तः कुण्डलद्वयशोभितः ॥
शङ्खचक्रगदाशार्ङ्गबाणकौमोदकीधरः ।
मुशलध्वजधृक् श्वेतच्छत्रवज्राङ्कुशैर्युतः ॥
सोऽच्युतः कथितो नाम्ना दुर्लभस्तपसा विना । इति ।

इत्यच्युतलक्षणम् ।

---

१ चतुर्बिलो ह्यष्टचक्रैर्वामदक्षिणपार्श्वगैः ।' इति शाल. प. पाठः ।

अथोपेन्द्रलक्षणम् ।

ब्रह्माण्डपुराणे,

उपेन्द्रो मणिवर्णाभो ह्रस्वचक्रोऽतिशोभनः ।
श्यामलः कोमलाभस्तु वक्त्रपार्श्वे सुचक्रयुक् ॥ इति ।

इत्युपेन्द्रलक्षणम् ।

अथ जनार्दनलक्षणम् ।

ब्रह्मपुराणे,

द्वारद्वये चतुश्चक्रो जनार्दन इहोच्यते ।
चक्रद्वयं मध्यगतं चक्रद्वयं च पृष्ठतः ॥ इति ।

ब्रह्माण्डपुराणेऽपि,

पूर्वभागैकवदनः पश्चादेकास्यसंयुतः ।
जनार्दनश्चतुश्चक्रः श्रीप्रदो रिपुनाशनः ॥ इति ।

इति जनार्दनलक्षणम् ।

अथ हरिलक्षणम् ।

ब्रह्मपुराणे,

ऊर्ध्वमुखं विजानीयाद्धरितं हरिरूपिणम् ।
कामदं मोक्षदं चैव अर्थदं च विशेषतः ॥ इति ।

तथा,

ऊर्ध्वे मुखं विजानीयाच्छ्यामाभं वर्तुलं शुभम् ।
अधोबिन्दुसमायुक्तं सर्वकामार्थसाधकम् ॥ इति ।

ब्रह्माण्डपुराणे,

अल्पद्वारसमोपेता हरिमूर्तिरुदाहृता । इति ।

इति हरिलक्षणम् ।

इति चतुर्विंशतिमूर्त्तिलक्षणानि ।

अथ प्रकीर्णकलक्षणम् ।

तत्रानन्तमूर्तिलक्षणम्—

आग्नेये,

अनन्तो नागभोगाङ्को नैकाभो नैकमूर्तिमान् । इति ।

ब्रह्मपुराणे,

नानावर्णस्त्वनन्तः स्यान्नागभोगेन चिन्हितः । इति ।

वैखानससंहिताविष्णुप्रोक्तयोः,

नानावर्णमनन्तं च नागभोगेन चिन्हितम् ।
अनन्तमूर्तिसम्भिन्नं जानीयात् सर्वकामदम् ॥ इति ।

पद्मपुराणे,

अनेकचक्रो बहुभिश्चिन्हैरप्युपलक्षितः ।
अनन्तः स तु विज्ञेयः सर्वपूजाफलप्रदः ॥ इति ।

पुराणसङ्ग्रहे,

नानावर्णस्त्वनन्तः स्यान्नागभोगेन चिन्हितः ।
अनेकमुखसंयुक्तः सर्वकामफलप्रदः ॥ इति ।

ब्रह्माण्डपुराणे,

चतुर्दशद्वाःप्रभृतिविंशत्या चक्रलाञ्छितः ।
नानावर्णो ह्यनन्तात्मा नागभोगेन चिन्हितः ॥
अनेकमूर्तिसम्भिन्नः सर्वकामफलप्रदः ।
प्रदक्षिणावर्त्तकृतवनमालाविभूषितः ॥
कृष्णवर्णयुतश्चापि धनधान्यसुखप्रदः ।
पूजनीयः प्रयत्नेन स्थिरः स्निग्धश्च वर्त्तुलः ॥
अनन्तो मूर्ध्नि चक्राढ्यः— इति विशेषः ।

इत्यनन्तमूर्तिलक्षणम् ।

अथ वैकुण्ठमूर्तिलक्षणम् ।

ब्रह्मपुराणे,

वैकुण्ठो मणिवर्णाभश्चक्रमेकं तथाम्बुजम् ।
द्वारोपरि तथा रेखा कञ्जाकारा सुशोभना ॥
'वैकुण्ठं तिलवर्णाभं चक्रमेकं तथा ध्वजम् ।
द्वारोपरि तथा रेखा गुञ्जाकारा सुशोभना' ॥ इति पाठान्तरम् ।

आग्नेये,

वैकुण्ठ एकचक्रो हि मणिभः स्वच्छरेखकः । इति ।

वैखानससंहितायाम्,

वैकुण्ठो मणिरत्नाभश्चक्रमेकं तथाम्बुजम् ।
द्वारोपरि तथा रेखा चक्रचिन्हेन चिन्हितः ॥ इति ।

ब्रह्माण्डपुराणे,

वैकुण्ठो मणिवर्णाभो वामपार्श्वैकचक्रकः ।
द्वारोपरि तथा रेखा पद्माकारा सुशोभना ॥ इति ।

इति वैकुण्ठलक्षणम् ।

अथ हयग्रीवलक्षणम् ।

पद्मपुराणे,

हयग्रीवश्च स ज्ञेयो योऽङ्कुशप्रतिरूपकः ।
चक्रध्वजसमायुक्तः पूजितः सौख्यदस्ततः ॥ इति ।

ब्रह्मपुराणे,

'हयग्रीवो हयाकारो रेखा चक्रसमीपगा ।
बहुरूपसमाकीर्णः पृष्ठे स्यान्नीलरूपकः ॥
'बहुबिन्दुसमायुक्तं पृष्ठं नीरदनीलकम्' । इति पाठान्तरम् ।

आग्नेये,

हयग्रीवोऽङ्कुशाकारो रेखानीलः सबिन्दुकः ।

तथा पद्मपुराणे,

हयग्रीवोऽङ्कुशाकारो रेखाः पञ्च भवन्ति हि ।
बहुबिन्दुसमाकीर्णो दृश्यते नीलरूपकः ॥
हयग्रीवा यथा लम्बा रेखाङ्का या शिला भवेत् ।
तथा सौम्यो हयग्रीवः पूजितो ज्ञानदो भवेत् ॥
अश्वाकृति मुखं यस्य साक्षमालं शिरस्तथा ।
पद्माकृतिर्भवेद्वापि हयशीर्षा त्वसौ मतः ॥ इति ।

पुराणसङ्ग्रहे,

हयग्रीवोऽपि भगवान् रक्तपीतादिमिश्रितः ।
अङ्कुशाकृतिकस्ताक्ष्यं चक्रद्वयसमन्वितः ॥
पद्माकृतिस्तथा पार्श्वे कुण्डलाकृतिरेव वा ।
ज्ञानदो मोक्षदो नृणां भोगदो विनतासुत ॥ इति ।

इति हयग्रीवलक्षणम् ।

अथ परमेष्ठिलक्षणम् ।

आग्नेये,

परमेष्ठी साब्जचक्रः पृष्ठच्छिद्रश्च बिन्दुमान् । इति ।

ब्रह्मपुराणे,

परमेष्ठी तु शुक्लाभः पद्मचक्रसमन्वितः ।
बिम्बाकृतिस्तथा पृष्ठे सुषिरं चातिपुष्कलम् ॥

तथा,

परमेष्ठी लोहिताभश्चक्रमेकं तथाम्बुजम् ।
बिल्वाकृतिस्तथा रेखा सुषिरं चातिपुष्कलम् ॥ इति ।

पुराणसङ्ग्रहे,
परमेष्ठी तु शुक्लाभः पृथुचक्रसमन्वितः ।
विम्बाकृतिः क्वचित्पीतः पृष्ठे च सुषिरान्वितः ॥
'परमेष्ठी तु शुक्लाभश्चक्रपद्मसमन्वितः ।
सुवर्त्तुलस्तथा पीतः पृष्ठे च सुषिरं ध्रुवम्' ॥ इति पाठान्तरम्।
वैखानससंहितायाम्,
परमेष्ठी तु रक्ताभश्चक्रं पद्मसमन्वितम् ।
गदाकृतिस्तथा रेखा दृश्यते वामपार्श्वतः ॥ इति ।
ब्रह्माण्डपुराणे,
परमेष्ठी च शुक्लाभश्चक्रपद्मसमन्वितः ।
द्विधाकृतस्तथा पृष्ठे सुषिरं चापि वर्त्तुलम् ॥
पीतवर्णयुतो वापि भुक्तिमुक्तिवरप्रदः । इति ।

इति परमेष्ठिलक्षणम् ।

अथ हिरण्यगर्भलक्षणम् ।

ब्रह्मपुराणे,
हिरण्यगर्भं जानीयान्मधुपिङ्गलविग्रहम् ।
ईषद्दीर्घं मनोज्ञं च स्निग्धं सकलकामदम् ॥
तथा,
चन्द्राकृतिं हिरण्याख्यं रश्मिज्वालं विनिर्दिशेत् ।
सुवर्णरेखाबहुलं स्फटिकद्युतिशोभितम् ॥ इति ।
ब्रह्माण्डपुराणे विशेषः ।
हिरण्यगर्भो भगवान् पवित्रो भुवि दुर्लभः ।
अन्तर्ध्वनिसमायुक्तः कृष्णवर्णः सुवृत्तकः ॥
वर्तुलो ह्रस्ववदनो चक्रमध्ये च कोमलः ।

श्रीवत्सकमलाकारलाञ्छनं पृष्ठपार्श्वके ॥
हिरण्यगर्भो विख्यातः पृथुनाभिसमन्वितः ।
हिरण्येन विमिश्रस्तु श्रीप्रदः कुलवर्द्धनः ॥ इति ।

इति हिरण्यगर्भलक्षणम् ।

अथ चतुर्भुजमूर्तिलक्षणम् ।

ब्रह्मपुराणे,
चतुर्भुजश्चतुश्चक्रो नवमेघसमद्युतिः ।
मण्डलाकारचक्रः स्यात्सर्वेषामभयप्रदः ॥ इति ।

इति चतुर्भुजलक्षणम् ।

अथ गदाधरलक्षणम् ।

ब्रह्मपुराणे,
गदाधरस्तथा देवो गुरुरूपः समन्ततः ।
चक्रस्निग्धोऽतिकृष्णश्च पद्मं शङ्खं च दक्षिणे ॥ इति ।
गुरुरूपः बृहस्पतिवर्णः, पीत इत्यर्थः ।
पुराणसङ्ग्रहे,
गदाधरस्त्रिलेखाभिर्लाञ्छितो मध्यदेशतः ।
ध्वजवज्राङ्कुशैः पीतो वामचक्रः सुवर्त्तुलः ॥ इति ।

इति गदाधरलक्षणम् ।

अथ पुण्डरीकाक्षलक्षणम् ।

ब्रह्माण्डपुराणे,
पार्श्वे वा मूर्ध्नि पृष्ठे वा चामरद्वयसंयुता ।
पुण्डरीकाक्षमूर्तिः स्यात्सर्वलोकवशङ्करी ॥ इति ।
कमलद्वयसंयुता । इति पाठान्तरम् ।

इति पुण्डरीकाक्षलक्षणम् ।

अथ चतुर्मुखमूर्तिलक्षणम्।

पाद्मपुराणसङ्ग्रहब्राह्मेषु,

चतस्रो यत्र दृश्यन्ते रेखाः पार्श्वसमीपगाः।
द्वे चक्रे मध्यदेशे च सा शिला स्याच्चतुर्मुखा॥ इति।

ब्रह्माण्डपुराणे,

चतस्रो यत्र वर्त्तन्ते रेखाः पार्श्वसमीपतः।
द्विचक्रो मध्यदेशे तु सा शिला स्याच्चतुर्मुखा॥ इति।

इति चतुर्मुखमूर्तिलक्षणम्।

अथ सुदर्शनमूर्त्तिलक्षणम्।

पुराणसङ्ग्रहे,

अतसीपुष्पसङ्काशो बिन्दुना परिभूषितः।
सुदर्शनः स्मृतो देवः श्यामो भूतिसुखप्रदः॥ इति।

ब्रह्मपुराणे,

सुदर्शनस्तथा देवः श्यामवर्णो महाद्युतिः।
वामपार्श्वे गदाचक्रे रेखा चैव तु दक्षिणे॥ इति।

पद्मपुराणे,

चक्राकारेण पङ्क्तिः सा यत्र रेखामयी भवेत्।
स सुदर्शन इत्येवं ख्यातः पूजाफलप्रदः॥ इति।

ब्रह्माण्डपुराणे,

सुदर्शनं द्विधा ज्ञेयं लक्षणान्तरयोगतः।

---

१ शाल० प० यामिदं वचनं पुराणसङ्ग्रहस्थत्वेनोल्लिखितमास्ति। एतदनन्तरम्—

शुद्धं सुदर्शनं चैव तथोभयसुदर्शनम्।
सुदर्शनं समाख्यातं ज्ञेयं लक्षणकोविदैः॥

इत्यधिकमप्यस्ति।

एकं चक्रं शिरोदेशे कृष्णवर्णमुखस्तथा ॥
सुदर्शनः स विज्ञेयः सर्वपापप्रणाशनः ।
पद्माकारं बृहद्द्वारं निम्ननाभि सुदर्शनम् ॥ इति ।

इति सुदर्शनलक्षणम् ।

अथ योगेश्वरलक्षणम् ।

ब्रह्मपुराणे,
दृश्यते शिखरे लिङ्गं शालग्रामसमुद्भवम् ।
स च योगेश्वरो नाम ब्रह्महत्यां व्यपोहति ॥ इति ।

इति योगेश्वरलक्षणम् ।

अथ विष्णुपञ्जरलक्षणम् ।

पद्मपुराणे,
वज्रकीटोद्भवा रेखाः पङ्क्तीभूताश्च यत्र वै ।
शालग्रामशिला सा तु विष्णुपञ्जरसंज्ञिता ॥ इति ।

इति विष्णुपञ्जरलक्षणम् ।

अथ यज्ञमूर्तिलक्षणम् ।

ब्रह्माण्डपुराणे,
यज्ञमूर्तिस्तु भगवान् पीतरक्तविमिश्रितः ।
द्वारं ह्रस्वमधश्चक्रं स्रुवौ वा दक्षिणेऽपि च ॥ इति ।

इति यज्ञमूर्तिलक्षणम् ।

अथ दत्तात्रेयमूर्त्तिलक्षणम् ।

तत्रैव,
पीतोऽरुणोऽसिताभश्च ह्रस्वपृष्ठोन्नतो भवेत् ।

---

१ इदं वचनं शा० प० यां पद्मपुराणीयत्वेन लिखितमास्ति ।

अक्षमालाकृतिः पृष्ठे दत्तात्रेयः शुभप्रदः ॥ इति ।
तथा,
कृष्णो रक्तश्च पीतश्च दत्तात्रेयाभिधो भवेत् । इति ।

इति दत्तात्रेयमूर्तिलक्षणम् ।

अथ शिशुमारलक्षणम् ।

तत्रैव,
शिशुमारो दीर्घकायो बिलशाय्यतिगह्वरः ।
पुरस्तु पृष्ठभागे तु चक्रेणैकेन संयुतः ॥
पुरः चक्रद्वयं, पृष्ठभागे एकं चक्रम्,एवं चक्रत्रयमित्यर्थः ।
सर्वाधारः स विज्ञेयः सर्वसिद्धिप्रदो नृणाम् ॥ इति ।

इति शिशुमारलक्षणम् ।

अथ हंसमूर्तिलक्षणम् ।

ब्रह्माण्डपुराणे,
हंसस्तु धनुराकारो नीलश्वेतविमिश्रितः ।
चक्रपद्मसमोपेतः केवलं मोक्षदो भवेत् ॥ इति ।

इति हंसलक्षणम् ।

अथ परमहंसलक्षणम् ।

ब्रह्माण्डपुराणे,
परहंसः खगेशान शिखण्डिगलसन्निभः ।
शिखण्डी मयूरः ।
स्निग्धश्चायतवृत्तश्च वर्त्तुलद्वारसंयुतः ।
बिन्दुमध्ये तथा चक्रे दृश्येते ह्यतिशोभने ।
चक्रस्य दक्षिणे पार्श्वे द्युमणिर्भास्वरो भवेत् ।
वराहरेखे तद्वामे दृश्येते विनतासुत ॥
मूर्त्तिः परमहंसाख्या चतुर्वर्गफलप्रदा । इति ।

इति परमहंसलक्षणम् ।

अथ लक्ष्मीपतिलक्षणम् ।

ब्रह्माण्डपुराणे,

मुखे च पाश्वर्तो वापि मयूरगलसन्निभः ।
कृष्णवर्णः सूक्ष्मचक्रः पृथुलास्योऽसमप्रभः ॥
लक्ष्मीपतिरितिख्यातो लक्ष्मीसम्पत्तिदायकः । इति ।

इति लक्ष्मीपतिलक्षणम् ।

अथ गरुडध्वजलक्ष्मीपतिलक्षणम् ।

ब्रह्माण्डपुराणे,

स्वर्णशृङ्गखुरः सौम्यो वर्त्तुलः स्निग्धकेसरः ।
चक्रे मध्यगते स्निग्धकृष्णरेखाविभूषितः ॥
लक्ष्मीपतिर्वैनतेय गरुडध्वजसंज्ञितः । इति ।

इति गरुडध्वजलक्ष्मीपतिलक्षणम् ।

अथ वटपत्रशायिलक्षणम् ।

ब्रह्माण्डपुराणे,

वटपत्रशायी भगवान् वर्त्तुलोऽत्यन्तशोभनः ।
क्षीरबुद्बुदवत्ताक्ष्यं नीलश्वेताविमिश्रितः ॥
वक्त्रस्य वामतः शङ्खो दक्षिणे पद्ममेव च ।
वदनैकं मध्यदेशे चतुश्चक्रस्त्रिबिन्दुकः ॥ इति ।

इति वटपत्रशायिलक्षणम् ।

अथ विश्वम्भरमूर्तिलक्षणम् ।

ब्रह्माण्डपुराणे,

चक्राणां विंशतिकया युक्तो विश्वम्भरः शुभः । इति ।

इति विश्वम्भरलक्षणम् ।

---

१ पृथुलास्यः स्रगन्वितः । इति शा० प० पाठः ।

अथ विश्वरूपलक्षणम् ।

तत्रैव,

विश्वरूपोऽपि भगवान् द्विविधः परिकीर्त्तितः ।
विश्वरूपो हरिः साक्षात्पारावतगलोपमः ॥
बहुचक्राङ्कितोऽनेकमूर्तिरूपसमन्वितः ।
पञ्चवक्त्रः स्थूलतरः पुरुषो बहुचक्रकः ॥
विश्वरूपो ह्यनन्तो वा पुत्रपौत्रादिकप्रदः । इति ।

इति विश्वरूपलक्षणम् ।

अथ पीताम्बरधरलक्षणम् ।

उक्तं च तत्रैव,

स्निग्धगोरोचनाकारः सुचक्रो वर्त्तुलोऽपि वा ।
पीताम्बरधरो देवः सौख्यदः फलदोऽर्चितः ॥ इति ।

इति पीताम्बरधरलक्षणम् ।

अथ सत्यवीरश्रवसो लक्षणम् ।

तत्रैव,

सुवर्त्तुलो ह्यचक्रः सर्वाङ्गे हेमविन्दवः ।
सत्यवीरश्रवाः प्रोक्तः सर्वसौभाग्यवर्द्धनः ॥ इति ।

इति सत्यवीरश्रवसो लक्षणम् ।

अथामृताहरणलक्षणम् ।

तत्रैव,

अमृताहरणो देवो नीलोत्पलसमप्रभः ।
वर्त्तुलो ह्रस्ववदनो ह्रस्वचक्रोऽतिकोमलः ॥ इति ।

इत्यमृताहरणलक्षणम् ।

अथ चक्रपाणिमूर्त्तिलक्षणम् ।

ब्रह्माण्डपुराणे,

पूर्वभागे त्रिवदनः पश्चादेकास्यसंयुतः ।
चक्रपाणिरिति ख्यातश्चक्रवर्त्तित्वदायकः ॥ इति ।

अत्र प्रतिमुखं चक्रद्वयं ज्ञेयम् ।

इति चक्रपाणिलक्षणम् ।

अथ बहुरूपिलक्षणम् ।

तत्रैव,

आभ्यन्तरे पृथक्चक्रे बहुलास्यः समन्ततः ।
बहुरूपी समाख्यातः पूजितो मोक्षदायकः ॥ इति ।

इति बहुरूपिलक्षणम् ।

अथ पारिजातलक्षणम् ।

तत्रैव,

अथो यः पारिजाताख्यः पारिजात इति स्मृतः ।
ब्रह्मचर्यव्रतस्थेन पूजनीयः प्रयत्नतः ॥ इति ।

इति पारिजातलक्षणम् ।

अथ जगद्योनिलक्षणम् ।

तत्रैव,

द्वारचक्रो रक्तवर्णो जगद्योनिः सुखप्रदः । इति ।

इति जगद्योनिलक्षणम् ।

अथ त्रिमूर्त्तिलक्षणम् ।

तत्रैव,

ऊर्ध्वाधस्तु त्रिवदनः षट्चक्रः श्यामलाङ्गधृक् ।

---

१ शा० प० क्षायामस्य पारिजातहरत्वेन कृष्णभेदप्रकरणे समुल्लेखः । पाठश्च-कृष्णोऽयं पारिजाताख्यः पारिजातहरस्तथा । इति वर्तते ।

त्रिमूर्त्तिरिति विख्यातः सर्वसौभाग्यदायकः ॥ इति ।

इति त्रिमूर्त्तिलक्षणम् ।

अथ हरिहरमूर्त्तिलक्षणम् ।

तत्रैवोक्तम्,

चक्रत्रयसमेतो वा चक्रद्वययुतोऽपि वा ।
शिवनाभियुतो मूर्ध्नि पृष्ठे वापि तथैव च ॥
एनं हरिहरं विद्यात्सुखसौभाग्यदायकम् । इति ।

तथा,

चतुश्चक्रो हरिहरो द्विमुखो द्विमुखोऽप्यधः[1] ।
विनश्यति गृहस्थानां धनं क्षेत्रं कुलं क्रमात् ॥ इति ।

इति हरिहरमूर्त्तिलक्षणम् ।

अथ शङ्करनारायणलक्षणम् ।

ब्रह्माण्डपुराणे,

शिवनाभियुतः पार्श्वे वामे वा दक्षिणेऽपि वा ।
स च शङ्करपूर्वाख्यो नारायण इतीरितः ॥ इति ।

इति शङ्करनारायणलक्षणम् ।

अथ स्वयम्भूलक्षणम् ।

ब्रह्माण्डपुराणे,

स्वर्णवर्त्तुलरेखाभिरावृतो नीलवर्णवान् ।
दीर्घास्यः पृथुचक्रस्तु स्वयम्भूरिति विश्रुतः ॥
केवलं मोक्षफलदो ह्यर्चकस्य न संशयः । इति ।

इति स्वयम्भूलक्षणम् ।

---

१ द्विमुखोर्ध्वे तथाप्यधः । इति शा० प० पाठः ।

अथ पितामहलक्षणम् ।

ब्रह्माण्डपुराणे,

पितामहश्चतुर्वक्त्रो ह्यष्टचक्रसमन्वितः । इति ।

इति पितामहलक्षणम् ।

अथ नरमूर्त्तिलक्षणम् ।

ब्रह्माण्डपुराणे,

नरमूर्त्तिस्तु भगवानतसीकुसुमप्रभः ।
एकनाभिसमोपेतो ब्रह्मसूत्रं च पार्श्वके ॥ इति ।

इति नरमूर्त्तिलक्षणम् ।

अथ शेषमूर्त्तिलक्षणम् ।

पद्मपुराणे,

नागवत्कुण्डलीभूतरेखापङ्क्तिः सशेषकः । इति ।

ब्रह्माण्डपुराणे,

अथवा कुण्डलीभूतनागभोगसमन्वितः ।
शेषमूर्त्तिस्तु भगवान् रक्तवर्णसमन्वितः ॥
प्रलम्बघ्न इति ख्यातः पूजितो मृत्युदायकः ।
अथ वा रक्तवर्णसमन्वितश्चेत् प्रलम्बघ्न इति सम्बन्धः । एतस्यैव दुष्टं फलं न शेषमूर्त्तेः । तच्चाग्रे पद्मपुराणीयं वक्ष्यते ।

इति शेषमूर्त्तिलक्षणम् ।

अथ सूर्यमूर्त्तिलक्षणम् ।

ब्रह्माण्डपुराणे,

बाह्ये चाभ्यन्तरे वापि चक्रद्वादशसंयुता ।
सूर्यमूर्त्तिरिति ख्याता सर्वव्याधिविनाशिनी ॥ इति ।

इति सूर्यमूर्त्तिलक्षणम् ।

अथ हैहयमूर्त्तिलक्षणम्।

तत्रैव,

गर्भागारे तु चक्रे द्वे पद्मे दक्षिणतो बहिः।
पद्मपत्राकृतिर्वापि हेमवर्णसमाकुला॥
हैहयस्तु सदा गोप्ता सर्वसिद्धिप्रदायकः। इति।

इति हैहयमूर्त्तिलक्षणम्।

अथ गरुडमूर्त्तिलक्षणम्।

पद्मपुराणे,

पक्षाकारे च पङ्क्ती द्वे मध्ये लम्बा च रेखिका।
गरुडः स तु विज्ञेयः—इति।

ब्रह्माण्डपुराणे,

द्विपक्षाभ्यामुपेतं यद्गारुडं भुवि दुर्लभम्।
विषमचक्रं दुर्लभं समचक्रं कलौ न हि॥
कल्मषौघविनाशि स्याद्वलयाकाररेखया।
सुवर्णनिभया द्वित्रिचतुष्टयसमेतया॥
संयुक्ता शुभदात्री स्याच्छ्यामा नीला सितापि वा। इति।
गरुडमूर्त्तिरिति शेषः।

इति गरुडमूर्त्तिलक्षणम्।

विशेषान्तरमुक्तम्—

पद्मपुराणे,

विष्णुरुवाच।
निवसामि सदा ब्रह्मन् शालग्रामोद्भवाश्मनि।
तत्रैव वर्णचक्रादिभेदान्नामानि मे शृणु॥
शुक्लो रक्तस्तथा कृष्णो द्विवर्णो बहुवर्णवान्।

एकचक्रस्य च तथा संज्ञाः पञ्च यथाक्रमम् ॥
पुण्डरीकः प्रलम्बघ्नो रामो वैकुण्ठ एव च ।
विष्वक्सेन इति ब्रह्मन् फलं चास्यार्चने शृणु ॥
मोक्षं मृत्युं विषादं च दारिद्र्यमटनं तथा ।
ददाति पूजितो नृणां तस्माद् ज्ञात्वार्चयेन्नरः ॥
शुक्लादिवर्णसंयुक्तो द्विचक्रः पद्मसम्भवः ।
वासुदेवो जगद्योनिः कृष्णः पीताम्बरोऽव्ययः ॥
चक्रे द्वारि स्थिते ज्ञेयः सौख्यैकफलदोऽर्चितः ।
चक्रे तु मध्यदेशस्थे तेषामाख्यान्तरं शृणु ॥
परमेष्ठ्यजितक्रोधस्तथा नारायणोऽन्तकः ।
अनन्तश्चेति विज्ञेयो नानामूर्त्तिश्च यो भवेत् ॥
राज्यं मृत्युं धनं चैव हानिं वै वाञ्छितार्थकम् ।
ददाति पूजितो लोके तस्माद् ज्ञात्वार्चयेन्नरः ॥ इति ।

एताश्चोक्तलक्षणलक्षिताः सर्वा अपि शालग्रामशिलामूर्त्तयो द्विविधा ज्ञेयाः । तदुक्तम्—

ब्रह्माण्डपुराणे,

मूर्त्तयो द्विविधाः प्रोक्ता जलजाः स्थलजास्तथा ।
जलस्थाः कोमलाः स्निग्धाः स्थलस्थाः परुषाः स्मृताः ॥ इति।

पूर्वोक्तलक्षणलक्षितासु शालग्रामशिलामूर्त्तिषु सूक्ष्मा एतन्मूर्त्तयः फलाधिक्यात्पूजनीयाः । तासां पूजने प्रशस्ततरत्वात् । तथा चोक्तम्–

पद्मपुराणे,

शालग्रामशिलालक्षणमुक्त्वा–
एतल्लक्षणयुक्तास्तु शालग्रामशिलाः पुनः ।

याश्च तास्वपि सूक्ष्माः स्युस्ताः प्रशस्ततराः स्मृताः ॥
यथा यथा शिला सूक्ष्मा महत्पुण्यं तथा तथा।
तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये ॥
तत्राप्यामलकीतुल्या सूक्ष्मा चातीव या भवेत्।
तस्यामेव सदा ब्रह्मन् श्रिया सह वसाम्यहम् ॥ इति।

स्कन्दपुराणेऽप्येवमेव। अत्र वर्णभेदेन पूजने मूर्त्तिविशेषः पठ्यते हेमाद्रौ—

विष्णुप्रोक्ते;

'ब्राह्मणैर्वासुदेवस्तु नृपैः सङ्कर्षणस्तथा।
प्रद्युम्नः पूज्यते वैश्यैरनिरुद्धस्तु शूद्रजैः ॥
चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः।
वैश्यैर्द्वावेव सम्पूज्यौ तथैकः शूद्रजातिभिः ॥ इति।

ब्रह्माण्डपुराणे,

वासुदेवो विप्रजनैरुपास्यः पूजने सदा।
सङ्कर्षणः क्षत्रियस्य प्रद्युम्नो वैश्यपूजितः ॥
अनिरुद्धस्तु शूद्राणां पूज्यः सर्वफलप्रदः।
विप्राणां मूर्त्तयः सर्वाः पूजनीयाः प्रयत्नतः ॥
क्षत्रियस्य त्रयः पूज्या वैश्यस्य द्वयमेव हि।
शूद्रस्यैका भवेत्ताक्ष्यं सर्वदा सर्वसिद्धिदा ॥ इति।

बृद्धगौतमेन तु विशेषोऽभिहितः।

लक्ष्मीनारायणानन्तनृसिंहाच्युतकेशवाः।
हिरण्यगर्भप्रद्युम्नगोपालगरुडध्वजाः ॥
रामानिरुद्धवैक्रास्यदामोदरगदाधराः।
चतुर्भुजमहानीलमुकुन्दपुरुषोत्तमाः ॥
पीताम्बरहरिब्रह्मकृष्णश्रीधरमाधवाः।

वासुदेवेति चाख्याताश्चतुर्विंशतयः शिलाः ॥
वक्रास्यः वक्रं भुग्नमास्यं मुखं यस्येति सः। हयग्रीव इत्यर्थः।
ब्रह्मेति हरिविशेषणम् ।
ब्रह्मक्षत्रियविट्शूद्रयतीनामिष्टदार्चिताः ।
नैव वर्णाधमानां च न जात्वखिलयोषिताम् ॥

ब्राह्मणानां पूज्या मूर्तीराह—

शिलाश्चैकद्विषष्ठाष्टदशपञ्चदशान्विताः ।
पूजार्हाः सर्वदाऽद्यानां गण्डकीसरिदुद्भवाः ॥
लक्ष्मीनारायणानन्तहिरण्यगर्भपुरुषोत्तमचतुर्भुजसंज्ञाः शालग्रामशिलामूर्त्तय आद्यानां ब्राह्मणानां पूजने प्रशस्ताः ।

क्षत्रियाणां पूज्या मूर्तीराह—

राज्ञामाद्यद्येकविंशत्येकादशनवाष्टमाः ।
दशद्वाविंशतितमाः सर्वदाभीष्टदा यतः ॥
लक्ष्मीनारायणानन्तकृष्णानिरुद्धगरुडध्वजगोपालरामश्रीधरसंज्ञा मूर्त्तयः क्षत्रियाणां पूजने प्रशस्ताः ।

वैश्यानां पूज्या मूर्तीराह—

चतुर्विंशति सप्तैव त्रयोदश चतुर्दश ।
एकोनविंशविंशैका नित्या योग्या शिला विशाम् ॥
वासुदेवप्रद्युम्नदामोदरगदाधरपीताम्बरहरिलक्ष्मीनारायणसंज्ञा मूर्त्तयो वैश्यानां पूजने प्रशस्ताः ।

सच्छूद्राणां पूज्या मूर्तीराह—

त्रयोविंशैकविंशैकतुर्यैकादशमूर्तयः ।
पञ्चमैकोनविंशाः स्युः सच्छूद्राणां फलप्रदाः ॥ इति ।
माधवहरिलक्ष्मीनारायणाच्युतानिरुद्धकेशवपीताम्बरसंज्ञा

मूर्त्तयः सच्छूद्राणां पूजने प्रशस्ताः। चतुर्विंशतिमूर्तिषु अवशिष्टा मूर्त्तयो नृसिंहवक्त्रास्यमहानीलमुकुन्दसंज्ञा यतीनां पूजने प्रशस्ता इत्यर्थः।

स्कन्दपुराणे,

ब्राह्मणक्षत्रियविशां सच्छूद्राणामथापि वा।
शालग्रामेऽधिकारोऽस्ति न चान्येषां कदाचन॥
स्त्रियो वा यदि वा शूद्रा ब्राह्मणाः क्षत्रियादयः।
पूजयित्वा शिलाचक्रं लभन्ते शाश्वतं पदम्॥ इति।

ननु—

ब्रह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत्।
इति विष्णुधर्मोत्तरवचनात्,
प्रणवोच्चारणाच्चैव शालग्रामशिलार्चनात्।
ब्राह्मणीगमनाच्चापि शूद्रश्चाण्डालतां व्रजेत्॥

इत्यापस्तम्बवचनाच्च क्षत्रियादीनां शालग्रामशिलामूर्तिपूजननिषेधात्, क्षत्रियादिभिः शालग्रममूर्त्तिपूजनं कर्त्तव्यमित्युक्तम्। तत्कथमिति चेत्, सत्यम्।

ब्राह्मणक्षत्रियविशां त्रयाणां मुनिसत्तम।
अधिकारः स्मृतः सद्भिः शालग्रामशिलार्चने॥
स्त्रीशूद्रानुपनीतानां विटानां च विकर्मणाम्।
नैवाधिकारो विज्ञेयः शालग्रामशिलार्चने॥
विष्णुभक्तैर्वैष्णवैश्च गोब्राह्मणहिते रतैः।
शालग्रामशिलाचक्रं पूजनीयं सदा मुने॥

इत्यादिपद्मपुराणादिवचनैः पूर्वोदाहृतवचनैश्च क्षत्रियादीनां शालग्रामशिलामूर्त्तिपूजाभ्यनुज्ञाश्रवणात्।

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मम ॥

इति भविष्यलिङ्गपुराणवचने ब्राह्मणस्यैवेत्यत्रान्ययोगव्यवच्छेदपरेणैवकारेण ब्राह्मणमात्रस्यैव स्पर्शवत्पूजायामधिकारावगमात् क्षत्रियादीनां शालग्राममूर्तिस्पर्शमात्रं निषिद्धमित्यवगम्यते । एवं च सति क्षत्रियादिपूजानिषेधकवचनानां स्पर्शमात्रनिषेधपरत्वात् क्षत्रियादीनां शालग्रामशिलामूर्तिपूजाविधायकानि वचनानि स्पर्शहीनपूजाविषयत्वेन योज्यानीति । अत एव—

बृहन्नारदीयेऽप्युक्तम्,

स्त्रीणामनुपनीतानां शूद्राणां च नरेश्वर ।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च ॥
शूद्रो वाऽनुपनीतो वा स्त्री वापि पतितोऽपि वा ।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ॥ इति ।

अत्रानास्थया प्रत्येकं वाशब्देन क्षत्रियादीनामप्युपसङ्ग्रहो ज्ञेयः । यद्येवम् क्षत्रियादीनां शालग्रामस्पर्शनिषेधः, तर्हि सदाचारविरोधः स्यादिति चेत्, अत्र ब्रूमः ।

ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत् ।

इनि वचने क्षत्रियादिरित्यत्र अतद्गुणसंविज्ञानबहुव्रीहिणा शूद्रादेरेव निषेधोऽस्तु न क्षत्रियादेः ।

ब्राह्मणक्षत्रियविशां त्रयाणां मुनिसत्तम ।
अधिकारः स्मृतः सद्भिः शालग्रामशिलार्चने ॥
स्त्रीशूद्रपतितानां च षण्ढानां च विकर्मणाम् ।
नैवाधिकारो विज्ञेयः शालग्रामशिलार्चने ॥

इत्यादिपूर्वोदाहृतवचननिचयात् । तथा च—

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मम ॥

इति वचनमप्येवं व्याख्येयम् । शुचेरप्यशुचेरपि ब्राह्मणस्यैवाहं पूज्यो न क्षत्रियादेः, क्षत्रियादेस्तु शुचेरेवाहं स्पर्शयोग्यः, नाशुचेरित्यर्थः । सत्क्षत्रियवैश्ययोरेव स्पर्शेव पूजायामधिकारो नान्येषामित्याशयः । किञ्च । अन्ययोगव्यवच्छेदपर एवकारोऽप्यशुचिक्षत्रियादिस्पर्शनिषेधपरो व्यवतिष्ठते । तथा सति—

स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मम ।

इत्युत्तरार्द्धं शूद्रादिस्पर्शनिषेधपरं यथाश्रुतमेव सुस्थम् । यत्तु पूर्वोदहृतं बृहन्नारदीयवचनम्– "स्त्रीणामनुपनीतानाम्" इत्यादि । तत्रापि शूद्राणामेव आहृत्य स्पर्शनिषेधात्तत्परमेव । वाशब्देन च क्षत्रियाद्युपसङ्ग्हे क्लिष्टकल्पना । तस्माद्ब्राह्मणैः सत्क्षत्रियैः सद्वैश्यैः स्पर्शपूर्विका शालग्रामपूजा कार्या, नासत्क्षत्रियादिभिरिति सिद्धम् । अत्र–" स्त्रीशूद्रानुपनीतानाम् " इत्याद्युदाहृतवचनैः शालग्रामशिलार्चने यः शूद्रनिषेधः स सच्छूद्रातिरिक्तविषयः । सच्छूद्रैस्तु ब्राह्मणद्वारा शालग्रामशिलार्चनं कर्त्तव्यम् । तथा चोक्तम्—

पद्मपुराणे पुराणसङ्ग्हे च,
दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ।
कर्त्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥ इति ।

शालग्रामशिलामूर्त्तिषु च यस्य या इष्टा मूर्तिः सा तेन पूज्या । तदुक्तम्—

ब्राह्मब्रह्माण्डपुराणयोः,
इष्टा च यस्य या मूर्त्तिः स तां यत्नेन पूजयेत् ।

पूजयित्वा फलं सम्यक् प्राप्नोतीह परत्र च ॥ इति ।

इष्टमूर्त्यभावे च शालग्रामशिलामूर्त्यन्तरेऽपि सर्वदेवताधिकरणत्वेन स्वेष्टदेवताः पूज्याः ।

शालग्रामशिलायां तु यष्टव्याः सर्वदेवताः ।

इति ब्रह्माण्डपुराणवचनेन शालग्रामशिलायां सर्वदेवतापूजाविधानात् । स्वेष्टदेवानुपक्रम्य—

तेषां लिङ्गे मणौ कुम्भे मण्डले च प्रपूजनम् ।
शालग्रामे च तद्बुद्ध्या यन्त्रादौ च प्रपूजयेत् ॥
भूमावेव कृता पूजा पुत्रायुर्धननाशिनी ।

इति रुद्रयामलवचनाच्च ।

शालग्रामशिलायां च तत्तद्बुद्ध्या समर्चयेत् ।

इति सोमशम्भुवचनाच्च ।

अन्यत्रापि,

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
शालग्रामे च चक्राङ्के पटे मुद्रासु देवता ॥ इति ।

प्रतिमादीनां नित्यपूजने स्नानं न कारयेत् । तदाह—

व्यासः,

प्रतिमापटयन्त्राणां नित्यं स्नानं न कारयेत् ।
कारयेत्पर्वदिवसे यथा मलनिवारणम् ॥ इति ।

शालग्रामशिलामूर्त्तिपूजा तु नित्या प्रत्यहं कार्यैव । नित्यत्वं च प्रतिपाद्यते । तथाहि—

स्कन्दपुराणे,

कर्त्तव्यं सततं भक्त्या शालग्रामशिलार्चनम् ।' इति ।

पुराणसङ्ग्रहे,

नारदं प्रति ब्रह्मणो वचनम् ।

देवर्षे किं बहूक्तेन शृणु मे निश्चितं वचः ।
शालग्रामशिला अर्च्याः पूजनीयाः सदा द्विजैः ॥ इति ।
इत्यादिवचनेषु सततसदाशब्दश्रवणात् ।
शालग्रामशिलापूजां विना योऽश्नाति किञ्चन ।
स चाण्डालादिविष्ठायामाकल्पं जायते कृमिः ॥

इति पद्मपुराणे पूजनं विना भोजने निन्दाश्रवणाच्च नित्यत्वमवगम्यत इति । शालग्रामशिलामूर्तिजनं तु पूजाविधिजपाद्यनभिज्ञेनापि कर्त्तव्यमेव । तथोक्तम्—

पद्मपुराणे,
न गुरुर्न च मन्त्रोऽस्ति न जापो न च भावना ।
न स्तुतिर्नोपचारश्च चक्राङ्कितशिलार्चने ॥ इति ।
स्कन्दपुराणेऽपि,
न पूजनं न मन्त्राश्च न जापो न च भावना ।
न स्तुतिर्नोपचारश्च शालग्रामशिलार्चने ॥ इति ।
पुराणसङ्ग्रहे,
येषां नास्ति विधिर्मन्त्रो न दीक्षा न विधिक्रमः ।
न तेषामपराधोऽस्ति शालग्रामशिलार्चने ॥ इति ।
गृहस्थैर्गृहे शालग्रामद्वयं नार्च्यम् । उक्तम्—
वराहपुराणे;
गृहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा ।
द्वे चक्रे द्वारकायास्तु नार्च्ये सूर्य्यद्वयं तथा ॥
शक्तित्रयं तथा नार्च्यं गणेशत्रयमेव च ।
द्वौ शङ्खौ नार्चयेच्चैव भग्नां च प्रतिमां तथा ॥

---

१ पूज्यत्वेन विहिता न तु निषिद्धा इत्यर्थः ।

नार्चयेच्च तथा शङ्खं मत्स्यद्वादशकाङ्कितम् ।
गृहे ऽग्निदग्धा भग्नाश्च नार्चाः पूज्या वसुन्धरे ॥
अर्चाः प्रतिमाः ।
एतासां पूजनान्नित्यं सुखं न प्राप्नुयाद्गृही ।
शालग्रामशिला भग्ना पूजनीया सचक्रका ॥ इति ।

पद्मपुराणे विशेषः ।

शालग्रामा युगाः पूज्या युगेषु द्वितयं न हि ।
अयुग्मा नैव पूज्यन्ते विषमेष्वेक एव हि ॥ इति ।

स्कान्देऽपि,

शालग्रामाः समाः पूज्या विषमा न कदाचन ।
समेषु द्वितयं नेष्टं विषमेष्वेक एव हि ॥ इति ।

द्वादशशालग्रामशिलामूर्तिपूजने फलाधिक्यमुक्तम्—

पद्मपुराणे,

शिला द्वादश भो वैश्य शालग्रामसमुद्भवाः ।
विधिवत् पूजिता येन तस्य पुण्यं वदामि ते ॥
कोटिद्वादशलिङ्गैस्तु पूजितैः स्वर्णपङ्कजैः ।
यत्स्यात् द्वादशकल्पैस्तु दिनेनैकेन तद्भवेत् ॥ इति ।

ब्रह्मपुराणेऽपि,

शिला द्वादश भो पुत्र शालग्रामसमुद्भवाः ।
विधिवत्पूजिता येन तस्य पुण्यं वदामि ते ॥
कोटिलिङ्गसहस्रैस्तु पूजितैर्जाह्नवीतटे ।
काशीवासे दिनान्यष्टौ[1] दिनेनैकेन तद्भवेत् ॥ इति ।

शतशालग्रामपूजने फलविशेषोऽप्युक्तः—

---

१ युगान्यष्टौ इति शा. प. पाठः ।

पद्मपुराणे,

यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम् ।
तत्फलं नैव शक्तोऽहं वक्तुं कल्पशतैरपि ॥ इति ।

शालग्रामशिलामूर्तौ प्रतिष्ठानियमो नास्ति। तथा चोक्तम्-

स्कन्दपुराणे,

शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ।
महापूजां तु कृत्वादौ पूजयेत्तां सदा बुधः ॥ इति ।

शालग्रामे विष्णोरन्यदेवतानां च नावाहनं कार्यमिति केचिदाहुः । तत्र स्कन्दपुराणवाक्यं मूलम् । तच्चिन्त्यम् ।

शालग्रामार्चने नैव आवाहनविसर्जने ।
शालग्रामे हि भगवानाविर्भूतः सदा हरिः ॥ इति ।

अन्ये तु

विप्रः पूर्वं निजे देहे स्मृत्युक्तेन न्यसेद्बुधः ।
ततस्तु प्रतिमायां तु शालग्रामे विशेषतः ॥
क्रमेण च ततः पश्चात्कुर्यादावाहनादिकम् ।
आवाहयेच्च पुरतो ध्यानसेव्यं द्विजोत्तम ॥
इति शिवार्चनचन्द्रिकायां स्कन्दपुराणवचनैः,

पूर्वमावाहयेद्देवमासनं तु द्वितीयया ।

इति षोडशोपचारपूजाविधानाच्च शालग्रामे विष्णोरन्यदेवतानामप्यवश्यमावाहनं कार्यमेवेत्याहुः । तस्य चावाहनस्येत्थं स्वरूपमुक्तम्-

सिद्धान्तशेखरे,

स्वत एवाभिपूर्णस्य तत्त्वस्येहार्चनादिषु ।
सादरं सम्मुखीभावस्तदावाहनमिष्यते ॥ इति ।

अत एवोक्तम्-

मन्त्रराजानुष्टुब्विधाने,

अमन्त्रेण न वै पूज्यः स्वमन्त्रेण स्वमुद्रया ।
स्वध्यानेन सदा पूज्यो नान्यथा पूजयेत् हरिम् ॥
स्वमूर्त्तिः स्वेन मन्त्रेण पूज्यैवावाहनं विना ।
सर्वाः शिलाः समभ्यर्च्याः पुरुषसूक्तेन नित्यशः ॥
आवाहन ऋचा दद्यात्पूर्वं पुष्पाञ्जलिं हरेः ।
तस्यैवोन्मुखताप्राप्त्यै यागे चोद्वासने ऋचा ॥
अन्ते पुष्पाञ्जलिं दद्याद्यागसम्पूर्त्तिसिद्धये । इति ।
शालग्रामशिलादानं च कुर्यात् फलाधिक्यात् । तथा च-

पद्मपुराणे,

शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम् ।
भूचक्रं तेन दत्तं स्यात्सशैलवनकाननम् ॥ इति ।

बृहन्नारदीये,

ब्रह्माण्डकोटिदानेन यत्फलं लभते नरः ।
तत्फलं समवाप्नोति शिवलिङ्गप्रदानतः ॥
शालग्रामशिलादाने ततोऽपि द्विगुणं फलम् ।
शालग्रामशिलारूपी विष्णुरेवेति वै श्रुतिः ॥ इति ।
शालग्रामशिलायाः क्रयविक्रयौ च न कुर्यात् । तदुक्तम्-

पद्मपुराणे,

शालग्रामशिलायां यो मौल्यमुत्पादयेन्नरः ।
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः ॥
सर्वे ते नरकं यान्ति यावदाभूतसम्प्लवम् । इति ।

पुराणसङ्ग्रहेऽपि,

शालग्रामशिलायां यो मौल्यमुत्पादयेन्नरः ।

विक्रेता चानुमन्ता च परीक्षां योऽनुमोदयेत् ॥
सर्वे ते पापिनो ज्ञेयाः शश्वद्दुःखस्य भागिनः ।
मुने किं बहुनोक्तेन नरकं यान्ति दारुणम् ॥ इति ।
शालग्रामपूजनमक्षतैर्न कर्त्तव्यम् । तदुक्तम्—

स्मृतिसङ्ग्रहे,

शालग्रामे च चक्राङ्के शिवनाभौ विशेषतः ।
नाक्षतैः पूजयेद्विष्णुमर्चयन्नरकं व्रजेत् ॥ इति ।

अक्षता यवाः ।

अक्षता धानाः कृत्वा सर्पिषाद्धाननक्ति । अक्षतसक्तूनां नवं कलशं पूरयित्वा । इत्याश्वलायनसूत्रे वृत्तिकारादिभिः अक्षता नाम यवा इति व्याख्यातम् ।

अक्षतैः पूज्यते विष्णुस्तेन सा अक्षया स्मृता ।

इत्यादिना विशेषतो विहितं विष्णुपूजनमक्षयतृतीयायां यवैरेव क्रियते ।

तानेव दत्त्वा विप्रेभ्यः—

इत्यादिना अक्षयतृतीयायां विप्रेभ्यो यवा दीयन्ते । श्रीदत्तेन च अक्षता आमतण्डुला इति व्याख्यातम्। शालग्रामपूजनं तुलसीदलैः कुर्यात् । तथा च—

काशीखण्डे,

ध्रुववाक्यम्—

शालग्रामशिला येन पूजिता तुलसीदलैः ।
स पारिजातमालाभिः पूज्यते सुरसद्मनि ॥ इति ।

गरुडपुराणे,

तुलसीमिश्रतोयेन स्नापयन्ति जनार्दनम् ।

पूजयन्ति च भावेन धन्यास्ते भुवि मानवाः ॥ इति ।

शालग्रामशिलाश्च द्वारकाशिलाचक्रयुताः पूज्या न केवलमिति । तदुक्तम्—

स्कन्दपुराणे,

शालग्रामोद्भवो देवो देवो द्वारावतीभवः ।
उभयोः सङ्गमो यत्र तत्र मुक्तिर्न संशयः ॥ इति ।

तथा,

प्रत्यहं द्वादश शिलाः शालग्रामस्य योऽर्चयेत् ।
द्वारवत्याः शिलायुक्ताः स वैकुण्ठे महीयते ॥ इति ।

तथा,

शालग्रामशिला यत्र यत्र द्वारावती शिला ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ इति ।

तथा,

नृसिंह पूजने श्रेष्ठा शालग्रामोद्भवा शिला ।
द्वारकाजातचक्राङ्का शिला श्रेष्ठा तथैव च ॥
तयोश्च सङ्गमं कृत्वा पूजयन् मुक्तिभाग्भवेत् ।
शालग्रामशिला वापि चक्राङ्कितशिलापि वा ॥ इति ।

शालग्रामशिलामूर्त्तितीर्थमाल्यधारणं च कर्तव्यमेव । तदुक्तम्—

पाद्मस्कान्दयोः,

तीर्थकोटिसहस्रैस्तु सेवितैः किं प्रयोजनम् ।
तोयं यः पिबते नित्यं शालग्रामशिलाच्युतम् ॥
गवां कोटिप्रदानेन यज्ञायुतशतेन च ।
यत्फलमृषिभिः प्रोक्तं विष्णोः पादोदकेन तु ॥
लभ्यते इति शेषः ।

चक्राङ्कितशिलाभ्रष्टं निर्माल्यं तोयमेव च ।
यो वहेच्छिरसा नित्यं नास्ति धुर्यो नरस्ततः ॥
कुङ्कुमं चन्दनं पत्रं नैवेद्यं कुसुमं जलम् ।
शालग्रामशिलालग्नं तीर्थकोटिशताधिकम् ॥ इति ।

ब्रह्मपुराणे,

गङ्गा गोदावरी रेवा नद्यो मुक्तिप्रदास्तु याः ।
निवसन्ति सतीर्थास्ताः शालग्रामशिलाजले ॥ इति ।

पुराणङ्गहेऽपि,

छिन्नस्तेन महासेन गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
पादोदकेन देवस्य हत्याकोटिसमन्वितः ।
शुद्ध्यते नात्र सन्देहस्तथा शङ्खोदकेन हि ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रैस्तु प्राशितैः किं प्रयोजनम् ॥
प्रायश्चित्ते समुत्पन्ने किं दानैः किमुपोषणैः ।
चान्द्रायणैश्च किं तीर्थैः पीत्वा पादोदकं शुचिः ॥ इति ।
शालग्रामविष्ण्वादिदेवार्पितनैवेद्यं भोक्तव्यमेव ।तदुक्तम्—
पाद्मस्कान्दब्राह्मपुराणसङ्गहेषु,

शिव उवाच ।

भक्त्या भुङ्क्ते च नैवेद्यं शालग्रामशिलार्पितम् ।
कौट्यैन्दवस्य लभते फलं यज्ञसहस्रयोः ॥
ऐन्दवं चान्द्रायणम् ।
अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलालग्नं सर्वं याति पवित्रताम् ॥

शालग्रामशिलालग्नम् शालग्रामशिलासंबद्धम् । तेन यत् शालग्रामे सर्वदेवतापूजाधिकरणत्वेन शिवपूजनं क्रियते तन्नैवेद्याद्यदुष्टम् । अथ वा । शालग्रामे या शिवमूर्तिः शिवनाभिमूर्त्तिस्तत्पूजने यन्नैवेद्यादि तददुष्टमिति । अथ वा । शालग्रामशिलासंयुक्तशिवलिङ्गपूजने नैवेद्यादिकं भक्षणीयम् । केवलशिवलिङ्गनैवेद्यभक्षणे तु—

स एवाह,

नैवेद्यं मे नरो भुक्त्वा शुद्ध्यै चान्द्रायणं चरेत् । इति ।

विष्णुनैवेद्यभक्षणे तु पुनः—

स एवाह,

भुक्त्वा केशवनैवेद्यं कोटियज्ञफलं लभेत् । इति ।

बृहन्नारदीयेऽपि,

हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पाददोकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥
मृत्युकाले च यस्यास्ये दीयते पादयोर्जलम् ।
अपि पापसमाचारः स गच्छेद्विष्णुमव्ययम् ॥
अग्निष्टोमसहस्रैस्तु वाजपेयशतैरपि ।
तत्फलं लभते देवि विष्णोर्नैवेद्यभक्षणात् ॥ इति ।

अत एव एकादशीनिर्णयप्रस्तावे पारणाविषये माधवाचार्यैरुपपादितम्—

"पारणं च नैवेद्यमिश्रितं कुर्यात् । तदुक्तम्—

स्कन्दपुराणे,

कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने ।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥" इति ।

शिवलिङ्गनैवेद्यातिरिक्तमपि विष्णुादिदेवार्पितं नैवेद्यं न ग्राह्यम् । कुतः। अर्पणं च दानमेव । दाने च नैवेद्ये अर्पिते पुनर्नैवेद्यग्रहणे दत्तापहारदोष इति केचिदाहुः । तत् भ्रान्तप्रलपितं द्वेषः । अज्ञानं वा मूलमित्यास्तां प्रसक्तानुप्रसक्तविचारेणेति ।

अथ शिवनाभिमाहात्म्यं लक्षणं च ।

पद्मपुराणे,

स्वर्गे मर्त्ये च पाताले पाषाणाः सन्ति भूमिप ।
शालग्रामसमाः क्वापि निवसन्ति पुनः पुनः ॥
शिला लिङ्गाकृतिर्यत्र दृश्यते च यतस्ततः ।
शिवनाभिः स विख्यातः शालग्रामोद्भवो नृप ॥
पूजयेत्तं विशेषेण तत्र सन्निहितः शिवः ।
दृष्ट्वा स्पृष्ट्वा नरो भक्त्या सर्वपापैः प्रमुच्यते ॥
शिवं नारायणं शैलं शालग्रामसमुद्भवम् ।
पूजयेत्तु प्रयत्नेन तत्र सन्निहितावुभौ ॥
शालग्रामशिलाभक्त्या भक्त्या विष्णोः शिवस्य च ।
शालग्रामशिलामध्ये लिङ्गरूपी शिवः स्थितः ॥
अर्चयन्ति महाभक्त्या शिवनाभिं नरोत्तमाः ।
ते यान्ति मन्दिरं शैवं सिद्धचारणसेवितम् ॥
शिवनाभिं तु ये मर्त्या विधिवत्पूजयन्ति च ।
मन्त्रैः पुष्पोपहारैश्च ते यान्ति शिवसन्निधौ ॥
शैवं नारायणं शैलं यत्र देशे व्यवस्थितम् ।
तच्छैवं वैष्णवं तीर्थं भुक्तिमुक्तिप्रदायकम् ॥
चक्रे तु दृश्यते लिङ्गं शिलायां नारद क्वचित् ।
श्रीधरः स तु विज्ञेयः सर्वकामफलप्रदः ॥ इति ।

स्कन्दपुराणे,

शालग्रामशिलालिङ्गे यः करोति ममार्चनम् ।
तेनार्चितः कार्तिकेय युगानामेकसप्ततिः ॥ इति ।

सर्वपुराणसारोद्धारकार्तिकमाहात्म्ये,

कूर्मचक्रा मध्यभागे श्वेताभा गोखुरान्विता ।
शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा ॥
गोखुरान्विता गोष्पदयुक्ता ।
पूर्वे विद्युत्कला भानुरूर्ध्वे पिङ्गजटा शशी ।
शिवनाभिरिति ख्यातः सूक्ष्मास्यः स्पृश्यलिङ्गकः ॥ इति ।

ब्रह्माण्डपुराणे,

कूर्माकृतिरधोभागे लिङ्गभागे खुरान्वितः ।
शिवनाभ इतिख्यातो भुक्तिमुक्तिफलप्रदः ॥
सर्वत्र लोहिताकारा मूर्ध्नि रक्तजटा शशी ।
अघोरा सा परित्याज्या गृहिभिर्यतिपूजिता ॥
हेमवर्णजटायुक्ता हेमबिन्दुसमन्विता ।
मस्तके गोखुराभा च चन्द्रगङ्गासमन्विता ॥
सद्योजाताभिधा श्रेष्ठा पुत्रपौत्रधनप्रदा ।
शिरोमध्ये रक्तवर्णा श्वेतचन्द्रजटायुता ॥
वामदेवाभिधा श्रेष्ठा गृहिभिः पूजिता सदा ।
किञ्चित्कपिलसंयुक्ता कृष्णनीलजटायुता ॥
पार्श्वरेखासमोपेता ईशाना मुक्तिदा भवेत् ।
पूर्वे विद्युज्जटाभार ऊर्ध्वे पिङ्गजटा शशी ॥
तत्पुरुषाभिधाना स्याद्दुर्लभा सर्वकामदा ।
द्विलिङ्गो वा त्रिलिङ्गो वा चतुष्पञ्चषलिङ्गवान् ॥

स च शच्छङ्करनामा स्याद्देवदेवः सदा शिवः ।
देवत्वदायकैर्लिङ्गैः पञ्चभिः षड्भिरुत्तमा ॥
ततो मूर्त्तिफलं पुण्यं मया वक्तुं न शक्यते । इति ।

नृसिंहपुराणे,

कूर्मचक्रमधोभागे श्वेताभा गोखुरान्विता ।
शिवनाभिरितिख्याता भुक्तिमुक्तिफलप्रदा ॥
पूर्वे विद्युत्कला भानुरुर्ध्वे पिङ्गजटा शशी ।
शिवनाभिरितिख्याता दुर्लभा सर्वकामदा ॥ इति ।

प्रयोगपारिजातेऽपि किञ्चित्स्मर्यते ।
द्विनाभिः पद्मरूपा चेद्भवेद्धरिहरात्मिका ।
नाभौ लिङ्गेन युक्ता वा श्वेताभा वै खुरान्विता ॥
शिवनाभीति विख्याता भुक्तिमुक्तिप्रदायिका ।
यवमात्रं तु गर्तं स्याद्यवार्द्धं लिङ्गमुच्यते ॥
शिवनाभिरितिख्यातस्त्रिषु लोकेषु दुर्लभः ।
वासुदेवमयं क्षेत्रं लिङ्गं शिवमयं स्मृतम् ॥
तस्माद्धरिहरक्षेत्रे पूजयेच्छङ्कराच्युतौ ।
सा चेच्छिलाशतैः शस्ता चतुर्वर्गफलप्रदा ॥
साक्षान्महेश्वरेणात्र संयुक्तः पूजितो हरिः । इति

इति शिवनाभिमाहात्म्यं लक्षणं च ।

अथ द्वारवतीशिलामाहात्म्यम् ।

स्कन्दपुराणे,

द्वारवत्याः शिला देवि मुद्रया मम मुद्रिता ।
तया तु सहितं तत्स्यात्तीर्थं द्वादशयोजनम् ॥
म्लेच्छदेशेऽशुचौ वापि चक्राङ्को यत्र तिष्ठति ।

योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे ॥
तन्मध्ये म्रियते यस्तु पूजकः सुसमाहितः ।
शतबाधां च प्राप्तस्तु न पुनः सोऽपि जायते ॥
चक्राङ्कितस्य सान्निध्ये यत्कर्म क्रियते नरैः ।
स्नानं दानं तपो होमः सर्वं भवति चाक्षयम् ॥
संवत्सरं तु यत्पापं मनसा कर्मणा कृतम् ।
तत्सर्वं नश्यते पुंसां सकृच्चक्राङ्कदर्शनात् ॥
ज्वरदाहो विषं चैव अग्निचौरभयं तथा ।
सर्वे ते प्रशमं यान्ति सकृच्चक्राङ्कपूजनात् ॥
भूतप्रेतपिशाचाश्च डाकिन्यश्च वसुन्धरे ।
सर्वे ते प्रलयं यान्ति यत्र चक्राङ्कितं न्यसेत् ॥
भक्त्या वा यदि वाऽभक्त्या चक्राङ्कं पूजयेन्नरः ।
अपि चेत्स दुराचारो मुच्यते नात्र संशयः ॥
संवत्सरं तु यः कुर्यात्पूजां स्पर्शनदर्शने ।
विना साङ्ख्येन योगेन मुच्यते नात्र संशयः ॥ इति ।

तथा,

द्वारवतीमधिकृत्य—

यत्किञ्चित्तत्र पाषाणं कृष्णचक्रेण मुद्रितम् ।
तस्य दर्शनमात्रेण मुच्यते सर्वपातकैः ॥
हृदि स्थिते तु चक्राङ्के दूता वैवस्वतस्य तु ।
नोपसर्पन्ति ते भीता दृष्ट्वा विष्णुपरिग्रहम् ॥ इति ।

तथा,

विधिहीनापि या काचित् क्रिया मन्त्रविवर्जिता ।
चक्राङ्कपूजनात्सम्यक् लभेच्छास्त्रोदितं फलम् ॥
चक्राङ्कितशिलाभ्रष्टं निर्माल्यं तोयमेव च ।

यो वहेच्छिरसा नित्यं नास्ति धन्यो नरस्ततः ॥
चक्राङ्कितशिलाग्रे तु कुर्याज्जागरणं हि यः ।
एकादश्यां नृपश्रेष्ठ देवास्तस्य वरप्रदाः ॥
यत्र तिष्ठति चक्राङ्को देवो द्वारवतीभवः ।
तीर्थकोटिसहस्राणि तत्र सन्निहितानि वै ॥
यत्र यत्र नृपश्रेष्ठ देवश्चक्राङ्कचिह्नितः ।
तत्र गच्छ महाभाग संसाराब्धिं तरिष्यसि ॥ इति ।

तथा भगवद्वाक्यमपि,

तिथीनां द्वादशी ब्रह्मन्नभीष्टा मुनिसत्तम ।
प्रतिमानां तु सर्वासां शालग्रामशिला मम ॥
चक्राङ्किताश्च पाषाणा द्वारकायां च ये स्थिताः ।
ममेष्टाः सर्वदा विप्र चक्रतीर्थसमुद्भवाः ॥
प्रवरं सर्वतीर्थानां शालग्रामशिलोदकम् ।
चक्राङ्कितस्य विप्रेन्द्र नापरं विद्यते क्वचित् ॥

तथान्यत्रापि,

सर्वेषु तीर्थेषु वसन्ति शैलाः परं न ते केशवचक्रचिन्हिताः ।
ये चाङ्किताः कृष्णसुदर्शनेन व्रजन्ति पूजां शुभसंयुतास्ते ॥
तिष्ठन्ति तस्मिन् पितरो मनुष्यास्तीर्थानि गङ्गागयपुष्कराणि ।
यज्ञाश्वमेधाद्यपि पुण्यशैलाश्चक्राङ्किता यस्य वसन्ति गेहे ॥ इति ।

इति द्वारकाशिलामाहात्म्यम् ।

अथ द्वारकाशिलालक्षणम् ।

पद्मपुराणे,

कृष्णा मृत्युप्रदा नित्यं कपिला तु भयावहा ।
औन्मत्त्यं कर्बुरा दद्यात्पीता वित्तविनाशिनी ॥

कर्बुरा शबला ।
धूम्राभा पुत्रनाशाय भग्ना भार्यावियोगदा ।
श्वेता स्निग्धा शिला पूज्या सर्वकामार्थदायिका ॥
अच्छिद्रचक्रा सा पूज्या दुःखदारिद्र्यनाशिनी ।
छिद्रा दारिद्र्यदा चैव भवेत्पार्थिव सा शिला ॥
पुत्रपौत्रगृहादीनि स्वर्गमोक्षसुखानि च ।
ददाति शुक्लवर्णाभा यत्नेन तु समर्चयेत् ॥
वर्त्तुला चतुरस्रा च पूजिता सिद्धिदायिका ।
सुखदा समचक्रा च विषमा दुःखदा भवेत् ॥
विषमा विषमचक्रिका ।
छिद्रा भग्ना त्रिकोणा च तथा विषमचक्रिका ।
अर्द्धचन्द्राकृतिर्या च पूज्यास्ता न भवन्ति हि ॥
फलमुत्पद्यते तासां पूजया न कदाचन ।
इत्यभिधानात् ।
त्रिकोणा विषमा रक्ताश्छिद्रा भग्ना विवर्जयेत् ।
अर्द्धचन्द्राकृतिर्या तु पूजिता हानिकारिका ॥ इति
प्रयोगपारिजाते तु विशेषः स्मर्यते ।
भिन्नश्चैवार्थनाशाय स्थूलो बुद्धिविनाशकः ।
दीर्घश्चायुर्हरो ज्ञेयो रूक्ष ऋद्धिविनाशकृत् ॥
शुक्लवर्णं शुभं ज्ञेयं वृत्तचक्रं तथैव च । इति ।
अत्रैव चक्रैर्मूर्तिभेदः अग्निपुराणे उक्तः—
सुदर्शनस्त्वेकचक्रो लक्ष्मीनारायणो द्वयात् ।
त्रिचक्रश्चाच्युतो देवस्त्रिचक्रो वा त्रिविक्रमः ॥
जनार्दनश्चतुश्चक्रो वासुदेवश्च पञ्चभिः ।
षट्चक्रश्चैव प्रद्युम्नः सङ्कर्षणश्च सप्तभिः ॥

सङ्कर्षणः बलदेवः।
पुरुषोत्तमोऽष्टचक्रो नवव्यूहो नवात्मकः।
दशावतारो दशभिर्दशैकेनानिरुद्धकः॥
द्वादशात्मा द्वादशभिरत ऊर्ध्वमनन्तकः। इति।
गरुडपुराणे,

ब्रह्मोवाच।

चतुश्चक्रश्चतुर्भुजः। इति विशेषः। हेमाद्रौ तु मूर्त्तिभेदेन फलभेदः स्मर्यते।

विष्णुरुवाच।

एकचक्रा शिला तार्क्ष्य द्वारवत्याः सुशोभना।
सुदर्शनो महादेवो मोक्षैकफलदायकः॥
लक्ष्मीनारायणो द्वाभ्यां चक्राभ्यामङ्किता शिला।
पूजिता भक्तियुक्तेन भुक्तिमुक्तिफलप्रदा॥
त्रिचक्रश्चाच्युतो देवो देवेन्द्रस्य पदप्रदः।
पूजितो नात्र सन्देहस्त्रिविक्रमश्च कीर्तितः॥
चशब्दो वार्थे। त्रिचक्रः अच्युतस्त्रिविक्रमो वेत्यर्थः।
श्रीप्रदो रिपुहन्ता च चतुश्चक्रो जनार्दनः।
पूजयेद्भक्तिसंयुक्तः सुगन्धैः कुङ्कुमादिभिः॥
पञ्चभिर्वासुदेवः स्यात्षभिश्चक्रैः शिलार्चितः।
जन्ममृत्युभयात्त्राता भवते नात्र संशयः॥
प्रद्युम्नः षड्भिश्चक्रैश्च लक्ष्मीकीर्त्तिप्रदो भवेत्।
पूजितो भक्तिभावेन चक्रतीर्थशिलोद्भवः॥
बलभद्रशिला ज्ञेया सप्तचक्राङ्किता खग।
पूजितस्तुष्यते देवो गोत्रपुत्रप्रदो भवेत्॥
वाञ्छितं चाष्टभिश्चक्रैर्ददाति पुरुषोत्तमः।

सर्वं दद्यान्नवचक्रो दुर्लभं यत्सुरैरपि ॥
पूजितः केशवस्तस्य ददाति स्थानमुत्तमम् ।
राज्यदो दशभिश्चक्रैर्दशावतारसंज्ञकः ॥
दशावतारपूजा स्याच्चक्राङ्कस्यास्य पूजनात् ।
एकादशभिरैश्वर्यमधिकं च प्रयच्छति ॥
पूजितो भक्तिभावेन चक्रतीर्थशिलोद्भवः ।
तत्रैव प्राप्यते देवश्चक्रैर्द्वादशभिः श्रितः ॥
पूजितः सर्वकामानामनन्तफलदायकः ।
द्वादशात्मा स विज्ञेयो भुक्तिमुक्तिप्रदोऽर्चितः ॥
अत ऊर्ध्वं परात्मासौ सदा प्रीतिविवर्द्धनः ।
पूजितः सर्वलोकात्मा विष्णुलोकप्रदायकः ॥
इति चक्राङ्कितशिलाः कथिताः फलनामतः ।
एकचक्रविषये विशेषः—
प्रयोगपारिजाते स्मर्यते,
एकचक्रे विशेषोऽस्ति स विशेषस्त्वथोच्यते ।
शुक्लं कृष्णं तथा रक्तं द्विवर्णं बहुवर्णकम् ॥
यद्येकचक्रिणः स्युश्च तेषां संज्ञा भवेत्क्रमात् ।
पुण्डरीकः प्रलम्बघ्नो रामो वैकुण्ठ एव च ॥
विष्वक्सेन इति ब्रह्मन् तेषां पूजाफलं शृणु ।
मोक्षं मृत्युं विवादं च दारिद्र्यमटनं तथा ॥
ददाति पूजकस्यास्य तस्मात्तां तु परित्यजेत् । इति ।

इति द्वारवतीशिलामूर्तिलक्षणम् ।

इति श्रीवीरमित्रोदये शालग्रामशिलामूर्त्ति-
लक्षणप्रकरणं समाप्तम् ।

अथ लिङ्गलक्षणप्रकरणम् ।

तत्र—

विशेषाच्छैलजं मुक्त्यै भुक्तये चानुषङ्गतः ।
पार्थिवं भुक्तये शस्तं मुक्तये चानुषङ्गतः ॥
एवं वै दारुजं ज्ञेयं चित्रलिङ्गं तथा पुनः ।
स्थिरलक्ष्मीप्रदं हैमं राजतं चैव राज्यभृत् ॥
प्रजावृद्धिकरं ताम्रं वाङ्मायुःप्रवर्द्धनम् ।
पाञ्चरागं महाभूत्यै सौभाग्याय च मौक्तिकम् ॥
चान्द्रकान्तं मृत्युजितं स्फाटिकं सर्वकामदम् ।

इत्यादिवचनैः फलविशेषकामनया नानाविधलिङ्गपूजा उक्ता । सा च पूजा—

लिङ्गं सलक्षणं कुर्यात्त्यजेल्लिङ्गमलक्षणम् ।
दैर्घ्यहीने भवेद्व्याधिरधिके शत्रुवर्द्धनम् ॥
नाहहीने विनाशः स्यादधिके च शिशुक्षयः ।
विस्तारे चाधिके हीने राष्ट्रनाशो भवेद्ध्रुवम् ॥
शूलहीने तु दारिद्र्यं शिरोहीने कुलक्षयः ।
ब्रह्मसूत्रविहीने च राजा राष्ट्रं च नश्यति ॥
तस्मात्सर्वप्रयत्नेन लिङ्गं कुर्यात्सलक्षणम् ।
लिङ्गं सलक्षणं पूज्यं त्यजेल्लिङ्गमलक्षणम् ॥

इत्यादिवचनैः संलक्षणानामेव लिङ्गानां कर्तव्येत्युक्तम् । तत्र कानि सलक्षणानि लिङ्गानीति लिङ्गलक्षणमुच्यते । तत्रादौ लिङ्गमहिमा उच्यते—

स्कन्दपुराणे,

शिव उवाच ।

न तुष्याम्यर्चितोऽर्चायां पुष्पधूपनिवेदनैः ।

लिङ्गेऽर्चिते यथात्यर्थं परितुष्यामि पार्वति ॥
एष देवि पुराकल्पे लीनोऽहं सर्वदैवतैः ।
लीनत्वाल्लिङ्गमित्युक्तं सदेवासुरकिन्नरैः ॥
सर्वेन्द्रियप्रयुक्तो वा संयुक्तः सर्वपातकैः ।
प्रयच्छामि दिवं देवि यो मे लिङ्गार्चने रतः ॥
त्यक्त्वा सर्वाणि पापानि निर्द्वन्द्वो दग्धकल्मषः ।
मन्मना मन्नमस्कारो मामेव प्रतिपद्यते ॥
वस्त्रपूतजलैर्लिङ्गं स्नापयित्वा ममामराः ।
लक्षाश्वमेधजनितं पुण्यमाप्नोति सत्तमाः ॥
सुगन्धचन्दनरसैर्लिङ्गमालिप्य भक्तितः ।
आलिप्यते सुरस्त्रीभिः सुगन्धैर्यक्षकर्दमैः ॥ इति ।

शिवनारदसम्वादेऽपि,

विना लिङ्गार्चनं यस्य कालो गच्छति नित्यशः ।
महाहानिर्भवेत्तस्य दुर्वृत्तस्य दुरात्मनः ॥
एकतः सर्वदानानि व्रतानि विविधानि च ।
तीर्थानि नियमा यज्ञा लिङ्गार्चा चैकतः स्थिता ॥
कलौ लिङ्गार्चनं श्रेष्ठं यथा लोके प्रदृश्यते ।
तथा नास्तीति नास्तीति शास्त्राणामेष निश्चयः ॥
भुक्तिमुक्तिप्रदं लिङ्गं विविधापत्तिवारणम् ।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् ॥
न लिङ्गाराधनादन्यत्पुण्यं वेदचतुर्ष्वपि ।
विद्यते सर्वशास्त्राणामेष एव विनिश्चयः ॥
सर्वमन्यत्परित्यज्य कर्मजालमशेषतः ।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाप्यनुलोमजः ।

पूजयेत्सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ॥
तत्तन्मन्त्रेण यथायोग्यं वैदिकतन्त्रनाममन्त्रेण ।
लिङ्गपुराणे,
बहुनात्र किमुक्तेन चराचरमिदं जगत् ।
शिवलिङ्गं समभ्यर्च्य स्थितमत्र न संशयः ॥
मूले ब्रह्मा तथा मध्ये विष्णुस्त्रिभुवनेश्वरः ।
रुद्रोपरि महादेवः प्रणवाख्यः सदाशिवः ॥
लिङ्गवेदी महादेवी लिङ्गं साक्षान्महेश्वरः ।
तयोः सम्पूजनान्नूनं देवी देवश्च पूजितौ ॥
दर्शनात्स्पर्शनात्तस्य लभन्ते निर्वृतिं नराः ।
तस्य पुण्यं मया वक्तुं सम्यग्युगशतैरपि ॥
शक्यते नैव विप्रेन्द्र तस्मात्संस्थापयेच्छिवम् ।
सर्वेषामेव वर्णानां विभोर्दिव्यं वपुः शुभम् ॥
सकलं भावनायोग्यं योगिनामेव निष्कलम् ।
तथा,
शिवलिङ्गं समुत्सृज्य यजते चान्यदेवताः ।
स नृपः सह देशेन रौरवं नरकं व्रजेत् ॥
ब्रह्मादयः सुराः सर्वे राजानश्च महर्द्धिकाः ।
मानवा मुनयश्चैव सर्वे लिङ्गं यजन्ति च ॥
विष्णुना रावणं हत्वा ससैन्यं ब्रह्मणः सुतम् ।
स्थापितं विधिवद्भक्त्या लिङ्गं तीरे नदीपतेः ॥
कृत्वा पापसहस्राणि हत्वा विप्रशतं तथा ।
भावात्सधाश्रितो लिङ्गं मुच्यते नात्र संशयः ॥
तस्मादभ्यर्चयेल्लिङ्गं यदीच्छेच्छाश्वतं पदम् ॥
सर्वे लिङ्गमया लोकाः सर्वं लिङ्गे प्रतिष्ठितम् ।

तस्मात्सर्वप्रयत्नेन स्थापयेत्पूजयेच्च तत् ॥
ब्रह्मा हरश्च भगवान् विश्वेदेवा उमा हरिः ॥
लक्ष्मीर्धृतिः स्मृतिः प्रज्ञा मेधा दुर्गा शची तथा ।
रुद्राश्च वसवः स्कन्दो विशाखः शाख एव च ॥
नैगमेशश्च भगवान् लोकपाला ग्रहास्तथा ।
सर्वे नन्दिपुरोगाश्च गणा गणपतिः प्रभुः ॥
पितरो मुनयः सर्वे कुबेराद्याश्च सुप्रभाः ।
आदित्या वसवः साध्या अश्विनौ च भिषग्वरौ ॥
विश्वेदेवाः समरुतः पशवः पक्षिणो मृगाः ।
ब्रह्मादिस्थावरान्तं च सर्वं लिङ्गे प्रतिष्ठितम् ॥
तस्मात्सर्वं परित्यज्य स्थापयेल्लिङ्गमैश्वरम् ।
यत्नेन स्थापितं पिण्डं पूजितं पूजयेद्यदि ॥
मूले ब्रह्मा वसति भगवान् मध्यभागे च विष्णुः
सर्वेशानः पशुपतिरजो रुद्रमूर्तिर्वरेण्यः ।
तस्माल्लिङ्गं गुरुगुरुतरं स्थापयेत्पूजयेद्वा
यस्मात्पूज्यो गणपतिरसौ देवमुख्यैः समस्तैः ॥
गन्धैः स्रग्धूपदीपस्नपनहुतबलिस्तोत्रमन्त्रोपहारै-
र्नित्यं येऽभ्यर्चयन्ति त्रिदशवरतनुं लिङ्गमूर्त्तिं महेशम् ।
गर्भाधानार्थनाशक्षयभयरहिता देवगन्धर्वमुख्यैः
सिद्धैर्वेद्याश्च पूज्या गणवरनमितास्ते भवन्त्यप्रमेयाः ॥
तस्माद्भक्त्योपचारेण स्थापयेत्परमेश्वरम् ।
पूजयेच्च विशेषेण लिङ्गं सर्वार्थसिद्धये ॥
तथा,
तस्मात्सदा पूजनीयो लिङ्गमूर्त्तिर्महेश्वरः ।
यावत्पूजा सुरेशस्य तावद्देहस्थितिर्यशः ॥

पूजनीयः शिवो नित्यमतः श्रद्धासमन्वितैः।
सर्वो लिङ्गमयो लोकः सर्वं लिङ्गे प्रतिष्ठितम्॥
तस्मात्सम्पूजयेल्लिङ्गं य इच्छेत्सिद्धिमात्मनः।
सर्वे लिङ्गार्चनादेव देवा दैत्याश्च दानवाः॥
यक्षा विद्याधराः सिद्धा राक्षसाः पिशिताशिनः।
पितरो मुनयश्चापि पिशाचाः किन्नरादयः॥
अर्चयित्वा लिङ्गमूर्त्तिं संसिद्धा नात्र संशयः।
तस्माल्लिङ्गं यजेन्नित्यं येन केनापि भो सुराः॥

तथा,

ये वाञ्छन्ति महाभोगान् राज्यं वा त्रिदशालये।
तेऽर्चयन्तु सदा कालं लिङ्गरूपं महेश्वरम्॥
छित्त्वा भित्त्वा च भूतानि हत्वा सर्वमिदं जगत्।
यजेदेकं विरूपाक्षं न स पापैः प्रलिप्यते॥ इति।

इति लिङ्गमहिमा।

अथ लिङ्गलक्षणम्।

तत्र लिङ्गं द्विविधम् अकृत्रिमं कृत्रिमं च। अकृत्रिमं स्वयम्भूबाणलिङ्गादि। कृत्रिमं निर्मितधातुलिङ्गादि।

सिद्धान्तशेखरे,

नत्वा नादमयं लिङ्गं पिण्डिकां बिन्दुरूपिणीम्।
ब्राह्मीं शिलां कलारूपां वक्ष्ये लिङ्गस्य लक्षणम्॥
तल्लिङ्गं द्विविधं ज्ञेयमचलं च चलं तथा।
प्रत्येकं त्रिविधं ज्ञेयं व्यक्ताव्यक्तोभयात्मकम्॥
प्रासादे स्थापितं लिङ्गमचलं तच्छिलादिजम्।
स्थापितं तच्चलं गेहे स्थिरं लिङ्गमथोच्यते॥

पञ्चधा तत् स्थिरं लिङ्गं स्वयम्भुदैवबाणकम् ।
आर्षं च मानुषं लिङ्गं तेषां लक्षणमुच्यते ॥ इति ।
तत्र स्वयम्भुलिङ्गलक्षणं चोक्तम्—
मयदीपिकायाम्,
आचार्यमनपेक्ष्यैव स्वयम्भूतो महेश्वरः ।
यत्र चैव स्वयं व्यक्तं लिङ्गमुक्तं स्वयम्भु तत् ॥
विषुवद्यस्य संस्पर्शाद्वहति क्षिप्रमेव तु ।
विषुवत् सुषुम्णा । इडापिङ्गलाव्यतिरिक्ता ब्रह्मरन्ध्रं निर्भिद्य निर्गता नाडी ।
शैवसिद्धान्तशेखरे,
नानाच्छिद्रसुसंयुक्तं नानावर्णसमर्चितम् ।
अदृष्टमूलं यल्लिङ्गं कर्कशं भुवि दृश्यते ॥
तल्लिङ्गं स्वयमुद्भूतमपीठं लक्षणच्युतम् ।
स्वयम्भु लिङ्गमित्युक्तं तच्च नानाविधं मतम् ॥
शङ्खाभमस्तकं लिङ्गं वैष्णवं तदुदाहृतम् ।
पद्माभमस्तकं ब्राह्मं छत्राभं शाक्रमुच्यते ॥
शिरोयुग्मं तदाग्नेयं त्रिपदं याम्यमीरितम् ।
खड्गाभं निर्ऋतेर्लिङ्गं वारणं कलशाकृति ॥
वायव्यं ध्वजवल्लिङ्गं कौबेरं तु गदानिभम् ।
ईशानस्य त्रिशूलाभं लोकपानामिति स्मृतम् ॥
स्वयम्भु लिङ्गमाख्यातम्—इति ।

इति स्वयम्भुलिङ्गलक्षणम् ।

अथ बाणलिङ्गलक्षणम् ।

कालोत्तरे,
बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम् ।

उत्पत्तिं बाणलिङ्गानां लक्षणं लेशतः शृणु ॥
नर्मदादेविकयोश्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनां च बाणलिङ्गानि षण्मुख ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैश्चिह्नितानि च ।
आपीतानि षडस्राणि चक्राङ्काणि विशेषतः ॥
इन्द्रलिङ्गानि तान्याहुः साम्राज्यार्थप्रदानि तु ।
अरुणं हि सकीलालमुष्णस्पर्शकरोज्ज्वलम् ॥
आग्नेयं तत् शक्तिनिभमथ वा शक्तिलाञ्छितम् ।
इदं लिङ्गवरं स्थाप्य तेजसोऽधिपतिर्भवेत् ॥
दण्डाकारं भवेद्याम्यमथ वा रसनाकृति ।
यदभ्यक्तं मुहूर्त्तेन निर्णिक्तं जायते तदा ॥
निर्णिक्तं रुक्षम् ।
शत्रूणां निधनं तेन क्रियते स्थापितेन तु ।
राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ॥
शर्करादिसुलिप्तं तु कटुकत्वं न चेत्तदा ।
राक्षसं निर्ऋतिलिङ्गम् ।
वारुणं वर्त्तुलाकारं पाशाङ्कं चातिवर्चसम् ॥
छद्विदं सुस्वदं स्वच्छमम्भो यात्यप्सु मध्यगम् ।
कृष्णं धूम्रं च वायव्यं ध्वजाभं ध्वजभूषणम् ॥
मस्तके स्थापितस्तस्य तूलो ननमितस्ततः ।
निर्वाते तु चलत्यत्र शत्रोरुच्चाटने हितम् ॥
तूलः कार्पासः ।
गदाकारं मध्यगुरु कौबेरं सस्यमध्यगम् ।
दिनं वाप्यथ वा रात्रिं सस्यानां वृद्धिवर्द्धनम् ॥
त्र्यस्रं शूलाङ्कितं रौद्रं हिमकुन्देन्दुवर्चसम् ।

चतुर्वर्णमयं वापि वैष्णवं जायतेऽग्रतः ॥
वैष्णवं चक्रशङ्खाङ्कं गदाब्जादिविभूषितम् ।
श्रीवत्सकौस्तुभाङ्कं च शेषसिंहासनाङ्कितम् ॥
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ।
वैष्णवं नामतः प्रोक्तं सर्वैश्वर्यफलप्रदम् ॥
शालग्रामादिसंस्थं तु शङ्खाङ्कं श्रीविवर्द्धनम् ।
पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥
उक्ताङ्कं श्रेयसे योज्यं शेषमत्र विवर्जयेत् ।
पद्मवर्णं तु यल्लिङ्गं पद्माङ्कं सकमण्डलु ॥
दण्डाङ्कं सूत्रचिह्नं वा ब्राह्मं ज्ञानाप्तिदं मतम् ।
शशिवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पुष्परागनिभं शार्वं मुद्गाभं सिद्धपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् ॥
वसुदैत्येन्द्रयक्षेशगुह्यकैर्यातुधानकैः ।
नानावर्णं लोहवर्णमथ नीलोत्पलप्रभम् ॥
इत्येतल्लक्षणं प्रोक्तं परीक्ष्यं तत्त्वकोविदैः ।
त्रिसप्तपञ्चवारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥
नद्यां वा प्रक्षिपेद्भूयो यदा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि मनःसुखविवर्द्धनम् ॥
अथ बाणं समाख्यातं यथा वक्ष्ये तथादितः ।
बाणः सदाशिवो देवो बाणो बाणासुरोऽपि वा ॥
तेन तस्मै कृतं यस्माद्बाणलिङ्गमुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः ॥
कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।

पक्वजम्बूफलाकारं कुक्कुटाण्डसमाकृति ॥
भुक्तिमुक्तिप्रदं चैव बाणलिङ्गमुदाहृतम् !
कर्कशे बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ॥
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ।
एकपार्श्वक्षते धेनुपुत्रदारधनक्षयः ॥
शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च ।
अन्यजातिविलग्ने तु सर्वगोत्रक्षयो भवेत् ॥
छिद्रे लिङ्गेऽर्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधितो जायते पुमान् ॥
अर्च्यं स्यात्कपिलं लिङ्गं मुनीनां मोक्षकाङ्क्षिणाम् ।
लघु वा कपिलं स्थूलं गृहे नैवार्चयेत्क्वचित् ॥
गृहे विवर्जयेत्तादृक् तन्मुमुक्षार्थिनो हितम् ।
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ॥
तत्सपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं बाणं सर्वप्रासादपीठगम् ॥
बाणलिङ्गं यदा हस्ते तदा सौषुम्णिकं वहेत् ।
सुषुम्णा योगवायुपूरिका नाडी ।
त्रिपञ्चसप्तवारं वा तुलासाम्यं न जायते ॥
तदा बाणं समाख्यातं शेषं पाषाणकं वदेत् ।
नद्यां वा प्रक्षिपेद्भूयो यदा तदुपलभ्यते ॥
तदा बाणं समाख्यातमन्यथा क्लेशदायकम् ।
रेखाकारो विचार्योऽत्र संहितोक्तविधानतः ॥
तथा,

श्रीभैरव उवाच ।

साधु साधु महाभागे यत्त्वया पृच्छितो ह्यहम् ।

कथयामि न सन्देहो यथाशास्त्रं च निश्चयम् ॥
बाणासुरः पुरा भद्रे शिवस्यातीववल्लभः ।
जितक्रोधोऽनुरक्तश्च शिवपूजाविधौ रतः ॥
बुद्धिज्ञो निपुणश्चैव शिल्पज्ञो लक्षणान्वितः ।
दिने दिने स्वयं कृत्वा लिङ्गं स्थाप्य प्रपूजयन् ॥
एवं यावच्छतं चाब्दं दिव्यमानमपूजयत् ।
तदा तद्भक्तिमुत्प्रेक्ष्य प्रत्यक्षः शङ्करोऽभवत् ॥

शङ्कर उवाच ।

तुष्टोऽहं तव हे बाण वरं ब्रूहि किमिच्छसि ।
शङ्करस्य वचः श्रुत्वा बाणो वचनमब्रवीत् ॥
यदि तुष्टोऽसि हे नाथ मह्यं त्वं मन्दभागिने ।
क्लिष्टोऽहं तव देवेश लिङ्गं कृत्वा दिने दिने ॥
तत्तल्लक्षणसंसिद्धं लक्षणं शास्त्रनिर्मितम् ।
शास्त्रार्थो दुर्लभो देव सिद्धश्चार्थः सुदुर्लभः ॥
तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सलक्षणम् ।
सर्वकारुणिकं नाथ सर्वसत्त्वानुकम्पकम् ॥
सर्वेषां च हितार्थाय प्रसादं कुरु शङ्कर ।
श्रुत्वैवं वचनं तस्य शिवः परमकारणम् ॥
गत्वा कैलासमूर्द्धानं बाणेन सह शाङ्करि ।
निर्मिता लिङ्गकोटीनां सङ्ख्याश्चैव चतुर्दश ॥
सिद्धं लिङ्गं तु तत्सर्वं सदोषघ्नं स्वसम्भवम् ।
आपाद्यैवं सुसम्पूर्णं बाणस्य च समर्पितम् ॥
अक्षयं चाव्ययं बाणं स्थाप्यमानं च नित्यशः ।
ततः सङ्गृह्य बाणस्तु भारं कृत्वा प्रयत्नतः ॥

तद्धारं स्वपुरं नीत्वा नूनं चिन्तयते शुचिः।
अक्षयं यदि संसिद्धं स्थाप्यमानं दिने दिने॥
सत्त्वानां सिद्धिहेत्वर्थं पुण्यस्थानेषु सञ्चये।
लिङ्गाद्रौ कालिकागर्त्ते साञ्चितास्तु त्रिकोटयः॥
श्रीशैले कोटयस्तिस्रः कोट्येका कन्यकाश्रमे।
माहेश्वरे च कोटिस्तु कन्यातीर्थे च कोटिका॥
महेन्द्रे चैव नेपाले एकैका कोटिरेव च।
बाणार्थं हि कृतं लिङ्गं बाणलिङ्गमतः स्मृतम्॥
बाणो वा शिव इत्युक्तस्तत्कृतं बाणमुच्यते।
तत्कृतत्वादथो बाणं स्वतो लिङ्गानुरूपतः॥
तस्मात्तेषु प्रदेशेषु पुण्ये स्थाने ततोऽपि वा।
स्थितं यच्छिवसद्भावं शिवस्याकृतिविग्रहम्॥
हेमाद्रुदाहृतलक्षणसमुच्चयेऽपि,
स्वयम्भुलिङ्गवद्बाणलिङ्गं भुक्त्यै च मुक्तये।
सहस्रफलमन्यस्माद्यथा स्थापनपूजने॥
श्रीशैले कालिकागर्त्ते लिङ्गाद्रौ कर्णिकाश्रमे।?
कन्यातीर्थे च नेपाले महेन्द्रे चामरेश्वरे॥
स्थितानि बाणलिङ्गानि शिवेनैव कृतानि तु। इति।
शैवसिद्धान्तशेखरे,
बाणलिङ्गमन्यधिकृत्य
तदनेकप्रकारं स्याद्बहुवर्णमपीठकम्।
श्लक्ष्णं सूत्रविहीनं च बाणं तत्पृथुलाग्रकम्॥ इति।
एतेषां बाणलिङ्गानां च प्रतिष्ठावाहनादिकं न कर्त्तव्यम्। तदुक्तम्—
भविष्यपुराणे,
बाणलिङ्गानि राजेन्द्र स्थितानि भुवनत्रये।

न प्रतिष्ठा न संस्कारस्तेषामावाहनं तथा ॥ इति ।

इति बाणलिङ्गलक्षणम् ।

अथ रौहलिङ्गलक्षणम् ।

सिद्धान्तशेखरे,

नदीसमुद्भवं रौहमन्योन्यस्य विघर्षणात् ।
नदीवेगात्समं स्निग्धं सञ्जातं रौहमुच्यते ॥ इति ।

हेमाद्रुदाहृतलक्षणसमुच्चये,

सरित्प्रवाहसंस्थानं बाणलिङ्गसमाकृति ।
यदन्यदपि बोद्धव्यं लिङ्गं रौहं सुखावहम् ॥

सरित् नदी । सा च नर्मदा ।

रौहलिङ्गं तथाऽऽख्यातं बाणलिङ्गसमाकृति ।
श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम् ॥
स्वभावात्कृष्णवर्णं वा सर्वजातिषु सिद्धिदम् ।
नर्मदासम्भवं रौहं बाणलिङ्गवदीरितम् ॥

इति कालोत्तरे उक्तत्वात् ।

सिद्धान्तशेखरे,

नर्मदासम्भवं लिङ्गं बाणलिङ्गवदीरितम् ।
सर्वप्रासादयोग्यं च सर्वपीठार्हकं मतम् ॥ इति ।

इति रौहलिङ्गलक्षणम् ।

अथ शिवनाभिलिङ्गमहिमा ।

शिवनारदसंवादे,

शिवनाभिमयं लिङ्गं नित्यं पूज्यं महर्षिभिः ।
यतश्च सर्वलिङ्गेभ्यस्तस्मात्पूज्यं विधानतः ॥ इति ।

सर्वलिङ्गेभ्यः, श्रेष्ठमित्यर्थः ।

इति शिवनाभिलिङ्गमहिमा ।

अथ शिवनाभिलिङ्गलक्षणम् ।

शिवनारदसंवादे,

शिवनाभिलिङ्गं प्रक्रम्य

उत्तमं मध्यमं नीचं त्रिविधं लिङ्गमीरितम् ।
चतुरङ्गुलमुच्छ्रायं रम्यं वेदिकया युतम् ॥
उत्तमं लिङ्गमाख्यातं मुनिभिः शास्त्रकोविदैः ।
तदर्द्धं मध्यमं प्रोक्तं तस्यार्द्धं चाधमं स्मृतम् ॥ इति ।

इति शिवनाभिलिङ्गलक्षणम् ।

अथ दैवलिङ्गलक्षणम् ।

सिद्धान्तशेखरे,

करसम्पुटसंस्पर्शं शूलटङ्केन्दुभूषितम् ।
रेखाकोटरसंयुक्तं निम्नोन्नतसमन्वितम् ॥
दीर्घाकारं च यल्लिङ्गं ब्रह्मभागादिवर्जितम् ।
लिङ्गं दैवमिति प्रोक्तं गाणकं प्रोच्यते ऽधुना ॥ इति ।

इति दैवलिङ्गलक्षणम् ।

अथ गणलिङ्गलक्षणम् ।

सिद्धान्तशेखरे,

कूष्माण्डस्य फलाकारं मातुलुङ्गफलोपमम् ।
उर्वारुकफलाकारं कपित्थफलसन्निभम् ॥
तालस्य वा फलाकारं गणानां लिङ्गमीरितम् । इति ।

इति गणलिङ्गलक्षणम् ।

अथार्षलिङ्गलक्षणम् ।

तत्रैव,

नालिकेरफलाकारं ब्रह्मसूत्रविवर्जितम् ।

मूले स्थूलं च यल्लिङ्गमग्रे स्थूलं च यद्भवेत् ॥
मध्ये स्थूलं च यल्लिङ्गमृषीणां तदुदाहृतम् ।

इत्यार्षलिङ्गलक्षणम् ।

अथ कृत्रिममानुषलिङ्गलक्षणम् ।

तच्चानेकविधं तत्तद्धात्वादिनिर्मितम् । तथाच—

शैवसिद्धान्तशेखरे,

मानुषं बहुधा प्रोक्तं रत्नजं लोहजं तथा ।
धातुजं मृन्मयं वार्क्षं शैलं पिष्टादिनिर्मितम् ॥ इति ।

लोहजं सुवर्णादिनिर्मितम् । सुवर्णादीनि च द्रव्याणि 'लोहान्युच्यन्ते । **विष्णुधर्मोत्तरे** चापलक्षणे—

लोहानि राम चत्वारि शस्यन्ते चापकर्मणि ।
सुवर्णं रजतं ताम्रं तथा कृष्णायसं द्विज ॥

इत्युक्तत्वात् । अत्र मानुषलिङ्गभेदे यत् पिष्टादिनिर्मितं लिङ्गं तच्च क्षणिकं ज्ञेयम् । न स्थिरं न चलम् । क्षणिकं नाम तात्कालिकम् । तच्च यथाकामं गन्धादिद्रव्यमयं निर्माय प्रतिष्ठाप्य तत्कालमेव समभ्यर्च्य विसृज्य जले प्रक्षिपेत् । तथा चोक्तम्—

कालोत्तरे,

गन्धादिपिष्टजातानि न स्थिराणि चलानि च ।
तावत्कालं च सम्पूज्य विसृज्यैतानि के क्षिपेत् ॥ इति ।

एतानि क्षणिकलिङ्गानि । कं जलम् ।

सिद्धान्तशेखरे,

क्षणिकानामथो वक्ष्ये लिङ्गानां लक्षणं तथा ।
गन्धजं पिष्टजं गौडं गोमयोत्थं च भस्मजम् ॥
हरिद्रानवनीतोत्थं सैकतं मृन्मयं तथा ।
लाक्षं सार्जरसं सैकत्यं नानाद्रव्यसमुद्भवम् ॥ ?

फलं पुष्पमितीमानि क्षणिकानि विचक्षणाः ।
आहुर्लिङ्गानि चैतेषां चतुर्भिर्वीक्षणादिभिः ॥
शुद्धिं कृत्वाथ सम्पूज्य ततो मन्त्राद्विसर्ज्जयेत् ।
पूजान्ते तानि लिङ्गानि ह्यगाधे पयसि क्षिपेत् ॥ इति ।

हेमाद्यूरुदाहृतलक्षणसमुच्चये,

द्विविधं रत्नजं लिङ्गं निर्मितं चाप्यनिर्मितम् ।
कारुभिर्घटितं यच्च तल्लिङ्गं निर्मितं स्मृतम् ॥
स्वभावोत्थं विशुद्धं यद्रत्नं तच्चाप्यनिर्मितम् ।
तत्पूज्यं राजभिर्यत्नात् भुक्तिमुक्त्यार्थीभिः सदा ॥
त्यजेद्विन्द्वन्वितं रौद्रं शूलाग्रं चिपिटं कृशम् ।
ऊर्ध्वाधोवदनं दीर्घमधःस्थूलं च निष्प्रभम् ॥ इति ।

रत्नलिङ्गेषु पूर्वोक्तरत्नपरीक्षाप्रकरणे प्रतिरत्नलक्षणं ये गुण-दोषा उक्तास्ते तत्तद्रत्नलिङ्गेषु द्रष्टव्याः ।

सिद्धान्तशेखरे,

त्रिविधं स्फटिकं प्रोक्तमर्कसोमयमात्मकम् ।
मध्याह्नसमये तीक्ष्णे सूर्यरश्मौ धृते मणौ ॥
जायते सार्कतूलेऽग्निर्यस्मात्तत्सूर्यकान्तकम् ।
सम्पूर्णचन्द्रकिरणे निशीथे विधृते मणौ ॥
यस्मात्पतति पानीयं चन्द्रकान्तं तदुच्यते ।
न ज्वलत्यर्करश्मौ यन्नेन्दुरश्मौ द्रवत्यपि ॥
समात्मकं तत्स्फटिकं सर्वं तच्च चतुर्विधम् ।
शुक्लं रक्तं च पीतं च कृष्णाभं ब्राह्मणादिषु ॥
अम्बुबिन्दुनिभं स्वच्छं समं स्निग्धं प्रभान्वितम् ।
अशेषदोषनिर्मुक्तं स्फाटिकं सर्वकामदम् ॥
निष्प्रभं निर्मुखं रूक्षं बहुवर्णं च जर्जरम् ।

तुषारकणसन्त्रासरेखाचिपिटसंयुतम् ॥
सगर्भं कीलकोपेतं शर्करात्रणसंयुतम् ।
अन्यजातिसमाक्रान्तं सदोषं स्फाटिकं त्यजेत् ॥
रत्नानामपि लिङ्गानां पीठं कुर्यात्स्वयोनिजम् ।
हेमजं तदभावे स्यात्तदभावे तु राजतम् ॥
ताम्रजं तदभावे वा कुर्यात्काम्येऽन्यलोहजम् ।
सपीठं स्फाटिकं कुर्यात्तल्लक्षणमथोच्यते ॥
लिङ्गमस्तकविस्तारं पूजाभागसमं नयेत् ।
नाहं तत्त्रिगुणं कुर्यान्नाहवत्पीठविस्तृतम् ॥
पूजांशद्विगुणं कुर्यादुन्नतं पीठमुत्तमम् ।
वृत्तं वा चतुरस्रं वा मध्ये कण्ठसमन्वितम् ॥
द्विगुणं लिङ्गनाहाच्च कण्ठनाहं समाचरेत् ।
त्रिमेखलमधश्चोर्ध्वं समं वा यद्विमेखलम् ॥
लिङ्गमस्तकविस्तारं षड्भागं विभजेत्ततः ।
मेखलामेकभागेन कुर्यात् वा तं च तत्समम् ॥
लिङ्गदैर्घ्यसमं कुर्यात् प्रणालं पीठबाह्यतः ।
विस्तारं तत्समं मूले तदग्रं च तदर्धतः ॥
जलमार्गः प्रकर्त्तव्यस्तस्य मध्ये त्रिभागतः ।
कुर्यात् पीठार्धदीर्घं वा प्रणालं च शिवोदितम् ॥
सर्वेषां रत्नलिङ्गानां सपीठानां विशेषतः ।
लोहादीनां च लिङ्गानामेवं लक्षणमाचरेत् ॥ इति ।

शिल्पशास्त्रे,

लिङ्गमस्तकमध्यात्तु सूत्रं स्यादाप्रणालिकम् ।
लिङ्गप्रणालीपृष्ठत्वं तावदेव प्रकीर्तितम् ॥
उच्चत्वेऽपि तथा पीठे पञ्चसूत्रं प्रचक्षते । इति ।

कालोत्तरे,

लिङ्गमस्तकविस्तारो लिङ्गोच्छ्रायसमो भवेत्।
त्रिगुणः परिणाहः स्यात्ततः पिण्डी प्रतिष्ठिता॥
लिङ्गतुल्यं प्रणालं स्यात्पञ्चसूत्रस्य लक्षणम्।
पञ्चसूत्रसमायुक्तं शिवलिङ्गं समर्चयेत्॥
भुक्तिदं मुक्तिदं देवि धनारोग्यसुतप्रदम्। इति।

इदं च पञ्चसूत्रादिलक्षणं चले पाषाणलिङ्गे अवश्यं द्रष्टव्यमेव। रत्नलिङ्गादौ तु तदभावेऽपि न दोषः। तदुक्तम्—

हयशीर्षपञ्चरात्रे,

न कुर्याल्लक्षणोद्धारं रत्नजानां चलात्मनाम्।
सुप्रभालक्षणं त्वेषां स्वर्णजानामपि द्विज॥
तस्मान्न लक्षणोद्धारं कुर्यात्पाषणलिङ्गवत्।
अचलानां तैजसानां क्वचिदिष्येत लक्षणम्॥

इत्यादि। पाषाणलिङ्गवदितिपदेन पाषाणलिङ्गे पञ्चसूत्रादिलक्षणमवश्यं द्रष्टव्यमित्यवगम्यते।

सोमशम्भुनाप्युक्तम्—

रत्नजे लक्षणोद्धारो न लोहे न सरिद्भवे।
लिङ्गेषु चललोहेषु न दृष्टं क्वचिदागमे॥
स्वरूपं लक्षणं तेषां प्रभा रत्नेषु निर्मला। इति।

शिवनारदसंवादे।

पञ्चसूत्रविधानं च पार्थिवे न विचारयेत्।
यथाकथञ्चिद्विधिना रमणीयं प्रकारयेत्॥
अखण्डं तद्धि कर्तव्यं न द्विखण्डं प्रकारयेत्।
सखण्डं हि प्रकुर्वाणो नैव पूजाफलं लभेत्॥
पक्वजम्बूफलाकारं सर्वकामप्रदं शिवम्।

चिपिटं यः करोत्येव हानिपीडाकरं हि तत् ॥ इति ।
अथापरो विशेष उक्तः—
कालोत्तरे,
रत्नजं हेमजं लिङ्गं पारदं स्फाटिकं तथा ।
पार्थिवं पिष्टजं पौष्पमखण्डं तु प्रकारयेत् ॥ इति ।
पिष्टजपदं पौष्पपदं च सर्वक्षणिकलिङ्गोपलक्षकम् ।
शिवनारदसंवादे विशेषः,
अखण्डं तु चरं लिङ्गं द्विखण्डमचरं स्मृतम् ।
वेदिका तु महाविष्णुर्लिङ्गं देवो महेश्वरः ॥
अतो हि स्थावरे लिङ्गे स्मृता श्रेष्ठा द्विखण्डता ।
द्विखण्डं स्थावरं लिङ्गं कर्त्तव्यं हि विधानतः ॥
अखण्डं जङ्गमं प्रोक्तं शैवसिद्धान्तवेदिभिः ।
द्विखण्डं तु चरं लिङ्गं कुर्वन्त्यज्ञानमोहिताः ॥
नैव सिद्धान्तवेत्तारो मुनयः शास्त्रपारगाः ।
अखण्डं स्थावरं लिङ्गं द्विखण्डं चरमेव च ॥
ये कुर्वन्ति नरा मूढा न पूजाफलभागिनः ।
तस्माच्छास्त्रोक्तविधिना त्वखण्डं चरसंज्ञकम् ॥
द्विखण्डं स्थावरं लिङ्गं कर्त्तव्यं परया मुदा । इति ।

इति कृत्रिममानुषलिङ्गलक्षणम् ।

अथ लिङ्गमानम् ।

सिद्धान्तशेखरे,
अङ्गुलादिविवृद्धानि रत्नलिङ्गानि कारयेत् ।
सर्वलक्षणयुक्तानि त्रिभिर्भागैर्युतानि च ॥ इति ।
कालोत्तरे,
लोहरत्नमयं लिङ्गं गृहिणां च गृहे हितम् ।

अङ्गुलात्तु वितस्त्यन्तं नोर्ध्वं नाधो विभूतये ॥

अङ्गुलाद्वितस्त्यन्तमिति सुवर्णरूप्यमयलिङ्गविषयम् । रत्नजे तु नायं नियमः ।

रत्नजे नियमो नास्ति यथालाभं प्रपूजयेत् ।

इति स्मरणात् । नियमो नास्तीत्येतदपि सगुणोत्तमरत्नविषयमिति–

मानोन्मानप्रमाणादि तेषु ग्राह्यं न वा बुधैः ।

इत्यत्राग्रे वक्ष्यंते ।

तथा,

तच्छैलं दारुजं वापि स्वगृहे परिवर्जयेत् । इति ।

मयसङ्ग्रहे,

रत्नलिङ्गमधिकृत्य ।

पृथक् पीठमपीठं वा तत्स्यान्नोर्ध्वं नवाङ्गुलात् ।

नवाङ्गुलादिति गुणहीनरत्नविषयम् । अङ्गुलादर्वागपि महारत्नमयं लिङ्गं भवतीत्याह–

स एव,

सिद्धये बदराभाधश्चणकाद्वा प्रशस्यते । इति ।

बदराधः सिद्धये न प्रशस्यते इति वदन् बदरप्रमाणमभ्यनुजानाति । चणकाद्वेति गुणाधिक्यमभिप्रेत्योक्तम् । अत एवाङ्गुलादर्वागपि महारत्नलिङ्गपूजने फलमपि स्मर्यते–

मुद्गाद्यङ्गुलपर्यन्तं शास्त्रज्ञैः सुपरीक्षितम् ।

महारत्नं महामूल्यं यत् गुणाद्यन्वितं सदा ॥

तस्यार्चनाज्जयः शान्तिरारोग्यं विपुलाः श्रियः ।

संप्रतापो यशश्चायुर्भवेयुर्भूपतेश्चिरम् ॥ इति ।

प्रभातिशये सति परापरप्रमाणावधिद्वयातिक्रमेऽपि न दोष इत्याह–

सुसंस्थानं प्रदीप्तं चेदाधिक्येऽपि न दोषकृत् ।
सूक्ष्मे चैको गुणो येन बलीयान् सर्वदोषजित् ॥

तद्रत्नं यदि सुसंस्थानं शोभनलिङ्गाकृतिसंयुक्तं प्रकृष्टतरदीप्तियुक्तं च भवति तदा नवाङ्गुलाधिक्ये चणकादल्पत्वेऽपि दोषकृन्न भवति। येन कारणेनातिबलवानेक एव दीप्तिलक्षणो गुणः सर्वदोषजिद्भवति किं पुनः संस्थानयुक्तं इत्यर्थः । दीप्तेः सर्वदोषजित्त्वे हेतुमाह–

समस्तमणिजातीनां दीप्तिः सान्निध्यकारणम् ।
ज्योतिर्मयस्य परमेश्वरस्य दीप्तिरेव सन्निधेः कारणम् ।

तदुक्तम्–

येन पाषाणखण्डस्य मूल्पमल्पं वसुन्धरा ।
बहुदीप्ततरस्याथ तेजसस्तद्विजृम्भितम् ॥ इति ।

अतः सुसंस्थानवति दीप्ते च रत्ने चणकादारभ्य नवाङ्गुलावधिको माननियमो न ग्राह्य इत्याह–

मानोन्मानप्रमाणादि तेषु ग्राह्यं न वा बुधैः । इति ।

शिवागमे स्फाटिकं लिङ्गमधिकृत्य–

अङ्गुल्यादिवितस्त्यन्तं पूजनीयं गृहे सदा ।
तदूर्ध्वाधोऽपि संस्थाप्यं निर्मलं प्रभयोज्ज्वलम् ॥ इति ।

सिद्धान्तशेखरेऽपि,

अङ्गुल्यादिवितस्त्यन्तं लिङ्गं गेहे प्रपूजयेत् ।
प्रासादे तु तदूर्ध्वं स्यात्पूजनीयं प्रयत्नतः ॥ इति ।

हेमाद्रौ लक्षणसमुच्चये विशेषः ।

चललिङ्गं द्विधा कार्यं धातुरत्नमयं तथा ।

हेमादि चललिङ्गं स्यादङ्गुलादित्रिपञ्चकम् ॥
क्षुद्ररत्नोत्थमप्येवं स्वमानाद्ररत्नजम् ।

हेमादीत्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा हेमरजतभिन्नधातुलिङ्गं गृह्यते । तच्च अङ्गुलादित्रिपञ्चकम् । एकाङ्गुलमारभ्य पञ्चदशाङ्गुलप्रमाणावधि कुर्यात् । हेमरजतलिङ्गं तु द्वादशाङ्गुलप्रमाणान्तं कार्यम् ।

रत्नन्तं हेमतारोत्थं लिङ्गं शेषैस्त्रिपञ्चकम् ।
इच्छासिद्धिः सुतो धर्मः सौभाग्यं च रिपुक्षयः ॥
आरोग्यं राजसौख्यं च नृपः स्त्रीजनकं जयः ।
धैर्यं च स्त्रीजनायुश्च लिङ्गादेकाङ्गुलादितः ॥
चललिङ्गाद्भवेत्कार्यं साधकानां क्वचिन्मते ।

इति स्मरणात्। रत्नन्तं द्वादशाङ्गुलान्तम्। शेषैः हेमरजतातिरिक्तधातुभिः। त्रिपञ्चकं पञ्चदशाङ्गुलप्रमाणम् । अयमत्र निष्पन्नोऽर्थः। एकाङ्गुलादारभ्य द्वादशाङ्गुलान्तं हेमरजतलिङ्गं तदतिरिक्तधातुलिङ्गं च पञ्चदशाङ्गुलान्तं कुर्यादिति। स्वमानादिति। यावन्मानं रत्नं लभ्यते तावन्मानादेव निष्पन्नम् ।

तिथ्यन्तमग्रजातीनां नृपाणां यावदिन्द्रकम् ।
वैश्यानां मन्मथान्तं स्याच्छूद्राणां वस्वगावधि ॥

तिथयः पञ्चदश । इन्द्राश्चतुर्दश । मन्मथास्त्रयोदश । वसवोऽष्टौ । अगाः सप्त ।

यक्षादीनां क्वचिल्लिङ्गं विकारादेकविंशतिः ।
चलं तदूर्ध्वं देवानां त्रयस्त्रिंशतिकाङ्गुलम् ॥

तथा,

एकाङ्गुलादिपञ्चान्तमधमं चलमुच्यते ।
षडादिदशपर्यन्तं चललिङ्गं च मध्यमम् ॥

एकादशाङ्गुलादि स्याङ्कमात्पञ्चदशान्तकम् ।
श्रेष्ठं लिङ्गं प्रमाणं तु श्रेष्ठाष्टाङ्गुलसंयुतम् ॥ इति ।

गन्धादिनिर्मितं च क्षणिकलिङ्गमेकाङ्गुलमारभ्य त्र्यङ्गुलावधि पञ्चाङ्गुलावधि च कार्यम् । तदुक्तम्—

हेमाद्रौ लक्षणसमुच्चये,

ऐहिकं त्र्यङ्गुलं यावन्नोर्ध्वं गन्धभवादिकम् ।
पञ्चाङ्गुलं च वै ज्यायः फलदं स्वप्रमाणतः ॥ इति ।

ऐहिकमैहिकपुत्रादिकाममदमित्यर्थः । गन्धभवादीत्यत्रादिपदेन सर्वाणि क्षणिकलिङ्गान्युपलक्ष्यन्ते । क्वचित्तद्विशेषः । अन्ननिर्मितं लिङ्गं च त्र्यङ्गुलादिसप्ताङ्गुलान्तं कुर्यात् । तदुक्तम्—

ज्ञानरत्नावल्याम्,

अथ पक्वान्नजं लिङ्गं कर्त्तव्यं वाऽन्नसम्भवम् ।
त्र्यङ्गुलादर्णवान्तं च कर्त्तव्यं हि यथारुचि ॥

अर्णवाः सप्त ।

गुणतत्त्वपदं प्राप्य पश्चाच्छिवसमो भवेत् । इति ।

गुडलिङ्गं तु एकाङ्गुलमारभ्य द्वादशाङ्गुलान्तं कुर्यात् । तदप्युक्तम्

ज्ञानरत्नावल्याम्,

कार्यं गुडमयं लिङ्गं कलातो द्वादशाङ्गुलम् ।
प्राप्नोत्यैश्वर्यममलं क्षये मोक्षं लभेत्तथा ॥ इति ।

इति लिङ्गमानम् ।

अथ लिङ्गफलम् ।

कालोत्तरे,

सर्वं रत्नं महाभूत्यै मणयस्तद्वदेव हि ।
अनन्ताद्याः स्मृता ह्यष्टौ मणयो विद्युदुज्ज्वलाः ॥
रात्रौ प्रकाशकाः सर्वे विषघ्ना जयकारिणः ।

नानावर्णास्तु विज्ञेया रसगन्धानुरूपतः ॥
वज्राद्याः स्फाटिकाद्याश्च रत्ना वै मुक्तिमुक्तिदाः ।
अयस्कान्तं चतुर्धा तु ज्ञेयं सामान्यसिद्धिषु ॥
बेरकं कटुकं चैव भ्रामकं चुम्बकं तथा ।
एवमादीनि रत्नानि ज्ञात्वा स्थाप्यानि षण्मुख ॥ इति ।
मयसङ्ग्रहे विशेषः ।
सर्वं रत्नभवं श्रेष्ठं तत्र वज्रमरिच्छिदे ।
पद्मरागं महाभूत्यै सौभाग्याय च मौक्तिकम् ॥
पुष्टिमूलं महानीलं ज्योतीरससमुद्भवम् ।
यशसे कुलसन्तत्यै तैजसं सूर्यकान्तजम् ॥
चन्द्रप्रियं मृत्युजितं स्फाटिकं सर्वकामदम् ।
चन्द्रप्रियं चन्द्रकान्तजमित्यर्थः ।
शूलाख्यमणिजं शत्रुक्षयाय पौलिकं तथा ॥
यत्सन्निधानात् शूलरोगनाशः स शूलमणिः । पौलिकं पुलकजम् ।
सस्यकं सस्यनिष्पत्तौ भौजङ्गं दिव्यसिद्धिदम् ।
सस्यकं रत्नविशेषः ।
श्रेष्ठं मारकतं लिङ्गमारोग्याहितचेतसाम् ॥
आरोग्ये आहितं चेतो यैः । आरोग्यकामा इत्यर्थः ।
वैकृते च महावर्त्तरक्तायस्कान्तजं हितम् ।
क्षुद्रसिद्धिषु तन्मन्त्रजातिसंस्कृतमिष्टदम् ॥
क्षुद्रसिद्धिषु मारणोच्चाटनादिषु । तन्मन्त्रजातिसंस्कृतं क्षुद्रसिद्धिकरमन्त्रजातिप्रतिष्ठितम् ।
गुणादूर्ध्वं फलं विप्राः परासु मणिजातिषु ।
परासु उत्कृष्टासु वैदूर्यादिमणिजातिषु गुणोत्कर्षात्फलोत्क-

र्णो वेदितव्य इत्यर्थः ।

वर्णाभिधानसंस्थानविशेषेभ्यश्च तद्विदा ॥

ऊह्यं फलमित्यनुषङ्गः ।

हेमाद्र्युदाहृतलक्षणसमुच्चयेऽपि,

आयुष्यं हीरजं ज्ञेयं रोगहृन्मौक्तिकोद्भवम् ।
सुखकृत्पुष्परागोत्थं वैडूर्यं शत्रुदर्पहृत् ॥
पद्मरागं च लक्ष्मीदमैन्द्रनीलं यशःप्रदम् ।
लिङ्गं मारकतं पुष्ट्यै स्फाटिकं सर्वकामदम् ॥
महारत्नोत्थलिङ्गानि क्षुद्ररत्नोद्भवान्यतः ।

महारत्नोद्भवानि लिङ्गान्युक्तानि । अतः परं क्षुद्ररत्नोद्भवानि वक्ष्यामीति शेषः ।

वैदुमं वश्यकामार्थं कर्केतनममित्रहृत् ।
पुलकोत्थं तु विद्याकृत् साङ्ख्यं सौख्यप्रदायकम् ॥ इति ।

पुलकोत्थं तुच्छजम् । साङ्ख्यं सङ्ख्यजम् ।

कालोत्तरे,

महाभूतिप्रदं हैमं तारजं भूतिवर्द्धनम् ।
आरकूटं तथा कांस्यं शुल्बं सामान्यभुक्तिदम् ॥

आरकूटं पित्तलम् । शुल्बं ताम्रम् ।

त्रपुसीसायसं लिङ्गं शत्रूणां नाशने हितम् ।

तथा,

कीर्त्तिदं कांस्यजं लिङ्गं तारजं पुत्रवर्द्धनम् ॥
पैत्तलं भुक्तिमुक्त्यर्थं मिश्रजं सर्वसिद्धिदम् ।

शिवनारदसंवादे,

पितॄणां मुक्तये पूज्यं लिङ्गं रजतसम्भवम् ।
हेमजं सत्यलोकस्य प्राप्तये पूजयेत् पुमान् ॥

पूजयेत्ताम्रजं लिङ्गं पुष्टिकामो हि मानवः।
तुष्टिकामस्तु सततं लिङ्गं पित्तलसम्भवम्॥
कीर्त्तिकामोऽर्चयेन्नित्यं लिङ्गं कांस्यसमुद्भवम्।
शत्रुमारणकामस्तु लिङ्गं लोहमयं सदा॥
सदा सीसमयं लिङ्गमायुःकामोऽर्चयेन्मुदा। इति।

तथा,

ब्रह्मस्वपरिहारार्थं सौवर्णं लिङ्गमर्चयेत्। इति।

लक्षणसंमुच्चये,

स्थिरलक्ष्मीप्रदं हैमं राजतं चैव राज्यभृत्।
प्रजावृद्धिकरं वाङ्गं ताम्रमायुःप्रवर्द्धनम्॥
विद्वेषकारकं कांस्यं रीतिजं शत्रुनाशनम्।
रीतिजं पित्तलमयम्।
रोगघ्नं सैसकं लिङ्गमायसं रिपुनाशनम्।
अष्टलोहमयं लिङ्गं कुष्टरोगक्षयावहम्॥
त्रिलोहसम्भवं लिङ्गं मन्त्रध्यानप्रसिद्धिदम्। इति।

कालोत्तरे,

विशेषाच्छैलजं मुक्त्यै भुक्तये चानुषङ्गतः।
पार्थिवं भुक्तये शस्तं मुक्तये चानुषङ्गतः॥
एवं वै दारुजं ज्ञेयं चित्रलिङ्गं तथा पुनः। इति।

शिवनारदसंवादे,

पाषाणसम्भवं लिङ्गं सम्पूज्य परया मुदा।
इह कामानवाप्नोति प्रेत्य चानुत्तमं पदम्॥
लिङ्गानामपि सर्वेषां पार्थिवं लिङ्गमुत्तमम्।
कृत्वा सम्पूज्य विधिवत्सर्वकामानवाप्नुयात्॥ इति।

लिङ्गपुराणे,
श्रीप्रदं शर्वजं लिङ्गं शिलाजं सर्वसिद्धिदम् ।
शर्वजः पारदः ।
धातुजं धनदं साक्षादारुजं भोगसिद्धिदम् ॥
मृन्मयं धान्यदं चैव क्षणिकं कर्मसिद्धिदम् । इति ।
कालोत्तरे,
गन्धपुष्पमयं लिङ्गं तथान्नादिविनिर्मितम् ।
भस्मगोमयजं चाथ गुडान्नादिविनिर्मितम् ॥
सर्वकामप्रदं पुंसां लिङ्गं तात्कालिकं मतम् । इति ।
लक्षणसमुच्चये,
गान्धं सौभाग्यदं लिङ्गं पौष्पं मुक्तिप्रदायकम् ।
स्थण्डिले मण्डले पूज्यं स्यादीक्षास्थापनादिके ॥
एकाहान्यैहिकान्यत्र प्रोच्यन्ते सिद्धिमिच्छताम् ।
मधुमानप्रदं शार्ङ्गं सैन्यदं नागदन्तजम् ॥
कूर्मकीकससञ्जातं नूनं पातालसिद्धिदम् ।
अणिमादिप्रदानि स्युरन्यान्यब्दार्द्धतः सदा ॥
पैष्टान्यष्टप्रकारणि सद्वीह्यष्टकजानि तु ।
शालिपिष्टोद्भवं पुष्ट्यै षाष्टिकं बुद्धिवर्द्धनम् ॥
गोधूमं वातरोगघ्नं यवजं बलसौख्यदम् ।
रिपुभेदकरं मौद्गं स्त्रीदं स्यान्माषसम्भवम् ॥
तैलपिष्टं करोत्यग्निं सिद्धार्थं भयनाशनम् ।
अग्निं करोति मन्दाग्नेः क्षुद्वोधं करोतीत्यर्थः ।
सुखकृन्नावनीतं तु गोमयं रोगनाशनम् ।
आयुष्यमायुःप्रदं ज्ञेयं गौडं प्रीतिविवर्द्धनम् ॥
नानाफलोद्भवं लिङ्गं नानाकामप्रदायकम् ।

गुप्यदं सैकतं भूरितोभाग्याय च लावणम् ॥
उच्चाटने तु पाशव्यं मौल्यं शत्रुक्षयावहम् ।
वंशाङ्कुरसमुद्भूतं वंशवृद्धिप्रदं भवेत् ॥
पुरक्षोभकरं पौरं रामठं रोगकारकम् । इति ।
पौरं गुग्गुलनिर्मितम् । रामठं हिङ्गुनिर्मितम् ।
ज्ञानरत्नावल्याम्,
तात्कालिकदरिद्रश्च कृत्वा भक्त्या समर्चयेत् ।
पूज्यं गन्धमयं लिङ्गं त्रिकालं स्वसुखावधि ॥
चन्द्रेण चन्दनेनाथ कुङ्कुमेन सुगन्धिना ।
चतुःसमेन वा कार्यं लघुना केवलेन वा ॥
चन्द्रः कर्पूरः । लघुरगुरुः । चतुःसमलक्षणमुक्तम्-
गरुडपुराणे,
कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमः ॥ इति ।
शशी कर्पूरः ।
एवं वै गन्धलिङ्गं तु कृत्वा सम्पूज्य भक्तितः ।
प्रयाति शिवसायुज्यं बन्धुभिः सहितो नरः ॥
कल्प्यं फलमयं लिङ्गं स नीयेत पदे परे ।
कार्यं पुष्पमयं लिङ्गं रूपगन्धसमन्वितम् ॥
नवखण्डां धरां भुक्त्वा गणेशाधिपतिर्भवेत् ।
रजोभिर्निर्मितं लिङ्गं यः पूजयति भक्तितः ॥
विद्याधरपदं प्राप्य पश्चाच्छिवसमो भवेत् ।
मुमुक्षुश्च सितं लिङ्गं पूजयेच्छिवतां व्रजेत् ॥
श्रीकामो गोशकृल्लिङ्गमहन्यहनि पूजयेत् ।
स्वच्छेन कापिलेनैव गोमयेन प्रकल्पयेत् ॥

स्वच्छेन भूमिपतनात्तत्प्रागेवोद्धृतेन च ।
कार्यं पिष्टमयं लिङ्गं यवगोधूमशालिजम् ॥
श्रीकामः पुष्टिकामश्च पुत्रकामस्तदर्चयेत् ।
सिताखण्डमयं लिङ्गं पूज्यमारोग्यवर्द्धनम् ॥
कीर्तिकामेन सम्पूज्यो दर्पणे परमेश्वरः ।
वश्ये लवणजं लिङ्गं तालत्रिकटुकान्वितम् ॥
तालं हरितालम् । त्रिकटुकं शुण्ठीपिप्पलीमरीचमिति द्रव्यत्रयं प्रसिद्धम् ।
गव्यं घृतमयं लिङ्गं सम्पूज्यं बुद्धिवर्द्धनम् ।
भूतये वस्त्रलिङ्गं तु दुष्टघ्नं सार्षपं शिवम् ॥ इति ।
शिवनारदसंवादेऽपि,
लवणेन च सौभाग्यं पार्थिवं सार्वकामिकम् ।
कामदं तिलपिष्टोत्थं तुषोत्थं मारणे स्मृतम् ॥
भस्मोत्थमभदं प्रोक्तं गुडोत्थं प्रीतिवर्द्धनम् ।
गन्धोत्थं गुणदं भूरि शर्करोत्थं सुखप्रदम् ॥
वंशाङ्कुरोत्थं वंशार्थे गोमयं सर्वरोगहम् ।
केशास्थिसम्भवं लिङ्गं सर्वशत्रुविनाशनम् ॥
स्तम्भने रजनीपिष्टसम्भवं लिङ्गमुत्तमम् ।
रजनी हरिद्रा ।
तण्डुलोद्भवपिष्टस्य लिङ्गं सारस्वतप्रदम् ॥
दधिदुग्धोद्भवं लिङ्गं कीर्तिलक्ष्मीसुखप्रदम् ।
धान्यजं धान्यदं लिङ्गं फलोत्थं फलकृद्भवेत् ॥
पुष्पोत्थं दिव्यभोगाय मुक्त्यै धातृफलोद्भवम् ।
नवनीतोद्भवं लिङ्गं कीर्तिसौभाग्यवर्द्धनम् ॥
दूर्वागुडूचीसम्भूतमपमृत्युनिवारणम् ।

प्लक्षवृक्षोद्भवं लिङ्गं स्मृतमुच्चाटने परम् ॥
ज्वरशान्त्यै चन्दनजमर्चयेद्विधिवत्सदा ॥
कर्पूरसम्भवं लिङ्गं शान्तिकामोऽर्चयेत्सदा ।
कस्तूरीसम्भवं लिङ्गं धनिको हि प्रपूजयेत् ॥
लिङ्गं गोरोचनोत्थं तु रूपकामस्तु पूजयेत् ।
कान्तिकामस्तु सततं लिङ्गं कुङ्कुमकेसरम् ।
श्वेतागरुसमुद्भूतं महाबुद्धिविवर्द्धनम् ॥
धारणाशक्तिदं लिङ्गं कृष्णागरुसमुद्भवम् ।
यक्षकर्दमसम्भूतं लिङ्गं प्रीतिविवर्द्धनम् ॥
गोधूमपिष्टजं लिङ्गं गोकामो नित्यमर्चयेत् ।
मुद्गपिष्टमयं लिङ्गं पूजयन्मुदमाप्नुयात् ॥
माषपिष्टमयं लिङ्गं नित्यमिष्टान्नसिद्धिदम् ।
चणकोद्भवपिष्टस्य लिङ्गं शुद्धिविवर्द्धनम् ॥
आढकीपिष्टजं लिङ्गं रतिसौख्यविवर्द्धनम् ।
लिङ्गं व्रीहिमयं पूज्यं वर्चस्कामेन नित्यशः ॥
यवधान्यमयं लिङ्गं यमलोकनिवारणम् ।
प्रियङ्गुपिष्टजं लिङ्गं प्रियदं सर्वदेहिनाम् ॥
नीवारपिष्टजं लिङ्गं सर्वारिष्टनिवारणम् ।
यः करोति तिलैः श्वेतैः श्वेतद्वीपे महीयते ॥
यः कृष्णैश्च तिलैः सम्यक् लिङ्गं कृत्वार्चयेन्नरः ।
सर्वपापविनिर्मुक्तो याति माहेश्वरं पदम् ।
मधुपुष्पोद्भवं लिङ्गं वसन्ते पूजयेन्नरः ।
यः कामेष्वप्रियो नित्यं भवेत्स्त्रीणां च मानवः ।
ग्रीष्मे च मल्लिकापुष्पसम्भवं लिङ्गमुत्तमम् ।
पूजयित्वा नरो भक्त्या प्राप्नोति महतीं कृषिम् ॥

वर्षासु पूजयेद्भक्त्या लिङ्गं कनकपुष्पजम् ।
कनकपुष्पजं चम्पककिंशुकधत्तूरकाञ्चनारपुष्पनिर्मितम् ।
इह चामुष्मिके लोके सुखी भवति मानवः ।
नीलोत्पलमयं लिङ्गं ज्ञात्वा शरदि मानवः ॥
पूजयन् परमां सिद्धिं भक्त्या प्राप्नोति मानवः ।
हेमन्ते जातिकुसुमैर्लिङ्गं कृत्वा मनोहरम् ॥
भक्त्या समर्च्य मतिमान् शिवेन सह मोदते ।
शिशिरे सर्वपुष्पोत्थं लिङ्गमभ्यर्च्य मानवः ॥
सर्वपापं विहायाशु मोदते ब्रह्मणा सह ।
येन केन प्रकारेण यस्य कस्यापि वस्तुनः ॥
कृत्वा लिङ्गं समभ्यर्च्य गाणपत्यमवाप्नुयात् । इति ।
पूर्वोक्तसर्वलिङ्गपूजने तारतम्यमपि श्रूयते—
तत्रैव,
पाषाणात्स्फाटिकं श्रेष्ठं स्फाटिकात्पद्मरागजम् ।
पद्मरागात्तु काश्मीरं काश्मीरात्पुष्परागजम् ॥
इन्द्रनीलं पुष्परागादिन्द्रनीलाच्च गोमदम् ॥
गोमदाद्विद्रुमं श्रेष्ठं विद्रुमान्मौक्तिकं वरम् ।
मौक्तिकाद्राजतं श्रेष्ठं सौवर्णं राजताद्वरम् ॥
सौवर्णाद्धीरकं श्रेष्ठं हीरकात्पारदं परम् ।
पारदाद्घाणजं श्रेष्ठं तस्मात् श्रेष्ठं न विद्यते ॥
सर्वतीर्थानि यज्ञाश्च साङ्गा वेदव्रतानि च ।
सुरसङ्घा योगिनश्च बाणलिङ्गे व्यवस्थिताः ।
तदर्च्य विधिवद्भक्त्या शिवलोके महीयते ॥
बाणे च राजते रत्ने स्फाटिके हेमसम्भवे ।
काश्मीरे चन्द्रकान्ते च लिङ्गे स्वायम्भुवे तथा ॥

सदा सन्निहितो देवः शर्वः सत्यादिलक्षणः।
विद्यतेऽहर्निशं यस्मात्तस्मात्पूज्यानि नित्यशः॥ इति।

उक्तलिङ्गेषु कलौ क्षिप्रफलदं नानाविधकामनया पार्थिवलिङ्गमेव पूज्यम्। तदप्युक्तम्—

शिवनारदसंवादे,

उक्तेष्वेतेषु लिङ्गेषु लिङ्गमेकं समाश्रयेत्।
तत्रापि पार्थिवं लिङ्गं क्षिप्रं सिद्धिप्रदं भवेत्॥
पार्थिवेन तु लिङ्गेन बहवः सिद्धिमागताः।
देवासुरमनुष्याश्च गन्धर्वोरगराक्षसाः॥
कृते रत्नमयं लिङ्गं त्रेतायां हेमसम्भवम्।
द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे॥
अष्टमूर्तिषु सर्वासु मूर्तिर्वै पार्थिवी परा।
एवं पार्थिवलिङ्गं तु लिङ्गेष्वन्येषु विद्यते॥
यथा सर्वेषु देवेषु श्रेष्ठः किल महेश्वरः।
एवं सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते॥
यथा नदीषु सर्वासु ज्येष्ठा गङ्गा सरिद्वरा।
तथा सर्वेषु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते॥ इति।

अत्रैव कामनाभेदेन पूजने पार्थिवलिङ्गसङ्ख्यापि स्मर्यते।

ईश्वर उवाच।

मुने सर्वप्रयत्नेन पार्थिवं लिङ्गमुत्तमम्।
कर्त्तव्यं हि नृभिर्नित्यं कार्यमुद्दिश्य यत्नतः॥
सङ्ख्या पार्थिवलिङ्गानां यथाकामं निगद्यते।
मृल्लिङ्गं पार्थिवं लक्षं भुक्तिमुक्तिकरं परम्॥
देशं कालं कुलं ज्ञात्वा कुर्यालिङ्गं फलप्रदम्।
न करोति यदा ज्ञात्वा न कार्यं तस्य सिध्यति॥

विद्यार्थी लिङ्गसाहस्रं धनार्थी च तदर्धकम् ।
पुत्रार्थी सार्द्धसाहस्रं कन्यार्थी च शतत्रयम् ॥
विद्वान् लिङ्गायुतं कुर्यात्सर्वपापहरं परम् ॥
राज्यार्थी शतसाहस्रं कान्तार्थी शतपञ्चकम् ।
मोक्षार्थी कोटिगुणितं भूकामश्च सहस्रकम् ॥
रूपार्थी त्रिसहस्रं तु तीर्थार्थी द्विसहस्रकम् ।
सुहृत्कामः सहस्रं तु वस्त्रार्थी शतमष्टकम् ।
मारणार्थी सप्तशतं मोहनार्थी शताष्टकम् ॥
उच्चाटनपरश्चैव सहस्रं च यथोक्ततः ।
स्तम्भने च सहस्रं तु जारणे च तदर्धकम् ॥
निगडान्मुक्तिकामस्य सहस्रं सार्द्धमीरितम् ।
महाराजभये पञ्चशतं चौरादिसङ्कटे ॥
शतद्वयं तु डाकिन्या भये पञ्चशतं परम् ।
दरिद्रः पञ्चसाहस्रमयुतं सर्वकामदम् ।
एकं पापहरं प्रोक्तं द्विलिङ्गं चार्थसिद्धिदम् ॥
त्रिलिङ्गं सर्वकामानां कारणं परमीरितम् ।
उत्तरोत्तरमेवं स्यात्पूर्वोक्तगणनावधि ॥ इति ।

ग्रन्थान्तरे,

लिङ्गानामयुतं कृत्वा महाराजभयं हरेत् ।
सहस्रमेकं लिङ्गानां व्याधीनां तु भयं हरेत् ॥
सहस्राणि तथा पञ्च निगडान्मुक्तये ध्रुवम् ।
कारागृहविमुक्त्यर्थमयुतं कारयेद्बुधः ॥
डाकिन्यादिभये सप्तसहस्रं कारयेत्तथा ।
सहस्राणां च पञ्चाशदपुत्रो हि प्रकारयेत् ॥
लिङ्गानामयुतेनैव कन्यका सन्ततिं लभेत् ॥

एकलिङ्गार्चनेनैव ह्यतुलां श्रियमाप्नुयात् ।
लक्षमेकं तु लिङ्गानां यः करोति नरो भुवि ॥
शिव एव भवेत्सोऽपि नात्र कार्या विचारणा । इति ।

इति लिङ्गफलम् ।

अथ शिवलिङ्गनैवेद्यभक्ष्याभक्ष्यविचारः ।

पद्मपुराणे,

द्रव्यमन्नं फलं तोयं शिवस्य न स्पृशेत्क्वचित् ।
लङ्घयेन्नैव निर्माल्यं कूपे सर्वं विनिःक्षिपेत् ॥
मक्षिकापादमात्रं यः शिवान्नमुपजीवति ।
लोभान्मोहात्स पच्येत कल्पान्ते नरके नरः ॥ इति ।

पाद्मस्कान्दब्रह्मपुराणसङ्ग्रहेषु,

शिव उवाच ।

अनर्हं मम नैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलालग्नं सर्वं याति पवित्रताम् ॥
नैवेद्यं मे नरो भुक्त्वा शुद्ध्यै चान्द्रायणं चरेत् । इति ।

शालग्रामशिलालग्नमित्यस्यार्थः पूर्वमेव शालग्रामशिलालक्षणप्रकरणे नैवेद्यप्रस्तावे प्रपञ्चितः । क्वचिच्छिवलिङ्गनैवेद्यभक्षणे दोषाभावोऽपि । तदुक्तम्—

शिवनारदसंवादे,

बाणलिङ्गे न चण्डांशो न च निर्माल्यकल्पना ।
सर्वं बाणार्पितं ग्राह्यं भक्त्या भक्तैश्च नान्यथा ॥
ग्राह्याग्राह्यविचारोऽयं बाणलिङ्गे न विद्यते ।
तदर्पितं जलं चान्नं ग्राह्यं प्रासादसंज्ञया ॥
बाणलिङ्गे स्वयम्भूते चन्द्रकान्ते हृदि स्थिते ।

चान्द्रायणसमं ज्ञेयं शम्भोर्नैवेद्यभक्षणम् ॥ इति ।
निर्माल्यकल्पना चोक्ता—
सिद्धान्तशेखरे,
धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् ।
विहाय शेषं निर्माल्यं चण्डांशाय निवेदयेत् ॥
अन्यदन्नादिपानीयं ताम्बूलं गन्धपुष्पकम् ।
दद्याच्चण्डाय निर्माल्यं शिवभुक्तं तु सर्वशः ॥ इति ।
भविष्यपुराणे,
ज्योतिर्लिङ्गं विना लिङ्गं यः पूजयति सत्तमः ।
तस्य नैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम् ॥
शालग्रामोद्भवे लिङ्गे बाणलिङ्गे स्वयम्भुवि ।
रसलिङ्गे तथार्षे च सुरसिद्धप्रतिष्ठिते ॥
हृदये चन्द्रकान्ते च स्वर्णरूप्यादिनिर्मिते ।
शिवदीक्षावता भक्तेनेदं भक्ष्यमितीर्यते ॥ इति ।
स्वर्णरूप्यादीत्यत्रादिना ताम्रादिधातुमयलिङ्गं गृह्यते ।
तथा हनुमन्तं प्रति शम्भुः,
बाणलिङ्गे स्वयम्भूते चन्द्रकान्ते हृदि स्थिते ।
चान्द्रायणसमं ज्ञेयं शम्भोर्नैवेद्यभक्षणम् ॥
लिङ्गे स्वयम्भवे बाणे रत्नजे रसनिर्मिते ।
सिद्धप्रतिष्ठिते चैव न चण्डाधिकृतिर्भवेत् ॥
यत्र चण्डाधिकारोऽस्ति न भोक्तव्यं च मानवैः ।
चण्डाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः ॥ इति ।
यच्च पुरुषार्थप्रबोधे शिववचनम्—
किं दीक्षया किं तपसा किं ध्यानेन जपेन किम् ।
शृणु देवि वरारोहे मद्भुक्तं यदि भुज्यते ॥ इति ।

तदपि बाणादिलिङ्गार्पितनैवेद्यविषयमिति। बाणलिङ्गादिषु शम्भोर्नैवेद्यभक्षणे न दोष इति वदता तत्तीर्थमाल्यधारणमप्यभ्यनुज्ञातम्। श्रीविश्वनाथतीर्थादिधारणं तु कर्त्तव्यमेव। तथा च—

स्कान्दे काशीखण्डे,

जलस्य धारणं मूर्ध्नि विश्वेशस्नानजन्मनः।

इत्युपक्रम्योक्तम्—

स्नापयित्वा विधानेन यो लिङ्गस्नापनोदकम्।
त्रिः पिबेत्त्रिविधं पापं तस्येहाशु विनश्यति॥
लिङ्गस्नपनवार्भिर्यः कुर्यान्मूर्धाभिषेचनम्।
गङ्गास्नानफलं तस्य जायतेऽत्र विपाप्मनः॥ इति।

यथा रत्नेश्वरोपाख्याने,

श्रद्धावता स्वभक्तानामुपसर्गे महत्यपि।
नोपायान्तरमस्त्येवं विनेशचरणोदकम्॥
ये व्याधयो हि दुःसाध्या बहिरन्तः शरीरिणाम्।
श्रद्धयेशोदकस्पर्शात्ते नश्यन्त्येव नान्यथा॥ इति।

ज्योतिर्लिङ्गं विना लिङ्गमिति पूर्वोदाहृतभविष्यवचनाच्चेति।

इति शिवलिङ्गनैवेद्यादिभक्ष्याभक्ष्यविचारः।

अथ प्रसङ्गादन्यदपि किञ्चिदुच्यते। पाराशरमाधवीये—

नन्दिकेश्वरः,

यः प्रदद्याद्वा लक्षं दोग्ध्रीणां वेदपारगे।
एकाहमर्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकम्॥
सकृत्पूजयते यस्तु भगवन्तमुमापतिम्।
अस्याश्वमेधादधिकं फलं भवति नान्यथा॥ इति।

व्यासः,

सहस्रकलशैरद्भिरभिषेकं करोति यः।

शिवाय विधिवन्मन्त्रैश्चिरजीवी भवेन्नरः ॥ इति ।

विष्णुधर्म्मोत्तरे,

प्रायश्चित्तविहीनानि पापानि शृणु भूपते ।
समस्तपापतुल्यानि महानरकदानि वै ॥
यः शूद्रेणार्चितं लिङ्गं विष्णुं वा प्रणमेन्नरः ।
न तस्य निष्कृतिर्भूप प्रायश्चित्तायुतैरपि ॥
नमेद्यः शूद्रसंस्पृष्टं लिङ्गं वा हरिमेव वा ।
स सर्वयातनाभोगी यावदाचन्द्रतारकम् ॥
योषिद्भिः पूजितं लिङ्गं विष्णुं वापि नमेत्तु यः ।
स कोटिकुलसंयुक्त आकल्पं रौरवं व्रजेत् ॥
पाखण्डपूजितं लिङ्गं नत्वा पाखण्डतां व्रजेत् ।
आभीरपूजितं लिङ्गं विष्णुं वापि नरेश्वर ॥
नमन्तं नाशयाम्येव किमन्यैर्बहुभाषितैः ।
शूद्रो वाऽनुपनीतो वा स्त्री वापि पतितोऽपि वा ॥
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते । इति ।

एतत्सर्वमिदानीन्तनप्रतिष्ठितलिङ्गादिविषयम् । न तु पुराणप्रसिद्धमाहिमलिङ्गादिविषयम् ।

यदा प्रतिष्ठितं लिङ्गं मन्त्रविद्भिर्यथाविधि ।
तदाप्रभृति शूद्रश्च योषिद्वापि न संस्पृशेत् ॥

इति तत्रैवोक्तत्वात् । अत एव—

स्कान्दे काशीखण्डे लिङ्गानि प्रकृत्योक्तम्,

अदृश्यान्यपि दृश्यानि दुःखस्थान्यपि च प्रिये ।
भग्नान्यपि च कालेन तानि पूज्यानि सुन्दरि ॥ इति ।

दुःखस्थान्यस्पृश्यस्पृष्टानि । तथान्योऽपि विशेषः—.

तत्रैव,

स्त्रीणामनुपनीतानां शूद्राणां च नरेश्वर ।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च ॥
यः शूद्रसंस्कृतं लिङ्गं विष्णुं वापि नमेन्नरः ।
इहैवात्यन्तदुःखानि पश्यत्यामुष्मिके किमु ॥
शूद्रो वानुपनीतो वा स्त्री वापि पतितोऽपि वा ।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ॥ इति ।

सिद्धान्तशेखरे,

प्रतिष्ठां शिवलिङ्गस्य वक्ष्ये नानागमोदिताम् ।
आचार्यैरुपदिष्टां च समासेन यथामति ॥
पञ्चधा या शिवेनोक्ता प्रतिष्ठा स्थापनं ततः ।
स्थितस्थापनमित्येतत्त्रयमव्यक्तलिङ्गकम् ॥
आस्थापनं तु सुव्यक्ते जीर्णे तूत्थापनं मतम् ।
लिङ्गब्रह्मशिलायोगः प्रतिष्ठा मन्त्रसंस्कृतः ॥
लिङ्गं बाणादिकं कृत्वा सप्तधा पञ्चधा त्रिधा ।
द्विधा वारोप्यते पीठे यत्र स्थापनमुच्यते ॥
अभिन्नपिण्डकं लिङ्गं रत्नं वा लोहजादिकम् ।
त्रिधा संस्क्रियते मन्त्रैस्तत् स्थितस्थापनं मतम् ॥
व्यक्तलिङ्गस्य पीठस्य यो योगः क्रियते नृभिः ।
आस्थापनं तदुद्दिष्टं विष्णुादिप्रतिमास्वपि ॥
जीर्णादिदोषदुष्टं यल्लिङ्गं वा प्रतिमापि वा ।
उद्धृत्य स्थापितं यत्र तदुत्थापनमुच्यते ॥
एवं पञ्चविधा प्रोक्ता प्रतिष्ठा शिवशासनात् । इति ।

वायवीयसंहितायाम्,

अत्यन्तोपहतं लिङ्गं विशोध्य स्थापयेत्पुनः ।
सम्प्रोक्षयेदुपहतं मनागुपहितं यजेत् ॥

लिङ्गानि बाणसंज्ञानि स्थापनीयानि यानि वा ।
तानि पूर्वं शिवेनैव संस्कृतानि यतस्ततः ॥
संस्तुतानीति पाठान्तरम् ।
रौद्राणि स्थापनीयानि यानि दृष्टानि बाणवत् ।
स्वयमुद्भूतलिङ्गे च दिव्ये चार्षे तथैवच ॥
अपीठे पीठमावेश्य कृत्वा सम्प्रोक्षणं विधिम् ।
यजेत्तत्र शिवं तेषां प्रतिष्ठा नावसीयते ॥
दग्धं श्लथं क्षताङ्गं च क्षिप्तेलिङ्गं जलाशये ।
सन्धानयोग्यं सन्धाय प्रतिष्ठादिकमाचरेत् ॥
वेराद्वा विकलाल्लिङ्गादेवं पूजापुरःसरम् ।
उद्धास्य हृदि सन्धानं त्यागं वाप्युक्तमाचरेत् ॥ इति ।
वेरः काश्मीरम् । तथा–
त्रिविक्रम्यां च,
स्पृष्टे सति तु लिङ्गे च वेरे मर्त्यप्रतिष्ठिते ।
पुनः प्रतिष्ठां कृत्वेशं पूजयेत्तत्र पण्डितः ॥
पुनः प्रतिष्ठां यो मोहादकृत्वा तत्र शङ्करम् ।
पूजयेत्तत्र शास्त्रेषु निष्कृतिर्नैव दृश्यते ॥
स्पृष्टे लिङ्गे च वेरे वा शूद्राद्यैरप्रतिष्ठिते ।
रुद्राभिषेकतो धीमान् विशोध्यात्र समर्चयेत् ॥ इति ।
सिद्धान्तशेखरे,
लिङ्गादीनां च जीर्णानां प्रोच्यते विधिरुद्धृतौ ।
सर्वारिष्टविनाशार्थं सर्वप्राणिहितार्थकम् ॥
लिङ्गस्य पिण्डिकायाश्च प्रतिमामुखलिङ्गयोः ।
सर्वेषां परिवाराणां हर्म्यप्राकारयोस्तथा ॥
उद्धारश्चोद्धृतिः प्रोक्ता चोद्धारे हेतुरुच्यते ।

स्फुटिते खण्डिते भिन्ने दग्धे वाऽशनिनाग्निना ॥
उन्मत्तैः शत्रुभिश्चौरैः करिणा स्रोतसा हृते।
लिङ्गे पीठादिके वापि विशीर्णे कालपर्ययात् ॥
देहं जीर्णं यथा देही त्यक्त्वान्यदुपगच्छति।
लिङ्गादीनि तु जीर्णानि तथा मुञ्चन्ति देवताः ॥
ततः प्रेताश्च वेताला जीर्णं दृष्ट्वा श्रयन्ति च।
लिङ्गाद्यं सत्त्वशून्यत्वात्तथा च ब्रह्मराक्षसाः ॥
कर्त्तुर्नृपाणां राष्ट्रस्य तद्ग्रामस्य विशेषतः।
पीडां कुर्वन्ति तेऽत्युग्रां दुर्भिक्षमरणादिकाम् ॥
तस्मात्सर्वप्रयत्नेन कुर्यादुद्धरणक्रियाम्।
स्वायम्भुवे च दैवे च बाणे च गणलिङ्गके ॥
ऋषिभिश्चासुरैर्देवैस्तत्त्वविद्भिः प्रतिष्ठिते।
लिङ्गे जीर्णादिदुष्टेऽपि नोद्धारं तत्र कारयेत् ॥
स्वायम्भुवादिलिङ्गानां जीर्णपीठं परित्यजेत्।
उक्तैर्जीर्णादिभिर्दुष्टं मानुषं तु परित्यजेत् ॥
दिग्गूढं पतितं स्थानात्प्रभ्रष्टं स्रोतसा हृतम्।
अग्निपुराणे तु दिग्मूढमिति पाठः।
चौराद्यैश्चलितं लिङ्गं स्थापयेन्निर्व्रणं पुनः ॥
यदि तल्लिङ्गं निर्व्रणं भवेत्तदा तदेव पुनः स्थापयेत्। अग्निपुराणे तु स्पष्टमेवाभिहितम्—
एवंविधं च संस्थाप्यं निर्व्रणं च भवेद्यदि। इति।
लोहाढ्यं छिन्नभिन्नाङ्गं सन्धाय स्थापयेत्पुनः।
बाहुपादशिरोहीनां कर्णनासास्यहीनिकाम् ॥
तादृशीं परिवाराणां प्रतिमां परिवर्जयेत्।
यद्द्रव्यं यत्प्रमाणं च लिङ्गं वा प्रतिमापि वा ॥

लिङ्गानि [illegible]ने स्थापनीयानि यानि वा ।
तानि पूर्वं शिवेनैव संस्कृतानि यतस्ततः ॥
संस्कृतादीति पाठान्तरम् ।
रौद्राणि स्थापनीयानि यानि दृष्टानि बाणवत् ।
स्वयमुद्भूतलिङ्गे च दिव्ये चार्षे तथैवच ॥
अपीठे पीठमावेश्य कृत्वा सम्प्रोक्षणं विधिम् ।
यजेत्तत्र शिवं तेषां प्रतिष्ठा नावसीयते ॥
दग्धं श्लथं क्षताङ्गं च क्षिप्तेलिङ्गं जलाशये ।
सन्धानयोग्यं सन्धाय प्रतिष्ठादिकमाचरेत् ॥
वेराद्वा विकलालिङ्गादेवं पूजापुरःसरम् ।
उद्वास्य हृदि सन्धानं त्यागं वाप्युक्तमाचरेत् ॥ इति ।
वेरः काश्मीरम् । तथा—
त्रिविक्रम्यां च,
स्पृष्टे सति तु लिङ्गे च वेरे मर्त्यप्रतिष्ठिते ।
पुनः प्रतिष्ठां कृत्वेशं पूजयेत्तत्र पण्डितः ॥
पुनः प्रतिष्ठां यो मोहादकृत्वा तत्र शङ्करम् ।
पूजयेत्तत्र शास्त्रेषु निष्कृतिर्नैव दृश्यते ॥
स्पृष्टे लिङ्गे च वेरे वा शूद्राद्यैरप्रतिष्ठिते ।
रुद्राभिषेकतो धीमान् विशोध्यात्र समर्चयेत् ॥ इति ।
सिद्धान्तशेखरे,
लिङ्गादीनां च जीर्णानां प्रोच्यते विधिरुद्धृतौ ।
सर्वारिष्टविनाशार्थं सर्वप्राणिहितार्थकम् ॥
लिङ्गस्य पिण्डिकायाश्च प्रतिमामुखलिङ्गयोः ।
सर्वेषां परिवाराणां हर्म्यप्राकारयोस्तथा ॥
उद्धारश्चोद्धृतिः प्रोक्ता चोद्धारे हेतुरुच्यते ।

स्फुटिते खण्डिते भिन्ने दग्धे वाऽशनिनाग्निना ॥
उन्मत्तैः शत्रुभिश्चौरैः करिणा स्रोतसा हृते।
लिङ्गे पीठादिके वापि विशीर्णे कालपर्ययात् ॥
देहं जीर्णं यथा देही त्यक्त्वान्यदुपगच्छति।
लिङ्गादीनि तु जीर्णानि तथा मुञ्चन्ति देवताः ॥
ततः प्रेताश्च वेताला जीर्णं दृष्ट्वा श्रयन्ति च।
लिङ्गाद्यं सत्त्वशून्यत्वात्तथा च ब्रह्मराक्षसाः ॥
कर्त्तुर्नृपाणां राष्ट्रस्य तद्ग्रामस्य विशेषतः।
पीडां कुर्वन्ति तेऽत्युग्रां दुर्भिक्षमरणादिकाम् ॥
तस्मात्सर्वप्रयत्नेन कुर्यादुद्धरणक्रियाम्।
स्वायम्भुवे च दैवे च बाणे च गणलिङ्गके ॥
ऋषिभिश्चासुरैर्देवैस्तत्त्वविद्भिः प्रतिष्ठिते।
लिङ्गे जीर्णादिदुष्टेऽपि नोद्धारं तत्र कारयेत् ॥
स्वायम्भुवादिलिङ्गानां जीर्णपीठं परित्यजेत्।
उक्तैर्जीर्णादिभिर्दुष्टं मानुषं तु परित्यजेत् ॥
दिग्गूढं पतितं स्थानात्प्रभ्रष्टं स्रोतसा हृतम्।
आग्नेयपुराणे तु दिग्मूढमिति पाठः।
चौराद्यैश्चलितं लिङ्गं स्थापयेन्निर्व्रणं पुनः ॥
यदि तल्लिङ्गं निर्व्रणं भवेत्तदा तदेव पुनः स्थापयेत्। अग्निपुराणे तु स्पष्टमेवाभिहितम्—
एवंविधं च संस्थाप्यं निर्व्रणं च भवेद्यदि। इति।
लोहाढ्यं छिन्नभिन्नाङ्गं सन्धाय स्थापयेत्पुनः।
बाहुपादशिरोहीनां कर्णनासास्यहीनिकाम् ॥
तादृशीं परिवाराणां प्रतिमां परिवर्जयेत्।
यद्द्रव्यं यत्प्रमाणं च लिङ्गं वा प्रतिमापि वा ॥

त्यक्तं तत्तेन मानेन तद्द्रव्येण प्रकल्पयेत् ।
कारयेन्नान्यमानेन नान्यद्रव्येण तद्बुधः ॥
नान्याकारं च नान्यत्र स्थापयेत्तद्गुरूत्तमः ।
स्रोतसापहृते लिङ्गे प्रासादे वा तदन्यतः ॥
तत्समीपगते देशे स्थापयेद्बाधवर्जिते ।
प्राकारे पतिते हर्म्ये गोपुरे मण्डपादिके ॥
तदाकारं च तद्द्रव्यं तन्मानं तत्र कारयेत् ।
कर्मयोग्याः शिला ग्राह्या दृढकाश्च तथाविधाः ॥
हीनद्रव्यकृतं हर्म्यं श्रेष्ठैर्द्रव्यैः समाचरेत् ।
हीनं वाप्यधिकं मानं प्राकारं वा न कारयेत् ॥
एवमुक्तेन मार्गेण दोषैरुक्तैर्विचार्य च ।
लिङ्गपीठादिकं जीर्णं तदुद्धारं तदाचरेत् ॥
विधिनक्षत्रवारादींस्तदर्थं न विचारयेत् ।
जीर्णं चोद्धारयेज्जीर्णमजीर्णं रक्षयेद्बुधः ॥ इति ।

अग्निपुराणे,

सुस्थितं दुःस्थितं वापि शिवलिङ्गं न चालयेत् ।
शतेन स्थापनं कुर्यात्सहस्रेण तु चालनम् ॥ इति ।

सुस्थितदुःस्थितलक्षणमपि तत्रैवोक्तम्—

पूजादिभिश्च संयुक्तं जीर्णाद्यमपि सुस्थितम् ।
पूजया रहितं यत्तददुष्टमपि दुःस्थितम् ॥ इति ।

अदुष्टमजीर्णम् ।

हीनं पूजादिभिर्लिङ्गमजीर्णमपि दुःस्थितम्—

इति सिद्धान्तशेखरे उक्तत्वात् । अजीर्णं दृढमनेककाल-स्थितियोग्यमित्यर्थः । दुःस्थितविषये तत्रैव विशेषः ।

दिग्मूढं स्थापितं लिङ्गं मोहान्निम्नत्वमागतम् ।

तल्लिङ्गं दुस्थितं वापि तन्त्रज्ञैरिति निश्चितम् ॥
शतेन स्थापनं कुर्यात्सहस्रेण तु चालनम् । इति ।
अस्य चार्थः सिद्धान्तशेखरे उक्तः—
सहस्राधिकहोमेन तस्य चालनमीप्सितम् ।
स्थापनं शतहोमेन तस्य लिङ्गस्य चोदितम् ॥ इति ।
अतिजीर्णं लिङ्गं स्याच्चेत्तदा तज्जले निक्षिप्य तत्रान्यल्लिङ्गं-स्थापयेत् । एतद्विधिश्च—
अग्निपुराणे उक्तः—
विसृज्य स्वर्णपाशेन वृषस्कन्धस्थया तथा ।
रज्ज्वा बद्धा तया नीत्वा शैवं मन्त्रं गृणन् शनैः ॥
तज्जले निःक्षिपेन्मन्त्री पुष्ट्यर्थं जुहुयाच्च तम् ।
तृप्तये दिक्पतीनां च वास्तुशुद्ध्यै शतं शतम् ॥
रक्षां विधाय तद्वाम्नि महापाशुपतास्त्रतः ।
लिङ्गमन्यत्ततस्तत्र विधिवत्स्थापयेद्गुरुः ॥ इति ।

इति लिङ्गलक्षणप्रकरणम् ।

अथ प्रकीर्णलक्षणप्रकरणम् ।

इह पूर्वं शालग्रामशिवलिङ्गादिमूर्त्तिपूजा कर्त्तव्येत्युक्तम् । तत्र वैखानसाद्यागमोक्तदीक्षावद्भिर्वैष्णवैः शालग्रामादिविष्णुमूर्तिपूजा कर्त्तव्या, शिवागमोक्तदीक्षावद्भिः शिवभक्तैस्तु लिङ्गादिपूजा कर्त्तव्येति विवेकः । तत्र तत्र दीक्षादौ गुरोरावश्यकत्वात्कीदृग्लक्षणो गुरुः कर्त्तव्य इति तल्लक्षणमुच्यते ।
रामार्चनचन्द्रिकायाम्,
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेषवान् ।

शुद्धाचारः सुप्रसिद्धः शुचिर्दक्षः सुबुद्धिमान् ॥
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविचक्षणः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥ इति ।

मन्त्रमुक्तावल्याम्,

अन्नदातान्वये शुद्धः स्वोचिताचारतत्परः ।
आश्रमी वेदवित्क्रोधरहितः सर्वशास्त्रवित् ॥
श्रद्धावाननसूयश्च प्रियवाक् प्रियदर्शनः ।
शुचिः सुवेशस्तरुणः सर्वभूतसमानधीः ॥

तरुण इत्यनेन अतिवृद्ध इन्द्रियविकलोऽप्रौढो बालश्च निषिध्यते । न तु तरुणो यौवनाक्रान्तोऽभिधीयते ।

हीनाङ्गमधिकाङ्गं च खल्वाटं दन्तुरं कृशम् ।
खल्वाटमूर्ध्वकेशम् ।
अतिबालं च वृद्धं च खञ्जं गौडोद्भवं तथा ।
कार्णाटकं च कालिङ्गं कामरूपं विवर्जयेत् ॥

इति तत्र शेखरवचनात् ।

धीमाननुद्धतमतिः पूर्णो ऽहन्ता विमर्शकः ।

पूर्णः मन्त्रकलापेतिकर्त्तव्यताद्यागमज्ञानवान् । अहन्ता जीवाहिंसकः । विमर्शको विचारवान् ।

स्वगुणाचारकृतधीः कृतज्ञः शिष्यवत्सलः ।
निग्रहानुग्रहे दक्षो महामन्त्रपरायणः ॥

महामन्त्रपरायण इति पदेन क्षुद्रविद्योपासनया क्षुद्रदेवताभक्तिरहितः प्रतीयते ।

ऊहापोहप्रकारार्हः शुद्धायश्च कृपालयः ।

---

१ शङ्खवचनादिति द्वि० पु० पाठः ।

शुद्धः आयः द्रव्यागमो यस्य सः तथोक्तः। असत्प्रतिग्रहान्यायोपार्जितद्रव्यविवर्जित इत्यर्थः।

इत्यादिलक्षणैर्युक्तो गुरुः स्याद्गरिमालयः॥ इति।

गरिमा गुरुत्वम्।

सिद्धान्तशेखरे तु विशेषः।

आर्यावर्त्तसमुद्भूतो गुरुः श्रेष्ठः प्रकीर्तितः।
अथ वा स्वेच्छया यत्र चरन्ति श्यामलाः मृगाः॥
तं देशमुत्तमं प्राहुस्तद्देशीयो गुरुर्वरः।
ब्राह्मणः सर्ववर्णानां त्रयाणां क्षत्रियो गुरुः॥
द्वयोर्वैश्यो गुरुः श्रेष्ठः शूद्रो वर्णानुपूर्वतः।
गृहस्थः सर्ववर्णेषु श्रेष्ठो गुरुरुदाहृतः।
नैष्ठिकस्त्वधमो ज्ञेयो भौतिकस्तु ततोऽधमः॥

भौतिको भूत्या ऐश्वर्येण सम्पन्नः महाधनी इत्यर्थः।

वानप्रस्थयतीनां तु गुरुत्वं नेष्यते सदा।

इदं तु गृहस्थादिभिन्नाश्रमिविषयम्। एकाश्रमिविषये तु न दोषः।

गृहस्थानां गृहस्थो वै यतीनां तु यतिर्भवेत्।
भिन्नाश्रमी गुरुस्त्याज्यः सर्वसाधारणश्च यः॥

इति कल्पचिन्तामणौ अभिधानात्। अथ वा उक्तगुणोपेतगृहस्थसंज्ञावे निर्गुणयत्यादिविषयम्।

वर्णाश्रमक्रियानिष्ठो वेदविच्छास्त्रकोविदः।
मिताशी मितनिद्रश्च मितवाक् योगतत्परः॥
जितेन्द्रियो जितद्वन्द्वस्तपोदानदयापरः।
जितद्वन्द्वो जितशीतोष्णः।
स्थिरबुद्धिः स्थिरारम्भः क्षान्तः शान्तः प्रसन्नधीः॥

सत्यवागूर्जितप्रज्ञो मेधावी नियतः शुचिः ।
शक्तः कल्यो निस्पृहश्च सर्वभूतहितान्वितः ॥
कल्यो निरामयः ।
वास्तुशास्त्रकृताभ्यासः शल्योद्धारविचक्षणः ॥
नित्याधिकारकुशलो नैमित्तिकविचक्षणः ।
काम्याधिकारचतुरो दीक्षाकर्मणि कर्मठः ॥
मण्डले मण्डपे कुण्डे प्रासादे प्रतिमासु च ।
लिङ्गे पीठे शिलायां च परीक्षानिपुणाग्रणीः ॥
निग्रहानुग्रहे दक्षः सर्वदोषविवर्जितः ।
एवम्भूतो गुरुर्ज्ञेयो वरो दीक्षाप्रतिष्ठयोः ॥
वर्ज्योऽपि विशेषतस्तत्रैवोक्तः—
क्षयरोगी च दुश्चर्मा कुनखी श्यामदन्तकः ।
काणोऽन्धः कुसुमाक्षश्च खल्वाटः खञ्जरीटकः ॥
खञ्जरीटकः खञ्जः ।
अङ्गहीनोऽतिरिक्ताङ्गः पिङ्गाक्षः पूतिनासिकः ।
वृद्धाण्डो वामनः कुब्जः पङ्गुः श्वित्री नपुंसकः ॥
पूतिनासिकः दुर्गन्धिनासिकः । श्वित्री कुष्ठी ।
शिपिविष्टः कृशः स्थूलो दीर्घश्रोत्रो विवर्जितः ॥
त्रिकर्णो दन्तुरो वृद्धो बालो लम्बोदरान्वितः ।
शिपिविष्टः खल्वाटः सन् कृशः, स्थूलः ।
इत्याद्यैर्देहजैर्दोषैः संयुक्तो निन्दितो गुरुः ।
अकुलीनः कुदेशस्थः कुमातापितृसम्भवः ।
संस्काररहितो मूर्खो वेदशास्त्रविवर्जितः ॥
श्रौतस्मार्तक्रियाशून्यः पतितः शुष्कतार्किकः ।
पुरोधाः पण्यजीवी च नटो वैद्यश्च गायकः ॥

क्रूरो दम्भी मत्सरी च व्यसनी कृपणः खलः ।
कुसङ्गी नास्तिको भीरुर्महापातकदूषितः ॥
परिवित्तिरशक्तश्च परिवेत्ता च सेवकः ।
वानप्रस्थश्च संन्यासी पीनाङ्गो निन्दितान्नभुक् ॥
देशवर्णाश्रमाचाररहितः पारदारिकः ।
देवाग्निगुरुविद्यादिपूजाविधिपराङ्मुखः ॥
सन्ध्यातर्पणपूजादौ मन्त्रोहज्ञानवर्जितः ।
आलस्योपहतो भोगी धर्महीनस्तपश्च्युतः ॥
इत्याद्यैर्बहुभिर्दोषैरागमोक्तैश्च संयुतः ।
वर्जनीयो गुरुः प्राज्ञैर्दीक्षासु स्थापनादिषु ॥ इति ।

इति गुरुलक्षणम् ।

अथ शिष्यलक्षणम् ।

अमात्यदोषो राजानं भार्यादोषः पतिं यथा ।
तथा शिष्यकृतो दोषो गुरुं प्राप्नोत्यसंशयम् ॥
तस्माच्छिष्यं गुरुर्नित्यं परीक्षेत परिग्रहे ।

इति चूडामणिवचनात् गुरुणा शिष्योऽपि परीक्षणीय इति तल्लक्षणमुच्यते ।

शारदातिलके,

शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपरायणः ।
अधीतवेदः कुशलो दूरमुक्तमनोभवः ॥
हितैषी प्राणिनां नित्यमास्तिकस्त्यक्तनास्तिकः ।
स्वधर्मनिरतो भक्त्या पितृमातृहितोद्यतः ॥
वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः ।
एतादृशगुणोपेतः शिष्यो भवति नापरः ॥ इति ।

रामार्चनचन्द्रिकायाम्,
शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः ।
समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो धनी ॥
एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा । इति ।
मन्त्रमुक्तावल्याम्,
शिष्यः शुद्धान्वयः श्रीमान् विनीतः प्रियदर्शनः ।
सत्यवाक् पुण्यचरितः शुद्धधीर्दम्भवर्जितः ॥
कामक्रोधपरित्यागी रागी च गुरुपादयोः ।
देवताप्रवणः कायमनोवाग्भिर्दिवानिशम् ॥
नीरुजो निर्जिताशेषपातकः श्रद्धयान्वितः ।
द्विजदेवपितॄणां च नित्यमर्चापरायणः ॥
युवा विनियताशेषकरणः करुणालयः ।
परोपकारेषु हितः परार्थे विगतज्वरः ॥ इति ।
भैरवपद्मावतीकल्पे,
मन्त्राराधनशूरः पापविदूरो गुणेन गम्भीरः ।
मौनी महाभिमानी मन्त्री स्यादीदृशः पुरुषः ॥ इति ।
तन्त्रशेखरे,
शिष्यलक्षणमधिकृत्य ।
बहुप्रलापितां कामं क्रोधं लाभं च चापलम् ।
असत्यवादितां कुर्याद्गुरुणा न कदाचन ॥
शिवस्वरूपं जानीयाद्गुरुं मर्त्यं न भावयेत् ।
एतादृशगुणोपेतो नेतरो दुःखकृद्गुरोः ॥ इति ।
वर्ज्योऽपि शिष्यः—
श्रुतावुक्तः, विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधि-
ष्टेऽहमस्मि । असूयकायानृजवेऽयताय न मां ब्रूया अवीर्यवती

तथा स्याम्। इति। अयमर्थः। विद्या ब्राह्मणमाह मां गोपाय रक्ष तेऽहं शेवधिः निधिरस्मि। ननु कोऽसौ रक्षणप्रकारस्तमाह—असूयकाय ईर्ष्यायुक्ताय अनृजवे यः ऋजुर्न भवति तस्मै अयताय अपवित्राय मां न त्वं ब्रूयाः। एवंभूताय न वक्तव्यमित्यर्थः। एतावतैव मम रक्षणं भवति। अन्यथा उक्तवैपरीत्ये अहमवीर्यवती स्याम्।

भुवनेश्वरीकल्पे,

अयोग्याय न दातव्यो मन्त्रराजस्त्वयानघ।
अलसं मलिनं क्लिष्टं दम्भलोभसमन्वितम्॥
अन्यायेनार्जितद्रव्यं परदाररतं सदा।
भ्रष्टव्रतं कृष्टवृत्तिं पिशुनं दुष्टमानसम्॥
बह्वाशिनं क्रूरचेष्टमग्रगण्यं दुरात्मनाम्। इति।

चूडामणौ,

अन्यदेशागतं क्रूरं सुधूर्त्तमतिलोभितम्।
पाखण्डिनं विकर्मस्थं कुजातिं व्याधिपीडितम्॥
काश्मीरं कोङ्कणं चैव कार्णाटं करहाटकम्।
कौवेर्यकोशलं काणमेतान् यत्नेन वर्जयेत्॥
कौवेर्यकोशलम् उत्तरकोशलोद्भूतम्।
गृह्णीयाद्यदि तद्दोषः प्रायो गुरुमपि स्पृशेत्।
अमात्यदोषो राजानं भार्यादोषः पतिं यथा॥
तथा शिष्यकृतो दोषो गुरुं प्राप्नोत्यसंशयम्।
तस्माच्छिष्यं गुरुर्नित्यं परीक्षेव परिग्रहे॥ इति।

शिष्यपरीक्षाकालावधिरप्युक्तो—

रामार्चनचन्द्रिकायां सारसङ्ग्रहे च,

सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत्। इति।

वर्णभेदेन विशेष उक्तः—

शारदातिलके,

एकाब्देन भवेद्योग्यो ब्राह्मणोऽब्दद्वयान्नृपः ।
वैश्यो वर्षैस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरोः ॥
शुश्रूषुश्च परिग्राह्यो दीक्षायागव्रतादिषु ॥
एवं शिष्येणापि गुरुः परीक्षणीयः ।
गुरुं परीक्षयेच्छिष्यो बहुधा सर्वकर्मभिः ।
गुणैः पूर्वोदितैः सर्वैरागमज्ञानपूर्वकैः ॥

इति सिद्धान्तशेखरवचनात् ।

मन्त्रमुक्तावल्यामपि,

गुरुशिष्यलक्षणमुक्त्वा—

तयोर्वत्सरवासेन ज्ञातान्योन्यस्वभावयोः ।
गुरुता शिष्यता वापि नान्यथेति विनिश्चयः ॥

इत्युक्तत्वात् ।

इति शिष्यलक्षणम् ।

योगपट्टादीनां पदार्थानां पूजादावुपयोगात्तल्लक्षणान्युच्यन्ते ।

सिद्धान्तशेखरे,

त्रिविधं योगपट्टं स्यादाद्यं व्याघ्राजिनोद्भवम् ।
द्वितीयं मृगचर्माद्यं तृतीयं तन्तुनिर्मितम् ॥
चतुर्मात्रप्रविस्तारं दैर्घ्यं स्याद्यज्ञसूत्रवत् । इति ।

इति योगपट्टलक्षणम् ।

अथ कौपीनलक्षणम् ।

सिद्धान्तशेखरे,

एकहस्तप्रविस्तारं करद्वन्द्वसमायतम् ।

विलम्बिततृतीयांशं गुह्याच्छादनमीरितम् ॥ इति ।

इति कौपीनलक्षणम् ।

अथ कटितन्तुलक्षणम् ।

तत्रैव,

कार्पासमूत्रसम्भूतं त्रिगुणं त्रिगुणीकृतम् ।
तत्पुनस्त्रिगुणं चेति सप्तविंशतिसूत्रकम् ॥
प्रदक्षिणक्रमेणेति कटिसूत्रमुदाहृतम् । इति ।

इति कटिसूत्रलक्षणम् ।

अथ यज्ञोपवीतलक्षणम् ।

तत्रैव,

यज्ञसूत्रमथो वक्ष्ये सूत्रं कार्पासनिर्मितम् ।
सुश्लक्ष्णं सुसितं सूक्ष्मं समं ग्रन्थ्यादिवर्जितम् ॥
वेष्टयेद्वक्षहस्तस्य चतुरङ्गुलिमध्यतः ।
समं तथा षण्णवतिसङ्ख्यया तन्तुना ततः ॥
त्रिगुणीकृत्य तत्सूत्रं जलार्द्रं वर्तयेद्यथा ।
पूर्वमूर्ध्वं नयेद्वामपार्णिं सूत्रस्य वर्त्तने ॥
पश्चादूर्ध्वं नयेद्दक्षपार्णिं प्राग्वदवस्थितः ।
त्रिगुणं त्रिगुणीभूतं गोमयालिप्तभूतले ॥
क्षिप्रं भ्रमति वै यावत्तावत्प्रीतिमतिव्रजेत् ।
विप्रस्य त्रिसरद्वन्द्वं राज्ञस्त्रिसरकं भवेत् ॥
वैश्यस्य द्विसरं प्रोक्तं शूद्रस्यैकसरं मतम् । इति ।

छन्दोगपरिशिष्टे,

त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥

तथा,

पृष्ठदेशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।
तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् ॥ इति ।

इति यज्ञोपवीतलक्षणम् ।

अथोत्तरीयलक्षणम् ।

सिद्धान्तशेखरे,

सप्तषट्पञ्चहस्तैर्वा दैर्घ्यं स्यादुत्तरीयकम् ।
एकहस्तप्रविस्तारं यद्वा सूर्याङ्गुलास्तृतम् ॥
द्विपुच्छौ बन्धयेत्तस्य धारयेद्यज्ञसूत्रवत् ।
यद्वा यवोदरास्तीर्णं दैर्घ्यं तद्यज्ञसूत्रवत् ॥
उत्तरीयमिति ख्यातम्—इति ।

इत्युत्तरीयलक्षणम् ।

अथ रुद्राक्षमहिमा ।

स्मृतिसङ्ग्रहे,

सर्वाश्रमाणां वर्णानां रुद्राक्षाणां च धारणम् ।
कर्तव्यं मन्त्रवत्प्रोक्तं द्विजानां नान्यवर्णिनाम् ॥
रुद्राक्षधारणादेव रुद्रा रुद्रत्वमागताः ।
मुनयः सत्यसङ्कल्पा ब्रह्मा ब्रह्मत्वमागताः ॥
रुद्राक्षमालाभरणाः शिवपूजापरायणाः ।
बाह्यलक्षणसंयुक्तास्ते रुद्रा नात्र संशयः ॥
रुद्राक्षस्य मुखं ब्रह्मा नालं विष्णुः सनातनः ।
देवाश्च बिन्दवो जाता ईशः सर्वाधिदेवताः ॥
सुवर्णेनाथ वा बद्धा रुद्राक्षं रजतेन वा ।
शिखायां धारयेन्नित्यं कर्णयोर्वा समाहितः ॥

यज्ञोपवीते हस्ते वा कण्ठे तुण्डेऽथ वा नरः ।
श्रीमत्पञ्चाक्षरेणैव प्रणवेनैव चाथ वा ॥
आत्ममन्त्रेण मेधावी रुद्राक्षं धारयेन्मुदा ।
रुद्राक्षधारणं साक्षाच्छिवज्ञानस्य साधनम् ॥
रुद्राक्षं यच्छिखायां ताच्छिवतत्त्वमिति स्मरेत् ।
कर्णयोरुभयोश्चैव देवं देवीं च भावयेत् ॥
यज्ञोपवीते वेदांश्च तथा हस्ते दिवाकरम् ।
कण्ठे सरस्वतीं देवीं पावकं चैव भावयेत् ॥
सहेमरुद्राक्षमाला मनोज्ञा शमलापहा ।
तद्वत् सहेमपद्माक्षमाला कान्तियशस्करी ॥
स्फाटिकं पद्मरुद्राक्षहारमाभरणानि च ।
मेध्यन्तनाग्न्यमायुष्यं श्रीकरं पापवारणम् ॥
रुद्रक्षधारिणं श्राद्धे पूजयित्वा तु मोदितः ।
पितृलोकमवाप्नोति नात्र कार्या विचारणा ॥
रुद्राक्षधारिणं दृष्ट्वा परिवादं करोति यः ।
उत्पत्तौ तस्य साङ्कर्यमस्त्येवेति विनिश्चयः ॥ इति ।

क्रियासारे,

रुद्राक्षधारिणं यस्तु श्राद्धे भोजयति द्विजम् ।
पितरस्तस्य तृप्ताश्च भवन्ति सुखिनो भृशम् ॥ इति ।

इति रुद्राक्षमहिमा ।

अथ रुद्राक्षलक्षणम् ।

क्रियासारे ,

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः ।
श्वेतो रक्तः सुवर्णाभः कृष्णवर्णः क्रमाद्भवेत् ॥

एतेषु ब्राह्मणः श्रेष्ठो जपमालाकृतौ मृशम् ।
अलाभे स्युर्द्विजातीनामपिवा हि त्रिजातयः ॥
धारणे सकलाः श्रेष्ठा रुद्राक्षा दोषवर्जिताः ।
रुद्राक्षं सर्वदा धार्यं शिवभक्तैरसंस्कृतम् ॥
तस्योच्छिष्टादिको दोषो नास्त्यनारतधारणे ।
अतिस्थूलोऽतिसूक्ष्मश्च स्फाटितो भङ्गुरो लघुः ॥
भिन्नः पुराधृतो जीर्णो रुद्राक्षो नावरः स्मृतः । इति ।

इति रुद्रालक्षणम् ।

वैखानससंहितायाम्—

आराधनोपकरणं तस्य लक्षणमेव च ।
उच्यते सम्प्रति ब्रह्मन् श्रूयतां तदशेषतः ॥

इत्युपक्रम्य सिंहासनघण्टाभिषेकधूपदीपादिपात्रलक्षणान्यभिधाय—

चतुष्कं हेमदण्डांश्च पूजार्थं परिकल्पयेत् ।

इत्युपसंहारात्, घण्टाभिषेकादिपात्राणां पूजाङ्गत्वस्मरणात् पूजोपयोगित्वादुपकरणपात्रलक्षणान्युच्यन्ते । तत्र प्रथमं देवाधिष्ठानतया अभ्यार्हितत्वात् सिंहासनलक्षणं निरूप्यते ।

वैखानसग्रन्थे,

श्रीभगवानुवाच ।

आराधनोपकरणं तस्य लक्षणमेव च ।
उच्यते सम्प्रति ब्रह्मन् श्रूयतां तदशेषतः ॥
सपर्याविष्टरं ब्रह्मन् हस्तमानान्वितं शुभम् ।
यद्वा न्यूनसमुत्सेधं यथावित्तानुसारतः ॥
सपर्याविष्टरं सिंहासनम् ।
सिंहपादयुतं यद्वा हस्तिपादचतुष्टयम् ।

शार्दूलपादमथ वा हेमरत्नपरिष्कृतम् ॥
चतुरस्रं मध्यमे तु सरसीरुहविस्तृतम् ।
तपनीयमयं यद्वा रजतादिविनिर्मितम् ॥
दारुजं वा मणिच्छन्नं स्वर्णपट्टैर्विराजितम् । इति ।

इति सिंहासनलक्षणम् ।

अथ कुम्भलक्षणम् ।

विष्णुधर्मोत्तरे,

हैमराजतताम्राश्च मृन्मया लक्षणान्विताः ।
यात्रोद्वाहप्रतिष्ठादौ कुम्भाः स्युरभिषेचने ॥
पञ्चाशाङ्गुलवैपुल्या उत्सेधे षोडशाङ्गुलाः ।
द्वादशाङ्गुलमूलाः स्युर्मुखमष्टाङ्गुलं भवेत् ॥ इति ।

पञ्चाशेति । पञ्च च आशाश्च पञ्चाशाः । आशा दश । पञ्चदशाङ्गुलैर्मध्ये विस्तृता इत्यर्थः ।

अत्राङ्गुलं च,

दक्षिणस्य च हस्तस्य मध्याङ्गुल्याश्च मध्यमम् ।
पर्वरन्ध्रेण मात्राख्यमङ्गुलं तत्त्रिधा मतम् ॥
उत्तमं पर्वदैर्घ्यं स्यात्तत्पादोनं तु मध्यमम् ।
पर्वदैर्घ्यार्धमधमामिति मात्राङ्गुलं त्रिधा ॥
इति सिद्धान्तशेखरोक्तं ग्राह्यम् ।

सिद्धान्तशेखरे विशेषः ।

तत्रादौ सम्प्रवक्ष्यामि शिवकुम्भस्य लक्षणम् ।
उदरस्य प्रविस्तारो भवेत्पञ्चदशाङ्गुलः ॥
पूकादशाङ्गुलोत्सेध आस्ये स्याच्चतुरङ्गुलम् ।
ओष्ठमेकाङ्गुलं कुर्यात्तन्निर्व्यूहं चतुर्यवम् ॥

त्र्यङ्गुलं तद्गलोत्सेधं तिस्रो रेखा गलादधः ।
पक्वबिम्बफलाकारः कृष्णभिन्नादिवर्जितः ॥
शिवकुम्भ इति प्रोक्तो बर्द्धनीलक्षणं ब्रुवे ।
सप्ताङ्गुलसमोत्सेधा विस्तृता स्याच्चवाङ्गुलम् ॥
त्र्यङ्गुलं वक्त्रविस्तारं कण्ठोत्सेधं चतुर्यवम् ।
ओष्ठान्तं त्र्यङ्गुलं कुर्यान्निर्गमं चैकमङ्गुलम् ॥
नालं सार्द्धाङ्गुलं कुर्यादुत्पलाकृतिवच्छुभम् ।
बर्द्धनीलक्षणं प्रोक्तं कलशस्याथ लक्षणम् ॥
षडङ्गुलोन्नताः सर्वे विस्तृता नागपर्वभिः ।
नागा गजाः । ते चाष्टौ । पर्व मानाङ्गुलम् ।
त्र्यङ्गुलं मुखविस्तारं कुर्यादर्द्धाङ्गुलोष्ठकम् ॥
तन्निर्व्यूहं यवं चैकं गलोत्सेधं चतुर्यवम् ।
कनिष्ठाः कलशा ह्येते द्विगुणा मध्यमा मताः ॥
उत्तमास्त्रिगुणा ज्ञेयाः कलशाः कथिता इति ।
सामान्यघटसङ्घातलक्षणं वच्मि साम्प्रतम् ॥
अष्टाङ्गुलोन्नताः कार्या विस्तृता रुद्रपर्वभिः ।
आस्यमग्न्यङ्गुलं कुर्यादोष्ठमर्धाङ्गुलं ततः ॥
अग्निशब्दः त्रिसङ्ख्यावाचकः ।
तन्निर्व्यूहं यवं कुर्यान्मानं सार्धाङ्गुलोन्नतम् ।
साधारणाः समुद्दिष्टा देवस्य स्नपनाईकाः ॥ इति ।

इति कुम्भलक्षणम् ।

अथार्घ्यपात्रलक्षणम् ।

देवीपुराणे,

हैमराजतताम्राणि काष्ठमृच्छैलजानि च ।
रत्नादीनि च पात्राणि शुभरेखाङ्कितानि च ॥

अर्घ्यनैवेद्यपूजार्थं बलिदाने प्रकल्पयेत्। इति।
शिवरहस्ये विशेषः।
हेमपात्राणि सर्वाणि ईहितानि भवन्त्युमे।
अर्घं दत्त्वा तु रौप्येण आयू राज्यं सुतान् लभेत्॥
ताम्रपात्रेण सौभाग्यं धर्मं मृन्मयसम्भवे।
सर्वाभावे तु माहेयं स्वहस्तघटितं यदि॥
माहेयं मृन्मयम्।
आसनं चार्घपात्रं च भग्नमासादयेन्न तु।
सर्वत्र स्वर्णकं ताम्रमर्घपात्रे ततोऽधिकम्॥
पात्राणामादरः कार्यः पात्राण्येवोत्तमादरः।
बलिहोमक्रियार्थं हि विना पात्रं न सिद्ध्यति॥
षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्तितम्।
मध्यमं तु त्रिभागेण कनिष्ठं द्वादशाङ्गुलम्॥
चतुर्विंशाङ्गुलं मध्यं कनिष्ठं द्वादशाङ्गुलम्—इत्यपि क्वचित्पाठः।
वस्वङ्गुलविहीनं तु न पात्रं कारयेत्क्वचित्।
न पात्रं कारयेद्बुध इति पाठान्तरम्।
सर्वाभावे तु तत्पात्रं स्रवते यन्न धारितम्॥
यत्रोदकं न स्रवते तत्। स्रवत इति कार्याक्षमोपलक्षकम्।
नाभीविवररूपाणि पुण्डरीकाकृतीनि च।
शङ्खनीलोत्पलाभानि पात्राणि परिकल्पयेत्॥ इति।
वैखानसग्रन्थे,
प्रस्थमानपलद्रव्यपूरयोग्यान्तराणि च।
शङ्खशुक्तिप्रभवाणि यद्वा पात्राणि कल्पयेत्॥ इति।
सिद्धान्तशेखरे,
अर्घ्यस्य लक्षणं वक्ष्ये पलद्रव्यादिभेदतः।

सामान्यार्घे निरोधार्थं विशेषार्घं पराङ्मुखम् ॥
अर्घपात्राणि चत्वारि स्वर्णदुर्वर्णजानि वा ।
दुर्वर्णं रजतम् ।
ताम्रशुक्तिशिलादारुकुर्ममृत्पात्रजानि च ॥
उत्तमं पलविंशत्या मध्यमं दशभिः पलैः ।
हीनं पञ्चपलं कुर्यादेवमाचास्यपाद्ययोः ॥
चतुष्पर्वाणि तानि स्युर्विस्तृतान्यष्टपर्वभिः ।
पृष्ठे पङ्केरुहाङ्काणि वृत्ताकाराणि वा पुनः ॥
चतुरस्राणि कुर्वीत चतुष्पात्राणि वार्घके ।
कर्पूरं कुङ्कुमं दूर्वा सिद्धार्थं बिल्वपत्रकम् ॥
यवदर्भाङ्कुरांश्चेति सामान्यार्घ्ये विनिःक्षिपेत् ।
तिलप्रसूनसिद्धार्थदर्भदूर्वायवाक्षतान् ॥
द्रव्याण्येतानि सप्तापि निरोधार्घ्ये विनिःक्षिपेत् ।
तिलतण्डुलसिद्धार्थदूर्वादर्भं यवानपि ॥
पराङ्मुखार्घपात्रे च द्रव्यषट्कं प्रकल्पयेत् । इति ।

इत्यर्घपात्रलक्षणम् ।

अथ पाद्यपात्रलक्षणम् ।

वैखानसग्रन्थे,

पादावनेजनजलग्रहणं पात्रमद्भुतम् ।
त्रिरावृत्तं सरोजाभं हैमं राजतमेव वा ॥
ताम्रं सचक्रचरणमपि वा पावनं सताम् । इति ।

सिद्धान्तशेखरे,

षडङ्गुलप्रविस्तारमुत्सेधं चतुरङ्गुलम् ।
ओष्ठमेकाङ्गुलं कुर्यान्नासिकां चतुरङ्गुलाम् ॥

पृष्ठे पादसमायुक्तं चतुरङ्गुलमानतः ।
पाद्यपात्रमिति ख्यातम् । इति ।

इति पाद्यपात्रलक्षणम् ।

अथ पाद्यक्षेपणीयपात्रलक्षणम् ।

सिद्धान्तशेखरे,

अष्टाङ्गुलसमुत्सेधं विस्तारे षोडशाङ्गुलम् ।
ओष्ठमेकाङ्गुलं कुर्याच्छरावाकृति पात्रकम् ॥
उभयोः पार्श्वयोः कुर्यात् वृत्तकङ्कणके समे ।
पृष्ठे पादसमायुक्तमष्टाङ्गुलसुविस्तृतम् ॥
पादोत्सेधं चतुर्मात्रं पाद्याधारं प्रकीर्त्तितम् । इति ।

इति पाद्यक्षेपणीयपात्रलक्षणम् ।

अथाचमनपात्रलक्षणम् ।

वैखानसग्रन्थे,

आचामवारिग्रहणपात्रमुत्तमलोहजम् ।
सरोजकर्णिकाकारं कुर्याद्दद्भुतदर्शनम् ॥
कार्त्तस्वरमयं वृत्तं राजतं वाथ पावनम् । इति ।

कार्त्तस्वरं सुवर्णम् ।

सिद्धान्तशेखरे,

द्वादशाङ्गुलविस्तारं कुक्षिमध्ये सुवृत्तकम् ।
अङ्गुलं तद्वलोत्सेधमोष्ठं कुर्यादथाङ्गुलम् ॥
आस्यतारं त्रिमात्रं स्यात्पार्श्वे नासा युगाङ्गुला ।
रन्ध्रं कनिष्ठिकातुल्यमग्रे तद्द्विगुणं त्वधः ॥
पृष्ठे पादान्वितं कुर्यादुत्सेधं अङ्गुलं ततः ।
षडङ्गुलप्रविस्तारं पात्रमाचमनार्थकम् ॥ इति ।

इत्याचमनपात्रलक्षणम् ।

अथाभिषेकपात्रलक्षणम् ।

वैखानसग्रन्थे,

अरत्रिमानविस्तारं मध्येऽष्टदलसंयुतम् ।
प्रतिपद्म दलं मध्ये सुषिराणि शतं भवेत् ॥
अष्टोत्तरशते भूयः पर्यन्तदलमध्यतः ।
खचितं च महारत्नैरेवं धारासहस्रकम् ॥

अयमर्थः । अरत्निमानविस्तीर्णं पात्रं कुर्यात्तन्मध्येऽष्टदलं कार्यम् तदेकैकदले शतं सुषिराणि । एवमष्टदले सुषिराणामष्टशती सञ्जायते । भूयः अष्टोत्तरशते सम्पादितसुषिराष्टशत्युत्तरशते उपरितनं शतद्वयं छिद्राणामष्टसु पर्यन्तदलेषु पञ्चविंशतिसङ्ख्यया कार्यम् । एवं सहस्रसुषिरै रत्नखचितैर्धारासहस्रकं भवतीत्यर्थः ।

धाराष्टकेन वा युक्तमभिषेकाय कल्पयेत् ।
व्याकोशपङ्कजाकारं शुद्धमुत्तमलोहजम् ॥
आढकापरिमाणाम्भःपूरयोग्यं महाबिलम् ।
हस्तदीर्घं जलस्रावि पार्श्वमानोपशोभितम् ॥
कल्पयेदपरं स्नानपात्रं मुक्तापरिष्कृतम् ।
यद्वा शङ्खनिभाकारमग्रतो जलनालकम् ॥ इति ।

इत्यभिषेकपात्रलक्षणम् ।

अथ त्रिपादीलक्षणम् ।

सिद्धान्तशेखरे,

चतुःषडष्टभिर्मात्रैरूनता विस्तृता त्रिधा ।
उत्तमादिविभेदेन यन्त्रिका त्रिपदी मता ॥
त्रिचक्रपादसंयुक्ता पादार्द्धे सिंहचक्रकम् ।

पादमध्यं सुवृत्तं स्याच्छरावाभं पदोऽप्यधः ॥
शेषं कुर्याद्यथाशोभं त्रिपादीति प्रकीर्त्तिता ।
अर्घ्यशङ्खादिनैवेद्यपात्राधारा त्रिपादिका ॥ इति ।

इति त्रिपादीलक्षणम् ।

अथ शङ्खमाहात्म्यम् ।

स्कन्दपुराणे,

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ।
शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत् ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्वदेवैस्तु पाञ्चजन्य नमोऽस्तु ते ॥
तव नादेन जीमूता वित्रस्यन्ति सुरासुराः ।
शशाङ्कायुतकान्त्याभ पाञ्चजन्य नमोऽस्तु ते ॥
दर्शनादेव शङ्खस्य किं पुनः स्पर्शने कृते ।
विलयं यान्ति पापानि हिमवद्भास्करोदये ॥
पुरतो वासुदेवस्य सपुष्पं सजलाक्षतम् ।
शङ्खमभ्यर्चितं तिष्ठेत्तस्य लक्ष्मीर्न दुर्लभा ॥
शङ्खे कृत्वा तु पानीयं सपुष्पं सजलाक्षतम् ।
अर्घ्यं ददाति देवस्य ससागरमहीफलम् ॥
प्राप्नुयाद्दीति शेषः ।
अर्घ्यं कृत्वा तु शङ्खेन यः करोति प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
तीर्थोदकं हरेर्मूर्ध्नि भ्रामयेच्छङ्खसंस्थितम् ।
मुक्तिं ददाति वै तस्य क्षीरसागरजाप्रियः ॥
भ्रामयित्वा हरेर्मूर्ध्नि दृश्यते कृष्ण सर्वदा ।(?)

तथा,

शङ्खलग्नं तु यत्तोयं भ्रामितं केशवोपरि ।
वहते शिरसा नित्यं गङ्गास्नानेन तस्य किम् ॥
नित्ये नैमित्तिके काम्ये स्नानार्चनविलेपने ।
शङ्खमुद्वहते यस्तु श्वेतद्वीपे वसेद्धि सः ॥ इति ।

इति शङ्खमाहात्म्यम् ।

अथ शङ्खलक्षणम् ।

क्रियासारे,

प्रस्थाम्बुप्रमितः शङ्खः श्रेष्ठस्तत्रार्धशपूर्णकः ।
मध्यस्तदर्धप्रमितः कनिष्ठः क्रमशो भवेत् ॥
सुश्वेतः प्रौढशिखरः स्निग्धो दीर्घाम्बुपद्धतिः ।
शङ्खः स्यादर्चने योग्यो योऽसावलिकचक्षुषः ॥
अलिकचक्षुस्त्रियम्बकः ।
मलिनो निम्नशिखरः सरक्तः कृमिदष्टकः ।
ह्रस्वप्रणालिकः शङ्खो न स्याद्योग्यः सुरार्चने ॥
गोक्षीरधवलः स्निग्धो दीर्घनालो बृहत्तनुः ।
वृत्तो यो दक्षिणावर्त्तः सोऽब्धिजः शङ्खसंज्ञकः ॥
पूर्वोक्तलक्षणोपेतो वामावर्त्तोऽथ वाचितः ।
शङ्खोऽयं नातिसुलभः सोऽपि मुख्यः सुरार्चने ॥
ताम्रस्फटिकशङ्खेषु सुवर्णकलधौतयोः ।
न विद्यते भिन्नदोषो द्रव्येष्वन्येषु विद्यते ॥
कलधौतं रजतम् ।
शङ्खः शुद्धो भवेत्तत्र तुषाभिर्घर्षणेन च । इति ।
तुषा धान्यत्वचः ।

इति शङ्खलक्षणम् ।

अथ गन्धपात्रलक्षणम्।

सिद्धान्तशेखरे,

अर्घ्यवत् गन्धपात्रं स्यात्—इति।

अत्रार्घ्यवदित्यनेन सम्पूर्णार्घ्यपात्रलक्षणातिदेशः। यथार्घ्यपात्रं क्रियते तथैव गन्धपात्रं कर्त्तव्यमित्यर्थः।

इति गन्धपात्रलक्षणम्।

अथ धूपपात्रलक्षणम्।

वैखानसग्रंन्थे,

धूपपात्रं सरोजाभं सुवर्णादिविनिर्मितम्।
पादयोरपि तस्य स्यादुत्सेधश्चतुरङ्गुलः॥
अनेकसुषिरं तस्य पिधानं संहतं भवेत्।

पिधानमाच्छादनम्। अथवा विकसत्पद्मसदृशाकारशोभितमिति।

सिद्धान्तशेखरे,

धूपपात्रविधिं वक्ष्ये पलद्रव्यादिपूर्ववत्।
चतुष्पञ्चरसाश्चैवा पात्रविस्तारमङ्गुलैः॥

रसाः षट्। अश्वाः सप्त।

पात्रोत्सेधस्तदर्धः स्यादोष्ठमर्द्धाङ्गुलं मतम्।
पद्माभं परितः पात्रं व्यङ्गुलाऽधोगलोन्नतिः॥
पादमेकाङ्गुलोत्सेधं विस्तृतं व्यङ्गुलं ततः।
षट्पर्वदीर्घं नालं स्यात्तन्नाहं व्यङ्गुलं मतम्॥
पूर्ववत्पादसंयुक्तं वृत्तं चक्रं च चापवत्।
पिधानं त्र्यङ्गुलोत्सेधं नानाच्छिद्रसमन्वितम्॥
एकच्छिद्रयुतं चापि कलशाकारमूर्द्धतः। इति।

इति धूपपात्रलक्षणम्।

अथ दीपपात्रलक्षणम् ।

वैखानसग्रन्थे,

दीपपात्रं तथा नालमध्ये कुमुदकुण्डलम् ।
वर्त्त्याधारशतेनापि युक्तमष्टाभिरेव च ॥
विंशत्या चाष्टभिश्चैव द्वाभ्यां वा दशभिश्च वा ।
अष्टभिर्वा यथाशक्ति कल्पयेच्छिल्पवित्तमः ॥ इति ।

सिद्धान्तशेखरे,

दीपपात्रविधिं वक्ष्ये पलद्रव्यादिरर्घ्यवत् ।
पादनालगला धूपपात्रवच्छेष उच्यते ॥
एकपत्रं चतुष्पत्रं षड्दलं चाष्टपत्रकम् ।
तत्रैकपत्रं मध्ये तु निम्नाश्वत्थदलाकृति ॥
चतुष्पत्रं चतुर्दिक्षु मध्यस्था निम्नकर्णिका ।
षड्दलेऽष्टदलं तद्वदुपपत्रसमन्वितम् ॥ इति ।

इति दीपपात्रलक्षणम् ।

अथ दीपमालालक्षणम् ।

सिद्धान्तशेखरे,

दार्वयस्ताम्रसम्भूता दीपमालाऽधमा मता ।
मध्यमा च तथा श्रेष्ठा स्वर्णदुर्वर्णजा क्रमात् ॥
द्वारेषु द्वारवत्कुर्यात् लिङ्गपृष्ठे प्रभाकृतिम् ।
द्वाराभामन्यदेशेषु दीपमालां सुशोभनाम् ॥
चतुर्भिरङ्गुलैर्दीर्घं स्कन्धं त्र्यङ्गुलविस्तृतम् ।
एवं कृत्वा विभागैकं दण्डं मध्ये नियोजयेत् ॥
स्कन्धात्स्कन्धं समं कुर्यादन्तरं भूतमात्रकम् ।
दीपमालेति गदिता दीपाधारोऽथ कथ्यते ॥ इति ।

इति दीपमालालक्षणम् ।

अथ दीपाधारलक्षणम्।

सिद्धान्तशेखरे,

हेमताम्रादिसम्भूतं विदध्यादुत्तमादिकम्।
द्वादशाङ्गुलमारभ्य यङ्गुलादिविवृद्धितः॥
अष्टादशोदिता भेदा दीपाधारस्य चोन्नतिः।
स्नेहाधारस्य पादे तु नाहं दैर्घ्यसमं मतम्॥
पादतारशरांशो वा स्नेहाधारोऽपि तत्समः।
तदूर्ध्वं मुकुलं कुर्यात्पट्टिकादिसमन्वितम्॥
नानापट्टीसमायुक्तं नानाकुम्भं सनालकम्।
दीपाधार इति प्रोक्तः—इति।

इति दीपाधारलक्षणम्।

अथ दीपिकालक्षणम्।

वैखानसग्रन्थे,

लोहजान् दीपिकास्तम्भान् चतुर्हस्तप्रमाणकान्।
त्रिहस्तानेकहस्तान् वा द्विहस्तान् वा यथाबलम्॥
तत्सङ्ख्यजान् राजतीयान् वा ऽयुग्मैस्तैः स्नेहधारकैः।
युग्मैर्वा वृत्तविस्तीर्णैर्वल्हसैर्वा परिष्कृतान्। (?)
स्नेहाधारपरिक्षिप्तपद्मकोशैरलङ्कृतान्॥ इति।

इति दीपिकालक्षणम्।

अथ नीराजनपात्रलक्षणम्।

वैखानसग्रन्थे,

नीराजनक्रियापात्र्यो हेमादिद्रव्यनिर्मिताः।
त्रितालायतविस्तीर्णा वृत्तमध्यसरोरुहाः॥
नव वा सप्त वा पञ्च तिस्रस्त्वेका वृतिर्भवेत्। इति।

सिद्धान्तशेखरे,
हिरण्यतारताम्रादिनिर्मितं घुत्तमादिकम् ।
षट्त्रिंशताङ्गुलैः श्रेष्ठं त्रिंशता मध्यमं मतम् ॥
चतुर्विंशतिमात्रैः स्यादधमं विस्तृतौ क्रमात् ।
अग्रिभागैकभागेन कुर्यान्मध्येऽत्र कर्णिकाम् ॥
तद्भाणैकांशमुत्सेधं कर्णिकायाः प्रमाणतः ।
पट्टिकां परितः कुर्याद्यवयुग्मेन विस्तृताम् ॥
तत्समानोन्नतां चाथ परितोऽष्टदलानि च ।
कर्णिकार्धप्रमाणेन काष्ठानामष्टके समम् ॥
ओष्ठमेकाङ्गुलं कुर्याद्विस्तारात्कर्णिकोन्नतेः ।
समानं पूर्णचन्द्राभं दीपाधाराश्च कुम्भवत् ॥
उन्नता द्विचतुर्मात्रैर्विस्तृताश्चाङ्गुलद्वयात् ।
तद्रन्ध्रं द्व्यङ्गुलं कुर्यात्कर्णिकामध्यसंस्थितम् ॥
दीपाधारांश्च पात्रेऽस्मिन् स्थापयेत्तदलाष्टके ।
मध्यस्थमेकमित्येवं नवदीपक्रमो मतः ॥
पञ्चात्मके चतुर्दिक्षु मध्ये त्वेकमिति त्रिधा ।
अङ्गुलत्रयमानेन पादं कुर्यादधस्ततः ॥
नीराजनमिति प्रोक्तं घण्टालक्षणमुच्यते । इति ।

इति नीराजनपात्रलक्षणम् ।

अथ घण्टालक्षणम् ।

वैखानसग्रन्थे,
शब्दब्रह्ममयी घण्टा हस्तोत्सेधप्रमाणिका ।
ब्रह्माण्डगोलकाकारा सौवर्ण्यप्युत्तमा भवेत् ॥
अधोमुखस्तालमानविस्तारोत्सेधमन्ततः ।
प्रदीपतुल्यसंस्थानस्तीक्ष्णाभ्यन्तरतालुकः ॥

चक्राङ्का पद्मजाङ्का वा घण्टैषा परिकीर्तिता।
नालबन्धाश्रतस्रोऽन्या घण्टाप्रतिदिशः कृताः॥
एवं विशिष्टा घण्टा स्याद्यद्वा वित्तानुसारतः। इति।
सिद्धान्तशेखरे,
पञ्चाङ्गुलोन्नता घण्टा तद्वद्विस्तारसम्मता।
ओष्ठं चतुर्यवं कुर्याच्चत्समं तस्य निर्गमम्॥
उपपदी यवेन स्याच्छिखरं त्वङ्गुलोन्नतम्।
अर्द्धाङ्गुलो गलोत्सेधो जिह्वा वेदाङ्गुलायता॥
घण्टायास्तत्परीणाहो विस्तारार्धेन वर्तितः।
अङ्गुलं दण्डदैर्घ्यं स्यात्तन्नाहं तत्समं मतम्॥
दण्डाग्रे वृषभं शूलं नलिनं वापि कारयेत्।
शुद्धकांस्येन कर्त्तव्या घण्टालक्षणमीरितम्॥
महाघण्टामथो वक्ष्ये विदध्याच्छुद्धकांस्यतः।
स्वराङ्गुलसमुत्सेधामष्टाङ्गुलसुविस्तृताम्॥
अग्न्यङ्गुलोन्नतगलां गलनाहं रसाङ्गुलम्।
पट्टिकाद्वन्द्वसम्बद्धो व्यङ्गुलः शिखरोदयः॥
तन्नाहमष्टमात्रं स्याच्चतुर्नासं सरन्ध्रकाम्।
तारार्धवर्तितन्नाहं जिह्वां रन्ध्राङ्गुलायताम्॥
चतुर्मात्रपरीणाहां तदग्रे बलयान्विताम्।
महाघण्टा समाख्याता—इति।

इति घण्टालक्षणम्।

अथ भेरीलक्षणम्।

सिद्धान्तशेखरे,
सारदारुसमुद्भूतां वृत्तां हस्तद्वयायताम्।
पञ्चतालपरीणाहां चतुर्यवघनां शुभाम्॥

द्वादशाङ्गुलविस्तारा मुखोत्थाः सप्त कीलकाः ।
पार्श्वयोरुभयोर्मध्ये चापः पट्टेन वेष्टितः ॥
चर्मबद्धमुखां भेरीं कुर्यात्तस्याः प्रहारकम् ।
अयसा दारुणा वापि षोडशाङ्गुलदैर्घ्यकम् ॥
मध्याङ्गुलपरीणाहं भेरीताडनसाधनम् ।
भेरीलक्षणमित्युक्तम्—इति ।

इति भेरीलक्षणम् ।

अथ नैवेद्यपात्रलक्षणम् ।

वैखानसग्रन्थे ,

नैवेद्यपात्रं वक्ष्यामि केशवाय महात्मने ।
हैरण्यं राजतं ताम्रं कांस्यं मृन्मयमेव वा ॥
पालाशं पद्मपत्रं वा पात्रं विष्णोरतिप्रियम् ।
हविर्द्रव्यप्रमाणानि वृत्तानि परिकल्पयेत् ॥ इति ।

सिद्धान्तशेखरे,

स्वर्णदुर्वर्णताम्रा स्यात्स्थालिकात्युत्तमादिका ।
शुद्धकांस्येन वा कुर्यादेवनैवेद्यपात्रके ॥
एकपात्रं समारभ्य पञ्चाशत्पात्रतः क्रमात् ।
कुर्यान्नैवेद्यपात्राणि हीननैवेद्यकादिषु ॥
पात्रं शतपलं श्रेष्ठं तदर्द्धं मध्यमं मतम् ।
तदर्धमधमं ज्ञेयं पात्रसङ्ख्येति कीर्त्तिता ॥
स्थालिका नवधा कार्या तारा षट्त्रिंशदङ्गुलैः ।
त्र्यंङ्गुलत्र्यङ्गुलन्यूनैरष्टधार्काङ्गुलैः क्रमात् ॥
इति विस्तारमाख्यातं स्थालिकानवके क्रमात् ।
उत्तमत्रयमग्रे स्यान्मध्यमे मध्यमं त्रयम् ॥

न्यूनत्रयमधस्तात्स्यात्स्थालिकानां यथाक्रमम् ।
श्रेष्ठो नवयवः श्रेष्ठो यवैकैकविहीनतः ॥
विस्तरेण तथोन्नत्या नवधा कीर्तितः क्रमात् । इति ।

इति नैवेद्यपात्रलक्षणम् ।

अथ पानीयपात्रलक्षणम् ।

वैखानसग्रन्थे,
पानीयपात्रं सौवर्णं राजतं ताम्रमेव वा ।
वृत्तायतं सुवृत्तं वा भवेदायतमेव वा ॥
प्रस्थमानप्रमाणाम्भःपूरयोग्यान्तरं शुभम् । इति ।

इति पानीयपात्रलक्षणम् ।

अथ ताम्बूलपात्रलक्षणम् ।

वैखानसग्रन्थे,
कल्पयेन्नागलतिकादलपात्रं च रैमयम् ।
रैमयं सौवर्णम् ।
अरत्निमानविस्तीर्णं कारयेद्वा यथाबलम् ॥ इति ।

इति ताम्बूलपात्रलक्षणम् ।

अथ मुकुटलक्षणम् ।

सिद्धान्तशेखरे,
जटामुकुटमीशस्य शक्तीनां तु करण्डकम् ।
किरीटमन्यदेवानां तत्तन्मुकुटमानतः ॥
नानारत्नसमायुक्तं वल्लीकलशशोभितम् ।
लक्षणं मुकुटस्योक्तं पट्टलक्षणमुच्यते ॥ इति ।

इति मुकुटलक्षणम् ।

अथ सुवर्णपुष्पलक्षणम् ।

सिद्धान्तशेखरे,

त्र्यङ्गुलं पुष्पविस्तारं वृत्तं हैमं विनिर्मितम् ।
दलाष्टकसमायुक्तं मध्ये कर्णिकया युतम् ॥
हेमपुष्पमिति ख्यातं कुर्यादाभरणं यथा । इति ।

इति सुवर्णपुष्पलक्षणम् ।

अथ नानाभरणलक्षणम् ।

सिद्धान्तशेखरे,

हारकङ्कणकेयूरमुद्रिकाकटिसूत्रकम् ।
पदकं कण्ठमाला च यज्ञसूत्रं च नूपुरम् ॥
अन्यदाभरणं सर्वं तत्तन्मानानुरूपतः ।
हिरण्यनिर्मितं कुर्यान्नानारत्नविचित्रितम् ॥ इति ।

इति नानाभरणलक्षणम् ।

अथ कङ्कतलक्षणम् ।

वैखानसग्रन्थे,

कङ्कतं कनकं रूप्यमपि वाष्टाङ्गुलायतम् ।
षडङ्गुलायतं यद्वा तदर्धाङ्गुलविस्तरम् ॥
विंशत्या दशनैर्युक्तं भवेदुभयतोमुखम् ।
यद्वा षोडशभिर्दन्तैरष्टाभिर्वाथ मङ्गलम् ॥ इति ।

इति कङ्कतलक्षणम् ।

अथाञ्जनक्षोदपात्रशलाकालक्षणम् ।

वैखानसग्रन्थे,

सौवर्णमञ्जनक्षोदभाजनं पुंमृगाकृति ।
सिंहाकारं भवेद्यद्वा हंसाकारमथापि वा ॥

शिरोबिलं शलाका च द्वादशाङ्गुलमायता ।
अष्टाङ्गुला वा सौवर्णी भवेदुभयतोमुखी ॥ इति ।

इत्यञ्जनक्षेपदपात्रशलाकालक्षणम् ।

अथ दर्पणलक्षणम् ।

वैखानसग्रन्थे,

दर्पणं प्रतिमामानं तदर्धं वा सुशोभनम् ।
वृत्तं कांस्यं महारत्नखचितं वा यथाबलम् ॥
पादयुक्तं सनालं वा मुखमानमथापि वा । इति ।

सिद्धान्तशेखरे,

दर्पणं शुद्धकांस्येन पूर्णचन्द्रसमाकृति ।
षट्त्रिंशताङ्गुलैर्नाहं विदध्याद्वा तदर्धतः ॥
नालमष्टाङ्गुलं तस्य पदं स्याच्चतुरङ्गुलम् ।
नानापट्टिकया युक्तं प्रोक्तं दर्पणलक्षणम् ॥ इति ।

इति दर्पणलक्षणम् ।

अथ व्यजनलक्षणम् ।

सिद्धान्तशेखरे,

षट्त्रिंशता त्रिंशता वा दैर्घ्यं व्यङ्गुलनाहकः ।
दण्डो दण्डाग्रभागं तु द्विधा कृत्वात्र योजयेत् ॥
षोडशाङ्गुलकं वृन्तं पिच्छनालसमूहकम् ।
सुदृढं तन्तुसम्बद्धं वृन्ताग्रे पिच्छभूषितम् ॥
मायूरं व्यजनं प्रोक्तं वक्ष्ये पट्टादिसम्भवम् ।
सम्पाद्य पूर्ववद्दण्डं वृन्तं वेणुविवर्जितम् ॥
अष्टादशाङ्गुलं वाथ षोडशाङ्गुलसम्मितम् ।

देवाङ्गपट्टकार्पासवेष्टितं योजयेद्दृढम् ॥
लक्षणं व्यजनस्योक्तम्—इति ।

इति व्यजनलक्षणम् ।

अथ पादुकालक्षणकम् ।

वैखानसग्रन्थे,

पादमानानुसारेण पादुके रैमये शुभे ।
यद्वा रूप्यमये ताम्रमये कांस्यमये तथा ॥
अयोमयं विवर्ज्यं स्याद्वृत्तमध्ये कृताम्बुजम् । इति ।
दण्डस्थानीयमित्यर्थः ।

सिद्धान्तशेखरे,

पादुकालक्षणं वक्ष्ये स्वर्णताम्रादिदारुजम् ।
पादुकायुगलं कार्यं पूजार्थे चोत्सवादिषु ॥
पूजार्थं पादुकायुग्मं दैर्घ्यमष्टादशाङ्गुलम् ।
पञ्चाङ्गुलसुविस्तारं शेषं स्याद्वक्ष्यमाणवत् ॥
तत्तत्पादसमं दैर्घ्यं प्रतिमाऽऽचार्यकादिषु ।
दैर्घ्यार्धविस्तृतं कार्यं पादुकाग्रद्वयं समम् ॥
पार्ष्णिभागः पार्ष्णिसमो घनं स्याच्चतुरङ्गुलम् ।
घनं तु तत्त्रिधा कृत्वा भागाभ्यां तत्खुरोन्नतिः ॥
भागेनोर्ध्वघनं कुर्यादष्टांशोच्चं तु कीलकम् ।
तदूर्ध्वं तत्समं पुष्पं मुकुलं तत्त्रिभागतः ॥
हंससिंहादिरचना यवार्धेन विचित्रिता ।
खुरत्रिभागतो गर्त्तं कुर्यान्मूलाग्रयोरधः ॥
पाशावन्योन्यसंश्लिष्टावङ्गुलार्द्धविचित्रितौ । इति ।

इति पादुकालक्षणम् ।

अथ वितानलक्षणम्।

सिद्धान्तशेखरे,

दुकूलपट्टहेमाङ्गं कार्पासं वा वितानकम्।
चतुर्हस्तसमायामं विस्तारं गुणसंयुतम्॥
चतुष्कोणसमोपेतं घण्टारज्जुसमन्वितम्।
कोणेषु तच्चतुर्दण्डैर्बद्धा तद्धारयेद्बहिः॥
चतुष्करायता दण्डाश्चतुरङ्गुलनाहकाः।
अयोवलयसंयुक्ता वैणवा ग्रन्थिवर्जिताः॥
प्रासादमण्डपाद्येषु तत्तत्पङ्क्तिसमानकम्।
वितानं विस्तृतं तद्वद्वितानमिति कीर्त्तितम्॥ इति।

इति वितानलक्षणम्।

एतानि च पूर्वोक्तलक्षणानि सिंहासनादीन्युपकरणपात्राणि पूजार्थमुपकल्पनीयानि। तथा चोक्तम्—

वैखानसग्रन्थे,

मुक्तातपत्रं धवलं शशिबिम्बसमद्युति।
यद्वाऽऽतपत्राणि तथा बर्हिपत्रमयानि च॥
आतपत्राण्यनेकानि हेमदण्डानि पद्मज।
व्यजनान्यपि च भूयांसि कल्याणानि महान्ति च॥
चतुष्कं हेमदण्डांश्च पूजार्थं परिकल्पयेत्॥ इति।

प्रत्याशं परिवर्द्धतेऽर्थिजतादैन्यान्धकारापहे
श्रीमद्वीरमृगेन्द्रदानजलधिर्यद्वक्रचन्द्रोदये।
राजादेशितमित्रमिश्रविदुषस्तस्योक्तिभिर्निर्मिते
ग्रन्थे लक्षणसङ्ग्रहस्य गहनः पूर्तिं प्रकाशोऽगमत्॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिम-
ञ्जरीनीराजितचरणकमल—
श्रीमन्महाराजाधिराजमधुकरसाहसूनु-
चतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदि-
नकर-
श्रीमन्महाराजाधिराजश्रीवीरसिंहदेवोद्योजित-
श्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूनु-
सकलविद्यापारावारपारीणधुरीण-
जगद्दारिद्र्यमहागजपारीन्द्र-
विद्वज्जनजीवातु-
श्रीमन्मित्रमिश्रकृते वीरमित्रोदयाभिधनिबन्धे
लक्षणप्रकाशः समाप्तः ॥